INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 23771
Date 22.3.68

आ॰चा॰ दु॰

श्रीगणेशाय नमः ॥ श्रीसीतारामचंद्राभ्यां नमः ॥ श्रीमहालक्ष्म्यै नमः ॥ श्रीगुरुचरणाभ्यां नमः ॥ ॐ
१ नमः शिवाय ॥ श्रीशार्ङ्गजो विजयते बुधसात्कृतश्रीः शाहाजिवर्मनृपतिर्नृहरिप्रधानः ॥ यस्मादपि
तार्थिमुदमेस्य निजाधिकां तां पंचत्वमाप सुरभूरुडपित्रपातः ॥ १ ॥ महाशैवः सश्रीशिवचरणपद्म
स्मरितप्रचेतास्तन्निष्ठोर्चतिगिरिशमब्जादिकुसुमैः ॥ यदर्चा दृष्टा प्रद्युतल इव चास्ते निमि
षतोप्सरोगंधर्वाद्यैः सपदिसुममो मंडलगतः २ तत्सेवासममनोरथः प्रतिकृतिस्त्वं प्रापितोपि स्व
यं नात्याशीन्निजपद्धतिं नरहरिः सेवैकबद्धादरः तत्वान्स्वान्मनुते हितं च तनुते तेषां यथा
वैभवं विद्वन्मंडलमंडनं च कुरुते प्रेष्ठं प्रयच्छन्सदा ३ इत्थं तत्धुरमुद्वहन्नपि सदाचारं व्यव
स्थापयन्कीर्त्याहूतमिवार्थिसंघमचिरात्तं मानयन्सादरं आचारं बुधशिष्टमाचितवरि
षु नानार्थसंग्राहकान्ग्रंथान्वीक्ष्य पुरातनान्लवलघुं ग्रंथक्रियोत्कस्स्वभून् ४ स्वशास्त्रीयास
न्विविधमतनिर्णायकममुं कुरुध्वं ग्रंथं चेत्यखिलगुरुविप्रानुमतितः ॥ कुशाग्रेक्षावंतं विमल १

कुलनारायणसुतं सम्मभ्यर्च्यो वोचन्ननितु मन संत्र्यंबकमयं ॥ ५ ॥ ततस्तं तन्द्भावं मनसि विनिधा
य प्रथमतोस्वकल्पं तद्वृत्तिं प्रतनपरिशिष्टादि पदशः ॥ विमृश्याचार्याणां मतमनुसरन् शांडिल
कुलो गुरोस्तातो पाध्यादुपगतरहस्याभचिदुषः ॥ ६ ॥ सतीर्थ्याद्बल्लालात्समधिगतसाहायकभ
रो गणेशं विघ्नौघद्विषमवनिजाजानिमसकृत् ॥ महालक्ष्मीं नत्वा गुरुजनपदे त्र्यंबक इमं तनो
त्याचारेंदुं विमलमतिहृत्कूतापहतये ॥ ७ ॥ तत्रादौ उपोद्घातप्रकरणं तत्राचारप्रशंसामाह परा
शरः आचारमूलं श्रुतिशास्त्रतत्त्वं आचारशाखास्तु तदुक्तकृत्यं आचारपर्णानि च यज्ञयोगा
आचारपुष्पाणि यशोधनानि आचारवृक्षस्य फलं हि नाकस्तस्मात्सुखस्वादुरसश्च मुक्तिः त
स्मादनंतफलदं नु ततमाचारमेवाथ श्रयेस्त्रयत्नात् इति तत्राचारलक्षणमानुशासनिके पर्व
णि आचारलक्षणो धर्मः संतश्चाचारलक्षणाः ॥ साधूनां च यथावृत्तमेतदाचारलक्षणमिति
हारीतोपि साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः तेषामाचरणं यत्तु स सदाचार उच्यते

देवतान
रूपमंगलं ॥

आ० दु अथशिष्टलक्षणं॥

संतः शिष्टाः तेषांस्वरूपमाह बोधायनः॥ शिष्टाः खलुगतमत्सरानिरहंकाराः कुंभीधान्याअलोलु
२ पादंभदर्पलोभमोहक्रोधविवर्जिताइति लौकिकाचारस्याप्यावश्यकत्वमुक्तं ग्रंथांतरे यद्यपि
स्यात्स्वयंब्रह्मात्रैलोक्याकर्षणक्षमः तथापिलौकिकाचारंमनसापिनलंघयेदिति तथासा
मवाचारिकोधर्मोदेशजातिकुलोद्भवः ग्रामाचाराः परिग्राह्याः सर्वत्रैवयथोदितमिति आ
चारार्केबृहस्पतिः दयाक्षमानसूयाचशौचानायासमंगलं अकार्पण्यमस्पृहत्वंसर्वसाधारणा
निच सर्वेषांविप्रराजन्यविट्शूद्राणांधर्मलक्षणानीत्यर्थः दयादीनांलक्षणमाहसएव परेवा
बंधुवर्गेवामित्रेद्वेष्टरिवासदा आपन्नेरक्षितव्यंतुदयैषापरिकीर्तिता बाह्येवाभ्यंतरेवापिदुः
खउत्पादितेपरैः नकुप्यतिनवाहंतिसाक्षमापरिकीर्तिता गुणान्नगुणिनोहंतिस्तौतिमंदगु
णानपि नान्यदोषेषुरमतेसानसूयाप्रकीर्तिता अभक्ष्यपरिहारश्चसंसर्गश्चाप्यनिंदितैः २
स्वधर्मेचव्यवस्थानंशौचमेतत्प्रकीर्तितं शरीरंपीड्यतेयेनसुशुभेनापिकर्मणा अत्यंतंन

आ॰ दु अथशिष्टलक्षणं॥

संतः शिष्टाः तेषां स्वरूपमाह बोधायनः॥ शिष्टाः खलु गतमत्सरा निरहंकाराः कुंभीधान्या अलोलु
२ पा दंभदर्पलोभमोहक्रोधविवर्जिता इति लौकिकाचारस्याप्यावश्यकत्वमुक्तं स्मृत्यंतरे यद्यपि
स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः तथापि लौकिकाचारं मनसापि न लंघयेदिति तथा सा
मवाचारिको धर्मो देशजातिकुलोद्भवः ग्रामाचाराः परिग्राह्याः सर्वत्रैव यथोदितमिति आ
चारार्के बृहस्पतिः दया क्षमा नसूया च शौचानायासमंगलं अकार्पण्यम[illegible]हत्वं सर्वसाधारणा
नि च सर्वेषां विप्रराजन्यविट्शूद्राणां धर्मलक्षणानीत्यर्थः दयादीनां लक्षणमाह स एव परे वा
बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा आपन्ने रक्षितव्यं तु दयैषा परिकीर्तिता बाह्ये वाभ्यंतरे वापि दुः
खउत्पादिते परैः न कुप्यति न वा हंति सा क्षमा परिकीर्तिता गुणान्न गुणिनो हंति स्तौति मंद गु
णानपि नान्यदोषेषु रमते सानसूया प्रकीर्तिता अ[illegible]क्ष्यपरिहारश्च संसर्गश्चाप्यनिंदितैः २
स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितं शरीरं पीड्यते येन सुशुभेनापि कर्मणा अत्यंतं न

 इ[illegible]नीं [illegible] कल्पनीयेत्याचारस्य व्यंतरितप्रामाण्येन प्रत्यक्षानुमानयोर्वि
रोधेनुमानस्यैव बहिरंगत्वेन दुर्बलत्वात् तदेतत्सकलमभिप्रेत्योक्तं मनुना यस्मि
 न्देशे य आचारः पारंपर्यक्रमागतः श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यत इति
स्कांदेपि च रागद्वेषविनिर्मुक्तैर्विद्वद्भिर्यदनुष्ठितः सदाचारः स विज्ञेयो धर्ममूलो
मनीषिभिः अत्र रागद्वेषराहित्यविशेषणात्पराशरादिकृतकैवर्तकन्यागमनादेरनाचर
णीयत्वमुक्तं इदमेवाभिप्रेत्याह हारीतः अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितं नानुष्ठेयं म
नुष्यैस्तत्तदुक्तं कर्म आचरेदिति श्रुत्यादिद्वैधे मनुः श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ
स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्पृथक् मनुस्मृतेस्तु विशेषमाहांगिराः मन्वर्थविपरी
तातु या स्मृतिः सा विनश्यतीति श्रुतिश्च यद्वै किंच मनुरवदत्तद्भेषजमिति स्मृत्यंतरे स्मृत्यंतर 
विरोधे तु कलौ पाराशरस्मृतिरिति कल्पसूत्रस्मृत्योर्विरोधे तु प्रत्यक्षश्रुतिमूलत्वेन कल्पसूत्रं

प्रबलमित्याह हेमाद्रौ संग्रहपौलस्त्यः श्रौतानां कर्मणां स्मृतिः कल्पसूत्रं तदुच्यते तथैवं गृह्य
कल्पानां स्मार्तानामुपसंग्रहः शाखानां विप्रकीर्णत्वात्पुरुषाणां प्रमादतः नानाप्रकरणस्थत्वा
त्स्मृतेर्मूलं न लक्ष्यते अत्र सर्वशाखाप्रत्ययमेकं कर्मेति न्यायेन सर्वशाखागृह्यसूत्रपरिशि
ष्टस्मृतिपुराणेतिहासाचारावगतसकलपदार्थोपसंहारेणैव स्नानसंध्यादिधर्मानुष्ठानं स
क्रे र्वसंमतं तत्रायः स्वसूत्रमतिभ्य परसूत्रेण वर्तते अप्रमाणमृषिं कृत्वा सोप्यधर्मेण युज्यते
तस्मात्सर्वप्रयत्नेन स्वसूत्रं न चलंघयेदिति विष्णुधर्मोत्तरादिवचनैः स्वसूत्राविरोधिशास्त्रान्तर
परिग्रहः कर्तव्यः अत एव भविष्यपुराणे उक्तं यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत्
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकं यथेति कार्ष्णाजिनिरप्याह आत्मतंत्रे तु यन्नोक्तं तत्कुर्यात्पा
रतंत्रिकं विशेषाः खलु सामान्या वेदोक्ता वेदवादिभिरिति ननु कृत्स्नसूत्रस्मृत्याद्युपसंहारस्य
मानुषेण कर्तुमशक्यत्वात् कर्मण्यनधिकार एव सर्वेषां इति चोन्माधव आह विशेषादर्शनं या

वतावत्सामान्यदर्शनं मान्यमेवान्यथातेस्यात्सर्वज्ञत्वेधिकारिता गुणोपसंहृतिश्चैवयथाद
र्शनमिष्ठतां अदृष्टानुपसंहारेनाकिंचित्करताव्रते यद्यावदृश्यतेवाक्यंशक्तिश्चात्रास्ययाव
ती तावत्कर्तुंनत्दपेक्षायुक्तावैगुण्यशंकयेति यद्वासमस्तेनेतिकर्तव्यतामात्रमेवकर्मकर्तव्यं त
दुक्तंबैजवापायनेन बहुल्पंवास्वशाखोक्तंयस्यकर्मप्रचोदितं तस्यतावतिशास्त्रार्थेकृतेसर्वंकृतंभ
वेत् लौगाक्षिणापि ऊनोवाप्यतिरिक्तोवायः स्वशाखोदितोविधिस्तेनसंतनुयाद्यज्ञंनकुर्यात्पारतं
त्रिकमिति गृह्यपरिशिष्टमपिस्वस्वसूत्रसमंगृह्यपरिशिष्टमितिसमाख्याबलात् तथाहिअथा
स्मिन्नाश्वलायनगृह्येयानिकानिचिदन्यत्रोक्तानीहेष्ठताआचार्येणानुमितानिज्ञापितानियानिचो
क्तेप्रदर्शितक्रियाणितानिसर्वावबोधाययथावदभिधास्यामइति आश्वलायनगृह्यपरिशिष्टे अत
एवजगद्गुरुभट्टैरपियहमखप्रकरणउक्तं आश्वलायनानांस्वगृह्यपरिशिष्टोक्तयहमखः तस्यसू
त्रसमत्वादिति अथगृह्यपरिशिष्टशौनकगृह्यकारिकाणांविरोधेकिमुचितमित्यपेक्षायांपरिजातेउ ४

न्नकुर्वीत अनायासः स उच्यते प्रशस्ताचरणंनित्यंमप्रशस्तविवर्जनं एतद्धि मंगलं प्रोक्तमृषिभि
स्तत्वदर्शिभिः स्तोकादपिप्रदातव्यमदीनेनांतरात्मना अहन्यहनियत्किंचिदकार्पण्यं हितस्मृ
तं यथोत्पन्नेनसंतोषः कर्तव्योह्यल्पवस्तुनि परस्याचिंतनं चिंतयंनर्थं सास्पृहापरिकीर्तिते
ति धर्ममूलमाह याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्यचप्रियमात्मनः सम्यक्संकल्पजः कामो धर्ममू
लमिदंस्मृतमिति श्रुतिर्वेदः स्मृतिर्मनुपराशराद्युक्तिः सदाचारः संतां शिष्टानामाचारोनुष्ठानं
स्वस्य चात्मनः प्रियं वैकल्पिके विषये यथागर्भाष्टमे वाब्दे इत्यादौ आत्मेच्छैवनियामिका स
म्यक्संकल्पाज्जातः कामः शास्त्राविरुद्धः यथा मया भोजनव्यतिरेकेणोदकं न पातव्यमि
ति एते धर्मस्य मूलं प्रमाणं एतेषां विरोधे पूर्वपूर्वबलीयस्त्वमिति तथा च संग्रहे श्रुतिस्मृति
पुराणेषु विरुद्धेषु परस्परं पूर्वं पूर्वं बलीयः स्यादिति न्यायविदो विदुरिति स्मृत्याचारयोर्वि
रोधे स्मृतिरेव बलवती यथा श्रुतिस्मृत्योर्विरोधे श्रुतिः इदानींतनाचारेण स्मृतिः स्मृत्या च श्रुतिः

स्त

हस्तस्याखिलंकर्म स्वसत्ताकं गृहंविना नसिध्यतियतस्माद्गृहप्रकरणंब्रुवइति यत्रतुबहिःसं
५ ध्यादशगुणेत्यादिविशेषवचनंतत्रास्यबाधः यदितुप्रवासादौपरगृहकर्मकरोतितदातद
नुमतिर्ग्राह्या नाननुज्ञातभूमिर्हियज्ञस्यफलमश्नुतइतिभारतात्परकीयप्रदेशेषुकृतंभव
तिनिष्फलमितिवचनांतरेदोषश्रवणाच्च तीर्थादौतुनानुमत्यपेक्षाप्रवाहमवधिंकृत्वायावद्ध
स्तचतुष्टयं तत्रनारायणस्वामीनान्यःस्वामीकदाचन तत्रजप्तंकृतंदत्तंकोटिकोटिगुणंभवे
दितिब्रह्मांडवचनात् अटवीपर्वताः पुण्यानदीतीराणितीर्थानिच सर्वाण्यस्वामिका
न्याहुर्नहितेषुपरिग्रहः वनानिगिरयोनद्यस्तीर्थान्यायुतनानिच देवखाताश्चगर्ताश्चन
स्वाम्यतेषुविद्यतइत्यादित्यपुराणाच्च एवंसर्वत्रसतोद्देशोत्कृष्टगृहधर्मशालादौनानुम
त्यपेक्षापरकीयत्वाभावादितिभृगुनेकमासानचद्वीपेनांतरालेकदाचन श्रुतिस्मृत्युदितंक ५
र्मनकुर्यादशुचिःक्वचित् अंतरालद्वीपयोर्लक्षणंसंग्रहे परितोवेष्टितोदेशोऽद्भिर्यःसद्वीपमु

च्यते अनावृतस्तु यो देशः सोंतरालं प्रकीर्तितमिति अस्यापवाद आचारचंद्रोदये धूमैकश
तयंत्र गवां तिष्ठत्य संवृतं न तद्धर्महतं द्वीपमेवं वेदविदो विदुः मार्कंडेयपुराणे अंकुंचनेन सभित्यं भवानी
सर्वदेवता ततः सा मत्यहं पूज्या गंधपुष्पाक्षतादिभिः मार्जनस्पर्शनं तत्र असंपूज्य च लंघनं कुर्वन्नर
कमाप्नोति तस्मात्तत्परिवर्जयेत् प्रातःकाले स्त्रिया कार्यं गोमये नानुलेपनं अकृतस्वस्तिकां यातु क्र
मे लिप्तां च मेदिनीं तस्यास्त्रीणि विनश्यंति वित्तमायुर्यशस्तथा अथाश्वलायनसूत्रोक्ताः परिभाषाः
तत्र यस्तीर्थेन कर्म कर्तुं विहारं प्रपन्नस्तस्य प्राङ्निःक्रमणात् मनोवा कार्यं त्राणादयो नित्याः स्युरिति
सर्वत्र वेदितव्यं कर्तुः प्राङ्मुखत्वं चेष्टानां च प्रागपवर्गता तत्साधनानां च प्रागग्रता वेदितव्या अंक
धारणाच्च नित्या वेदितव्या सर्वदा यज्ञोपवीती स्यात् तत्र निवीतप्राचीनावीते विधीयेते तत्रैव ते भव
तो न मानुषं पैतृकं वा कर्म दृष्ट्वेति क्रत्वर्थमप्यशुचित्वं संपादियत् कर्म तद्विहारान्निष्क्रम्य बहिः क
र्तव्यं पृष्ट्यायां यत्रासनं भवति तत्र मध्ये रेखायाः किंचिदुत्तरत उपविशेत् सव्यदक्षिणभेदेन द्वित्वयोगिय

अनादेशेच दक्षिणं प्रतीयात्

आ० दु दंगं हस्तादितस्यहित्वेनविनावचनेदक्षिणं प्रतीयात् ॥ जपानुमंत्रणाप्यायनोपस्थानान्युपांशुमंत्राश्च
कर्मकरणाः अयमर्थः अनुमंत्रणग्रहणेनाभिमंत्रणमपिगृह्यते जपः अनुमंत्रणं आप्यायनं
६ उपस्थानं मंत्रसंज्ञकामंत्राः कर्मकरणमंत्राश्चसर्वत्रोपांशुप्रयोक्तव्याः उपांशुत्वंनामकरणा
वदशब्दममनःप्रयोगउपांश्विति तेषांलक्षणानिवृत्तिकारेणोक्तानिज्ञातव्यानि सर्वत्रमंत्रां
तेकर्मारंभः अनुमंत्रणाप्यायनोपस्थानानांतुमंत्रोच्चारणसमकालमेवक्रियेति आसांश्रौत
परिभाषाणांगृह्येप्राप्तिस्तु उक्तानिवैतानिकानीतिसूत्रवृत्तौस्पष्टमेवसाधिता तत्रब्रह्मयज्ञा
तिरिक्तेकर्मणिक्वचिदुदङ्मुखतापितस्यनित्याःप्रांचश्चेष्टाइत्यनयापरिभाषयासर्वत्रप्राङ्मुख
त्वेसिद्धेपिब्रह्मयज्ञप्रकरणंपुनःप्राङ्मुखउपविश्येतिसूत्रंब्रह्मयज्ञातिरिक्तेकर्मसुक्वचिदुदङ्मुख
त्वस्यापिप्राप्त्यर्थमितिवृत्तौभाष्येचोक्तत्वात् जपतीतिचोदनाश्चांगृह्यकर्मणि अनित्यमुपांशुत्वं इति ६
वृत्तौसाधितं आसीनाद्यनियमेआसीनेनैवकर्मकर्तव्यंइतिस्थित्वाभिधमादध्यादितिसूत्रेवृत्तौस्पष्टं

क्तं कारिकागृह्यपरिशिष्टविरोधेपरिशिष्टोक्तमेवानुसंधेयंआचार्येणोक्तवचनत्वात् तथैवलौकिकं
वाक्यंस्मृतिबाधेपरित्यजेदितिवचनाच्चेति गृह्यपरिशिष्टशौनकयोर्विरोधेपरिशिष्टोक्तमेवानुसंधे
यंआचार्येणोक्तंवचनत्वादिति आचारानुष्ठाने प्रशस्तंदेशमाह याज्ञवल्क्यः यस्मिन्देशेमृगः कृ
ष्णस्तस्मिन्धर्मान्निबोधतेति मनुरपि सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तंदेवनिर्मितंदेशंब्रह्मा
वर्तंप्रचक्षते तस्मिन्देशेयआचारःपारंपर्यक्रमागतः वर्णानांसांतरालानांसदाचारःसउच्यते
कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनकाः एषब्रह्मर्षिदेशोवैब्रह्मावर्ता दनंतरः एतद्देशप्रसू
तस्य सकाशादग्रजन्मनः स्वंस्वंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः हिमवद्विंध्ययोर्मध्यंय
त्प्राग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्तितः आसमुद्रात्तुवैपूर्वादासमुद्राच्चपश्चि
मात् तयोरेवांतरंगिर्योरार्यावर्तंविदुर्बुधाः कृष्णसारस्तुचरतिमृगोयत्रस्वभावतः सज्ञेयोयज्ञियो
देशोम्लेच्छदेशस्ततःपरमिति स्वसत्ताकगृहएवकसकलंकर्मकर्तव्यंतदुक्तंमुहूर्तमालायां गृ

आ० दु
७

वताकार्यंसायंसंध्याकृतीर्विना अत्रापवादश्चतुर्विंशतिमते इक्षूनपः फलंमूलंतांबूलंपयऔषधं
भक्षयित्वापिकर्तव्याःस्नानदानादिकाःक्रियाः सर्वंकर्मसंकल्प्यकार्यंतदुक्तंमार्कंडेयपुराणे ^ संक
ल्पलक्षणंसंध्यारत्ने संकल्पोवैमनसिमननंप्रोक्तंरीत्याथवाचाव्याहर्त्तव्यंतदनुचकरणांबुसं
कल्पिधेति वाङ्मात्रेणत्वरितकरणेकेचि[illegible]ंतिचांबुक्षेपस्थानेंजलिकृतिमुशंत्यन्यएषविष्टआ
घः तत्रदेशकालाद्युल्लेखःकार्यःतदुक्तंसंग्रहे मासपक्षतिथीनांचनिमित्तानांचसर्वशः उल्लेख
नमकुर्वाणोनतस्यफलभाग्भवेदिति अत्रकेचित्तुग्रहणादिनिमित्तस्यमासपक्षतिथीनांप्रयाग
देश्चदेशविशेषमात्रस्योल्लेखःकार्यःनतुव्यापकानामयनमध्यदेशादीनामित्याहुः अन्येतुव्या
प्या[illegible]नांव्यापकानांचसर्वेषांउल्लेखःकार्यइत्याहुः नत्रसंकल्पेचांद्रसंवत्सरस्यैवोल्लेखः स्मरे
त्सर्वत्रकर्मादौचांद्रंसंवत्सरंसदेतिवचनात् ऋतुरपिचांद्रएवेतिधर्माब्धिसारे तिथिस्तौदयिकी
यांतिथिंसमनुप्राप्येत्यादिवचनादितिकेचित् कर्मणोयस्ययःकालस्तत्कालव्यापिनीतिथिः तया

^ संकल्प्यचतथाकुर्यात्स्नानदानव्र
तादिकं ॥ अन्यथापुण्यकर्माणिनिष्फ
७ लानिभवंतिच ॥ पुण्येत्यक्तेःशौच
भोजनादौदृष्टार्थेनसंकल्पः ॥

कर्माणिकुर्वीतेतिवचनाद्वर्तमानतिथेरुल्लेखइत्यन्येइदमेवयुक्तंशिष्टसमाचारात् एवमेवनक्षत्र
योगादेरपिनिर्णयःतुल्यन्यायात् मंडनः मुख्यकालेयदावश्यंकर्मकर्तुंनशक्यते गौणकालेपि
कर्तव्यंगौणोप्यत्रेदृशोभवेत् इदृशोमुख्यसमः अत्रविशेषस्तेनैवोक्तः गौणेष्वेतेषुकालेषुकर्म
चोदितमाचरन् प्रायश्चित्तप्रकरणप्रोक्तांनिष्कृतिमाचरेत् प्रायश्चित्तमकृत्वावागौणकाले
समाचरेदिति अत्रगौणकालेप्रायश्चित्तकरणाकरणयोर्व्यवस्थासमर्थासमर्थभेदेन समर्थतु त्वं
द्रव्यसामर्थ्यंशारीरसामर्थ्यंचेत्याद्यनेकविधंगौणकालस्तुसएवाह स्वकालादुत्तरोगौणःकालस्या
त्सर्वकर्मसु उत्तरग्रहणात्पूर्वस्यगौणत्वमित्याचाररत्ने आश्वलायनस्तु उक्तंकर्मयथाकाले
यदिकर्तुंनशक्यते अकालेवापितत्कुर्यात् उल्लंघ्याप्यपकृष्यवा वैश्वदेवेतथाब्रह्मयज्ञेचैवंवि
धिस्मृतः संध्ययोरुभयोश्चैवनापकर्षणमिष्यते यत्तु अकालेयत्कृतंकर्मप्राप्तकालेपुनश्चरे
दितिवचनंतदालस्यापकर्षविषयं कर्मत्रिविधंनित्यंनैमित्तिकंकाम्यंचेति तत्रनित्यत्वसाधका

निसंग्रहे नित्यंसदायावदायुर्नोकदाचिदतिक्रमेत् इत्युक्त्यातिक्रमेदोषश्रुतेरत्यागचोदनात् फला
श्रुतेर्वीप्सयाच तन्नित्यमिति कीर्तितमिति अहरहः संध्यामुपासीत यावज्जीवमग्निहोत्रं जुहु
यात् एवमादीनि नित्योदाहरणानि जीवनकामना व्यतिरिक्तं जातेष्टिग्रहणायनस्नानादि अनित्य
तनिमित्तं उपजीव्य प्रवृत्तं नैमित्तिकं कामनया प्रवृत्तं वर्षकामेष्टिः कारीरीत्यादिकं काम्यं तत्र
नित्ये क कर्मणि अशक्यांगपरित्यागेन प्रधानं कर्तव्यं तावतैव शास्त्रवशात् फलसिद्धिरिति षष्ठा
ध्याये तृतीयपादे मीमांसितं बोधायनस्मृतिरपि यथाकथंचिन्नित्यानि शक्यवस्त्वनुरूपतः ये
न केनापि कार्याणि नैव नित्यानि लोपयेदिति यथाकथंचित् किंचिदंगहानेनापि येन केनापिस्व
तः परतो वेत्यर्थ इति आचाररत्ने नित्यानीति नैमित्तिकप्रारब्धकाम्योपलक्षणं नैमित्तिकस्या
प्यकरणे प्रायश्चित्तश्रवणात् प्रारब्धकाम्यं नित्यायत इति न्यायाच्च आनारब्धकाम्यं तु संपूर्णा
नुष्ठानशक्तौ सत्यामेव कर्तव्यं इति षष्ठाद्यपादे सिद्धांतितं व्यासः श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं

आश्वलायनगृह्यपरिशिष्टे कर्तास्नातो धौतानार्द्रवासा यज्ञोपवीत्याचांतः प्राङ्मुख आसीनो दक्षिणंाग
काशीसमाहितो मंत्रांते कर्म कुर्वीत प्रत्यृचोक्तिष्ट गृषु अनादेश आज्यं द्रव्यं स्रुवः करणं अवदानवत्सु दर्वी
पाणिः कठिनेषु कर्मोक्तौ मंत्रोप्यावर्तते कर्मांत आचमनं चेति सामान्यमिति सर्वकर्मांगतया ज्ञानमा
वश्यकं ज्ञात्वा कर्माणि कुर्वीतेत्युक्तेः छांदोग्योपनिषद्यपि यदेव विद्यया करोति श्रद्धया तदेव वीर्यव
त्तरं भवतीति छंदोगपरिशिष्टे सदोपवीतिना भाव्यं सदा बद्धशिखेन च विशिखो व्युपवीतश्च यत्करोति न
तत्कृतं अत्र सदेत्यनेनोपवीतधारणादेः पुरुषार्थत्वं प्रतिपादितं विशिख इत्यादिना कर्मांगत्वं च तत्र
विशेषमाह कुथुमिः शिखिबद्धिकया भाव्यं वामावर्तनिबद्धया प्रदक्षिणं द्विरावर्त्य पाशांतः संप्रवे
शनात् प्रथमं हि गुणीकृत्य ब्रह्मावर्तमितीरितं गायत्रीं प्रजपन् कुर्याच्छिखायाश्च निबंधनमिति
संध्यारत्ने विप्रादिकानां खलु मुष्टिमेयकेशाः शिखा स्यादधिकात्ततो न द्विधा त्रिधा वापि विभज्य बं
धो यस्मात्ततोऽन्यापि न लंबितापि वराहपुराणे स्नानपूजातर्पणादिजपहोमसुरार्चनं उपवा

आ० दु

१

यात्॥ यदिकु

चास्मृत्यर्थसारे नपादप्रक्षालनशेषेण ना[illegible]चाचमनशेषेणनाग्न्युदकशेषेणकर्माणिकु-
र्यात् भूमौजले स्रावयित्वा तत्रांबुपात्रस्थापयित्वोत्थृत्य कुर्यादिति सर्वंचकर्म ऋष्यादिज्ञात्वैवकार्यं
तदुक्तं सर्वानुक्रमणिकायां अथऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्संख्या ऋषिदेवतछं
यथोपदेशं दांस्यनुक्रमिष्यामो नह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिरिति ऋष्यादिज्ञानाशक्तौ केवलदेव
तास्मरणमेवकार्यं देवतास्मरणमेववाकुर्यादिति परिशिष्टोक्तेः मंत्रोच्चारे विशेषः स्मृत्यंतरे
अभ्यासार्थेद्रुतां वृत्तिं प्रयोगार्थेतुमध्यमां शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलंबितां सर्वत्र
णव मंत्रादौ प्र[illegible]उच्चार्यः मंत्रादौ प्रणवं कुर्यादिति वचनात् अत्रापवादः संग्रहे नचस्मरेदृषिछंदः
श्राद्धे वैतानिके मखे ब्रह्मयज्ञेच वैतद्वत्तथोंकारंचवर्जयेत् ब्राह्मे श्रौतस्मार्तं तथाकर्मकर्तव्य
मधिकारिणा शुचिनासाधनैः शुद्धैः सम्यक् श्रद्धान्वितेनच॥ अधिकारिणः शुद्धिसाधनान्याहबृ
हस्पतिः गात्रंमृदंभसाशुध्येद्धित्नंभूतविशासनात् विद्ययातपसादेहोमतिर्ज्ञानेनशुध्यति स्वाध्या १

वि

समाचरेत् तत्राप्यशक्तः करणे सदाचारलंभेद्बुधः सदाचारः स्नानसंध्यादिः अत्राशक्तिः द्रव्याभावात् व्या
धितत्वात् ज्ञानाभावाच्चेति बहुविधा अर्थी समर्थो विद्वान् शास्त्रेण आपूर्य हस्तस्मृताः उद्धृता वाप्रश
स्ताः स्युः शुद्धैः पात्रैर्यथाविधिः एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृताः ता इति सर्वनाम्ना प्रकृता
गोतृप्तिमात्रपर्याप्ता अल्पा एवापः परामृश्यंते अतो बहूदकात् तडागादेरुद्धृतानां रात्र्युषितानां न दोषः
तथा अक्षोभ्यानि तडागानि नदीवापीसरांसि च चंडालाद्यशुचिस्पर्शे तीर्थतः परिवर्जयेत् तीर्थ
मुदकावतरणमार्गस्तत्र चंडालाद्यवतरणस्थले इत्यर्थः आदित्यपुराणे चिरपर्युषितं वापि शूद्र
स्पृष्टमथापि वा॥ गंगा च पंचधा गांगं पयः पुनात्येव पापमामरणांतिकमिति जान्हव्याः स्नानदाना
दौ पुनात्येव सदा पयः मरीचिः भूमिष्ठमुद्धृतं वापि शीतमुष्णमथापि वा॥ भागीरथी गौतमी च कृ
ष्णावेणी पिनाकिनी अखंडा चैव कावेरी पंचगंगाः प्रकीर्तिता इति॥ प्रचेताः वैश्वानरेण यत्किंचि
त् कुरुते प्रोक्षणं द्विजः गंगातोयसमं सर्वं वदंति ब्रह्मवादिनः वैश्वानरेण वैश्वानरो अजीर्णेन इत्यु

\+ गांगं पयः पुनात्येव पापमामरणांतिकमिति॥ गंगा च पंचधा॥

^ श्वाश्चिकारी लिखिधांतान्॥ कर्मणि प्रशस्तं
जलमाह देवलः॥ अविगंधा रसोपेता निर्मलाः
पृथिवीगताः अक्षीणाश्चैव गोपाना दापः

यं आसनारूढपादस्तु जानुनोर्वाथजंघयोः कृतावसक्थिको यस्तु प्रौढपादः स उच्यते वाराहे सु
१० स्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः जितेंद्रियः सत्यवादी सर्वकर्मसु शस्यते दक्षः सं
ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु यदन्यत्कुरुते कर्म न तस्य फलभाक् भवेत् तथा
अधौतेकारुधौतेच परिदध्यान्नवाससी अहतं तु [illegible]परीदध्यात्सर्वकर्मणि संयतः कात्या
यनः ईषद्धौतं नवं श्वेतं सदशं यन्नधारितं अहतं तद्विजानीयात्सर्वकर्मसु पावनं अन्य
त्रतु अहतं यंत्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा शस्तं तन्मांगलिक्येषु तावत्कालं न सर्व.
देत्युक्तं तथा कुशोपरिनिविष्टेन तथा यज्ञोपवीतिना सर्वंकर्मप्रकर्तव्यमन्यथाविफलं
भवेत् आपस्तंबः आर्द्रवासास्तु यः कुर्याज्जपहोमप्रतिग्रहान् सर्वं तद्राक्षसं विद्याद्बहि
र्जानुच यत्कृतं अत्रापवादः हारीतः आर्द्रवासा जले कुर्यात् तर्पणाचमनं जपं शुष्कवासाः स्थ १०
ले कुर्यात्तर्पणाचमनं जपं विष्णुपुराणे होमदेवार्चनाद्यासु क्रियास्वाचमने तथा नैकवस्त्रः प्र

वर्तेत द्विज वाच निके जपे शातातपः सव्या दंसा त्परिभ्रष्ट कटिदेशधृतांबरः एकवस्त्रं तु
तं विद्याद्दैवे पित्र्ये च वर्जयेत् मार्कंडेयः शिरःस्नातस्तु कुर्वीत दैवं पित्र्यमथापि वा प्राङ्मुखो वा
दङ्मुखो वापि श्मश्रुकर्म च कारयेत् देवार्चनादि कार्याणि तथा गुर्वभिवादनं कुर्वीत
सम्यगाचम्य प्रयतोपि सदा द्विज इति वृद्धमनुः प्राणानायम्य कुर्वीत सर्वकर्माणि सं
यतः वामनपुराणे सर्वमंगलमांगल्यं वरेण्यं वरदं विभुं नारायणं नमस्कृत्य सर्वकर्माणि
कारयेत् अथाभियुक्तोक्ताः काश्चित्कारिकाः लिख्यन्ते श्रद्धया कर्म कुर्वीत धौतवस्त्रधरो
भवेत् ॥ अव्यग्रोलंकृतो मौनी दंभासूयादिवर्जितः आपद्युक्तोपि शुद्धः सन्नेव कर्म समाचरेत्
जपहोमादिषु नरमंत्यं ताकारणात्स्पृशेत् अबुद्धिपूर्वसंस्पर्शश्चेत्तदा वार्युपस्पृशेत् बुद्धि
पूर्वकसंस्पर्शे तु प्राणायामत्रयं चरेत् संस्पर्शे प्रतिलोमानां स्नानमेव विधीयते खस्वाटत्व

आ० दु

११ द्दिदोषेणविशिखश्चेन्नरोभवेत् कौशींसदाधारयीतब्रह्मग्रंथियुतांशिखां कार्येयंसप्तभिर्दर्भैः धार्याश्रो
तुदक्षिणे कुर्यात्तिलकवान्कर्मवस्त्रद्वययुतस्तथा दानंप्रतिग्रहोहोमोभोजनंबलिरेवच सांगुष्ठेन
सदाकार्यमसुरेभ्योन्यथाभवेत् त्रिमात्रःप्रणवोवाच्यः कर्मारंभेचसर्वदा उपोषितःकर्मकुर्याद्धि
ध्यनुज्ञेविनासदा पेषणादिकयंत्रेषुशब्दोयावत्प्रवर्तते पतितांत्यजचांडालादीनांयावच्चशब्द
कः तावत्कर्मनकर्तव्यंतथासंध्याद्वयेपिच अनुल्लंघ्यस्वशाखोक्तविधिंकर्मसमाचरेत् कर्मान्य
थाकृतंज्ञात्वातावदेवपुनश्चरेत् प्रधानस्याक्रियायांतुसांगंतत्पुनराचरेत् तदंगाकरणेप्राय
श्चित्तमेवनकर्मतत् कदंगस्पर्शनेवामोहस्तोन्यस्पर्शनेन्यकः नाभ्यधोंगा^संतिस्युर्नाभ्यूर्ध्वंस्यु न्य
स्तुसंतिवै नाभोत्वन्यनरोहस्तइतिज्ञेयंविचक्षणैः करोगौयदितदोभयत्रोभावपिस्मृतौ अवैधं
नाभ्यधस्पर्शंकर्मकालेनचाचरेत् रक्तपूयरेतआदिस्पर्शेस्नानंप्रकीर्तितं प्राक्संस्थंकर्मदेवानां ११
उदग्दिगपवर्गकं* दक्षिणाशापवर्गंतुप्रत्यक्दिक्संस्थमेवहि पित्र्यंकर्मप्रकर्तव्यंस्पष्टंयदिवचोभ

*उदग्दिक्संस्थमथवाप्राचीदिगपवर्गकं*१

येनानुतापेनहोमेनेनतपसेवच ध्यानेनक्षेत्रवासेनदानेनाघपरिक्षयः तथा परापवादाश्र
वणंपरस्त्रीणामदर्शनं एतच्छौचंश्रोत्रदृशोर्जिह्वाशुद्धिरपैशुनं अप्राणिवधमस्तेयंशुचित्वं
पादहस्तयोः असंश्लेषःपरस्त्रीणांशारीरंशौचमिष्यते याज्ञवल्क्यः कालोग्निःकर्ममृ
द्वायुर्मनोज्ञानंतपोजलं पश्चात्तापोनिराहारःसर्वेमीशुद्धिहेतवः शुद्धिर्नामानर्हतापादकदो
षनिर्वतकसंस्कारविशेषः आपस्तंबः अग्न्यागारेगवांगोष्ठे देव ब्राह्मणसन्निधौ आहारे
जपकालेचपादुकेपरिवर्जयेत् कर्मणिवाग्यमलोपेयोगीश्वरः यदिवाग्यमलोपःस्याज्जपा
दिषुकथंचन व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं वैष्णवंमंत्रंअतोदेवाइदंविष्णुरितिवा
अतोदेवाअवंतुनइतिजपेदतिवान्यांवैष्णवीमित्याश्वलायनोक्तेः बौधायनः भोजनंहवनंदानंउप
हारःप्रतिग्रहः बहिर्जानुनकार्याणितद्वदाचमनंस्मृतं अत्रकेषांचिदुपादानंअन्येषामुपलक्ष
णार्थं सांख्यायनः पाद्यमाचमनंहोमंभोजनंदेवतार्चनं प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्प

र्वावाससापिवा सर्वेषुधर्मकार्येषुपत्नीदक्षिणतोभवेत् अभिषेकेविप्रपादक्षालनेवामतःस्मृता य
 न्नाम्नातंस्वशाखायांपारक्यमविरोधियत् आकांक्षितंशेषभूतमनुष्ठेयंविचक्षणैः तत्कृतोफलवैशि
ष्ट्यंनदोषस्त्वकृतोभवेदिति यदातुप्रमादात्कर्मप्रच्युतिः तदाप्रजापतिराह प्रमादात्कुर्वतांकर्म
प्रच्यवेताध्वरेषुयत् स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः आश्वलायनोपि कर्मकालेतुसर्व
त्रस्मरेद्विष्णुंहविर्भुजं तेनस्यात्कर्मसंपूर्णंतस्मैसर्वंनिवेदयेदिति इतिशांडिल्यकुलसंभवनारा
यणात्मजत्र्यंबकविरचितेआचारेंदौउपोद्घातप्रकरणं॥ श्रीरामंयोगिहृदयारामंसौमित्रिसंयुतं अ
भीष्टफलसिध्यर्थंसीताढ्यांकमाश्रये आश्वलायनः अथोच्यतेगृहस्थस्यनित्यकर्मयथाविधि
यत्कृत्वानृण्यमाप्नोतिदैवात्पित्र्याच्चमानुषात् पराशरः संध्यास्नानंजपोहोमोदेवतानांचपूजनं आ
तिथ्यंवैश्वदेवंचषट्कर्माणिदिनेदिने संध्यास्नानमित्यत्रयवागूपाकन्यायेनस्नानस्यप्राथम्यंव्याख्ये 
यं अथात्रब्राह्ममुहूर्तमारभ्यास्वापांतंकर्माण्युच्यंते ब्राह्ममुहूर्तश्चद्विविधा अंत्यमौर्यात्मकोरात्रेरु

पांत्यमुहूर्तेश्च तत्राद्यः पितामहेनोक्तः रात्रेस्तुपश्चिमोयामो मुहूर्तोब्राह्म उच्यते द्वितीयस्तुविष्णु
पुराणे रात्रेःपश्चिमयामस्य मुहूर्तोयस्तृतीयकः सब्राह्मइतिविज्ञेयोविहितः प्रबोधनइति अत्र
कर्तव्यमाह मनुः ब्राह्मेमुहूर्तेबुध्येतधर्मार्थावनुचिंतयेत् कायक्लेशांश्चतन्मूलान्वेदतत्वार्थमे
वच वेदतत्वार्थःपरमात्मा आगमे ब्राह्मेमुहूर्तेचोत्थायचिंतयेद्रघुनंदन श्रीपूर्वजेयमध्यस्थंद्वि ज
यांतंविचक्षणः अंगिराः उत्थायपश्चिमेयामेरात्रिवासःपरित्यजेत् प्रक्षाल्यहस्तपादास्यान्युपस्पृश्यहरिंस्मरेत् वि
ष्णुः उत्थायोत्थायबोद्धव्यं महद्भयमुपस्थितं मरणव्याधिशोकानांकिमद्यनिपतिष्यतीति परिशिष्टे प्रभा
ते इष्टदेवतां मनसा नत्वा तदहःकृत्यं स्मृत्वा धर्मशास्त्रोक्तविधिनामूत्रपुरीषोत्सर्गादिकुर्यादिति प्रा
तःस्मरणंचपितामहोक्तब्राह्ममुहूर्तमारभ्यकार्यमितिकेचित् अन्येतु द्वितीयब्राह्ममुहूर्तमार
भ्यप्रातःस्मरणंकार्यंपितामहोक्तस्तुवेदाभ्यासार्थमित्याहुः युक्तंचैतत् रात्रेरंतिमयामेतुद्वि
जोवेदेविचिंतयेदितिकात्यायनोक्तेः अत्रस्वापेमायश्चित्तमुक्तंस्मृतिरत्नावल्यां ब्राह्मेमुहू
* किमद्यसुकृतंकृतं दत्तंवादापितंवापिवाक्सत्याचापिभाषिता उत्थायोत्थायबोधव्यं × ८

र्तेयानिद्रासापुण्यक्षयकारिणी तांकरोतितुयो[illegible]मो[ज्ञा]त्पादकृच्छ्रेणशुध्यति इदंचप्रायश्चित्तंव्याधिर
हितानामेवेत्याचाररत्ने सूर्या[illegible]स्तोदयकालस्वापेत्वाश्वलायनः आव्याधितंचेत्स्वपंतमादित्योभ्यस्त
मियात्वाग्यतोनुपविशन्रात्रिशेषंभूत्वायेनसूर्यज्योतिषाबाधसेतमइतिपंचभिरादित्यमुपतिष्ठे
ताभ्युदियाच्चेदकर्मश्रांतमनभिरूपेणकर्मणावाग्यतइतिसमानमुत्तराभिश्चतस्त्रभिरूपस्थानमिति
आव्याधितंस्वपंतंआदित्यःउदयंप्राप्नोतिअस्तमितोवाभवति यदारागतःप्राप्तनृत्यादिकर्मणा
श्रांतएवनिद्रातिदेदंप्रायश्चित्तंविहितकर्मश्रांतेतुनेत्यर्थः अथप्रातःस्मरणंतत्रऋग्विधाने
प्रातरग्निंप्रातरिंद्रंऋक् ५ प्रातर्यावाणाप्रथ० ऋ० ५ प्रातारथोनवो० ऋक् ७ पुनःपुनर्जाय० ऋ
क् १ वामनपुराणे ब्राह्मेमुहूर्तेप्रथमंविबुध्येदनुस्मरेद्देववरान्मुनींश्चेतिदेववराः पंचायतनदेव
तादयः पंचायतनदेवताक्रमस्तुपद्मपुराणे आदित्यंगणनाथंचदेवींरुद्रंयथाक्रमं नारायणं
विशुद्धाख्यंअंतेचकुलदेवतां तत्रतावच्छ्रीसूर्यादेःस्मरणमुक्तंधर्मचिंतामणौ प्रातःस्मरामिखलु

भवेत् अंगोपस्पर्शनेवस्त्रदशासंस्पर्शनेतथा छेदनेभेदनेचैवनिरासेखननेतथा पैतृकेग्रासेरोदने
नैर्ऋतेचाभिचारिके एतेषुवैनिमित्तेषुज लोपस्पर्शनंभवेत् अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे मार्जार
^सर्वेषु मूषकस्पर्शेआक्रंदेक्रोधसंभवे निमित्तेष्वेषुकर्मकुर्वन्नपस्पृशेत् निवीतितामानुषेस्याद्दैवेयज्ञोपवी
तिता प्राचीनावीतितातुस्यात्पि स्पष्टंवचोयदि विहारःपृष्ठतोनैवप्रकर्तव्यःकदाचन पात्राण्याज्यं
हविर्वन्हिरेतेषांतःक्रमात्परं कर्तारस्तुबहिर्भूताएवैषांतस्तुहोमकृत् बहिर्भूतस्ततोब्रह्मान्येभ्योंत
त्ति भूंतइरितः सर्वेषेतेषुपत्न्यंतस्ततोप्यंतःप र्भवेत् एतत्सर्वंत्रविज्ञेयंविशेषविधिनाविना अवि
ज्ञातस्वरामंत्राःप्रयोक्तव्याःप्रयोक्तृभिः एकश्रुत्यैवसर्वत्रजयंतस्वाभिभाषणात् सौत्रे ष्यादि
विज्ञानंनेत्युक्तंपारिजातके कर्मशिष्टोदकंकर्मसमाप्तौतुपरित्यजेत् अनादेशेदक्षिणागौर्हेमवा
पूर्णपात्रकं देवकार्येनैवदेयंरजतंत्वश्रुजंहितत् पात्रंपदोपसंस्पृष्टंप्रक्षाल्यंसर्वथाबुधैः कृतंय
न्मांसधौतेनतन्नभुंक्तेहिदेवता पात्राणांशोधनंनातःकार्यंकेवलहस्ततः किंतुदर्भैस्तृणैर्वापिपर्णै

दायकं प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् अथ पार्वतीश्वरयोः प्रातस्स्मरामि शरदिंदुकरो
ज्वलाभां सद्रत्नवस्त्रकरकुंडलहारभूषां दिव्यायुधोर्जितसुनीलसहस्रहस्तां रक्तोत्पलाभचरणां
भवतीं परेशीं १ प्रातर्नमामि महिषासुरचंडमुंडशुंभासुरप्रमुखदैत्यविनाशदक्षां ब्रह्मेंद्ररु
द्रमुनिमोहनशीललीलां चंडीं समस्तसुरमूर्तिमनेकरूपां २ प्रातर्भजामि भजतामभिलाषदा
त्रीं समस्तजगतां दुरितापहंत्रीं संसारबंधनविमोचनहेतुभूतां मायां परां समधिगम्य परस्य वि
ष्णोः ३ श्लोकत्रयमिदं देव्याश्चंडिकायाः पठेन्नरः सर्वान्कामानवाप्नोति विष्णुलोके महीय
यते ४ प्रातः स्मरामि भवभीतिहरं सुरेशं गंगाधरं वृषभवाहनमंबिकेशं खट्वांगशूलवरदाभयह
स्तमीशं संसाररोगहरमौषधमद्वितीयं १ प्रातर्नमामि [illegible] गिरिशं गिरिजा
र्द्धदेहं सर्ग[illegible]स्थितिप्रलयकारणमादिदेवं विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोगहरमौष
धमद्वितीयं २ प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमनघं पुरुषं महांतं नामादिभेदरहि

श्लो
तंषडभावशून्यंसंसाररोगहरमौषधमद्वितीयं ३ प्रातःसमुत्थायशिवंविचिंत्यश्लोकत्रयंयेनुदिनंप
ठंति तेदुःखजातंबहुजन्मसंचितंहित्वापदंयांतितदेवशंभोः ४ अथश्रीविष्णोस्कांदे प्रातःस्मरा
मिभवभीतिमहार्तिशांत्यैनारायणंगरुडवाहनमब्जनाभं ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधं
तरुणवारिजपत्रनेत्रं १ प्रातर्नमामिमनसावचसाचमूर्ध्नापादारविंदयुगलंपरमस्यपुंसः नारा
यणस्यनरकार्णवतारणस्यपारायणप्रवणविप्रपरायणस्य २ प्रातर्भजामिभजनामभयंकरंतंप्रा
क्सर्वजन्मकृतपापभयापहत्यै योग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशमकरोत्धृतशंखचक्रः
३ श्लोकत्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः अथश्रीरामा
वतारस्यान्यत्र प्रातःस्मरामिरघुनाथमुखारविंदंमंदस्मितंमधुरभाषिवि[illegible]शालभालं कर्णावलंबि
चलकुंडलगंडशोभंकर्णांतदीर्घनयनंनय[illegible]भिरामं १ प्रातर्भजामिरघुनाथकरारविंदंरक्षोगणाय
भयदंवरदंनिजेभ्यः यद्राजसंसदिविभज्यमहेशचापंसीताकरग्रहणमंगलमापसद्यः २ प्रातर्नमा ग्र ६
मिरघुनाथपदारविंदंपद्मांकुशादिशुभरे[illegible]शुभावहंमे योगींद्रमानसमधुव्रतसेव्यमानंशापापहंस
खि

आ० दु

१५

^ भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः ... गौतमः॥ रैभ्यो मरीचिश्च्यवनश्च दक्षः कुर्वं
तु सर्वे मम सुप्रभातं॥ २॥ सनत्कुमारस्सनकस्सनंदनः सनातनोप्यासुरिपिंगलौ च॥ सप्तस्वरा
स्सप्तरसातलानि कुर्वंतु० ३॥ पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वायुर्ज्वलनं च तेजः॥

पदि गोतमधर्मपत्न्याः ३ प्रातः श्रये श्रुतिमितां रघुनाथमूर्तिं नीलांबुजेक्षणमितेतररत्ननीलां आमु
क्तमौक्तिकविशेषविभूषणाढ्यां ध्येयां समस्तमुनिभिर्हृदयार्तिहंत्रीं ४ प्रातर्वदामि वचसा रघुना
थनाम वाक्दोषहारि सकलं शमलं निहंतृ यत्पार्वती स्वपतिना सह भोक्तुकामा प्रीत्या सहस्रह
रिनामसमं जजाप ५ यः श्लोकपंचकमिदं नियतः पठेत नित्यं प्रभातसमये पुरुषः प्रबुद्धः श्रीरा
मकिंकरजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकमनन्यलभ्यं ६ वामनपुराणे ब्रह्मा मुरारि
स्त्रिपुरांतकारिर्भानुः शशी भूमिसुतो बुधश्च गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभा
तं १ ^ सप्तार्णवाः सप्तकुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त भूरादिकृत्वा भुवनानि सप्त कुर्वंतु सर्वे
मम सुप्रभातं ५ इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च भक्त्या दुःस्वप्ननाशो नघ सुप्रभातं भ
वेच्च सत्यं भगवत्प्रसादात् ६ वैन्यं पृथुं हैहयमर्जुनं च शाकुंतलेयं भरतं नलं च रामं च यो यः स्मरति प्रभा
ते तस्यार्थलाभो विजयश्च सिद्धिः ७ व्यासः महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा श्लोकैश्चतुर्भि

कृ० ॥ १ ॥ ... १५

लुतत्सवितुर्वरेण्यंरूपंहिमंडलमृचोथतनुर्यजूंषि सामानियस्यकिरणाःप्रभवादिहेतुंब्रह्माहरा
त्मकमलक्ष्यमचिंत्यरूपं १ प्रातर्नमामितरणिंतनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितंच वृ
ष्टिप्रमोचनविनिग्रहहेतुभूतंत्रैलोक्यपालनपरंत्रिगुणात्मकंच २ प्रातर्भजामिसवितारमनंत
शक्तिंपापौघशत्रुभयरोगहरंपरंच तंसर्वलोककलनात्मककालमूर्तिंगोकंठबंधनविमोचनमादि
देवं ३ श्लोकत्रयमिदंभानोःप्रातःप्रातःपठेत्तुयः ससर्वव्याधिनिर्मुक्तःपरमंसुखमाप्नुया
त् अथश्रीगणेशस्यतत्रैव प्रातःस्मरामिगणनाथमनाथबंधुंसिंदूरपूर्णपरिशोभितगंड
युग्मं उद्दंडविघ्नपरिखंडनचंडदंडमाखंडलादिसुरनायकवृंदवंद्यं१ प्रातर्नमामिचतुरान
नवंद्यमानमिच्छानुकूलमखिलंचवरंदधानं तंतुंदिलंद्विरसनाधिपयज्ञसूत्रंदेवंविलासचतुर वर
शिवयोःशिवाय २ प्रातर्भजाम्यभयदंखलुभक्तशोकदावानलंसुरवरंकुंजरास्यं अज्ञानका
ननविनाशनहव्यवाहमुत्साहवर्धनमहंसुतमीश्वरस्य ३ श्लोकत्रयमिदंपुण्यंसदासाम्राज्य

मस्वमे अथ मंगलदर्शनं कात्यायनः श्रोत्रियंसुभगंगांच अग्निमग्निचितंतथा प्रातरुत्थाय यःपश्ये
दापद्भ्यः सप्रमुच्यते रोचनंचंदनंगंधामृदंगंदर्पणंमणिं गुरुमग्निंरविंपश्येन्नमस्येत्प्रातरेवहि पारि
जाते अवलोक्योनचादर्शोमलिनोबुधिमन्नरैः तथा आदर्शदर्शीदर्शेचेद्भानुवारेविशेषतः सप्तजन्मभ
विदंधोदरिद्रःसोपिजायते ब्राह्मे उत्थायमातापितरोपूर्वमेवाभिवादयेत् आचार्यश्चततोनित्यमभि
वाद्योविजानता अथादर्शनीयाःकात्यायनः पापिष्ठंदुर्भगंचांधंनग्नमुरुतनासिकं प्रातरुत्थाययःप
श्येतत्कलेरुपलक्षणं क्वचिदंधमित्यस्यस्थानेमत्तमितिपाठः बालव्यतिरिक्तोत्रनग्नोविवक्षितइति
पारिजाते इतिप्रबोधविधिः अथमूत्रपुरीषोत्सर्गविधिः तत्रपराशरः ततःप्रातःसमुत्थायकुर्या
द्विण्मूत्रमेवच नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकंभुवः मनुः नमूत्रंपथिकुर्वीत नभस्मनिनगो
व्रजे नफालकष्टेनजलेनचित्यांनचपर्वते बृहन्नारदीये पथिगोष्ठेनदीतीरेतडागेकूपसन्निधौ
तथाचवृक्षछायायांकांतारेवन्हिसन्निधौ देवालयेतथोद्याने कृष्टभूमौचतुष्पथे ब्राह्मणानांसमी

पेतु तथागोगुरुब्राषितां तुषांगारकपोलेषु जलमध्येतथैवच एवमादिषुदेशेषु मलमूत्रंनकारयेत्
स्मृत्यंतरे दशहस्तंपरित्यज्य मूत्रंकुर्याज्जलाशयात् शतहस्तंपुरीषंच तीर्थेनद्याश्चतुर्गुणं अंगिराः
उत्थायपश्चिमेयामे ततआचम्यचोदकं अंतर्धायतृणेर्भूमिंशिरःप्रावृत्यवाससा वाचंनियम्ययत्
नेनष्ठीवनोच्छ्वासवर्जितः कुर्यान्मूत्रपुरीषेतुशुचौदेशेसमाहितः याज्ञवल्क्यः दिवासंध्यासुकर्णस्थ
ब्रह्मसूत्रउदङ्मुखः कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखः कर्णश्चात्रदक्षिणः पवित्रंदक्षिणेक
र्णेकृत्वाविण्मूत्रमुत्सृजेत् इतिलिंगपुराणोक्तेः पवित्रंउपवीतमितिमहेशादयः अंगिरास्तुविक
ल्पेनस्थानांतरमाह कृत्वायज्ञोपवीतंतुपृष्ठतःकंठलंबितं विण्मूत्रंतुगृहीकुर्याद्दिति कर्णेनि
धानंपृष्ठतः यद्वाकर्णेसमाहितः तत्रकर्णेनिधानएकवस्त्रविषयं तथाचसांख्यायनः यद्येक
वस्त्रोयज्ञोपवीतंकर्णेकृत्वामूत्रपुरीषोत्सर्गंकुर्यादिति कर्णेनिधानंपृष्ठतःकंठलंबितंवानिवी
तिनैवकार्यंतदुक्तंमत्रिणा ऋषितर्पणचांडालभाषणेशववाहने विण्मूत्रोत्सर्जनेस्त्रीणांरति

संगेनिवीतयः सायणीये गृहीत्वाजलपात्रंतुविण्मूत्रंकुरुतेयदि तज्जलंमूत्रसदृशंपीत्वाचांद्रायणंच
रेत् मलमूत्रंसमुत्सृज्यविस्मृत्यैवोपवीतधृक् उपवीतंनदुत्सृज्यदध्यादन्यन्नवंतदा आपस्तंबः
नचसोपानत्कोमूत्रपुरीषेकुर्यादिति इदंचयात्राद्युपयुक्तोपानत्परं सोपानत्कःसोदपात्रइतिया
त्राप्रकरणेआचारचंद्रिकायामुक्तेःसोपानत्सकलेमंडलुरितिग्रंथांतराच्च यमोपि प्रत्यादित्यंन
मेहेतनपश्येदात्मनःशकृत् दृष्ट्वासूर्यंनिरीक्षेतगामग्निंब्राह्मणंतथा मलमूत्रयोर्वेगंनधार
येत् नोपरुद्धःक्रियांकुर्यादितिनचवचनात् इतिमूत्रपुरीषोत्सर्गविधिः अथशौचविधिः
याज्ञवल्क्यः गृहीतशिश्नश्चोत्थायमृद्भिरभ्युद्धृतैःजलैः गंधलेपक्षयकरंशौचंकुर्याददतंद्रि
तइतिदिङ्नियममाहब्रह्मांडे उद्धृतोदकमादायमृत्तिकांचैववाग्यतः उदङ्मुखोदिवाकुर्याद्रा
त्रौचेद्दक्षिणामुखः मृत्संख्यामाहशातातपः एकालिंगेकरेसव्येतिस्रोद्वेहस्तयो र्द्वयोः मूत्रशौचं १७
समाख्यातंशकृतित्रिगुणंभवेत् माधवीयेतु एकालिंगेगुदेतिस्रस्तथैकत्रकरेदश उभयोःस

धर्मात्मा पुत्रमध्यापयस्तुकं १ मातापितृसहस्राणिपुत्रदारशतानिच संसारेष्वनुभूतानियांतियास्यं
तिचापरे २ हर्षस्थानसहस्राणिभयस्थानशतानिच दिवसेदिवसेमूढमाविशंतिनपंडितं २ ऊर्ध्वबा
हुर्विरौम्येषनचकश्चिच्छृणोतुमे धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ३ नजातुकामान्नभयान्न
लोभात्धर्मंत्यजेज्जीवितस्यापिहेतोः धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः ४ इ
मांभारतसावित्रींप्रातरुत्थाययःपठेत् सभारतफलंप्राप्यपरब्रह्माधिगच्छति तथा पुण्यश्लोकोन
लोराजापुण्यश्लोकोजनार्दनः पुण्यश्लोकाचवैदेहीपुण्यश्लोकोयुधिष्ठिरः १ कर्कोटकस्यनागस्यदम
यंत्यानलस्यच ऋतुपर्णस्यराजर्षेःकीर्तनंकलिनाशनं २ अश्वत्थामाबलिर्व्यासोहनुमांश्चबिभीषणः
कृपःपरशुरामश्चसप्तैतेचिरजीवीनः ३ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टमं जीवेद्वर्षशतंसा
पाठ· सर्वव्याधि ग्रअपमृत्युविवर्जितः ४ अहल्याद्रौपदीसीतातारामंडोदरीतथा पंचकंन्यास्मरेन्नित्यंमहापातकना
शनं ५ ततोभूप्रार्थनापारिजाते समुद्रवसनेदेविपर्वतस्तनमंडले विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्ष

ख्य

णामक्रोशेनांबालानांचोपनीतितः गंधलेपक्षयकरंशौचंकुर्यान्नसंख्यायां एकैकयामृदापादौह
स्तौप्रक्षालयेत्ततः विवस्वान् देशांतरगतोविप्रः क्षालयेत्तच्चभूतले शौचशेषांमृदंतोयैर्नहि
प्रक्षालयेद्यदि अशेषास्तस्यपितरस्तामश्नंतिनसंशयः देशांतरगतोविप्रः देशांतरस्थःस
न् अथपादप्रक्षालनंस्मृतिदीपिकायां प्रथमंप्राङ्मुखःस्थित्वापादौप्रक्षालयेच्छनैः नहसन्नै
वसंजल्पंनात्मानमवलोकयन् इत्येवमृद्भिराजानुप्रक्षाल्यचरणौपृथक् हस्तावामणिबंधा
च्चकुर्यादाचमनंततः पारिजातेआचार्यः पाण्योःकूर्परयोरङ्घ्रिमृद्भिःप्रक्षाल्यचांबुभिः आप
स्तंबस्तु प्रक्षाल्यपादावनेजनमित्याह हस्तशौचोत्तरंउपवीतीभूत्वापादशौचंकुर्यादितिपारि
सकम्पा
जातेआचाररत्नेच आचारार्केतुपादशौचगंडूषकरणोत्तरंउपवीतीभूत्वाद्विराचमेदित्युक्तं पा
दशौचेक्रमस्मृत्यंतरे शौचाहृतेवामपादेपूर्वंनक्षालनंभवेत् शौचेतुवामपूर्वंस्यादन्यत्रदक्षिणं
चे १८
सदेति आश्वलायनस्तु स्वपादंपाणिनाविप्रोवामेनक्षालयेत्सदा शौचेदक्षिणपादंतुपश्चात्क्षा

व्यंकराद्रुभौ॥ शौचंविनासदान्यत्र सव्यंप्रक्षाल्यदक्षिणमितिआह आश्वलायनैः स्तनयमेव
पक्षःस्वीकार्यः एवमुक्तशौचकरणेपियस्यभावस्शुद्धिर्नास्तिनतस्यशुद्धिरित्याह व्याघ्रपाद्
शौचंतुद्विविधंप्रोक्तंबाह्यमभ्यंतरंतथा मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरं गंगा
तोयेनकृत्स्नेनमृद्भारैश्चनगोपमैः आमृत्योश्चाचरन्छौ चंभावदुष्टोनशुध्यतीति बोधा
यनः देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं उपपत्तिमवास्थांचज्ञात्वाशौचंप्रकल्पयेत् शौच
स्यद्विविधस्यापिसर्वकर्माधिकारहेतुत्वमन्वयव्यतिरेकाभ्यांदक्षोदर्शयति शौचेयत्नःस
दाकार्यःशौचमूलोद्विजःस्मृतः शौचाचारविहीनस्यसमस्तानिष्फलाक्रियाः उक्तशौचाकर
णेप्रायश्चित्तंस्मृतिरत्नावल्यां गायत्र्यष्टशतंचैवप्राणायामत्रयंतथेति केचित्तुविष्णुस्मरणमे
वाचमसर्वदोषनिबर्हणंइतिवचनात्विष्णुस्मरणंवाकार्यमित्याहुः व्यासोपि अपवित्रः
पवित्रोवासर्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः गंडूषानाहश्वला

यनः कुर्याद्द्वादशगंडषान्पुरीषोत्सर्जने द्विजः मूत्रे चत्वार एव स्तु भोजनांते तु षोडश भक्ष्यभोज्या
वसाने च गंडूषाष्टकमाचरेत् गंडूषदेशः पारिजाते पुरतः सर्वदेवाश्च दक्षिणे पितरस्तथा ऋष
यः पृष्ठतः सर्वे वामं गंडूषमाचरेत् अथ प्रयोगः पूर्वोक्तब्राह्ममुहूर्ते उत्थाय वस्त्रांतरे धृत्वा ह
स्तपादमुखानि प्रक्षाल्याचम्येष्टदेवतां नमस्कृत्य प्रातः स्मरणीयं विधाय ग्रामाद्बहिर्नैरृत्यां इषु
क्षेपात्परे शुद्धमृत्तिकां ससिकतां जलपात्रं चादाय कीटादिरहितस्थलं गत्वा मृज्जलपात्रे निधाय तृ
णाद्यंतर्हितभूमौ प्रावृत्तशिराः निवीति पृष्ठतः कंठलंबितः यज्ञोपवीतः यद्येकवस्त्रश्चेद्दक्षिणकर्णे
निहितनिवीतयज्ञोपवीतः मौनी घ्राणास्ये पिधाय दिवा संध्यास्वुदङ्मुखः मूत्रं पुरीषे उत्सृज्य लो
ष्ठादिना गुदं प्रमृज्य गृहीतशिश्न उत्थाय पूर्वगृहीतमृज्जलपात्रे गृहीत्वा आर्द्रामलकमात्र मृज्ज
लैर्द्विवारं लिंगशौचं कृत्वा मृज्जलैस्त्रिवारं अपानं सं[illegible]शोध्य पुनर्मृज्जलैरेव लिंगगुदे प्रक्षाल्य शुद्ध 
मृत्तिकया एकवारं हस्तं प्रक्षाल्य दक्षिणवामशुद्धभूमिमांगत्वान्य मृज्जलैः दशवारं वामकरं प्रक्षा

प्रदातव्या मृदः शुद्धिमभीप्सते एवंच संख्याविशेषेधिक संख्या मुख्यः कल्पः अल्प संख्यात्वनु
कल्प इतिविवेक्तव्यमिति भट्टोजीये शक्ताशक्त भेदेन व्यवस्थेत्यन्ये उक्त संख्ययागंधलेपा[illegible]न
पगमे देवलः यावत्तु शुद्धिं मन्येत तावच्छौचं विधीयते प्रमाणं शौच संख्यायां न विभैरुपदिश्यते
केवल मूत्रोत्सर्गे दक्षः एका लिंगे तु सव्ये त्रिरुभयोर्मृद्द्वयं स्मृतं मूत्रशौचं समाख्यातं मैथुने द्वि
गुणं स्मृतं बृहन्नारदीये तिस्रस्तिस्रः प्रदातव्याः पादयोर्मृत्तिकाः पृथक् आश्वलायनः लिंग
शौचं पुरा कृत्वा गुदशौचं ततः परं मनुः एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगुणं स्याद्व
नस्थानां यतीनां स्याच्चतुर्गुणमिति देवलः धर्म्यं वै दक्षिणं हस्तं अधः शौचे न योजयेत् तथाच वा
महस्तेन नाभेरूर्ध्वं न शोधयेत् ऋष्यशृंगः धाराशौचं न कर्तव्यं शौचसिद्धिमभीप्सुना चुलकेनैव
कर्तव्यं हस्तशुद्धिविधानतः आदित्यपुराणे स्त्रीशूद्रयोरर्धमानं प्रोक्तं शौचं मनीषिभिः दिवाशौ
चस्यनिश्यर्धं पथि पादं विधीयते आर्तः कुर्याद्यथाशक्ति शक्तः कुर्याद्यथोदितं तथा स्त्रीशूद्रा

परिशिष्टात्संस्मार्ताचमनंतुसंध्याप्रयोगेवक्ष्यामः

णि विधानपारिजाते संध्यादौब्रह्मयज्ञेचहोमेदेवार्चनेतथा श्रौतमेवद्विजैःकार्यंइतिबोधाय
नोब्रवीत् पौराणमथवास्मार्तंश्रौतमाचमनंतथा ततकर्मणिकुर्वीतयथेष्टंवाविधीयते तत्र
श्रौतमाचमनंतैत्तिरीयारण्यकस्थंब्रह्मयज्ञांगंतत्प्रकरणेवक्ष्यामः पौराणंतुअगस्त्यसंहिता
यांकेशवाद्यैस्त्रिभिःपीत्वाद्वाभ्यांप्रक्षालयेत्करौ द्वाभ्यामोष्ठौतुसंमृज्यद्वाभ्यामुन्मार्जनंतथा
एकेनहस्तेनप्रक्षाल्यपादावपितथैकतः संप्रोक्ष्यैकेनमूर्धानंततःसंकर्षणादिभिः आस्यं
नासाक्षिकर्णौचनाभिहृत्कंभुजौस्पृशेत् एवमाचमनंकृत्वासाक्षान्नारायणोभवेत् शंखः
तर्जन्यंगुष्ठयोगेनस्पृशेन्नासापुटद्वयं अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रेपुनःपुनः कनि
ष्ठांगुष्ठयोर्नाभिंहृदयंचतलेनवै सर्वाभिस्तुततःशीर्षंबाहूचाग्रेणसंस्पृशेत् आचमनसा
धारणविधिमाहयोगी अंतर्जानुशुचौदेशउपविष्टउदङ्मुखः प्राग्वाब्राह्मेणतीर्थेनद्विजो २०
नित्यंउपस्पृशेत् कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमा

मात् आचमनीयंउदकंविशिनष्टिशंखः अद्भिःसमुत्धृताभिस्तुहीनाभिःफेनबुद्बुदैः वह्निना
नचनमाभिरक्षाराभिरुपस्पृशेत् याज्ञवल्क्योपि अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः
हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः शुध्येरंस्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः तृतीया
र्थेतसिःअंतेनतालुनास्पृष्टा[illegible]भिरित्यर्थः यमः अपःकरनखस्पृष्टाःसमाचामतियाद्विजः सु
रांपिबतिसुव्यक्तांयमस्यवचनंयथा संध्याभाष्ये नाचामेदासनस्थोंघ्रिर्नबत्धासनएववा प
वित्रकरआचामेदितिपवित्रंहिरण्यंपवित्रंवैहिरण्यमितिश्रुतेः अस्यापवादमाहयमः मधुपर्के
भोजनांतेसंध्यादौनित्यकर्मणि आसनस्थोपिचाचामेदन्यत्रकुक्कुटासनः विष्णुः जान्वोरूर्ध्वंज
लेतिष्ठनाचांतःशुचितामियात् अधस्ताच्छतकृत्वोपिसमाचांतोनशुध्यति अधस्ताज्जान्वोःयत्र
जलस्याल्पतातत्रोपविश्याचामेदिति तदुक्तंस्मृत्यं[illegible]सारे उपविष्टःसमाचामेज्जानुमात्रादधोजले
मग्नेनाः अनुष्णाभिरफेनाभिःपूताभिर्वस्त्रचक्षुषा हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भिराचमे

विद्वान्याव ग्रामेनन स्पृशेत्

दिति अत्रापवादमाहयमः रात्राववीक्षितेनापिशुद्धिरुक्तामनीषिणां उदकेनातुराणांचतथोष्णेनोष्ण
पायिनां उदकस्यग्रहणप्रकारंपरिमाणंचाह भरद्वाजः आयतःपूर्वतः कृत्वागोकर्णकृतिवत्करं सं
हतांगुलिनातोयंगृहीत्वा पाणिनाद्विजः मुक्तांगुष्ठकनिष्ठेनशेषेणाचमनंचरेत् माषमज्जनमा
त्रास्तुसंगृह्यत्रिःपिबेदपइति अत्रमाषःसुवर्णस्यतदुक्तंआचारप्रकाशेउशनसामाषसुवर्णमज्जन
मात्राहृदयंगमाइति अन्वारंभमाहयमः तावन्नोपस्पृशेत् दक्षिणंकरमितिशेषः आचारप्रा
दीपेदक्षिणेसंस्थितंतोयंतर्जन्यासव्यपाणिना तत्तोयंस्पृशतेयस्तुसोमपानफलंलभेत् केचि
त्विदंनिर्मूलमित्याहुरितिद्योते स्मृत्यर्थसारे सौवर्णरौप्यपात्रैस्तुवेणुबिल्वाश्मचर्मभिः वामे
नोधृत्यचाचामेदिति पारिजातेसंग्रहे करकालाबुपात्रेणताम्रपात्रपुटेनच गृहीत्वास्वयमा
चामेत्भूमिलग्नेननान्यथा अत्रभूमिलग्नत्वेमानंचिंत्यं वामेनोधृत्येतिस्मृत्यर्थसारविरोधा २१
दित्याचाररत्ने कमलाकरेमनुः कांस्येनायसपात्रेणत्रपुसीसकपित्तलैः आचांतःशतकृत्वो

ल्यततः करद्वयंसप्तवारंमृज्जलैः प्रक्षाल्यदक्षिणवामपादौप्रत्येकंत्रिः प्रक्षाल्यान्यजलेन द्वादशगंडूषा
न्वामभागेकृत्वाजलपात्रंत्रिः प्रक्षाल्योपवीतीद्विराचामेत् मूत्रमात्रोत्सर्गेतुपूर्ववदेकवारंलिंगंप्रक्षा
ल्यवामकरंत्रिः प्रक्षाल्यकरद्वयंद्विः प्रक्षाल्यैकैकयामृदापादौप्रक्षाल्यगंडूषचतुष्टयंविधाया
चामेत् इतिशौचप्रकरणं अथाचमनं वृद्धपराशरः कृत्वाथशौचंप्रक्षाल्यहस्तौपादौच
मृज्जलैः निबद्धशिखकच्छेस्तुद्विजआचमनंचरेत् आचमनंतावत्त्रिविधंश्रौतंस्मार्तंपौराणं
चेति तत्रप्रत्यक्षश्रुतिचोदितंश्रौतं सूत्रपरिशिष्टस्मृतिषूक्तंस्मार्तं केशवाद्यैस्त्रिभिःपीत्वे
त्याद्यगस्त्यसंहिताद्युक्तंपौराणं अथैतेषांविनियोगःस्मृतौ संध्यायांकर्मकालेचस्मृतेराच
मनंभवेत् ब्रह्मयज्ञेचवैकुर्यात्श्रुतेराचमनंद्विजः तथा शौचाचारेतथापानेस्पृष्टास्पृष्टाच
मर्षणे पुराणाचमनंकुर्यान्नामभिःकेशवादिभिः कमलाकराह्निके संध्यादौब्रह्मयज्ञेचहो
मेदेवार्चनेतथा श्रौतमाचमनंप्रोक्तंस्मार्तंस्मार्तंतथास्मृतं पौराणमथवाकार्यंसंध्यायांश्राद्धक

निष्ठांगुष्ठाभ्यां नाभिं संस्पृश्य जनार्दनाय० इति पाणितलेन हृदयं संस्पृश्य उपेंद्राय इति सर्वांगुल्यग्रैः
शिरः संस्पृश्य हरये० कृष्णाय० इति द्वाभ्यां तथैव दक्षिणवामबाहुमूले स्पृशेत् एतस्त्वत्यंगमङ्गिः
संस्पृश्यान्याचामेत् इमानि नामानि प्रथमैकवचनांतानि संबुध्यंतानि वोच्चार्याणीति आन्हिककौ
डिकायां अथाचमनकल्पाः तत्र स्मृत्यर्थसारे त्रिः पीत्वा हस्तं प्रक्षाल्य दक्षिणं श्रवणं स्पृशेत्
मार्कंडेये कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनं कुर्वीतालंभनं वापि दक्षिणश्रवणस्य तु यथा
विभवतो ह्येतत्पूर्वालाभे ततः परं नविद्यमाने पूर्वत्र उत्तरप्राप्तिरिष्यते अत्राचमनशब्देन जल
ण स्पर्शमात्रं अर्केति चंद्रस्याप्युपलक्षणमिति यति धर्मप्रकाशे याज्ञवल्क्यः गंगा च दक्षिणश्रोत्रे ना
सिकायां कृताशनः उभयोः स्पर्शनेनैव तत्क्षणादेव शुध्यति बोधायनः नीवीं विस्रस्य परिधायो
पस्पृशेदार्द्रं तृणं भूमिं गोमयं वा संस्पृशेदिति इत्याचमनानुकल्पाः अथ सकृदाचमननिमित्तानि
अ मनुः प्राणस्यायमनं कृत्वाचमेत्स्वपतोपि सन् आंतरं विद्यते यस्मात्तस्मादाचमनं स्मृतं कृत्वा २२

मूत्रंपुरीषंवारवान्याचांत उपस्पृशेत् वेदमध्येष्यमाणश्चाप्यन्नमश्नंश्चसर्वदा कौर्मे चांडालम्ले
छसंभाषेस्त्रीशूद्रोच्छिष्टभोजने उच्छिष्टपुरुषंस्पृष्ट्वाभोज्यंचापितथाविधं आचामेदश्रुपातेचलो
हितस्यतथैवच यमः उत्तीर्योदकमाचामेदवतीर्यतथैवच मार्कंडेये देवार्चनादिकर्माणित
थागुर्वभिवादनं कुर्वीतसम्यगाचम्यतद्वदेवभुजिक्रियां क्षुतेनिष्ठीवनेसुप्तेपरिधानेश्रुपात
ने पंचस्वेतेषुचाचामेच्छ्रोत्रंवादक्षिणंस्पृशेत् कौर्मे अग्नेर्वामथालंभंस्पृष्ट्वाप्रयतमेववा
स्त्रीणामप्यात्मनःस्पर्शेनीवींवापरिधायच केशानामात्मनःस्पर्शेवाससोक्षालितस्यच छं
दोगपरिशिष्टे पित्र्यमंत्रानुद्रवणेआत्मालंभेधूमेक्षणे अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे
मार्जारमूषकस्पर्शेआक्रुष्टेक्रोधसंभवे निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नुपस्पृशेत् मार्जारमूषक
स्पर्शोत्रमार्जारकर्तृकःपुरुषकर्तृकःस्पर्शोतु अभोज्यसूतिकाषंढमार्जाराखुश्वकुक्कुटानित्या
दिनामार्कंडेयस्नानविधानात् एतत्स्नानमुच्छिष्टसमयेवेदितव्यंसमाचारादिति आपस्तंबः

ग भे

२३ स्वमेक्षवथोसिंघाणिकाश्वालंभेइत्यादि सिंघाणिकानासामलं अश्रुनेत्रजलं इतिसकृदाचमननि
मित्तानि अथद्विराचमननिमित्तानि याज्ञवल्क्यः स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे आचा
तः पुनराचामेद्वासोविपरिधायच पैठीनसिः रथ्यामाक्रम्यकृतमूत्रपुरीषः पंचनखास्थ्यस्नेहं स्पृ
ष्ट्वाचांतः पुनराचामेच्चंडालम्लेच्छसंभाषणेच कौर्मो ओष्ठौविलोमकौस्पृष्ट्वावासोविपरीधायच
रेतोमूत्रपुरीषाणांउत्सर्गेशुक्तभाषणे ष्ठीवित्वाध्ययनारंभेकासश्वासागमेतथा चत्वरंवाश्म
शानंवासमागम्यद्विजोत्तमः संध्ययोरुभयोस्तद्वदाचांतोप्याचमेत्पुनः शुक्तभाषणमनृतवाक्यं
व्यासः दानेभोजनकालेच संध्ययोरुभयोरपि आचांतः पुनराचामेज्जपहोमार्चनादिषु बौधा
यनः भोजमेहावेनेदाने उपहारेप्रतिग्रहे हविर्भक्षणकालेच तद्विराचमनंस्मृतं इतिद्विराच
मननिमित्तानि अथाचमनापवादः दंतलग्नेफलेमूलेभुक्तस्नेहेतथैवच तांबूलेचेक्षुदंडेचनो २३
च्छिष्टोभवतिद्विजः उच्छिष्टस्याचमनविधानात्तद्भुतान्नायत्याभावोनत्वाचमनमपोद्यते स्नेहो

पि न कदाचन शुध्यति शौनकः ताम्रपात्रस्थितैर्वापि तथा तोयाशयस्थितैः कुर्वन्नाचमनं वि
प्रो नित्यं खानि समालभेत् पौराणाचमनप्रयोगः शुचौ देशे भूमिष्ठपादः अंतर्जानुहस्तः प्राङ्मु
ख उदङ्मुखो वोपविश्य संहितांगुलिना शुद्धजलं गृहीत्वा मुक्तांगुष्ठकनिष्ठिकेन वामान्वारब्धेन पा
णिना ब्रह्मतीर्थेन ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः इति त्रिभिः नाम
भिः त्रिः पिबेत् प्रणवाद्यतान्नमोंतताश्च सर्वत्र गोविंदाय विष्णवे इति द्वाभ्यां करौ प्रक्षाल्य मधुसू
दनाय त्रिविक्रमाय इति द्वाभ्यां अंगुष्ठमूलेनौष्ठौ संमृज्य वामनाय श्रीधराय इति द्वाभ्यां तथैव
मुखं मुन्मार्ज्य हृषीकेशाय इति वामकरं प्रोक्ष्य पद्मनाभाय इति पादौ संप्रोक्ष्य दामोदराय इति मू
र्धानं संप्रोक्ष्य संकर्षणाय इति संहतमध्यमांगुलित्रयेणास्यं संस्पृश्य वासुदेवाय प्रद्युम्नाय इति
द्वाभ्यामंगुष्ठतर्जनीभ्यां नासापुटे संस्पृश्य अनिरुद्धाय पुरुषोत्तमाय इति द्वाभ्यामंगुष्ठानामिका
भ्यां चक्षुषी संस्पृश्य अधोक्षजाय नारसिंहाय इति द्वाभ्यां तथैव श्रोत्रे संस्पृश्य अच्युताय इति क

आ०दु०

षुसोमेच मधुपर्के तथैवच आस्यहोमेषु सर्वेषु नोच्छिष्टोभवतिद्विजः आस्यहोमादष्टावशिष्टभक्ष्याः
मदयोः इत्याचमनापवादः इत्याचारेंदो आचमनप्रकरणं अथदंतधावनं भारते मत्स्यह
स्तौपादौ [illegible] चमुखंचसुसमाहितः दक्षिणंबाहुमुत्धृत्य कृत्वाजान्वंतरे ततः प्राङ्मुख
श्चोपविष्ट [illegible] भक्षयेद्वाग्यतोनरः दक्षिणंबाहुमुत्धृत्योपवीतीभूत्वेत्यर्थ इतिदत्तमहेशा
दयः अत्रदंतधावनस्यदंतसंबंधमात्रेण भक्षणशब्दप्रयोगः आश्वलायनः एवमाचम्य
अ दंतानांकाष्ठेन [illegible] मृजेन्मलं प्राग्वोदङ्मुख आसीनः प्राङ्मुखएववा वितस्तिमात्रमुद्दिष्टं दंत गुरु
काष्ठं द्विजन्मनां कनिष्ठागुलिवत्स्थूलं तदग्रकृतकूर्चकमिति अंगिराः आयुरित्यादिमंत्रोयं
उक्तः शाखाभिमंत्रेण उपरितनदंतानारभ्यनिमृजेत् ततउर्ध्वक्रमेणैव धावयेच्छाखयात
थैत्यंगिरस्मरणात् ततःकाष्ठंप्रक्षाल्यनैर्ऋत्यांत्यजेत् राक्षसस्यामुत्सृजेत्काष्ठं इत्याश्वला
यनस्मरणात् सूर्योदयोत्तरं दंतकाष्ठेन दंतधावननिषेधमाहाश्वलायनाचार्यः प्रागोदयाद्वेस्त्वधा

न्योदिते स्तमिते रवौ ॥ अथ ग्राह्याणि दंतकाष्ठानि नारसिंहे खदिरश्च करंजश्च कदंबश्च वटस्त
था वदरीतिंदुकास्त्वेते प्रशस्ता दंतधावने ॥ आश्वलायनः सर्वे कंटकिनः पुण्याः क्षीरिणश्च
विशेषतः भक्तिचंद्रोदये दंतकाष्ठं प्रकुर्वीत जिव्होल्लेखनिकां तथा एकेनैवोभयं कुर्वन्दुःख
दारिद्र्यमाप्नुयात् निषिद्धकालेपि जिव्होल्लेखः कार्य एव तथा च व्यासः प्रतिपद्दर्शषष्ठी
षु नवम्यां दंतधावनं पर्णैरन्यत्र काष्ठैस्तु जिव्होल्लेखः सदैव हीति दंतधावने निषिद्धकालः
र आचारर्त्ने नंदास्वष्टमिरंध्रयोर्व्रतदिने दर्शे रवौ भूमिजे श्राद्धे जन्मदिने च तुर्दशियुगक्रांतौ व्यती
पातके द्वादश्यां निजजन्मभे परतरे तत्पूर्वभे पूर्णिमास्यां मंगल्यदिनोपवासदिनयोश्चाप्यसुते
वाभ्यंगो अथ दंतकाष्ठालाभे निषिद्धकाले च कथं कर्तव्यमिति चेदाह व्यासः अलाभे दंतका
ष्ठानां निषिद्धायां तिथौ न तथा अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं स्मृत्यर्थसारे तु तृणपर्णैर्म ध
का ध्यमानामि[illegible]गुष्ठैर्वा निषिद्धाहेपि कुर्युरिति स्थितं पैठीनसिरपि तृणपर्णोदकेनांगुल्या वा दंता

न्धावयेत्प्रदेशिनीवर्जमिति आचारप्रकाशे आश्वलायनस्तु नांगुलीभिश्च मृद्भिश्च पर्णैर्लोष्ठैश्च
 भस्मना नायसैश्च तथा लोहैः सर्वैर्दंता[illegible]जे द्विज इत्याह अंगारवालुकापर्णतृणवस्त्रनखादि न्म
भिः न दंतधावनं कुर्यात् श्रीकामी दूषिते दिने अत्र सर्ववचनैकवाक्यतया निष्कर्षस्तु तृणपर्ण
योर्विहितप्रति[illegible]षिद्धत्वाद्विकल्पः अनामांगुष्ठोऽत्तमो मध्यमायाः कनिष्ठिकायाश्च विहित
प्रति[illegible]षिद्धत्वाद्विकल्पः तर्जनी तु सर्वमते निंद्या अथ प्रयोगः निषिद्धदिनातिरिक्तेषु [illegible]
[illegible]दिनेषु प्राङ्मुख उदङ्मुखो वा द्वादशांगुलप्रमाणं कनिष्ठांगुलिवत्स्थूलं चूर्णीकृताग्रं अपामार्गौदुं
बरादिविहितं काष्ठं प्रक्षालितं गृहीत्वा ॐ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ब्रह्म प्रज्ञां च मेधां च त्वं नो दे
हि वनस्पते इत्यभिमंत्र्य उपरितनदंतक्रमेण प्रादक्षिण्येन सर्वान्शो[illegible]यित्वा तत्काष्ठं नैर्ऋत्यां निरस्याप उपस्पृ 
श्य पुनस्तादृशेनैव जिह्वोल्लेखनेन जिह्वां सं[illegible]शोध्य द्वादशगंडूषान्कृत्वाचामेत् निषिद्धदिने तु जंबूवृक्षाम्र 
पर्णैर्मध्यमानामिकांगुष्ठैर्द्वादशगंडूषैर्वा दंतान्शोधयेत् इति दंतधावनप्रकरणं अथ केशप्रसाधनं बंधनं च

त्र कृताचमनस्यापि योहस्तादिलग्नो भोजनस्नेहइतिहेमाद्रिः याज्ञवल्क्यः मुखजाविप्रुषो मे
ध्यास्तथाचमनबिंदवः श्मश्रुचास्यगतंदंतसक्तंत्यक्त्वा ततःशुचिः मुखजातःश्लेष्मविप्रुषोंगे
षुनिपतितामेध्याः स्मृत्यर्थसारे वेदाभ्यासे मुखाज्जाताःशुद्धाएवतुसर्वतः स्मृत्यंतरे द्रा
क्षादीनि फलानि इक्षून्ययोमूलंफलंदधि तांबूलंऔषधंपत्रंहविर्भुक्त्वापिनाचमेत् षट्त्रिंश
न्मते वाग्भिःपत्रैर्मूलफलैस्तृणकाष्ठमयैस्तथा सुगंधिभिस्तथाद्रव्यैर्नोच्छिष्टस्तुभवेद्द्विजः
यां यमः प्रस्यांचमतो याश्च शरीरेविप्रुषोन्नृणां उच्छिष्टेषानास्त्यत्र भूमितुल्यास्तुताःस्मृताः
बौधायनः दंतवद्दंतलग्नेषु यच्चाप्यंतर्मुखेभवेत् आचांतस्यावशिष्टंतु निगिरन्नेवतच्छुचिः
एतच्च निगिरणं याज्ञवल्क्योक्तत्यागेनविकल्प्यते नचैवकारवैयर्थ्यं चर्वणेत्वाचमेन्नित्यं
मुक्त्वातांबूलचर्वणमिति विष्णूक्ताचमननिषेधार्थत्वात् दंतवदितिबौधायनवचनं रसानु
पलंभेज्ञेयं दंतवद्दंतलग्नेषु रसवर्जं अन्यत्रजिह्वाभिमर्शनादिति शंखोक्तेः वशिष्ठः प्राणाङ्कुली

नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत्

आ० दु

क्तोच्छिष्टं तु वर्जयेत् मार्कंडेयेपि सपवित्रेण हस्तेन कुर्यादाचमनक्रियां नब्रह्मग्रंथिनाचामेदितिप्र

२६ तिषेधात् यत्तु ग्रंथिकृतपवित्रेण न भुंजीयान्नचाचमेदित्याश्वलायनवचनं तत्तु ब्रह्मग्रंथिविषयं न

ब्रह्मग्रंथिनाचामेदिति स्मृतिसारात् पवित्रदर्भसंख्यामाह मार्कंडेयः चतुर्भिर्दर्भपिंजूलै ब्राह्मणस्य

वर्णे पवित्रकं एकैकन्यूनमुद्दिष्टं वर्णेष्व्यथाक्रमं सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं न वा त्रिभिः शांतिके का स्तु

र्ये पौष्टिके पंचभिस्तथा आन्हिः उभाभ्यामपि पाणिभ्यां विप्रैर्दर्भपवित्रके धारणीये प्रयत्नेन ब्रह्मग्रंथि

समन्विते ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते ब्रह्मग्रंथि

वर्तुलग्रंथ्योर्लक्षणं हेमाद्रिणोक्तं यथा द्विगुणीकृतानां दर्भशिखानां पाशः प्रदक्षिणं अर्धावेष्टनं विधा

य पश्चाद्भागेन यदा प्रवेश्यते तदा वर्तुलो ग्रंथिः स एव यदा प्रादक्षिण्येन सर्वावेष्टनं विधाय पुरोभागेन प्र

वेश्यते तदा ब्रह्मग्रंथिरिति पवित्रधारणस्थानमुक्तं स्कांदे अनामिकाधृता दर्भा ह्येकानामिकयापि वा २५

उभाभ्यामनामिकाभ्यां धार्ये दर्भपवित्रके रत्नावल्यां द्वयोस्तु पर्वणोर्मध्ये पवित्रं धारयेद्बुधः प्रथमं ल

५३

घर्षेत्पर्वद्वितीयंतु नलंघयेत् अग्रपर्वस्थितोदर्भस्तपोवृद्धिकरोहिसः मध्येचैवप्रजाकामोमूलेस
र्वार्थसाधकः चंद्रिकायां अंगुलीमूलदेशेतुपवित्रंधारयेद्विजः राज्ञांद्विपर्वकेचैवविशामप्येकपर्वस्यच
शास्त्रे मंत्रंविनाधृतंयत्तत्पवित्रमफलंभवेत् तस्मात्पवित्रेमंत्राभ्यांधारयेदभिमंत्र्यच पवित्रवंतइ
त्यादिमंत्रद्वितयंमस्यतु प्रणवस्त्वस्यमंत्रःस्यात्समस्ताव्याहृतीस्तुवाऽपवित्रत्यागेविशेषउक्तःस्मृ
त्यंतरे नित्येनैमित्तिकेवापिकर्मोप[illegible]क्रमणेद्विजः धृतंपवित्रंकर्मांतेग्रंथिंमुक्त्वैवतत्यजेत्
अत्रापवादमाहभरद्वाजः कर्मांतेपुनरादायपवित्रद्वितयंद्विजः शुचौदेशेविनिक्षिप्यदध्यादेत
त्पुनःपुनः यद्युच्छिष्टाद्युपहतंपवित्रंवैयदाभवेत् तदैवग्रंथिमुत्सृज्यत्यजेदितरथानहि ग्रं
थिमत्पवित्रासंभवेआश्वलायनः अ[illegible]थवानामिकाभ्यांतुग्रंथिही
नंकुशादिकं हेमादीन्वाथबिभृयात्सर्वकर्मस्वपिद्विजः अथकुशग्रहणकालमाहांगिराः अह
न्यहनिकर्मार्थंकुशच्छेदःप्रशस्यते कुशाधृताये पूर्वत्रयोग्याःस्युर्नोत्तरत्रतइति पूर्वकर्मणिधृताये

२७ कुशास्तेनोत्तरत्रानंतरं क्रियमाणेषु कर्मसु योग्या इत्यार्थः कालांतरमुक्तं स्मृत्यंतरे मासिमास्या
हृतादर्भास्तन्मास्येव चोदिताइति अस्याप्यसंभवे विष्णुः द श्रावणमासस्य संमंत्रोत्पादिताःकुशाः र्गे
अ यातयामास्ते दर्भानियोज्याः स्युः पुनःपुनः अयातयामाः अपर्युषिताः नियोज्याः उपयुक्ताः अ
प्यनिषेधे न्यत्र प्रयोज्या इत्यर्थः शंखोपि दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः अयातयामा
न्येतानि नियोज्यानि पुनःपुनः भाद्रमायामपि कुशग्रहणमुक्तं मदनरत्ने अथनिषिद्धकुशानाह हा
रीतः पथिदर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु प्रस्तरासनपिंडेषु षट् कुशान्परिवर्जयेत् ब्रह्मयज्ञे
च ये दर्भा ये दर्भाः पितृतर्पणे ह ता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते अपूता गर्भिता दर्भा ये च द
न्यते र्भा नखैः क्षताः क्वथिता अग्निदग्धाश्च कुशा नवर्जयेत् कुशग्रहणविधिमाह शौनकः शुचौ २७
देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः ओंकारेणैव मंत्रेण कुशान्स्पृष्ट्वा द्विजोत्तमः विरिंचिना स
होत्पन्न परमेष्ठिनिसर्गज नुद सर्वाणि पापानि र्भ स्वस्तिकरो भव इमं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः द

विष्णुपुराणे स्वाचांतस्तु पुरः कुर्यात् पुमान्केशप्रसाधनं मार्कंडेये दक्षिणाभिमुखोयस्तु विदिक्संमुख एव
च केशान्संस्कुरुते मर्त्यो धननाशं स विंदति शौनकः स्मृत्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः त
र्थः तः दंतधावनानंतरमित्य[illegible] इत्याचारप्रकाशे तच्च बंधनं दक्षिणभागे तदुक्तं सुमंतुना गायत्र्या
तु शिखां बध्वा नैरृत्यां ब्रह्मरंध्रतः पश्चात्तु जटिकां बध्वा सर्वकर्म समारभेत् शिखायाः ब्रह्मग्रंथिः
कार्या तर्जनीरौप्यसंयुक्तां ब्रह्मग्रंथियुतां शिखां भोजने मैथुने मूत्रे कुर्वन्कृच्छ्रेण शुध्यतीति रत्नमा
ला धृतसंग्रहवचनेन भोजनादित्रिष्वेव तस्य प्रतिषेधात् इति केशप्रसाधनबंधने अथ कुशप्रकर
२५ णं कुशहस्तेन यज्जप्तं दानं चैव कुशैः सह कुशहस्तेश्च यत्स्नानं तस्य संख्या न विद्यते कुशपूतं भवेत्स्ना २५
नं कुशेनोपस्पृशेद्द्विजः कुशेन चोद्धृतं तोयं सोमपानेन संमितं उपस्पृशेत् आचामेत् स्मृत्यंतरे
स्नाने होमे जपे दाने स्वाध्याये पितृकर्मणि करौ सदर्भौ कुर्वीत तथा संध्याभिवादने कात्यायनः सप
वित्रः सदर्भो वा कर्मांगे पितृकर्मणि अशून्यं तु करं कृत्वा सर्वत्राचमनं चरेत् नोत्सृज्यं तत्पवित्रं तु भु

आ०दु

वि
अथरजतपत्रंवाराहे तर्जन्यांरजतंधृत्वापितृभ्योमत्स्वदीयते अंतोस्तिपरमाणूनांतस्मांतोनैववि
२८ घते नारदीयेपि रूप्यहस्तेदातव्यंयत्किंचित्पितृवल्लभं तेनस्युःपितरस्तृप्ताःयावदाभूतसंप्ल
वं योगयाज्ञवल्क्यः अनामिकाधृतंहेमतर्जन्यांरौप्यमेवच कनिष्ठिकाधृतंखड्गं तेनपूतोभवेन्न
रः तर्जन्यांरौप्यधारणंजीवत्पितृकस्यजीवज्ज्येष्ठभ्रातृकस्यचनिषिद्धं तदुक्तंसंग्रहे पादुकेचो
त्तरीयंच तर्जन्यांरौप्यधारणं नजीवत्पितृकःकुर्याज्ज्येष्ठभ्रातरिजीवति अथताम्रपवित्रंदेवी
५ पुराणे दार्भंपवित्रं ताम्रंवाराजतंहैममेववा बिभृयाद्दक्षिणेपाणौपवित्रंचोत्तरोत्तरं वर्णभे
देनव्यवस्थास्मृतिसारे दर्भैःपवित्रंविज्ञेयंब्राह्मणस्यविशेषतः हेमराजतताम्राणिक्षत्रवि
ट्शूद्रजातिषु त्रिधातुमुद्रामाहाश्वलायनः अग्रंथिकंचहेमंच तथालोहत्रयोद्भवं गायत्र्य
क्षरवर्णेनगृह्णीयात्ताम्रमुत्तमं अनुष्टुभस्तथारौप्यंत्रिष्टुभःकनकोत्तमं गायत्र्यक्षराणिचतुर्विंशति २५८
अनुष्टुभोद्वात्रिंशत्त्रिष्टुभश्चतुश्चत्वारिंशत् शांकांकारयित्वातोभिस्तजेदंगुलीयकं एवंलोहत्र
ला

येणेव कृतं रक्षोघ्नमुत्तमं ॥ ऋद्धे धार्यं दिवारात्रं त्रयं सममथापि वा अभिसृजेत्कुर्यात् शलाकात्रयं नैरं तर्येण संयोजयेत् न तु वेणी अग्रंथिकानुपपत्तेः शारदातिलके तु तारताम्रसुवर्णानां अर्कषोडशरेदुभिः कृतात्रिशक्तिमुद्रेयं तीव्रदारिद्र्यनाशिनी अत्र ग्रहणे वेष्टितामुद्रेत्येवं तृतीयचरणः क्वचित्पठ्यते तारं रूप्यं अर्काः द्वादश रवेंदवो दश हेम रूप्यताम्राणां क्रमेण दश द्वादश षोडश भागैर्मुद्रा कार्येत्यर्थः नवरत्नमुद्रा तु आचारमयूखे ज्ञेया इति हेमाद्रि पवित्रप्रकरणं कौशिकः गवां वालपवित्रेण संध्योपास्तिं करोति यः स वै द्वादश वर्षाणि कृतसंध्यो भवेन्नरः भरद्वाजः रोम्णां पवित्रकरणे नियमो न कुशेष्विवेति इति गोवालपवित्रं अथ स्नानविधिः गौतमः कृतशौचविधिः सम्यक्स्वाचांतो दंतधावनं विधायोषसि कुर्वीत स्नानं च विधिपूर्वकं अथ स्नानभेदानाह शंखः स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं क्रियास्नानं तु षष्ठं षोढा स्नानं प्रकीर्तितं तत्र नित्यस्नानलक्षणमाह स एव अस्नात

तद्धे

स्तु पुमान्नाहे जिषाग्निहवनादिषु प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितं कौर्मे नित्यमभ्युद
यात्पूर्वं स्नातव्यं शुद्धिमिच्छता एष साधारणो धर्मश्चतुर्वर्णस्य कीर्तितः स्त्रीभिः शूद्रैश्च कर्तव्यं
मंत्रवर्जं विगाहनं चतुर्विंशतिमते उषस्युषसि यत्स्नानं संध्यायामुदितेपि वा प्राजापत्येन तत्तु
ल्यं सर्वपापप्रणाशनं उदितेपीति मुख्यकालासंभवे गौणकालपरं अस्मिन्पक्षे संध्याप्युत्कृष्य
ते इति भट्टोजीये चंद्रिकायां तु न च प्रातःस्नानोत्कर्षे संध्योत्कर्षः शंक्यः कर्मणां स्वस्वकाल ए
व यथाकथंचित्कर्तव्यत्वात् प्रातः संध्यामुपासीत दंतधावनपूर्विकामिति याज्ञवल्क्य वचना
च्चेत्युक्तं इदमेव युक्तं नित्यमेव तु मध्यान्हे प्रातश्च क्वचकस्यचिदिति स्मृत्यर्थसारात् मध्यान्ह
ए नित्यं स्नानमित्याचारादर्शोक्तेः अथ स्नानविधिः तत्रात्र मध्याह्नयोर्गृहस्थः कुर्यादेकतरत्रवे
त्याश्वलायनपरिशिष्टे गृहस्थस्य प्रातःस्नानवैकल्पिकत्वोक्तेश्च उषःकालं तु विष्णुराह नाडिकाः २९
षट्पंचाशत्प्रातस्त्वेकाधिकोरुणः उषःकालोष्टपंचाशत्क्षेषः सूर्योदयः स्मृत इति संग्रहे तु पंचपंच

हुं फट् कारेण मंत्रेण सकृच्छित्वा समुत्धरेत् अथ प्रयोगः कुशसमीपे गत्वा स्नातः शुक्लवस्त्रधरः प्राङ्मु
खउदङ्मुखो वा स्थित्वा प्रणवेन दर्भान्स्पृष्ट्वा ॐ विरिंचिना सहो[illegible]ति मंत्रं उच्चार्य प्राङ्मुखउदङ्मुखो — सहो
वोपविश्य ॐ हुं फट् इति सकृच्छित्वा अच्छिन्नाग्रान् शुभान्पवित्रान् कुशान्समुद्धरेत् इति कुशग्रह
णविधिः अथ कुशाभावे तत्प्रतिनिधिर्माहान्विः कुशाः काशा यवा दूर्वा उशीराश्च सकुंदकाः गोधूमा
कुंदः — व्रीहयो मुंजा दश दर्भाः सबल्बजाः कुंदरः कंदनाम्ना प्रसिद्धः बल्बजो दक्षिणदेशे मोळ इत्याचा
र प्रकाशे बल्बजं शुच्याई तृणमित्याचारार्के गोधूमादिशब्दास्तत्तत्तृणपराः इति कुशप्रकर
अथ हेमा — णं. तत्र स्कांदे अतो हेममयं कुर्यादंगुलीयक[illegible]संज्ञकं पवित्रं परमं ह्येतदनामांगुलसंज्ञकं
दिपवित्र — अन्यानि च पवित्राणि कुशदूर्वात्मकानि च हेमात्मकपवित्रस्य कलां नार्हंति षोडशीं पारिजा
प्रकरणं. — ते पवित्रोक्तप्रकारेण हेम्ना कुर्यात्पवित्रकं हेमेन सर्वदा सर्वं कुर्यादेवाविचारयन् आश्वला
यनः अन्यैर्धृतं न गृह्णीयात्पवित्रं तृणसंभवं हेमादयस्तु संग्राह्याः सम्य[illegible]ष्टप्य वह्निना
इति

न्नादेयमुच्यते तीर्थतोयं ततः पुण्यं ततो गांगं तु सर्वतः योगयाज्ञवल्क्यः त्रिरात्रफलदा नद्यो याः काश्चि
३० दसमुद्रगाः समुद्रगास्तु पक्षस्य मासस्य सरितांपतिः त्रिरात्रफलदाः त्रिरात्रव्रतफलदाः एवं मास
पक्षयोरपि भविष्योत्तरे गंगायां मौसलं स्नानं प्राजाप त्यसमं विदुरिति महाभारते चांद्रायणसह
स्रं तु यश्चरेत्कायशोधने पिबेद्यश्चापि गंगांभः समौ स्यातां न वा समौ भवंति निर्विषाः सर्पा यथा
तार्क्ष्यस्य दर्शनात् गंगाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते नायमर्थवादः तदुक्तं कौर्मे स्नानमा
त्रेण गंगायाः पापं ब्रह्मवधोद्भवं दुराधर्षं कथं यातिचिंतयेद्यो वदेदपि तस्याहं प्रददे पापं कोटिब्रह्म ५
वधोद्भवं स्तुतिवादमिमं मत्वा कुंभीपाकेषु जायते आकल्पनरकं भुक्त्वा ततो जायेत गर्दभ इति संग ३०
मस्नानं दशगोदानफलदं तदुक्तं ब्राह्मे नद्यां प्रत्येकशः स्नाने भवेद्गोदानजं फलं गोप्रदानैश्च दशभिः
स्नाने पुण्यं तु संगमे अत्र विशेषः प्रयागमाहात्म्ये कर्तव्यं न निमज्जेत पृथिव्यां संगमांतरे प्रयागे न[illegible]नि
षिद्धोस्ति न च तत्रैव तच्चरेत् कृष्णामहात्म्ये स्नानं कृत्वा संगमे तु संगमे[illegible]शं प्रपूज्य च सर्वपापविनिर्मु

कोगतिं प्राप्नोति शाश्वतीं। संगमादुत्तरे कूले प्रमाणं धनुषोद्वयं पश्चिमे धनुषैकेन संगमं पापनाशनं
षट्कूलमध्ये यदि वा कृतं च स्नानं सदा साधुभिर्मैंत्र वित्रमैः संतर्प्य देवांश्च यथैव ऋषीन्मुदा पितॄन्स्ति
लैर्मैंत्र पूतैः कुशाग्रैः। यमः नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं तीर्थाभावे तु कर्तव्य मुष्णोद
कपरोदकैः परोदकैः शीतोदकैः गंगादिपुण्यजलमिश्रवणेन कूपवाप्याद्युदकमपि पवित्रं भव
ति तदुक्तं मत्स्यपुराणे पुण्याम्भसः समायोगाद्दुष्टमप्यंबु पावनं भारतेपि अपवित्रमपि प्रा
प्य गंगां याति पवित्रतां \ अथ निषिद्धोदकानि जलाशयोत्सर्गपद्धतौ सदाजलं पवित्रं स्यादपवित्र
मसंस्कृतं कुशाग्रेणापि राजेंद्र न स्पृष्टव्यमसंस्कृतं मनुः परकीयनिपानेषु स्नायान्नैव कदाचन
निपानकर्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते यानशय्यासनान्यस्य कूपोद्यानगृहाणि च अदत्तान्यु
पभुंजान एनसः स्यात्तुरीयभागिति तत्र पारक्यशब्देन यदनुत्सृष्टं अप्रतिष्ठितं न देवगृह्यते सर्वोद्दे
शेनोत्सृष्टस्य परकीयत्वाभावादिति विज्ञानेश्वर मेधातिथिप्रभृतयः उत्कृष्टजलालाभे तु व्यासः

३१ पंचपिंडान्समुध्दृत्यपारक्येस्नानमाचरेत् स्मृत्यंतरोक्ताः पिंडगताधिकन्यूनसंख्यास्तुयथासाम[illegible]र्थ
वस्थिता इत्याचारादर्शे कूपादौपिंडोध्दरणासंभवे[illegible]धायनः निरुद्धास्तुत्रीन्पिंडान्कूपात्त्रिर्वाघटांस्त
थेति परकीयेपिविशेषः उत्सर्गपद्धतौब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चैवान्यजातयः एभिर्येकारिताः
कूपाःस्नानंतेषुतुकारयेत् अन्यजातयःमूर्धावसिक्ताद्याअनुलोमाः आपस्तंबः अंत्यजैःखानि
ताःकूपास्तडागंवाप्यएवच एषुस्नात्वाचपीत्वाचप्राजापत्येनशुध्यति अत्रापवादःशातातपः
अंत्यैरपिकृतेकूपेसेतौवाप्यादिकेतथा नत्रस्नात्वाचपीत्वाचप्रायश्चित्तंनविद्यते इदंअत्यंतापद्वि
षयमितिशूलपाणिः योगयाज्ञवल्क्यः वृथाउष्णोदकस्नानंवृथाजप्यमवैदिकं इत्थमनुः मृतेजन्म
निसंक्रांतौश्राद्धेजन्मदिनेतथा अस्पृश्यस्पर्शनेचैवनस्नायादुष्णवारिणा संक्रांत्यांभानुवारेचसप्त
म्यांराहुदर्शने आरोग्यपुत्रमित्रार्थीनस्नायादुष्णवारिणा पौर्णमास्यांतथादर्शेयःस्नायादुष्णवारिणा ३१
सगोहत्याकृतंपापंप्राप्नोतीहनसंशयः तदेतत्सर्वमनातुरस्यनद्यादिसद्भावविषयंनद्याद्यभावेत्वाह

उषःकालइत्युक्तं श्राद्धचंद्रिकायांतुपुराणेअरुणोदयोपिस्नानेउक्तः चतस्रोघटिकाःप्रातररुणोदयउच्य
ते यतीनांस्नानकालस्तुगंगांबुसदृशःस्मृतः यतयोनियताज्ञेगयाज्ञवल्क्यः लालास्वेदसमाकी
र्णःशयनादुत्थितःपुमान् स्रवंतिहिसुषुप्तस्यइंद्रियाणिस्रवंतिच अंगानिसमतांयांतिचोत्तमा
न्यधमैःसह अत्यंतमलिनःकायोनवच्छिद्रसमन्वितः स्रवत्येवदिवारात्रौप्रातःस्नानंविशोध
नं प्रातःस्नानंप्रशंसंतिदृष्टादृष्टकरंहितत् सर्वमर्हतिशुद्धात्माप्रातःस्नायीजपादिकं गुणादशस्नान
परस्यसाधोरूपंचतेजश्चबलंचशौचं आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्नघातश्चतपश्चमेधा
बौधायनः समाहंप्रातरस्नायीसंध्याहीनस्त्रिभिर्दिनैः द्वादशाहमनग्निःस्याद्विजःशूद्रत्वमा
प्नुयात् तद्दोषपरिहारार्थंभानुवारेपिशस्यते भानुवारेत्ववश्यंप्रातःस्नानंकार्यमित्यर्थइत्याचा
रार्के अथस्नानोदकानि योगी नद्यांस्नानानिपुण्यानितडागेमध्यमानिच वापीकूपेजघन्यानि
गृहेप्यत्यवराणिच याज्ञवल्क्यः भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकं ततोपिसारसंपुण्यंतस्मा

पुत्रजन्मनि एतद्विवाससास्नानमन्यैत्रैकेनवाससा वार्तामरणवार्ता मेधातिथिः नजलंताडयेत्सङ्ग्यांनज
लेतुमलंत्यजेत् मलंप्रक्षालयेत्तीरेततःस्नानंसमाचरेत् वामनपुराणे निक्षिप्यतीरेकुशपिंजुलानि
पूर्वोत्तराग्राणिमृदंन्यसेच्च प्रक्षाल्यपादौचमुखंचकंठयज्ञोपवीतंचजलंपिबेत्त्रिः कंठयज्ञोपवीतमित्ये
तद्वचनंकंगन्नोत्तरीयमित्येतदर्थंतथानिवीतंकृत्वाप्रक्षालयेदित्यर्थः कराभ्यांधारयेद्दर्भान्शिखाबंधंविधाय
च प्राणायामांस्ततःकुर्यात्कालज्ञानंयथाविधि कालज्ञानंअद्यब्रह्मणोद्वितीयपरार्धे इत्यादि इतिविधान
पारिजाते स्नानसंकल्पःस्नानानंतरंकार्यःसंग्रहे छर्दितेस्नानसंकल्पेक्षुरकर्मणिमैथुने दुःस्वप्नेदुर्ज
नेस्पर्शेषट्सुस्नानंविधीयते सूर्योदयात्पूर्वंरात्रौस्नानादौपूर्वाह्ण रात्रसंबंधिवारोल्लेखः सूर्योदयो
त्तरंवारभवृत्तेः इत्याचारसारेतिथिनक्षत्रादेरपिवर्तमानस्योल्लेखइतिपूर्वमुक्तं। नंदिनीनलिनीसीतामाल
तीचमहापगा विष्णुपादाब्जसंभूतागंगात्रिपथगामिनी भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी द्वा
दशैतानिनामानीयत्रयत्रजलाशये स्नानोद्यतःस्मरेन्नित्यंतत्रतत्रवसाम्यहं स्मृतिसंग्रहे गंगागंगांकु

तथाचारप्रकाशे॥

कुरुक्षेत्रंप्रयागोदधिसंगमं तीर्थान्येतानिसंस्मृत्यततोमज्जेज्जलाशये इदंकृत्रिमजलेषु गंगा
दिपुण्यतीर्थानिकृत्रिमादिषुसंस्मरेदितियोगयाज्ञवल्क्योक्तेः देवलोपि एकांनदीं समासाद्य नान्यांस्ना
ने नदींस्मरेत् अस्यापवादःस्कांदे स्नानकालेन्यतीर्थेषुजप्यतेजाह्नवीजनैः विनाविष्णुपदींकान्य
त्समर्थमघशोधने एवंचपूर्वोदाहृतयोगयाज्ञवल्क्यवचनेगंगादीत्यत्रगुणसंज्ञानबहुव्रीहिरेवांगीकर्तव्य इतिनवि
रोधः वृद्धपराशरः निरुध्यकर्णौनासांचत्रिःकृत्वोन्मज्जनंततः पुराणे ततःशिखांस्वपुरतःकृत्वामज्जेन्न
दीमुखः अथस्नानांगतर्पणंब्रह्मांडपुराणे नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते तर्पणंतुभवेत्त
स्यत्वंगत्वेनप्रकीर्तितं ब्रह्मवैवर्ते नाभिमात्रजलेस्थित्वाकुर्यात्स्नानांगतर्पणं देवानृषीन्पितृगणान्
स्वपितॄंश्चापितर्पयेत् उत्थितैरुदकैःस्नातोनकुर्याद्यदापुनः स्नानांगंतर्पणंविद्वान्कदाचिन्नेवहापये
त् चतुर्विंशतिमते स्नानादनंतरंतावत्तर्पयेत्पितृदेवताः उत्तीर्यपीडयेद्वस्त्रंसंध्याकर्मततः परमिति
उशनाः द्वौहस्तौयुग्मतःकृत्वापूरयेदुदकांजलिं गोशृंगमात्रमुत्धृत्यजलमध्येजलंक्षिपेत् अस्यस्वत्वोक्त
त्वाभावादंजलिनैवदानंयद्ब्रह्मयज्ञांगंस्वपित्रादेस्तर्पणंतद्दक्षिणेनैवस्तृते अंजलिचोदनाभावेनानादे

मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता ॥ ५

भावेपिसूत्रसमपरिशिष्टोक्तत्वा

शेदक्षिणंप्रतीयादितिसूत्रकारोक्तेरितिकमलाकरः अन्येत्वस्यसूत्रोक्तत्वात्तत्रचदक्षिणागकारीइतिप

३३ रिभाषायामुक्तेर्दक्षिणहस्तेनैवसव्यान्वार[illegible]ब्धेनतर्पणंनांजलिनेत्याहुः भगवान् स्नानांगंतर्पणं

कृत्वायक्ष्मणेजलमाहरेत् तत्रमंत्रंप्रयोगेवक्ष्यामः नदीक्षमापनंकौर्मे ज्ञानतोज्ञानतोवापियन्म

यादुष्कृतंकृतं तत्क्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते स्नानाप्रयोगिन्योः शंखयोनिमुद्रयोर्ल

क्षणंआगमे वामांगुष्ठंतुसंगृह्यदक्षिणेनतुमुष्टिना कृत्वोत्तानंततोमुष्टिंअंगुष्ठंतुप्रसारयेत्

वामांगु[illegible]:न्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षिणांगुष्ठसंस्पृष्टाः शंखमुद्रेयमीरिता ॥ अथ

स्नानविधौआचाररत्नमयूखादिधृतपरिशिष्टं अथस्नानविधिस्त्वप्रातर्मध्यान्हेचगृहस्थः कुर्यादेवं

सवनेषु रत्रवाप्रातरेवब्रह्मचारीयतिस्त्रिषुद्विस्त्रिर्वावान[illegible]प्रस्थः तत्प्रातः सहगोमयेनकुर्यान्मृदामध्यं

दिनेसायंशुद्धाभिरद्भिर्नप्रातःस्नानात्प्राक्संध्यामुपासीतप्रातःकृत्स्नंगोमयंअरिक्षस्थं संगृह्यभूमि त ३३

ष्ठंचोपर्यधश्चसंत्यज्यतीर्थमेत्यधौतपाणिपादमुखआचम्यसंध्योक्तवदात्माभ्युक्षणादिकृत्वाद्वि

यमः नित्यंनैमि त्तिकंचैवक्रियांगंमलकर्षणं तीर्थाभावेतु कर्तव्यमुष्णोदकपरोदकैः आतुरविषये
प्रतिप्रसवमाह यमः आदित्यकिरणैः पूतंपुनः पूतंतुवन्हिना आम्नातुमातुरस्नातेप्रशस्तंतुष्णोद
कं आप्तएवसदापूतास्ना सांवन्हिर्विशोधकः तस्मात्सर्वेषुकालेषु उष्णांभः पावनंस्मृतं तत्रापिविशेष
नि माह शीतास्वप्सुषिच्य स्यान्मंत्रसंभारसंभृतः गृहेपिशस्यतेस्नानंनफलंस्यात्तदन्यथा परिशिष्टे
पि नचगृहेमृदास्नायान्नशीतोदकेनशीतोष्णोदकेन गृहेस्नायान्मंत्रविधिंवर्जयेत् बहिर्वाशुचौदे
शेसर्वंपश्चात्कुर्यादिति अत्रापवादः संग्रहे उपरागेर्कवारेचह्यमावास्यांचपर्वसु गृहेवापिप्रकु
र्वीतस्नानंशीतोदकेनच इतिनिषिद्धोदकप्रपंचः अथस्नानेतिकर्तव्यता मार्कंडेयः नादशा
केन वस्त्रेणस्नायात्कौपीनकावृतः नान्यदीयेननार्द्रेणनसूच्याग्रथितेनच अत्रेतरकर्मवत् वस्त्र
द्वयधारणंनियतमितिकल्पतरुः मेधातिथिस्तु एकेनवाससास्नायाद्वाभ्यामपि यमस्मृतेः बहुभि
श्चप्रतीषेधः स्नानेफलमभीप्सतेत्याह आशार्कस्तु व्यवस्थामन्यते अस्पृश्यस्पर्शनेचैववार्तायां

याद न्यत्रादित्याभिमुखोथ साक्षताभिरद्भिः प्राङ्मुख उपवीती देवतीर्थेन व्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मा
३४ दि देवताः सकृत्सकृत्तर्पयित्वाथोदङ्मुखो निवीती सयवाभिरद्भिः प्राजापत्येन तीर्थेन कृष्णद्वैपायनादीनृ
व्याहृतिभि षीन्व्यस्तसमस्ताभिर्द्विर्द्विस्तर्पयित्वाथ दक्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भिर्व्याहृ
तिभिरेव सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ता अग्निः कव्यवाहनइत्यादींस्त्रिस्त्रिस्तर्पयेत्स्नानांग ४
तर्पणमथ तीरमेत्य दक्षिणामुखः प्राचीनावीती ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ते गृह्णंतु म
या दत्तं वस्त्रनिष्पीडनोदकमिति वस्त्रं निष्पीड्योपवीत्यप उपस्पृश्य परिधानीयम[illegible]स्पृश्य परिधाय द्वितीयं चो
त्तरीयं पर्युक्षितं प्रावृत्य द्विराचामेद्यथोक्तवत्संध्यामुपासीतेदं प्रातःस्नानविधानमिति अथ प्रयोगः अं
तरिक्षस्थं गोमयं भूमिष्ठं च द्वुपर्यधश्च संत्यक्तं गृहीत्वा तिलयवकुशाभस्मगोपीचंदनादिकं च गृहीत्वा ती ३४
र्थादि जलसमीपं गत्वा उद्धृतजलैर्बहिरेव हस्तौ पादौ मुखं च प्रक्षाल्य निधीतं यज्ञोपवीतं कृत्वा प्रक्षाल्य
यज्ञोपवीति बद्ध्वा कछशिख आचम्य ॐ भूर्भुवः स्वरित्यात्मानमभ्युक्ष्य द्विराचम्य प्राणानायम्य देशकालौ

संकीर्त्य ममकायवाङ्मनःकृतकर्मदोषपरिहारपूर्वकं सर्वकर्मसुश्रुत्यर्थं नित्यविधिरूपं प्रातःस्नानं करि
ष्ये इति संकल्प्य वीक्षितं गोमयमादाय सव्ये पाणौ निधाय ॐ भूर्भुवः स्वरिति त्रेधा विभज्य दक्षिणभागं
ॐ इति मंत्राद्धृत्वा प्राच्यादिदशदिक्षु क्षिप्त्वा उत्तरभागं तूष्णीं तीर्थे क्षिप्त्वा मध्यमभागं गृहीत्वा मानस्तो
केति कुत्सो रुद्रो जगती गोमयाभिमंत्रणे वि० ॐ मानस्तोके० हवामहे इत्यभिमंत्र्य ॐ गंधद्वारां
दु० श्रियं इति मूर्धादिसर्वांगं आलिप्य प्रांजलिर्वरुणं प्रार्थयेत् तत्र मंत्राः ॐ हिरण्यशृंगं० यन्मया०
यन्मे मनसा० तन्न इंद्रो० पुनः अवते हेळ इति द्वयोरजीगर्तिः शुनःशेपो वरुणस्त्रिष्टुप् वरुणप्रार्थने वि०
ॐ अवते हेळो० नि० ॐ उदुत्तमं० मप्रसम्राज इत्यष्टर्चस्य सूक्तस्य भौमोत्रिर्ऋषिः वरुणो देवता त्रि
ष्टुप् छंदः वरुणप्रा० ॐ प्र सम्राजे बृहदर्चा गभीरं० ८ याः प्रवत इत्यस्य वसिष्ठो नद्यो जगती तीर्थाभि
मर्शने ॐ याः प्रवतो० भवंतु ततो वस्त्रं शिखां च स्वपुरतः कृत्वा नाभिमात्रजले गत्वा प्रवहल्ले प्रवाहाभि अ
मुखः अन्यत्रार्काभिमुखः त्रिवारमवगाह्य शरीरं प्रक्षाल्य द्विराचम्य मार्जयेत् अंबयो यंत्यध्वभि

थि

३५ रित्यष्टर्चस्य काण्वो मेधातिथिर्ऋषिः आद्यानां सप्तानामापो देवताः अष्टम्या आपोग्निश्च देवते आद्या
नां तिसृणां गायत्रीछंदः चतुर्थ्याः पुर उष्णिक् पंचम्यनुष्टुप् षष्ठी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ मार्जने ॐ अंबयो
ति यंत्य ८ आपो हिष्ठेति नवर्चेन मार्जनं कृत्वा ततोंगुष्ठमूलेन जलं त्रिः प्रदक्षिणमालोडयेत् इमं मे गंग
इत्यस्य प्रैय्यमेधः सिंधुक्षिन्नद्यो जगती जलालोडने विनि० ॐ इमं मे गंगे० ततः अंगुष्ठाभ्यां श्रोत्रे तर्जनीम
ध्यमाभिर्नेत्रे अनामिकाभ्यां नासाबिले संपीड्य कनिष्ठिकाभ्यां मुखं च संमील्य प्रकाश एष्टम ग्नः ऋतं चे
त्यघमर्षणसूक्तं त्रिरावृत्य निमज्योन्मज्य आदित्यमवलोक्य द्वादश कृत्व आप्लुत्य पाणिभ्यां शंखमुद्रया यो
निमुद्रया वोदकमादाय मूर्ध्नि मुखे बाह्वोरुरसि चात्मानं गायत्र्याभिषिच्य त्वं नो अग्ने० ॐ स त्वं नो अग्ने०
ॐ तरत्समंदी० ४ पुनः स्नायात् मूर्ध्नि वाभिषिंचेत् ॐ तद्विष्णोः परमं० ॐ अग्ने रक्षाणो० ॐ यत्किंचे
दं० इति जपेत् अथ नाभिमात्रे जले तिष्ठन् स्नानांगतर्पणं कुर्यात् साक्षताभिरद्भिः प्राङ्मुख उपवीती देव ३५
तीर्थेन ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि भूर्देवां० भुवो देवांस्त० स्वर्देवां० भूर्भुवः स्वर्देवां० ततो निवीती

द्विराचम्य संयतप्राणः कर्म संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रिधा विभज्य दक्षिण
भागं प्रणवेन दिक्षु निक्षिप्योत्तरभागं तीर्थे क्षिप्त्वा मध्यमं मानस्तोक इत्यृचाभिमंत्र्य गंधद्वारामित्यृचा मूर्धा
दि सर्वांगमालिप्य प्रांजलिर्वरुणं हिरण्यशृंगमिति द्वाभ्यां अव ते हेड इति द्वाभ्यां प्र सम्राजे बृहदर्चेति सूक्ते
न च संप्रार्थ्य हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं तं न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनरित्यर्थ्याः
प्रवत इत्येतया तीर्थमभिमृश्यावगाह्य स्नातो द्विराचम्य मार्जयेदंब्रयो यंत्यध्वभिरित्यष्टाभिरापो हि ष्ठा म
यो भुव इति नवभिरथ तीर्थमंगुष्टेनेदूत्यृचाक्षिप्य दक्षिणमालोड्य प्रकाशपृष्ठमग्नो घर्षणसूक्तं त्रिरावृत्य निम म
ज्योन्मज्यादित्यमालोक्य द्वादश कृत्व आप्लुत्य पाणिभ्यां शंखमुद्रया वोदकमादाय मूर्ध्नि मुखे बाह्वोरुरसि चा
त्मानं गायत्र्याभिषिंचन् त्वं नो अग्ने वरुणस्य विद्वानिति द्वाभ्यां तरत्समंदी धावतीति सूक्तेन पुनः स्नात्वा मूर्ध्नि चा
भिषिंचेत् तद्विष्णोः परमं पदमग्ने रक्षाणो अंहसो यत्किंचेदं वरुण दैव्ये जन इत्येताञ्जपेत् ओं नमोभिमुखं सरित्सु स्ना

मंमेगंगे

रणमित्येतदुपदिष्टं महात्मभिः अथप्रयोगः नद्यादौगत्वाशिखांबध्वाजानूर्ध्वजलेतिष्ठन् अन्यथा तू
पविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्य ममकायिकवाचिकमानसिकदोषपरिहारपूर्वकसर्वकर्मसु
शुध्यर्थंनित्यविधिरूपंप्रातःस्नानंकरिष्येइतिसंकल्प्यप्रवाहाभिमुखःत्रिरवगाह्यांगानिनिमृज्यस्ना
त्वाद्विराचम्यापोहिष्ठेतिमार्जनंकृत्वाइमंमेगंगेइतिजलमालोड्याघमर्षणंत्रिरावृत्तेनऋतंचेतिसूक्तेन
जलनिमग्नतयाकृत्वास्तुत्याचम्यजलतर्पणंकुर्यात् तथापारिजाते गृहस्थस्यप्रवाहोदकेमज्जनरूपंस्ना
नं वापीकूपतडागाद्यप्रवाहेषुहस्ताभ्यांशिरआसेचनरूपं यतिवनस्थब्रह्मचारीणांसर्वत्रनिमज्ज
नरूपंस्नानमिति इतिसंक्षिप्तस्नानविधिः अथगृहस्नानविधिः व्यासः शीतास्वप्सु निषि
च्योष्णामंत्रसंभारसंभृताः गृहेपिशस्यतेस्नानंनफलंस्यात्तदन्यथा कात्यायनः यथाहनितथाप्रा
तर्नित्यंस्नायादतंद्रितः दंतान्प्रक्षाल्यनद्यादौगृहेचेत्तदमंत्रवत् अमंत्र वदितिनमोल्पत्वमर्थः यत्तु
मंत्रशून्यत्वमेवार्थइतिकेचित्तन्नगृहेपिहिद्विजातीनांमंत्रवत्स्नानमिष्यतइतिजैमिनिवचोविरोधात् गृ ३५

हस्नानविधौप्रातिस्विका ल्पमंत्रपागाच्च यमः पादौप्रक्षालयेत्पूर्वंमुखंयज्ञोपवीतकं द्विराचम्यकराभ्यां
चदर्भान्धृत्वाशिखांस्पृशेत् प्राणायामंनतः कुर्यात्कालज्ञानंयथोदितं आपोहिष्ठेतिमंत्रेणइमंमेगंगइत्य
थ अतोदेवेतिसूक्तेनसावित्र्याचाभिमंत्रयेत् शीतोदकेतुदर्भैश्चपश्चादुष्णोदकंक्षिपेत् आश्वला
यनः स्नानमध्येत्वाचमनंतर्पणंवस्त्रपीडनं करपात्रगतंतोयंगृहेचैतानिवर्जयेदिति बोधायनः गृ
हस्नानेनतुप्रोक्तंमार्जनंतर्पणादिकं नांतराचमनंकुर्यात्स्पश्चादाचम्यशुध्यति संग्रहेपि स्नानमध्येना
चमनंमार्जनंतर्पणंनच वस्त्रस्यपीडनंनेवसंकल्परहितंतथा संकल्परहितंस्नानमध्येसंकल्पर
सर्वथा हितं नतुसंकल्परहितमित्यर्थः गृहेगृहमुखंस्नानंमध्येसंकल्पवर्जितमितिवृहधर्मोक्तेः यत्वाचारं
ऽादर्ये वापीकूपगृहस्नानेसूतकेमृतकेतथा मासोचारंनकुर्वीतत्ततोयंरुधिरंभवेदितिवचस्तत्रमूलं
मृग्यमित्याचारप्रकाशे आश्वलायनः आसनेरहितंस्नानंपाषाणेसूर्वतःस्थितेः गृहएतानिवर्ज्यानिस
र्वदाद्विजसत्तमेरिति आसनेविशेषमाहमनुः श्रीपर्णीचशमीशल्लीकदंबोवारुणस्तथा पंचासनोपविष्ट

स्तु स्नानहोमादिकंचरेदिति अथप्रयोगः हस्तौपादौ मुखंयज्ञोपवीतंच प्रक्षाल्य गृहाभिमुखो द्विराचम्य
कराभ्यांदर्भान्धृत्वा शिखांबध्वाप्राणानायम्य देशकालौसंकीर्त्यमम कायवाङ्मनः कृतदोषपरिहारपू
र्वकं सर्वकर्मसुशुध्यर्थंनित्यविधिरूपं प्रातःस्नानंकरिष्य इति संकल्प्य स्नानपर्याप्तमुष्णोदकंपात्रे
आदाय ॐ आपोहिष्ठा०१ ॐ इमंमेगंगे०१ ॐ शंनोदेवी०५ ॐ तत्सवितु०१ इत्यभिमंत्र्यशीतोदक
पात्रे निषिच्यगंगादितीर्थानिप्रयागराजंच संस्मरन्स्नात्वाचामेत् मार्जनांतेआचमनतर्पणाघम
र्षणवस्त्रनिष्पीडनादि वर्जयेत् यद्वा स्नानोत्तरंशुचौदेशे गृहाद्बहिरुपविश्य मार्जनादिसर्वंकुर्यात्
बहिर्वाशुचौदेशे सर्वंपश्चात्कुर्यादिति परिशिष्टोक्तेः पारिजातेतु शंनोदेवी० आपःपुनंतु द्रुपदादिवे
न्मुमुचानःस्विन्नःस्नात्वा मलादिव पूतंपवित्रेणेवाज्य मापःशुंधंतुमेनसः १ ऋतंचसत्यं०१ आपोहिष्ठा०
इतिपंचमंत्रैरुष्णोदकमभिमंत्र्य नत्रनंदिनीनलिनीसीतामालतीचमहापगा विष्णुपादाब्जसंभूतागं
गात्रिपथगामिनी भागीरथीभोगवतीजान्हवीत्रिदशेश्वरी इतिगंगामावाह्यशीतास्वप्सुनिषिच्यतेनस्ना

भू०

उदङ्मुखः प्राजापत्यतीर्थेन सयवाभिरद्भिः कृष्णद्वैपायनादयो ये ऋषयः तानृषींस्त० भुव० स्वर्ऋ० भूर्भुवः स्व
र्ऋ० ततः प्राचीनावीती दक्षिणामुखः पितृतीर्थेन सतिलाभिरद्भिः सोमः पितृमान्यमोंगिरस्वान ग्निष्वात्ता अ
ग्निः कव्यवाहन इत्यादयो ये पितरः तान्पितं स्त० भूः पितं० भुवः० स्वः० भूर्भुवः० इति तर्पयित्वा तीरमेत्य द
क्षिणामुखः प्राचीनावीती येके चास्म० इति स्नानवस्त्रं निष्पीड्योपवीती यन्मया दूषितं तोयं शारीरमलसंभ
वात् तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहमित्यंजलिना यक्ष्मतर्पणं विधाय नदीं प्रार्थयेत् ज्ञानतोज्ञा
न० नमोस्तुते अथैतत्करणाशक्तो साग्निकस्य वा संक्षिप्तस्नानविधिरुच्यते कात्यायनः अल्पत्वाद्धो
मकालस्य बहुत्वात्स्नानकर्मणः प्रातः संक्षेपतः स्नानं होमलोप विगर्हितः दक्षोपि प्रातर्न तथा त्स्ना
नं होमलोप विगर्हितः अतो मध्यान्हकाले तु स्नानं विस्तरतश्चरेत् योगयाज्ञवल्क्यः योसौ विस्तरतः
प्रोक्तः स्नानस्य विधिरुत्तमः असामर्थ्यान्न कुर्यात्चेत्तत्रायं विधिरुच्यते स्नानमंतर्जले चैव मार्जना
चमने तथा जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनं अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः स्नाना च

न्नप्राशनात्प्रागाचौलं बालकः स्मृतः कुमारकस्तु विज्ञेयो यावन्मौंजीनिबंधनं इति नैमित्तकस्नानं अथका
म्यं शंखः पुष्यस्नानादिकं यत्तु दैवज्ञविधिचोदितं तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् पुल
३८ स्त्यः पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ अमायां च नदीस्नानं पुनात्यासप्तमं कुलं आदित्यपुराणे
गुरुवारेप्यमावास्यामश्वत्थच्छायवारिणी स्नानं प्रयागस्नानेन समं पातक नाशनं प्रार्थनामं
त्रः जीवो बृहस्पतिः सौरिराचार्यो गुरुरंगिराः वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम इति काम्य
स्नानं अथ क्रियांगं शंखः जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन् स्नानं समाचरेद्यस्तु
क्रियांगं तस्य कीर्तितं अथ मलापकर्षणं स्नानं स एव मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं मला
पकर्षणार्था तु प्रवृत्तिस्तस्य नान्यथा बौधायनः नंदासु चैव रिक्तासु पूर्णासु चनयासु च द्वादश्यां चै ३८
व सप्तम्यां व्यतीपाते स वैधृतौ रविसंक्रमणे चैव नाभ्यंगस्नानमाचरेत् अन्ये च निषेधाः ग्रंथांतरे 
याः ते च सर्वे रागप्राप्तविषया इति हेमाद्रिः पुरुषार्थचिंतामणौ उपोषितस्याक्लिन्नस्य कृत्तकेशनख

स्यच तावच्छ्रीस्तिष्ठतिप्रीत्यायावत्तैलंनसंस्पृशेत् प्रचेताः तैलाभ्यंगनिषेधेतुतिलतैलंनिषिध्यते
तदपिशुद्धमेव अतएवबृहस्पतिः संक्रांत्यांरविवारेचषष्ठ्यांभौमदिनेतथा द्रव्यांतरयुतंतै
लंनदुष्यतिकदाचन यमोपि घृतंचसार्षपंतैलंयत्तैलंपुष्पवासितं नदोषःपक्वतैलेषुस्ना
नाभ्यंगेषुनित्यशः यत्रत्वभ्यंगस्यैवनिषेधस्तत्रसार्षपाद्यपिनिषिध्यते अभ्यंगस्यनिषेधे
तुसार्षपादेर्निषिद्धतेतिप्रचेतस्स्मरणात् अभ्यंगलक्षणंआयुर्वेदे मूर्ध्निदत्तंयदातैलंभवेत्सर्वां
गसंगतं स्नातोनितर्पयेद्याङ्गनभ्यंगःसउदाहृतः अन्यत्रतु शिरोभ्यंगावशिष्टेनतैलेनांगंनलेप
येत् इत्युक्तं इतिमलापकर्षणंस्नानं अथक्रियास्नानंशंखः सरःसुदेवखातेषुतीर्थेषुचनदीषुच
क्रियास्नानंसमुद्दिष्टंस्नानंतत्रक्रियामता तथा यत्तुतीर्थादिषुस्नानंक्रियास्नानंप्रकीर्तितं स्ना
नमेवफलंयत्तुक्रियास्नानंप्रकीर्तितं इतिक्रियास्नानं ताःषट्सु स्नानभेदाः अनेकेषांस्नाना ख्य
नांएककालसंनिपातेनित्यनैमित्तिककाम्यानामुत्तरोत्तरेणपूर्वपूर्वस्यप्रसंगसिद्धिः अन्येषां

तत्र तानेककालेद्वयं स्नानमिति व्याघ्रपादस्मृतेः तत्र संक्रांतिनिमित्तनित्यस्नानयोः सन्निपाते
संक्रांतिनिमित्तं स्नानं करिष्ये इति संकल्प्य स्नानं कार्यं तेन नित्यस्नानस्यापि सिद्धिः इयं प्रसंगसिद्धि
मध्याह्नस्नानदर्शश्राद्धांगस्नानसंनिपाते मध्यान्हस्नानं दर्शश्राद्धांगस्नानं च तंत्रेण करिष्ये इति सं
क॰ल्प्य स्नायात् तेन स्नानद्वयसिद्धिः इदं तत्रोदाहरणं अथाशक्तो अशिरस्नानमाह जाबालिः
अशिरस्कं भवेत्स्नानं स्नानाशक्तो तु कर्मिणां स्मृतिसारे चक्षुरोगी शिरोरोगी कर्णरोगी कफाधि
कः कंठस्नानं प्रकुर्वीत शिरस्नानसमं हि तत् तथा शिरोरोगी जटी चैव स्नायादशिरसं तथा
आपोहिष्ठादिभिर्मंत्रैर्मार्जयेन्मूर्ध्नि वै जलं इत्यशिरस्कस्नानं अथ गौणस्नानानि योगयाज्ञव
ल्क्यः असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया मंत्रस्नानादितः सप्त केचिदिच्छंति सूरयः मां
त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् आपोहिष्ठादिभिर्मां
त्रं मृदालंभश्च पार्थिवं आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतं यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते

लापश्चाद्बहिः शुचौदेशेमार्जनादिविधिंकुर्यादित्युक्तं धर्माब्धिसारे तुशीतोदके उष्णोदकंप्रक्षिप्यशं
नोदेवीत्यादिपंचभिरभिमंत्र्यस्नायादित्युक्तं इतिगृहस्नानविधिः इतिनित्यस्नानं अथनैमित्तिकं
गोभिलः निमित्तादथजातंतुस्नानं नैमित्तिकंस्मृतं अत्रिः तूष्णीमेवावगाहेत यदास्यादशुचिर्नरः आ
चम्यप्रयतः पश्चात्स्नानंविधिवदाचरे दिति गार्ग्यः कुर्यान्नैमित्तिकंस्नानंशीताद्भिः काम्यमेवच
आपस्तंबः अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरेभगे स्नानंनैमित्तिकंकार्यंदैवपित्र्यविवर्जितं दैवपि
त्र्यविवर्जितंदेवादितर्पणरहितं निमित्तान्याहमनुः अजीर्णेभ्युदितेवांतेश्मश्रुकर्मणिमैथुने दुःस्वप्ने
दुर्जनस्पर्शेस्नानमात्रंविधीयते शुनाचैवश्वपाकेनमृतनिर्हारकेणवा स्पृष्टमात्रस्तुकुर्वीतसचेलं
प्लावनंजले परिजाते शवंदृष्ट्वाशवंस्पृष्ट्वागत्वाशवगृहंतथा शवानुगमनंकृत्वासवासाजलमावि
शेत् मार्कंडेयपुराणेतुशवदर्शनंप्रक्रम्यशुध्येदर्कविलोकनादित्युक्तं शिखादिविषयेआचारप्र
दीपे शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतं रजस्वलादिसंस्पर्शेस्नानमेवकुमारके शिशुस्त्व

कीर्त्य वारुणस्नानाशक्तोहं अनुकल्पनूपं मंत्रस्नानं करिष्ये इति संकल्प्य सव्ये पाणो उदकं गृहीत्वा आपो
हिष्ठेति तृचस्य आंब० मार्जने विनि० दर्भैर्वा महस्तैस्तैः उदकैर्मार्जयेत् ॐ आपोहिष्ठा० इति पादयोः
ॐ तान ऊर्जे इति मूर्ध्नि ॐ महेरणाय० इति हृदये ॐ योवः शि० मूर्ध्नि ॐ तस्य भाज० हृदये ॐ उ
शती० पादयोः ॐ तस्मा अरंग० हृदये ॐ यस्य० पादयोः ॐ आपोज० मूर्ध्नि अथार्धचशः ॐ आ
पोहि मूर्ध्नि ॐ महेरणाय० हृदये ॐ योवः शिवत० पादयोः ॐ उशती हृदये ॐ तस्मा० पादयोः ॐ
आपोज० मूर्ध्नि अथर्क्षः ॐ आपोहि हृदये ॐ योवः शि० पादयोः ॐ तस्मा अरं० मूर्ध्नि अथन
चेन ॐ ॐ आपोहिष्ठा० चनः मूर्ध्नि मार्जयित्वा दक्षिणहस्ते जलं गृहीत्वा गायत्र्या गाथिन० जलाभि
मंत्रणे वि० ॐ तत्स वि० इति दशावृत्त्याभिमंत्र्य प्रणवस्य ब्रह्मा० आप्प्राशने वि० ॐ ॐ इति पीत्वा द्वि
राचामेत् इति परिशिष्टोक्तमंत्रस्नानविधिः यद्वा विष्णुस्मृतो तृचाभिमंत्रितेस्तोयैः प्रक्षिपे ४०

न्मूर्ध्निसर्वतः अनुकल्पमिदंस्नानंसर्वपापापहंनृणां संकल्पांतंपूर्ववत्कृत्वादक्षिणपाणितलेजलं
गृहीत्वा ॐ आपोहिष्ठा०३ इतितृचेनाभिमंत्र्यतेनमूर्धादिसर्वांगंप्रोक्ष्यआचामेत् एतानिचगौ
वंदन णस्नानानिजपसंध्यावेदाध्ययनेष्वेवशुचित्वकारिणी तदाहाचार्यः प्रातःस्नातुमशक्तस्यरोगा
द्यैर्वाभयाच्चवा पूर्ववस्त्रंपरित्यज्यगौणस्नानेनशुध्यता सचकर्मस्वनर्हःस्याच्छ्राद्धदेवार्चनादि
षु जपेत्संध्यांतथावेदान्सोधीयीतयथाविधीतिकेचित् अन्येतु अत्रसंध्यादीनांकेषांचिदु
पादानंऔपासनहोमब्रह्मयज्ञादिसकलनित्यकर्मणामुपलक्षणार्थं अन्यथाप्रातःस्नानस्यैवै
कल्पिकत्वात्प्रातर्वारुणेनास्नातस्यमध्यान्हपर्यंतंसकलकर्मसुनित्यमनधिकारापत्तिः तथाश्राद्ध
निषेधः सगतिकमहालयकाम्यश्राद्धादिपरः नतुदर्शादिपरःतस्यकालांतरासत्वात् अकरणेप्राय
श्चित्तश्रवणाच्चदेवार्चननिषेधोपिनैमित्तिककाम्यदेवार्चनपरःनतुनित्यदेवार्चनपरः वरंप्राणा
परित्यागःशिरसोवापिकर्तनं नत्वसंपूज्यभुंजीतभगवंतंत्रिलोचनं सूतकेमृतकेचैवनदोषःपरिकी

र्तितइत्यादिलैंगादिवचनैः आशौचेपि तस्यकर्तव्यत्वाभिधानात्कैमुत्यन्यायेनात्रापितत्प्राप्तेरित्याहुः
इतिगौणस्नानानि इत्याचारेंदौस्नानप्रकरणं अथस्नानोत्तरकृत्यंकार्ष्णाजिनिः स्नानवस्त्रं ततः
पीड्यपुनराचमनंचरेत् तत्रविशेषमाहहारीतः तस्मादेकंजलस्यांतंपादमेकंस्थलेतथा कृत्वा
चामन्विधानज्ञः पूतोभवतिनान्यथा नतोदर्भांस्त्यजेत् तथाचस्मृतिः विकिरेपिंडदानेचतर्पणे
स्नानकर्मणि आचांतःसप्तकुर्वीतदर्भसंत्यजनंबुधः हारीतः स्नात्वानगात्रमवमृज्यान्नशिरोवि
धुनुयान्नोत्तरीयविपर्यासंकुर्यादिति विष्णुपुराणेतुस्नातोंगानिनमृज्याच्चस्नानशाट्यानपाणि
नेतिपाणिस्नानशाटीनिषेधइत्युक्तं तत्रसमर्थस्यमार्जनाभावः असमर्थस्यपाणिशाटीमार्जना
भावइतिव्यवस्थेतिहरिहरः केशाद्बिंदून्पुरतःस्रावयेत् तदुक्तंसंग्रहे सुराबिंदुसुराज्ञेयाःपृ
ष्ठतःकेशबिंदवः तएवपुरतोज्ञेयाःसर्वतीर्थोपमाबुधैः मार्जनपक्षेधौतवस्त्रेणांगमार्जनंकार्यं
तदुक्तंदेवलेन अंगानिशक्तोवस्त्रेणपाणिनानचमार्जयेत् धौतांबरेणवाप्रोंछ्यबिभृयात्क्षुष्कवा ४१

अवगाहोवारुणंस्यान्मानसंविष्णुचिंतनं अथकापिलस्नानंबृहस्पतिः आर्द्रेणकर्पटेनांगशोधनं
कापिलंस्मृतं अथगायत्रं गायत्र्याजलमादायदशकृत्वोभिमंत्र्यच शिरश्चांगानिसर्वाणिप्रो
क्षयेत्तेनवारिणा स्नानंगायत्रकंनामसर्वपापप्रणाशनं अशक्तानांतुजंतूनांगुरोःपादोदकंशु
भं विप्रपादाद्विष्णुपदात्तुलस्याःसंभृतंजलं अथसारस्वतं व्यासः चिद्वत्सरस्वतीप्राप्तंस्ना
नंसारस्वतंविदुः अथाचाराकर्कादिधृतपरिशिष्टं अथाशक्तस्यमंत्र स्नानंशुचौदेशेशुचिराचां
तः प्राणानायम्यदर्भपाणिःसव्येपाणावपःकृत्वातिसृभिरापोहिष्ठीयाभिःप्रणवपूर्वंदर्भोदकैः पच्छस्त्रिभि
मूर्ध्निहृदये मार्जयेत्पादयोर्मूर्ध्निहृदयेपादयोर्हृदयेपादयोर्मूर्ध्निचाथार्धर्चशोमूर्ध्निहृदयेपादयोर्हृद
येपादयोर्मूर्ध्निचाथर्चशोहृदयेपादयोर्मूर्ध्निचाथतृचेनमूर्ध्नीतिमार्जयित्वागायत्र्यादशधाभि
मंत्रिताअपःप्रणवेनपीत्वाहिराचामेदित्येतन्मंत्रस्नानमिति अथप्रयोगः प्रक्षालितपाणिपा
दमुखयज्ञोपवीतोधौतवस्त्रधरःआसनेउपविश्यपवित्रेधृत्वाचम्यप्राणानायम्यदेशकालौसं

४२ वस्त्रद्वयावश्यकतामाहयोगयाज्ञवल्क्यः स्नानंदानंजपंहोमंस्वाध्यायंपितृतर्पणं नैकवस्त्रोद्वि
जः कुर्याछ्राद्धभोजनसत्क्रियां एकवस्त्रलक्षणमाहगोभिलः सव्यादंसात्परिभ्रष्टंकटिदेशधृतां
बरः एकवस्त्रंतुतंविद्याद्दैवेपित्र्येचवर्जयेत् आश्वलायनस्मृतावपि उपवीतंयथायस्मिन्धत्तेकर्म
णि वैदिके ब्रह्मचारीगृहस्थ[illegible]श्चतद्वद्वासोपिधारयेत् परिशिष्टे परिधानीयमभ्युक्ष्यपरिधाय
द्वितीयंचोत्तरीयंपर्युक्षितंप्रावृत्यद्विराचामेदिति विष्णुः स्नातएवसोष्णीषेधौतेवाससीबिभृया
दिति उष्णीषंकंकेशजलापकर्षणार्थंवस्त्रमितिपृथ्वीचंद्रः तथा कर्तव्यमुत्तरंवासःपंचस्वेतेषुक
र्मसु स्वाध्यायोत्सर्गदानेषुभोजनाचमनेतथेतिपंचग्रहणानर्थक्यापत्तेः नसर्वत्रवस्त्रद्वयनिय
मइतिमाधवप्रयोगपारिजातौ नववस्त्रपरिधानंसमंत्रकमेवकार्यं वासश्छत्रोपानहश्चापूर्वाश्चे ४२
त्समंत्राइतिकात्यायनोक्तेः मंत्रस्तुयुवंवस्त्राणीतिप्रसिद्धः परिधानप्रकारस्तुयाज्ञवल्क्येनोक्तः

आजानुमूलंवस्त्रंस्यात्त्रिकछंधारयेद्बुधः तन्यूनमधिकंचैवसर्वकर्मसुगर्हितं वामकुक्षौचनाभौच
पृष्ठेचैवयथाक्रमं त्रिकछेनसमायुक्तोद्विजोसौमुनिरुच्यते पंचकछाअपिग्रंथांतरे कुक्षिद्वये
तथापृष्ठेनाभौद्वौपरिकीर्तितौ पंचकछाःस्तुतेप्रोक्ताःसर्वकर्मसुशोभनाः जातूकर्ण्यः परिधानाद्बहिः
कक्षानिबद्धात्यासुरीमताधर्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतः आर्द्रवस्त्रंतुगृहेउर्ध्वमार्गेणनिष्का
शनीयंनद्यांत्वधस्त्यजेत् उर्ध्वमुत्तारयेद्वस्त्रंगृहेनद्यामधस्त्यजेदितिबोधायनोक्तेः जावालिः नि
ष्पीडितंधौतवस्त्रंयदास्कंधेविनिक्षिपेत् तदासुरंभवेत्कर्मपुनःस्नानंविशोधनं वस्त्रंचतुर्गुणीकृ
त्यनिष्पिड्यसदशंतथा वामप्रकोष्ठेनिक्षिप्यस्थलस्थश्चद्विराचामेत् वस्त्रंद्विगुणीतंयस्तुनिर्ष्पी
डयतिमंदधीः वृथास्नानंभवेत्तस्यस्नातस्यदशधांबुनि शुष्कवस्त्रधारणानंतरंसमंत्रमार्द्रवस्त्रनि
ष्पीडनंशाखांतरविषयं आश्वलायनानांतुस्नानानंतरं आर्द्रवस्त्रंसमंत्रंनिष्पीड्यशुष्कवस्त्रंधार

येदितिगृह्यपरिशिष्टेउक्तत्वात्तैस्तथैवकर्तव्यंआचार्योक्तेःप्राबल्यादितिप्रयोगपारिजातेकमलाकरान्हि
के गृहेह्यधोदशांपीड्यंनद्यामूर्ध्वदशंनथेति विधानपारिजाते अधौतंकारुधौतंचपूर्वेद्युर्धौतमे
वच अप्सुयत्पीडितंवस्त्रंतत्त्याज्यंसर्वथाद्विजैः कात्यायनस्तु पूर्वेन्हिधौतंकार्पासंदैवेपित्र्ये
चकर्मणि ग्राह्यंशुध्यंविजानीयात्तदन्यत्क्षालनाच्छुचिरित्याह तदन्यद्दिनद्वयात्पूर्वंधौतमि
त्यर्थइतिप्रयोगचिंतामणौसएव पट्टवस्त्रंकंबलंचधौतमष्टदिनावधि शुद्धंतदन्यथाशुद्धं
पुनःप्रक्षालनाच्छुचि भृगुः श्रौतस्मार्तंतथाकर्मननग्नश्चिंतयेदपि नग्नलक्षणंप्रभासखंडे
नग्नःस्यान्मलवद्वासानग्नःकौशेयकेवलः विकच्छोनुत्तरीयश्चद्विकच्छोवस्त्रएवच नग्नः
काषायवस्त्रःस्यान्नग्नश्चार्धपट्टावृत्तः कौशेयकेवलस्यनग्नत्वोक्तेःवासोंतरसहितकौशे
यत्वेननग्नत्वं परिहितवस्त्रोपरितदुत्तरार्धेनवस्त्रांतरेणवाकटिबंधनंद्वितीयाकक्षातद्दी

ससी शुष्कवस्त्राभावेतुचतुर्विंशतिमते वस्त्रंद्वितीयंनिष्पीड्यसमवाताहनंकृतं स्थापयित्वानु
शिरसिद्वादश्याक्षरमंत्रतः प्रोक्षयेदुपविश्यैवसर्वांगंशोधयेत्ततः अथवस्त्रधारणं मनुः स्नात्वै
वंवाससीधौतेअक्लिन्नेपरिधायच वासोविशिनष्टिवसिष्ठः शुक्लमहतंवासोब्राह्मणस्यकार्या
संमांजिष्ठंक्षौमंक्षत्रियस्येति अहतलक्षणमाहप्रचेताः ईषद्धौतंनवश्वेतंसदशंयन्नधारितं
अहतंतद्विजानीयात्सर्वकर्मसुपावनं ईषद्धौतमकारुधौतंतथाचनदेवलः स्वयंधौतेनकर्तव्या
क्रियाधर्म्याविपश्चिता नतुनेजकधौतेननाहतेननकुत्रचित् नाहतेनेत्येकंपदंस्वयंग्रहणादेव
नेजकनिवृत्तोपुनस्तन्निषेधोन्येनापिब्राह्मणादिनाधौतेनक्रियाकार्येत्येतदर्थं तत्प्रमाणं
योगयाज्ञवल्क्यआह अष्टहस्तंनवश्वेतमिति अत्रदशहस्तमितिवापाठःक्वचित् यंत्र
निर्मुक्तमक्षालितमप्यहतमित्याहसत्यतपाः अहतंयंत्रनिर्मुक्तंवासःप्रोक्तंस्वयंभुवा
शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदा मांगलिक्यंमंगलकर्माणिविवाहादीनि

चोत्तरीयेत्वेनैवशाणादीनांग्रहणमित्याचाररत्ने आश्वलायनः परिधानेशितंशस्तंवासःप्रावरणेतथा
पट्टकूलंतथालाभेब्राह्मणस्यविधीयते आविकंत्रसरंचैवपरिधानेपरित्यजेत् शस्तंप्रावरणेप्रोक्तं
स्पर्शदोषोनविद्यते यो: भोजनंचमलोत्सर्गंकुर्वतेत्रसदावृतः प्रक्षाल्यत्रसरंशुद्धंदुकूलंचसदाशुचि
गौतमः धौताधौतंतथादग्धंसंधितंरजकाहृतं शुकमूत्राद्यसंस्पृष्टंआविकंचातसीभवं पवित्रमि
तिविज्ञेयंसर्वकर्मण्यसंशयं यमः रेतःस्पृष्टशवस्पृष्टंस्पृष्टंमूत्रपुरीषयोः वाताहतंक्षौमवस्त्रंअ
विकंचसदाशुचिः अयमर्थः मूत्रपुरीषाद्यैरननुलेपेवायुनाहतंशुद्धं लेपेतुक्षालनमेवदेवलः
और्णकौशेयकुतपपट्टक्षौमदुकूलजाः अल्पशोध्याभवंत्येतेशोषणमोक्षणादिभिः तान्येवा
मेध्ययुक्तानिक्षालयेच्छोधनैःस्वकैः उत्तरीयमाहजातूकर्ण्यः संग्रंथिपरिमंडलंवस्त्रमुत्तरी
यंकुर्यात् वस्त्रोत्तरीयाभावेत्वेकांगुलंद्व्यंगुलंत्र्यंगुलंचतुरंगुलंवासूत्रैरेवकृतंपरिमंडलमुत्तरी ४४
यंकुर्यादिति इदंचजीवत्पितृकस्यजीवज्ज्येष्ठभ्रातृकस्यनिषिद्धं तदुक्तंस्मृतिसारे उत्तरीयं

योगपट्टेपट्टं तर्जन्यांरोप्य धारणं नजीवत्पितृकः कुर्याज्ज्येष्ठोवाविद्यतेयदि अत्रोत्तरीयमिति योगप
ट्टस्यैवविशेषमित्याचारचंद्रोदयः पादुकेचोत्तरीयंचेति द्वंद्वमनुपाठः एतेनैवतृतीयमुत्तरीयार्थे
वस्त्राभावेदिष्यत इतिविश्वामित्रोक्तमुत्तरीयस्थानापन्नंतृतीयमुपवीतमपिनिषिद्धं द्वितीयव
स्त्रमात्रंतु तस्यापिभवत्येव त्य एकवस्त्रस्यकर्मनिषेधात् जातूकर्ण्यः आभावश्चेद्द्वितीयस्यव
स्त्रचीरंतदाभवेत् अस्याप्यसंभवेपारस्करगृह्ये एकंचेद्वासोभवतितस्यैवोत्तरभागेनप्रच्छादयती
ति धौतवस्त्राभावेतूशनाः स्नात्वानुपहतंवस्त्रंपरिदध्याद्यथाविधि अभावेपूर्ववस्त्रंवासोंभोक्ष्यं
प्रणवेनतु अनुपहतंअपरिहितं शुष्कवस्त्राभावेस्मृतिरत्नावल्यां समवाताहतंचार्द्रंशुष्कवस्त्र
त्वतिपादयेत् नीलीवस्त्रनिषेधोभविष्ये नीलीरक्तंयदावस्त्रंविप्रस्त्वंगेषुधारयेत् अहोरात्रोषि
भूत्वापंचगव्येनशुध्यति अयंचनीलीनिषेधःकार्पासएव ऊर्णायांपट्टवस्त्रेवानीलीरागोनदुष्य
तीतितत्रैवोक्तेः भृगुः स्त्रीधृतशयनेनीलीब्राह्मणस्यनदुष्यति भारते अन्यदेवभवेद्वासः

शायनीयेनराधिप अन्यद्दव्यासुदेवानामर्चायामन्यदेवहि अन्यत्रश्चलोकयात्रायांअन्यदीश्वरद
र्शने सुमंतु अन्यत्स्नानेतथापानेभोजनेचान्यदेवहि वस्त्रशोषणप्रकारमाहशातातपः प्रागग्र
मुदगग्रंवाधोतंवस्त्रंप्रसारयेत् पश्चिमाग्रदक्षिणाग्रपुनःप्रक्षालनाकुचि॥ इत्याचारेंदौस्नानोत्त
रंकृत्यं॥अथतिलकः॥सचद्विविधः ऊर्ध्वपुंड्रस्त्रिपुंडश्चेति तत्रऊर्ध्वपुंड्रउक्तःविष्णुस्मृतौ यागोदा
नंजपोहोमःस्वाध्यायःपितृतर्पणं भस्मीभवतितत्सर्वंऊर्ध्वपुंड्रंविनाकृतं यागादिसर्वकर्मोपलक्ष
णार्थंनपरिसंख्यार्थंउत्तरार्थेसर्वपदश्रुतेः त्रिपुंड्रउक्तोभविष्यत्पुराणे सितेनभस्मनाकुर्यात्त्रिस्त्रि
त्रिसंध्यंचत्रिपुंड्रकं सर्वपापविनिर्मुक्तःशिवेनसहमोदते सत्यंशौचंजपोहोमस्तीर्थंदेवादिसेव
नं तस्यव्यर्थमिदंसर्वंयास्त्रिपुंड्रंनधारयेत् ब्राह्मे ऊर्ध्वपुंड्रंमृदाकुर्यात्त्रिपुंड्रंभस्मनासदा तिलकंवै
द्विजःकुर्याच्चंदनेनयदृच्छया कात्यायनोपि ऊर्ध्वपुंड्रंमृदाकुर्याद्भस्मनातुत्रिपुंड्रकं उभयंचंदने
नैवअभ्यंगोत्सवरात्रिषु पारिजाते स्नात्वापुंड्रंमृदाकुर्यात्धृत्वान्वेवतुभस्मना देवानभ्यर्च्यगंधे ४५

न्द्विकस्सः एकस्यपटस्यअर्धंप्रावृण्वानोर्धपटावृत्तः खंडपटवसानोवा भृगुः नग्नोद्विगुणवस्त्रःस्यान्न
ग्नोदग्धपटस्मृतः नग्नस्तुस्यूतवस्त्रःस्यान्नग्नोग्रथितवस्त्रकः नग्नश्चबकुवस्त्रःस्यान्नग्नःकौपी
नकेवलः आचारप्रदीपे कटिस्पृष्टंचयद्वस्त्रंपुरीषंयेनकारितं मैथुनंमेहनंवापितद्वस्त्रंपरिवर्जये
त् दग्धंजीर्णंचमलिनंमूषकोपहतंतथा खादितंगोमहिष्याद्यैस्तत्याज्यंसर्वथाद्विजैः स्त्रीपरि
हितंचवासोनिषिद्धं अश्रीगातनूर्भवतिरुशतीपापयामुयापतिर्यद्वध्वो३वाससास्वमंगमभिधित्स
तइत्युङ्मंत्रेणाश्रीत्यादिदुष्टफलश्रवणेनतत्रापिनिषेधकल्पनात् मंत्राणामपिस्वार्थानुसंधानविष
यंप्रामाण्यंशाणकेनप्रतिपादितमेवन्यायसुधायां एतेचवासोनिषेधाःसतिसंभवेज्ञेयाः सतिसंभवे
नजीर्णमलवद्वासास्यादितिगोतमस्मरणात् वस्त्रानुकल्पमाहयोगयाज्ञवल्क्यः अभावेधौतवस्त्र
स्यशाणक्षौमाधिकानिच कुतपंयोगपट्टंवाद्विवासायेनवैभवेत् क्षौममतसीसूत्रकृतं कुतपोनेपा
लकंबलः धौतेतिविशेषणोपादानात्शाणादीन्यप्रक्षालितान्यपिगृह्णीयात्द्विवासइतिपादोपादाना

कुर्युर्विष्णोश्चवाबुधाः मूर्ध्निमूलेषुनमंत्रेणशेषंद्वादशनामभिः स्थानेष्वेषुद्विजःस्नात्वा नमोंतैः
प्रणवेनचेति ॐकेशवायनमइत्यादिमंत्रैरित्यर्थः स्थानविशेषेणाकृतिविशेषःस्मर्यते नि
टिलेबाहुवक्षश्चैवदंडवत्कर्णपल्लवे हृदयेकमलाकारमुदरेदीपवल्लिखेत् वेणुपत्रसमाका
रंबाह्वोर्मध्येलिखेत्सुधीः अधःपृष्ठेकंठदेशेलिखेज्जंबूफलाकृतिनिटिलेभाले दशांगुल
प्रमाणंतुउत्तमोत्तममुच्यते नवांगुलंमध्यमंस्यादष्टांगुलमतःपरं सप्तषट्पंचभिःपुंड्रम
ध्यमंत्रिविधंस्मृतं चतुस्त्रिद्व्यंगुलैःपुंड्रंकनिष्टंत्रिविधंभवेत् ऊर्ध्वपुंड्रमृजुंसौम्यंकनिष्ठां
गुलिवत्स्मृतं नासादिकेशपर्यंतेप्रयत्नाद्धारयेद्विजः पारिजातेसंग्रहे ऊर्ध्वपुंड्रंवामध्येशून्यं
प्रधारयेत् शृणुषण्मुखतन्मध्येउभयाहंश्रियाहरिः स्मृतिसारसमुच्चये गोपीचंदनलिप्तां
गोयंयंपश्यतिचक्षुषा तंतंशुद्धंविजानीयान्नात्रकार्याविचारणा अशुचिर्वाप्यनाचारोम

नसापापमाचरन् शुचिरेवभवेन्नित्यंमूर्ध्वपुंड्रंकितोनरः व्यासः वामहस्तेजलंकृत्वासावित्र्या
चाभिमंत्रितं तद्विष्णोरितिमंत्रेण मर्दयेन्मृत्तिकांततः अतोदेवेतिसूक्तेनतिलकंकारयेत्सदेःत्या
ह अथप्रयोगः वामहस्तेजलंगृहीत्वा ॐतत्सवितु॰ अभिमंत्र्य ॐइदंविष्णुर्वि॰ सुरेइति
मृदंमर्दयित्वाकनिष्ठिकारहितचतुरंगुलीनामन्यतमेन ॐकेशवायनमः इतिललाटेवेणु
पत्राकारं ॐ नारायणायनमइतिउदरेदीपाकारं ॐमाधवायनमइतिहृदयेकमलाका
रं ॐ गोविंदायनमइतिकंठमूलेजंबूफलाकारं ॐविष्णवे॰ इतिउदरदक्षिणपार्श्वेदीपाका
रं ॐमधुसूदनाय॰ इतिदक्षिणबाहुमध्येवेणुपत्राकारं ॐत्रिविक्रमाय॰ इतिदक्षिणकर्ण
मूलेदंडाकारं ॐ वामनाय॰ इतिउदरवामपार्श्वेदीपाकारं ॐश्रीधराय॰ इतिवामबाहुमध्येवे
णुपत्राकारं ॐ हृषीकेशाय॰ इतिवामकर्णमूलेदंडाकारं ॐपद्मनाभाय॰ इतिअधःपृष्ठदेशेजं
बूपत्राकारं ॐ दामोदराय॰ इतिककुदिजंबूपत्राकारं ॐ नमोभगवतेवासुदेवायइतिशिरसि

एवंपुंड्राणिकुर्यात्कृष्णेपक्षेएवमेवसंकर्षणादिद्वादशनामभिः द्वादशपुंड्राणि कृत्वा ॐनमोभगव
तेवासुदेवायेतिशिरसिचकुर्यात् यद्वा पाद्मे ललाटेहृदिबाह्वोर्मूर्ध्निचतुःपुंड्राणिधारयेत्
तत्रचतुर्षुसंकर्षणवासुदेवप्रद्युम्नानिरुद्धेतिचत्वारोमंत्राइत्याह्निकरत्नमालायां इत्यूर्ध्वपुंड्र
विधिः अथभस्मत्रिपुंड्रविधिः पुरुषार्थप्रबोधे श्रौतंभस्मद्विजामुख्यंस्मार्तंगौणंप्रकीर्तितं
अगस्तिसंहितायां अग्निहोत्राग्निजंभस्मंअग्निकार्योद्भवंतथा औपासनात्समुद्भूतंलक्षहोमो
द्भवंतथा भस्मानिषड्विधान्याहुः सर्वपापहराणिचत्रैवर्णिकानांसर्वेषांअग्निहोत्रसमुद्भवं अग्नि
कार्यात्समुद्भूतंतद्धार्यंब्रह्मचारिणां आवसथ्याग्निसंभूतंगृहस्थैरेवधार्यते शेषंभस्मत्रयंचैव
सर्वैःसर्वत्रधार्यते देवर्षिकृतहोमस्थंधार्यंयत्नेनसर्वदा अग्निहोत्रजंसर्वंभस्मप्रशस्तं तथापि
गार्हपत्यायतनस्थप्रशस्ततरंनर्यभस्मपरंब्रह्मद्वयंसंसारतारकंतयोरन्यतरत्सेव्यंसंसारभयभीरुभि
रितिवचनात् श्रौताग्निजंभस्मतदभावेस्मौपासनजंवाविभृयादित्याह्निकचंद्रिकायां पुलस्त्यः अग्नि

जलमध्येजलेनतु आचारतिलके ब्राह्मणांनृपाणांचभस्ममिश्रंचचंदनं॥अथोर्ध्वपुंड्रविधिः॥तत्रमृ
दः भारते जान्हवीतीरसंभूतांमृदंमूर्ध्नाबिभर्तियः बिभर्तिरूपंसोर्कस्यतमोनाशयकेवलं ब्रह्मपुरा
णे द्वारवत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकं कांस्येन्नित्यमेवंहिहंतिपापंदिनेदिने पर्वताग्रेनदी
तीरे ममक्षेत्रेविशेषतः सिंधुतीरेचवल्मीकेतुलसीमूलआश्रिताः मृदएवास्तुसंपाद्यावर्जये
दन्यमृत्तिकाः अंगुष्ठः पुष्टिदः प्रोक्तोमध्यमायुष्करीभवेत् अनामिकान्नदानित्यंमुक्तिदाच
प्रदेशिनी एतैरंगुलिभेदैस्तुकारयेन्ननखैःस्पृशेत् चंद्रिकायांब्रह्मपुराणे ललाटेकेशवंविद्या
न्नारायणमथोदरे माधवंहृदिविन्यस्यगोविंदंकंठमूलके उदरेदक्षिणेपार्श्वेविष्णुरित्यभिधी
यते तत्पार्श्वेबाहुमध्येतुविन्यसेन्मधुसूदनं त्रिविक्रमंकर्णदेशेवामकुक्षौतुवामनं श्रीधरंवा
मकेबाहौहृषीकेशंतुकर्णके पृष्ठदेशेपद्मनाभंककुद्दामोदरंन्यसेत् द्वादशैतानिनामानि
वासुदेवेतिमूर्ध्नि संकर्षणादिभिःकृष्णोप्युक्लेचेत्केशवादिभिः शौनकः ऊर्ध्वपुंड्रंशिवस्येव

लोबाङ्कसंधिषु पृष्ठदेशेशिरस्येवंस्थानेष्वेतेषुधारयेत् अथप्रयोगः गार्हपत्यायतनादिस्थंस्वोपासनजं
वाभस्मवामपाणौकृत्वादक्षिणेनाछाद्य भस्माभिमंत्रणमंत्रस्यपिप्पलादऋषिःरुद्रोदेवतागायत्रीछंदः
भस्माभिमंत्रणेवि नि० ॐ अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्म स
र्वंह वाइदंभस्ममनएतानिचक्षूंषिभस्मानिइतिसप्तभिः ● अंतिमरहितैःषड्भिर्वामंत्रैरभिमंत्र्यजलेन
मिश्रयित्वामध्यांगुलित्रयेणतिर्यगक्षिपर्यंतंललाटहृन्नाभिकंठांसदक्षिणबाहुमूलमध्यमणिबंधवा
मबाहुमूलमध्यमणिबंधपृष्ठशिरः स्थानेषु ॐ नमःशिवायेतिमंत्रावृत्याबिभृयात् इतिभस्मत्रि
पुंड्रविधिः एवमुक्तयोर्गोपीचंदनभस्मधारणयोर्यथास्वकुलसंप्रदायमित्यृग्ब्राह्मणेव्यवस्थाश्रूयते
श्रोणाकउदकंगामवाजतिमांसमेकःपिंशतिसूनयाभृतं आनिम्रुचःशकृदेकोअपाभात्किंस्वित्पुत्रेभ्यः
पितराउपावतुः अत्रप्रथमः पादोगोपीचंदनादेस्तिलकं द्वितीयस्तुगोरोचनायाः तृतीयोभस्मधा
रणंच चतुर्थस्वकुलसंप्रदायानुरोधंचैषांधारणेप्रतिपादयतीति विष्णुरपि शार्वंवाशिरवंवाचपुंड्रं ४६

चसमयाचारमेव पूर्वैराचरितंकुर्यादन्यथापतितोभवेदिति यद्वा मद्भक्तोधारयेन्नित्यंउर्ध्वपुंड्रंविना
तुतत् यत्कर्मक्रियतेनित्यंतत्सर्वंनिष्फलंभवेत् इतिवचसिमद्भक्तइतिविष्णुरुक्तेः तथाउर्ध्वपुंड्रं
वेतिवचनेउभयाहंश्रियाहरिरितिशिवोक्तेश्चशिवभक्तस्यत्रिपुंड्रंवैष्णवस्योर्ध्वंपुंड्रं आवश्यकंइतरेषां
तुविकल्पः क्वचिद्गोपीचंदनादेर्निषेधमाहज्योतिर्निबंधे अभ्यंगेमृतकेचैववविवाहेपुत्रजन्मनि मां
गल्येषुचसर्वेषुनधार्यंगोपीचंदनं एतच्चविवाहादिमांगल्येमासपर्यंतं विवाहादौमासमेकंन
धार्यंगोपीचंदनमितितेनैवोक्तत्वात् संस्कारदर्पणेस्मृतिसंग्रहे मृत्पुंड्रभस्मपुंड्रंचस्नानंशीतोद
केनचनैवकुर्युः सपिंडाश्चमंडपोद्वासनावधि इत्याचारेंदौतिलकप्रकरणं अथसंध्योपासनवि
धिः तस्यचनित्यतामाहमरीचिः संध्यायेननविज्ञातासंध्यायेनानुपासिता जीवमानोभवेच्छूद्रो
मृतःश्वाचाभिजायते अशुचित्वसंपादनेनकर्मांगतामाहदक्षः संध्याहीनोशुचिर्नित्यमनर्हःसर्व
कर्मसु यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेत् अंगताचप्रातःसंध्याया एवेतिकेचित् युक्तंतु

चनांतरप्राप्ततनत्संध्याकालोत्तरभावितत्त्वकर्मांगतासंध्यात्रयस्यापिअविशेषात्॥ अत्रिः संध्यात्र
यंतुकर्तव्यंद्विजेनात्मविदासदा॥ अत्रसंध्यापदस्यसंधिरूपकालयोगात् दर्शपौर्णमादिपदवत्कर्म
नामधेयत्वमभिमतं॥ तत्रार्घ्यप्रक्षेपणंगायत्रीजपः सूर्योपस्थानंचेतित्रितयंसंध्याकर्मणिप्रधानं
मार्जनाचमनादीनांसमस्तानांअंगतं॥ त्रितयेपिअर्घ्यप्रक्षेपणंबलवत्॥ गायत्रियाभिमंत्रिताआ
पऊर्ध्वंविक्षिपंतीतिश्रुतौतावन्मात्रस्यैवप्रधानत्वेनविधानात्॥ गायत्रीजपोपस्थानप्रतिषेधपू
र्वकंआशौचादावपिअर्घ्यप्रक्षेपणमात्रविधानाच्चेतिकेचित्॥ अन्येतुउद्यंतमस्तंयंतमादित्य
मभिध्यायन्कुर्वन्ब्राह्मणोविद्वान्सकलंभद्रमश्नुतेसावादित्योब्रह्मेतिब्रह्मैवसन्ब्रह्माप्येतियए
वंवेदेतिश्रुतौध्यानमात्रोक्तेः तेनतथैवमहाराजदंशितारणमूर्धति॥ संध्यागतंसहस्रांशुमादित्य
मुपतस्थिरेइतिभारतेरणेसांगानुष्ठानासमर्थैरर्जुनादिभिः॥ सूर्योपासनशब्दवाच्यसूर्यध्यान॥ ४९
मात्रस्यानुष्ठितत्वाच्चगायत्रीजपरूपध्यानस्यैवप्राधान्यंमन्यंते॥ आश्वलायनगृह्येसंध्यामुपा

रित्यादिभिर्मंत्रैः शुद्धं भस्माभिमंत्रितं शिवमंत्रेण तद्वार्थं मंत्रेणाष्टाक्षरेणवा गायत्र्यावाथ देवर्षे मंत्रेणप्र
णवेनवा क्रियासारे वामहस्ततलेभस्मक्षिप्त्वाछाद्यान्यपाणिना अग्निरित्यादिमंत्रेण स्पृशन्मंत्र्यभिमं
त्र्यच अग्निरित्यादिमंत्राश्चाथर्वणशाखायां प्रदर्शिताः तेचषट् अग्निरित्यादिभिर्मंत्रैः षड्भिराथर्वणै
स्तथेतिक्रियासारवचनात् सप्तवा अग्निरित्यादिभिर्मंत्रैः जाबालोपनिषदुक्तैः सप्तभिर्धूलनंको
र्यं भस्मना सजलेनचेति सूतसंहितायामुक्तत्वात् स्मृतिसंग्रहे धार्यंभस्मत्रिसंध्यंतु गृहिणाजल
संयुतं सार्वकालंभवेत्स्त्रीणां यतीनांजलवर्जितं वानप्रस्थस्यकन्यानांदीक्षाहीननृणांतथा मध्या
न्हात्प्राग्जलैर्युक्तंपरतोजलवर्जितं मध्यांगुलित्रयेणैव स्वदक्षिणकरस्यच त्रिपुंड्रं धारयेद्विद्वान्स
र्वकर्मसु सर्वदा षडंगुलप्रमाणंतु ब्राह्मणानां त्रिपुंड्रकं नृपाणानांचतुरंगुल्यं वैश्यानांद्व्यंगुलंतथा
शूद्राणामथ सर्वेषामेकांगुल्यं त्रिपुंड्रकं स्मृतिरत्नावल्यां मध्यमानामिकांगुष्ठैरनुलोमविलोमतः
अतिस्वल्पमनायुष्यमतिदीर्घं तपोहरं नेवयुग्मप्रमाणेन त्रिपुंड्रंधारयेद्द्विजः ललाटेहृदयेनाभौग

५० जिंता धर्मसारे उत्तमा तारकोपेता मध्यमा लुप्ततारका अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता उत्तमा
सूर्यसहिता मध्यमा लुप्तभास्करा अधमा तारकोपेता सायंसंध्या त्रिधा मता संध्याकर्मणः प्रारंभः
कालोभिस्मृतौ संध्याकालःप्रागुदयाद्विप्रस्याद्विमुहूर्तकः एतद्ब्राह्निककर्तृपरमितिमहेशादयः
दक्षः रात्र्यंत्ययामनाडीद्वे संध्यादिःकालउच्यते दर्शना इविलेखायास्तदंतो मुनिभिःस्मृतइति
गौणकालावधिरुक्तःस्मृत्यंतरे उदयास्तमितादूर्ध्वं यावत्स्यात्घटिकात्रयं तावत्संध्यामुपासीत
प्रायश्चित्तमतःपरं माधवीये आसंगवंप्रातःसंध्याया गौणःकालः आप्रदोषावसानंच सायंसंध्या
याः तदाहवृद्धमनुः नप्रातर्नप्रदोषश्चसंध्याकालोनिपद्यते मुख्यकालोऽनुकल्पश्चसर्वस्मिन्क
र्मणिस्मृतः तत्रषट्घटिकात्मकःकालःप्रातःशब्दार्थः मुहूर्तत्रयंप्रातरितिवचनात् प्रदोष
स्या कालोप्येतावानेव त्रिमुहूर्तःप्रदोषःस्याद्भानावस्तंगतेसतीतिवचनात् गौणकालेप्यतिक्रांते आ ५०
सायंप्रातःसंध्यांकुर्यात् तावत्स्वर्थेतेसूर्यस्यरक्षसांचयुत्यप्रवृत्तेः सूर्यस्यतत्कृत्यबाध

निवृत्त्यर्थत्वात्संध्योपासनस्य तस्मादुन्निष्ठंतं हवानानिरक्षांस्यादित्यं योधयंतियावदस्तमन्व
गादितिश्रुतेः कालातीतप्रायश्चित्तं त्वग्रेवक्ष्यामः अथ संध्येतिकर्तव्यता तत्र संवर्तः अथाचम
न्य कुशैर्युक्त आसने समुपस्थितः करसंपुटकं कृत्वा संध्यानित्यं समाचरेत् अर्घ्यदानोत्तर
समंत्रासनविधेरुक्तत्वात् तावत्पर्यंतं तूष्णीमेव प्रागग्रदर्भयुक्त आसने उपवेशनं तच्चोपस्थप्र
कारेण अंकधारणाचेति आचार्येण परिभाषायामुक्तेः अंकधारणा उपस्थापरपर्यायः तल्लक्ष
णमाहाश्वलायनः दक्षिणं चोपविश्योरु वामगुल्फोपरि न्यसेत् वामोरौ दक्षिणं गुल्फं तच्चोपस्थ
मुदीरितमिति संध्यात्रयेपि प्राङ्मुखत्वेन तदुक्तमाचार्यैः तस्य नित्याः प्रांचश्चेष्टा इति आश्वला
यनस्मृतिरिति प्रावृत्य परिधायाथ प्राङासीनः समाचरेत् संध्यामिति शेषः भारते प्राङ्मुखः
सततं विप्रः संध्योपासनमाचरेत् इति परिशिष्टपरिभाषाखंडे आचांतः प्राङ्मुख आसीन इति
अथाचमनं आश्वलायनः कुशपाणिर्द्विराचांतः तीरे सलिलसन्निधौ प्रवणेन द्विराचामेद्द्वि

स्प्य

णेनतुपाणिना उभौहस्तौचगल्लौद्वावोष्ठौपाणिद्वयंस्पृशेत् पादद्वयंशिरश्चास्यंनासारंध्रेचचक्षुषी श्रो
त्रे नाभिंचहृदेशंशिरश्चांसौस्पृशेत् क्रमात् प्राणानायम्यसंकैं नतःसंध्यामुपास्महेइति अथआचा
ररत्नधृतपरिशिष्टं बहिर्ग्रामात्प्राच्यामुदीच्यांवान्यस्यांदिश्यनिंदितायामनस्यमुदकाशयमेत्यप्रा
तःशुचिर्भूतःपाणिपादमुखानिप्रक्षाल्यशुचौदेशेभूमिष्ठपादोनपरिश्रितआचमेनप्रकृतिस्वच्छमफेना
बुद्बुदमुदकमीक्षितंदक्षिणेनपाणिनादायगनिष्ठांगुष्ठौविश्लिष्टौवितत्यतिस्रोंगुलीःसंहतोर्ध्वाःकृत्वा
ब्राह्मणतीर्थेनहृदयप्रायंत्रिःपीत्वापाणिंप्रक्षाल्यस्पृष्टांभसांगुष्ठमूलेनाकुंचितोष्ठमास्यंद्विःपरिमृ
ज्यसकृत्संहतमध्यांगुलिभिर्मुखंप्रमृज्यपाणिंप्रक्षाल्यसव्यंपाणिंपादौशिरश्चाभ्युक्ष्यस्पृष्टांभसा
संहतमध्यमांगुलिचयाग्रेणास्यमुपस्पृश्यसांगुष्ठयाप्रदेशिन्याघ्राणबिलद्वयमनामिकयाचक्षुःश्रो ५१
त्रेकनिष्ठिकयानाभिंकरतलेनहृदयंसर्वांगुलिभिःशिरस्तदग्रैरंसौचोपउपस्पृशेदित्येतदाचमनं

सीतेत्यनुक्रम्य जपमात्रस्यैवविधानादाश्वलायनानांविदमेवयुक्तं अथसंध्यादेशः शातातपः गृहे
तु प्राकृतीसंध्यागोष्ठेदशगुणाभवेत् नदीषुशतसाहस्राअनंताशिवसन्निधौ प्राकृताएकगुणा
शिवसन्निधावितिविष्ण्वादीनांउपलक्षणं अनंताविष्णुसन्निधावत्यादिवचनात् व्यासः बहिः सं
ध्यादशगुणगर्तप्रस्रवणेषुच स्नातेतीर्थेदशगुणात्वनंताजान्हवीजले शातातपः अनंतंमद्य
गंधंचदिवामैथुनमेवच पुनातिवृषलस्यान्नंबहिःसंध्याद्युपासिता यत्त्वत्रिवचनं संध्यात्रयंतु
कर्तव्यंद्विजेनात्मविदासदा उभेसंध्येतुकर्तव्येब्राह्मणेस्तुगृहेष्वपि तस्याशयः यद्यपिसंध्यात्रयंब
हिरेवेतिकमलाकरः अथकालःपरिशिष्टं प्रशस्तंतथापियदाहरणाद्यंगलोपप्रसक्तिस्तदाश्रौतस्यवि
हरणस्यप्राबल्यात्तदनुरोधेनद्वेसंध्येगृहेअनुष्ठेयेइति यदिविहरणमन्यकर्तृकंतदाबहिरेवेतिकम
लाकरः अथकालापरिशिष्टं यावदहोरात्रयोःसंधीयश्चपूर्वापराह्णयोस्तत्कालभवादेवतासंध्यामु
पासीतेति शातातपः प्रातःसंध्यासनक्षत्रामध्यान्हामध्यगेरवौ पश्चिमातुसमाख्यातारविनक्षत्रव

५२ ष्ठिरः पश्चात्प्रयोजयेत् व्यासः षोडशाक्षरकं ब्रह्मगायत्र्यास्तु शिरस्मृतं ओमापोज्योतिरित्येषमंत्रो वै
तै[illegible]रीयके आद्यंतप्रणवद्रूपमेकमक्षरं अन्यथाषोडशाक्षरकंब्रह्मेत्यादिविरुध्येत्येतेति अथवा
सुवरित्यस्यैकाक्षरत्वभावनयाषोडशाक्षरत्वंद्रष्टव्यं अत्रावर्तनशब्देनवर्णाभिध्यानमात्रंनोच्चारणं
तस्यासंभवात् अतएवसर्वतः प्रणवेनतुसंयुक्ताः व्याहृतीःसप्तनित्यशः सावित्रींशिरसासार्धंमनसा
त्रिःपठेद्द्विजः शौनकः नासिकामंगुलीभिश्चतर्जनीमध्यमाहृते सव्येनतुसमारुष्यदक्षिणेनविसृ
र्जयेत् शनैर्नासापुटेवायुमुत्सृजेन्नतुवेगतः नकंपयेच्छरीरंतुसयोगीपरमोमतः यस्तु वामेनरेचकंकु
र्याद्दक्षिणापूर्यचोदनंइतिदक्षोक्तौरेचकपूरकव्यत्यासःसशाखांतरपरः व्यासः अंगुष्ठेनपुटंग्राह्यंनासा
यांदक्षिणंपुनः कनिष्ठानामिकाभ्यांतुवामंप्राणस्यसंग्रहे यत्तु पंचांगुलीभिर्नासाग्रपीडनंप्रणवाभि
धा मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः कनिष्ठानामिकांगुष्ठैर्नासाग्रस्यचपीडनं ॐकारमुद्रासाप्रोक्ता ५२
यतेश्चब्रह्मचारिणइतिव्यवस्थापकंस्मृतिसंग्रहवचनंत[illegible]द्बह्वृचभिन्नपरं बह्वृचानांशौनकोक्तस्याभ्य

र्हितत्वात् उक्तप्राणायामाशक्तौ वैद्यनाथदीक्षितकृतांन्हिके भरद्वाजः अशक्तिः स्याद्यदि प्रोक्ते प्राणायामे
द्विजन्मनः बालस्य चेतरेषां च दशकृत्वा जपः स्मृतः अंत्यताशक्तौ स एव सप्तैव व्याहृतीरेताः केवला वा द्विजो
जपेत् जपकाम्येयमेव स्यात्सर्वपापप्रणाशनः ततः प्राणायामनिमित्तं आचमनं तदुक्तं मनुना प्राणस्या
यमनं कृत्वा आचमेत्प्रयतोपि सन् आंतरं विद्यते यस्मात्तस्मादाचमनं स्मृतमिति यद्वा आचमनानुक
ल्पत्वेन दक्षिणश्रवणं स्पृशेत् कुर्यादालंभनं वापि दक्षिणश्रवणस्य त्विति मार्कंडेयात् शिष्टाचारोप्येवं ततः सं
कल्पः तत्र परिशिष्टं अथ कर्म संकल्प्येति शौनकः „प्राणानायम्य विधिवद्वाग्यतः संयतेंद्रियः अथ संध्यामु
पासिष्य इति संकल्प्य मार्जयेत् तत्र संकल्पप्रकारो मतभेदान्त्रिविधः कौमारिलमते तावत्संध्यावंदनादि
षु नित्येषु कर्मसु अधिकारवाक्य चोदितफलाभावेपि मंत्रलिंगार्थवादादि बहुवाक्यपर्यालोचयोपात्तदुरित
क्षय एव फलत्वेन परिकल्पित इति तदनुरोधादुपात्तदुरितक्षयार्थं प्रातःसंध्यामुपासिष्ये ज्योतिष्टोमेन यक्ष्ये
इत्यादिरीत्या सर्वेषु नित्यकर्मसु संकल्पः गुरुमते तु विधिसिद्धिरेव विधेः फलं इति चोदितफलाभावेपि विधि

सिध्यर्थंप्रातःसंध्यामुपासिष्येज्योतिष्टोमेनयक्ष्येइत्यादिरीत्यासंकल्पः भट्टसोमेश्वरस्तुसर्वेषांपापक्षयेन्यान
र्थक्यात्कस्यचित्क्षयेविनिगमकाभावात् नित्यकर्मणांप्रत्यवायपरिहारार्थत्वमाह एतन्मतेप्रत्यवायपरि
हारार्थंप्रातःसंध्यामुपास्महेइति सांप्रदायिकास्तुममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसं
ध्यामुपासिष्येइतिसंकल्पमाहुः नैमित्तिकेपियत्रजातेष्ट्यादौफलश्रवणंतत्रनिमित्तफलसमुच्चिताधि
कारात्पुत्रजन्मनिमित्तंपुत्रगतपूतत्वादिकामोजातेष्ट्यायक्ष्येइत्यादिसंकल्पः यत्रतूपरागेस्नानादित्या
दौनिमित्तमात्रश्रवणंतत्रोपरागनिमित्तंस्नानंकरिष्येइतिसंकल्पःसंकल्पेदेशकालाकार्यइत्युक्तंप्रा
क् अथमार्जनं परिशिष्टे शुचौपात्रेसव्यपाणौवापआधायस्थिरेतूदकाशयेयावत्कर्मकुर्वीत तावत्त
दुकस्यविभागंकल्पयित्वातीर्थानितत्रावाह्यापःसदर्भेणपाणिनादायोत्तानंशिरसिमार्जयेदांपूर्वंपक्ष
आपोहिष्ठेतितिसृभिरिति शुचिपात्रमाहब्रह्मा नद्यांतीर्थेह्रदेतत्रभाजनेमृन्मयेगृहे औदुंबरेचसौ ५३
वर्णेराजतेदारुसंभवे कृत्वातुवामहस्तेवासंध्योपास्तिंसमाचरेत् औदुंबरंताम्रं औदुंबरंस्मृतंता

अत्र सांगुष्ठयेति अग्रेपि अनामिकया कनिष्ठिकयेत्यत्रानुवर्तनीयं अंगुष्ठानामिकाभ्यां चक्षुःश्रोत्रे च
संस्पृशेत् तथांगुष्ठकनिष्ठिकाभ्यां नाभिं पश्चादुपस्पृशेत् इति शौनकवचोनुरोधात् जयंतेनाप्येतत्सं
वादी आचमनप्रकार उक्तः तथा एवं द्विराचम्यात्मानमभ्युक्ष्य दंतान्छोदयित्वा पुनर्द्विराचम्य दर्भप
वित्रपाणिः प्रथमं-मंत्रकं प्राणायामत्रयं कृत्वा समंत्रकं सकृत्कुर्यादायतप्राणः सप्रणवसप्तव्याहृतीः
सावित्रीं सशिरसं त्रिरावर्तयेदेष समंत्रः प्राणायामः मात्रालक्षणं वैद्येनोक्तं यावत्कालं त्रिरावेष्ट्य जा
नु हस्तेन दक्षिणं छोटिकाकरणं यत्सा मात्रेति परिपठ्यते सिद्धांतशेखरे तु मात्राया लक्षणं वक्ष्ये प्रा
णायामादिसाधने वेष्टयित्वा त्रिधा जानुमंडलं छोटिकां सकृत् कुर्यादेषा भवेन्मात्रा कनिष्ठा कालमानतः
आहुरन्ये यथा मात्रां सकृज्जानुप्रदक्षिणां छोटिकां च सकृत्कुर्यादेषा मात्रा कनिष्ठिका मध्यमा द्विगुणा चैव
त्रिगुणा ह्युत्तमा तथेति सप्तव्याहृतीस्तु योगयाज्ञवल्क्य आह सप्तव्याहृतयः प्रोक्ताः प्राणायामेषु नित्य
शः भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च प्रत्योंकारसमायुक्तं तथा तत्सवितुः परं ओमापो ज्योतिरित्येत

आचा०टु

तुमार्जनकुशानांबहुत्वंपूर्वोक्तसंवर्तवचनेस्पष्टं शौनकः पादेपादेक्षिपेन्मूर्ध्निप्रतिप्रणवसंयुतं अंष्टाक्ष
५४ रं नवपादंपादांतेवारिचोत्सृजेत् अपादांतेतुयद्वारि ततोयंरुधिरंभवेत् यत्तु आपोहिष्ठादिभिःपादैःशि
रस्यंसेचविप्रुषः यस्यक्षयायेत्यधस्तात्क्षिप्त्वाद्भिःपरिषेचयेदितिब्राह्मवचनं तत्सप्तत्रयमाकाशेवरव
त्रयमस्तके भूम्यांप्रोक्तंनत्रयंतुएतन्मार्जनलक्षणमितिसंग्रहवचनंचआश्वलायनभिन्नपरंपरिशिष्ट
शौनकादिविरोधात् अथमंत्राचमनं तच्चमयूखादिधृतपरिशिष्टे अथाचमनोदकमादायसूर्यश्चे
तिपिबेत्सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतां यद्रात्र्यापापमकार्षंमनसावा
चाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुंपतुयत्किंचदुरितंमयिइदमहंमाममृतयोनौसूर्येज्योति
षिजुहोमिस्वाहेत्येतत्समंत्राचमनमिति अत्रयद्यपिसूर्यश्चेत्यादयोमंत्राचमनमंत्राःतैत्तिरीयो
ता पनिषद्यप्याम्नातास्तथाप्याश्वलायनैःपरिशिष्टोक्ताएवग्राह्याःस्वसूत्रत्यागेप्रत्यवायश्रवणात् ते ५४
प्येकश्रुत्यैवपठनीयाःअविज्ञातस्वरामंत्राःसोत्रएकश्रुतिर्भवेदितिकारिकोक्तेः अतएवजगद्गुरुणा

रायणभट्टैरपि द्ध्माधानादिसौत्रमंत्रा एकश्रुत्यैव पठनीया इत्युक्तं अत्र यद्यप्युदकपरिमाणं नोक्तं तथापि
माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदप इत्याचमनत्वस्याचाप्यविशेषात् आकांक्षासत्वाच्च अथ द्विती
यमार्जनं तत्र भट्टोजीये गृह्यपरिशिष्टं अथ पुनराचम्य मार्जयेत्प्रणवव्याहृतिसावित्रीभिर्ऋक्शः आ
पो हि ष्ठेति सूक्तेन गायत्रीशिरसा चांभसात्मानं परिषिंचेदेतन्मार्जनमिति इदं च सकृदाचमनं अत्र विशेषा
नुक्तत्वात् आद्यावंते च संध्यायां द्विर्द्विराचमनं भवेत् तथैवार्घ्यप्रदानांते मध्ये मध्ये सकृत्सकृदिति वच
नाच्च द्विराचमनमिति नागदेवीये भगवान् प्रणवेन व्याहृतिभिर्गायत्र्या प्रणवाद्यया आपो हि ष्ठेति
सूक्तेन चतुर्थमिति मार्जनं प्रणवाद्ययेत्ययमनुवादः मंत्रादौ सर्वत्र पारिभाषिकप्रणवस्य प्राप्तत्वात्
अन्यथा आपो हि ष्ठेत्यादौ प्रणवो न स्यात् प्रणवादिशिरोमंत्रांतानि त्रयोदश मार्जनानि ऋगंते मार्ज
नं कुर्यात्पादांते वा समाहितः अर्धर्चांते ऽथवा कुर्याच्छिष्टानां मतमीदृशमिति प्राजापत्युक्तप्रकारत्रये प्र
थमप्रकारः द्वितीयमार्जनानुगुणः ऋक्शः इत्युक्तत्वात् द्वितीयः प्रकारः प्रथममार्जनानुगुणः इत्युक्त

५५ त्वात् तृतीयप्रकारः शाखांतरपरः आचारार्के तु अर्धर्चांते द्वितीयमार्जनमुक्तं तच्च परिशिष्टविरोधाद्विचा
रणीयं इमान्यपि मार्जनानि शिरस्येव शिरसो मार्जनं कुर्यात्कुशैः सोदकबिंदुभिः प्रणवेन व्याहृतिभिर्गाय
त्र्येति क्रमात्त्रयं अब्दैवताभिरृग्भिश्च चतुर्थमिति मार्जनमिति कात्यायनस्मरणात् ततआत्मनपरि
षेकः अयं च मार्जनोत्तरांगं अंभसात्मानं परिषिंचेदेतन्मार्जनमितित्युपसंहारात् पूर्वोक्तब्राह्मवचने प्र
थममार्जनांगत्वेन परिषेकस्योक्तत्वाच्च पारिजातप्रयोगेप्यंभसात्मानं परिषिंचेदित्युक्तं ततोघमर्षणं
अथ गोकर्णवत्कृतेन पाणिनोदकमादाय नासिकाग्रे धारयन् कृष्णपुरुषाकृतिं पाप्मानमंतर्व्याप्य स्थितं वि
चिंत्य संयतप्राणोघमर्षणसूक्तं द्रुपदामृचं वावर्त्य दक्षिणेन नासापुटेन शनैः प्राणेरेचयन् सर्वतस्तेन संह
त्य कृष्णपुरुषं रेचनवर्त्मना पाणिस्थोदके पतितं ध्यात्वा तदुदकमनवेक्षमाणो वाम नो भुवीति तीव्रघातेन क्षि
प्त्वा तं पाप्मानं वज्रहतं भावयेदेतत्पाप्मव्यपोहनं मे केन कुर्वंति मार्जनेनैव तस्य व्यपोहितत्वादिति द्रुपदादि ५५
वेन्मुमुचानः स्विन्नः स्नात्वी मलादिव पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनस इति द्रुपदा ऋक् पापशोधनीति

न्नमितिविश्वकोशात् कृत्वेत्यनंतरंउदकमितिशेषः॥ पात्राकृतिमाहमरीचिः गोकर्णाकृतिवत्पात्रंताम्रंरौप्यं
चहाटकं जलंतत्रविनिक्षिप्यसंध्योपासनमाचरेत् सव्यपाणौवेतिउक्तपात्राभावेबोध्यं नतुपात्रसत्वेपि
वामहस्तेजलंकृत्वायेतुसंध्यामुपासते सायंसंध्यावृषलीज्ञेयाअसुरास्तैस्तुतर्पिताइतिस्मरणात् अयं
चविकल्पोगृहसंध्याविषयः नतुनद्यादिसंनिधिकर्तव्यसंध्याविषयः तथाचसंवर्तः इत्थंकृत्वातुसंक
ल्पंकुशानादायपाणिना नद्यांनद्युद्धृतैस्तोयैर्गृहेवामकरास्थितैः मार्जनंकुर्यादितिशेषः आपस्तंबोपि
गंगायांवापिकायांवातडागेचतथैवच वामहस्तेजलंगृण्हन्नकुर्यान्मार्जनंक्वचित् गृहेसपात्रसद्भावेपि
तन्मार्जनपात्रेवामहस्तेधार्यं गृहेवामकरस्थितैरितिपूर्वोक्तवचनात् अतएवगृहेवामकरधृतपात्रस्थोद
केर्मार्जयेदिति~~[illegible]~~ःकमलाकरोवदत्शिष्टाचारोप्येवं मार्जनंचदेवतीर्थेनकार्यं मार्जनार्चनबलिकर्म
भोजनानिदेवतीर्थेनकुर्यादितिहारीतोक्तेः देवतीर्थंतुअंगुल्यग्रेतीर्थंदैवमित्यमरसिंहोक्तेर्ज्ञेयं तत्रापिक[illegible]
विशेषःस्मृत्यंतरे मध्यमानामिकांगुष्ठैःक्षेपणंतुकुशोदकैः पारिजाते तर्जनीमध्यमाभ्यांवातृचेनाब्दैवतेन

गादिषु च स्थल एवार्घ्यदानं गृहादिषु कर्तव्यं चेच्छुचिस्थले संप्रोक्ष्य तत्रार्घ्यदानमिति इदं प्रातर्मध्याह्न
कालार्घ्यप्रदानविषयं तदुक्तं उपविश्य तु सायाह्ने जलेत्वर्घ्यं न निक्षिपेत् निक्षिपेद्यदि मूढात्मा रौरवं नर
कं व्रजेत् सायं उपविश्य वारिणा संप्रोक्ष्य भूमौ अर्घ्यदानं कार्यं न जले इत्यर्थः सायमुपविश्यार्घ्यदानं
बह्वृचातिरिक्तविषयं अंजल्या आप आदाय गायत्र्याह्यभिमंत्रयेत् रवेरभिमुखस्तिष्ठन्नूत्रिरूर्ध्वं संध्य
योः क्षिपेदिति शौनकपरिशिष्टादिविरोधात् अत्र गायत्र्याभिमंत्रिता अपः ऊर्ध्वं विक्षिपंतीत्यादिश्रुत्या
दिषु गायत्रीमात्रोक्तेः केवलगायत्र्यार्घ्यदानं न प्रणवव्याहृतियुतयेति तच्छाखांतरविषयं परिशिष्टवि
रोधात् प्रत्यर्घ्यदानं मंत्रावृत्तिः कर्मावृत्तौ मंत्रोप्यावर्तत इति परिशिष्टपरिभाषोक्तेः यत्तु सकृन्मंत्रेण द्वि
स्तूष्णीं अर्घ्यं दद्याद्विचक्षण इति स्मृतिवचनं तदितरान्प्रति सार्थकं अत्र विशेष आश्वलायनस्मृतौ
ततस्तिष्ठज्जलं गृह्य प्राङ्मुखोंजलिना स्मरन् मंडले सुस्थितं तेजः स्फाटिकज्योतिषा समं उत्क्षिपेत्तच्च सं
प्राप्तं दक्षिणेन पथांजलिं व्याहृत्यादि जपेन्मंत्रं स्मृत्वैवं परितो रवेः मंदेहान्युध्यतः क्रूरान्निक्षिपेत्तेषु वंजलीं ५६

न् षोडशाक्षरमंत्रेणपुनराकृष्यसत्वरः पुनर्जलंगृहीत्वैवंतेजोमंत्रंच संस्मरन् एवंत्रिवारभावर्त्यदग्ध्वातानस्
रान्द्विजः मंत्रेणाकृष्यतत्तेजःस्थानादौस्थापयेत्स्मरन् एवब्रह्ममार्गेणस्मृत्वासंस्थाप्यचात्मनि म
दक्षिणंसमावर्त्यजलंगृह्याचमेत्ततः स्थानादौआधारमंडपेस्थितंज्योतिःर्नासारंध्रेणआधारमंडपादंतरं
जलिआगतंमंदेहाख्यराक्षसनाशायतोयेनसहक्षिस्वंगायत्रीशिरसानासावामरंध्रेणपुनराधारमंडपेस्था
पयामीतिभावयेदितिसर्वतात्पर्यार्थः इदंमांत्रिकसंध्याविषयंनतुवैदिकसंध्याविषयंप्रत्यक्षवेदेतथाअ
नुक्तत्वादितिकेचित् आश्वलायनस्मृतावुक्तत्वादाश्वलायनानामावश्यकमन्येषांकृताकृतमित्यन्ये
अर्घ्यांजलौतर्जन्यंगुष्ठयोगोनकार्यः तदुक्तंस्मृत्यंतरे तर्जन्यंगुष्ठयोगेनराक्षसीमुद्रिकाभवेत् योद
दातितयाचार्घ्यंतत्तोयंरुधिरंभवेत् आश्वलायनः गोश्रृंगमात्रमुत्धृत्य रविंवीक्ष्यजलांजलिंद्वौपा
दौचसमौकृत्वापार्ष्णीउत्धृत्यनिक्षिपेदितिगोश्रृंगंतुद्व्यदशांगुलंवेतिबोध्यमितिचंद्रिकायां अर्घका
लःकाशीखंडे अर्घोदयास्तसमयेतस्मादर्कोदकंक्षिपेत् आश्वलायनेस्तुअर्धास्तेसायंअर्घनक्षत्रास्ते
प्रातर्यथाजपारंभोभवेत्तथाचमनादिगायत्र्यावाहनांतंकर्मकर्तव्यंतथैवतत्सूत्रसिद्धांतात् शौनकः अस्ता

वादित्यमंत्रेण प्रदक्षिणमतःपरं अपस्पृश्यादक्षिणेत्विति श्रुतिरिति यत्प्रदक्षिणंप्रक्रमंतितेनपाप्मा
नमवधून्वंतीति असावादित्यमंत्रेणदीर्घमाकारं केचित्पठंतितद्भाष्यविरुध्यत्वात्थेयं अपउपस्पृशेदि
तिकेवलजलस्पर्शएवनत्वाचमनं सायंमंत्रवदाचम्यप्रोक्ष्यसूर्यस्यचांजलिं दत्वाप्रदक्षिणंकृत्वाजलं
स्पृष्ट्वाविशुध्यतीतिचंद्रोदयेनारसिंह्वात् मंदेहानांविनाशायनिक्षिपेत्तुजलांजलीन् प्रायश्चितार्थ
माचम्यमुच्यतेदैत्यहत्ययेतिसंग्रहवचनेनाचमनमुक्तं जलस्पर्शाचमनयोःसमुच्चयइतिकेचित्उभ
योरेककार्यत्वान्नसमुच्चयइत्यन्येइदंचद्विराचमनमितिकेचित्तथैवार्घ्यप्रदानंतइतिपूर्वोक्तवचनात्
अथगायत्रीजपः तत्रगृह्यं यज्ञोपवीतीनित्योदकःसंध्यामुपासीनवाग्यतः सायमुत्तरापराभिमुखो
त्वष्टमदेशांसावित्रींजपेदर्धास्तमितेमंडलंआनक्षत्रदर्शनादेवंप्रातःप्राङ्मुखस्तिष्ठन्नामंडलद र्शना 
दिति परिशिष्टं शुचौदेशेदर्भांभसोक्षितेदर्भांस्तंस्तीर्यव्याहृतिभिरुपविश्यप्राणायामत्रयंकृत्वात्मानंव्या
हृतिभिरभ्युक्ष्यसावित्र्याऋषिदेवतछंदांस्यनुस्मृत्यतामेतांचतुरक्षरशोविभक्तांमंतयो[illegible]तांषड्भिश्वागमं 

गोकर्णलक्षणमुक्तं द्योते अंगुष्ठाग्रं समाकुंच्य मध्यमा मध्यपर्वणि गोकर्णं तद्धि विज्ञेयं सर्वेषाचमनेष्वपि
प्रजापतिः उद्धृत्य दक्षिणे हस्ते जलं गोकर्णवत्कृते निश्वसन्नासिकाग्रे तु पाप्मानं पुरुषं स्मरेत् ऋतं चे
ति त्र्चं वापि द्रुपदां वा जपेदृचं दक्षनासापुटेनैव पाप्मानमपसारयेत् तज्जलं नावलोक्याथ वामभागे क्षि
तौ क्षिपेत् आचारप्रकाशे जलपूर्णं तथा हस्तं नासिकाग्रे समर्पयेत् अथार्घ्यदानं तत्राचारार्के धृतप
रिशिष्टं अथाचम्य दर्भपाणिः पूर्णमुदकांजलिमुत्धृत्यादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावि
त्र्या त्रिर्निवेदयन्नुत्क्षिपेत देवार्घ्यनिवेदनं असावादित्यो ब्रह्मेति प्रदक्षिणं परियन्परिषिच्याप उपस्पृशेदि
दिति इदमाचमनं सकृदित्युक्तं प्राक् अत्रार्घ्योदके पुष्पमिश्रणं कार्यं सावित्र्याभिमंत्रितं उदकं पुष्पमि
श्रमंजलिनाक्षिपेत् इति हारीतस्मरणात् शौनकः ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजुसंस्थितः द्विजोर्घ्यं
प्रक्षिपेद्देव्या सायं तूपविशन्भुवीति स्मृत्यंतरे जलेत्वर्घ्यं प्रदातव्यं जलाभावे शुचिस्थले संप्रोक्ष्य वारिणा
सम्यक्पश्चादर्घ्यं यथाविधि अत्रापि दातव्यमित्यन्वयः अस्यार्थमाह पारिजातकारः नद्यादौ नडा

जं×२

हव्यासः कौशेयंकवलंचैवअजिनंपट्टमेवच दारुजंतालपत्रंवाआसनंपरिकल्पयेत् कृष्णाजिनेज्ञान
सिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि वशाजिनेव्याधिनाशः कंबलेदुःखमोचनं अभिचारेनीलवर्णस्तुवश्यादि
कर्मणि शांतिकेकंबलःप्रोक्तासर्वेष्टंचित्रकंबले शारदातिलके वस्त्रासनेरोगनाशंचित्रकंविष्टरंश्रि
ये महोदधौ अनंतंविमलंपद्मंडेतासननमोन्वितं जपन्निदध्यादर्भांस्त्रीन्कुशाचर्मांबरासने शंखः
कुशहस्त्यांसमासीनःकुशोतरायांवाकुशपवित्रपाणिःसूर्याभिःमुखोदेवतांध्यायन्जपंकुर्यादिति॥नि
षिद्धान्याहप्रचेताः॥गोशकृन्मृन्मयंभिन्नंतथापालाशपिप्पलं लोहबद्धंसदेवार्कंवर्जयेदासनंबुधः
व्यासः वंशासनेतुदारिद्र्यंपाषाणेव्याधिजंभयं धरण्यांदुःखसंभूतिर्दौर्भाग्यंछिद्रदारुजे तृणेधनयशो
हानिःपल्लवेचित्तविभ्रमः॥स्मृत्यंतरे मृगचर्मप्रयत्नेनवर्जयेत्पुत्रवान्गृही॥उपवेशनमंत्रस्तुपरिशिष्टम
तेव्याहृतिः॥गायत्रीकल्पेतुमंत्रांतरमुक्तंपृथ्वीत्वयाधृतालोकेत्यादि अनयोःसमुच्चयइतिप्रयोगिकाः उ
भयोरेककार्यत्वान्नसमुच्चयइत्यन्ये आचारार्केतुव्याहृतिभिरुपवेशनोत्तरंपृथ्वित्वयेतिमंत्रपाठउक्तः

सकिंमूलकइतिनविस्मः॥ उपवेशनंतूपस्थासनेनेतिपूर्वमुक्तं वायुपुराणे॥ पद्ममर्धासनंवापितथास्वस्ति
कमासनं एषांलक्षणानिकौर्मे ऊर्वोरुपरिविप्रेंद्रकृत्वापादतलेउभे समासीतात्मनः ~~प्रोक्तमासनंस्वस्ति~~
~~कंपरमिति~~ पद्ममेतदासनमुत्तमं एकंपादमथैकस्मिन्विन्यस्योरुणिसत्तम आसीनोर्धासनमिदंयो
गसाधनमुत्तमं उभेकृत्वापादतलेजानूर्वोरंतरेणहि समासीतात्मनः प्रोक्तमासनंस्वस्तिकंपरमिति
न्या षडंगेसमंत्रेषुभवति मंत्रमादौपारिभाषिकः प्रणवउच्चार्यः॥ पारिजातेप्येवंशक्तेः॥ षडंगंमुद्रामहोदधौ
हृद्यंगुलीत्रयंन्यस्येत्तर्जन्यादिद्वयेतुके शिखापदेशेथांगुष्ठंदशांगुल्यस्तुवर्मणि हृद्वन्नेत्रंपूर्वमस्त्रं
शक्तेरंगस्यमुद्रिकाः पूर्वमस्त्रंविष्णोरस्त्रतुल्यं तच्च तत्रैवप्रसारिताभ्यांहस्ताभ्यांकृत्वातालत्रयंसुधीः
तर्जन्यंगुष्ठयोरग्रेस्फालयन्नूबंधयेद्दिश इति मंत्रदेवतांध्यायेत्युक्तं तद्ध्यानमुक्तंपरिशिष्टएव अ
थदेवताध्यानं यासंध्योक्तासैवमंत्रदेवतास्वरूपास्यतेतांसर्वदैकरूपांध्यायेदनुसंध्यमन्यान्यरूपांवा
यदेकरूपामृग्यजुःसामनिपदांतिर्यगूर्ध्वाधरदिक्षट्कुक्षिंपंचशीर्षामभिमुखांब्रह्मशिरसंविष्णुहृदयां

शिखां पृथिवीयोनिं दंडकमंडल्वक्षसूत्राभयकरां चतुर्भुजां शुभ्रवर्णां शुभ्रांबरानुलेपनां मंडलमध्यस्थां रक्त
वर्णां रक्तांबरानुलेपनस्रगाभरणां चतुर्वक्त्रां दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां हंसासनारूढां ब्रह्मदैव
५८ त्यां ऋग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्रीं गायत्रीं नाम देवतां अथ मध्यंदिने तां युवतीं युवादित्यमंडलमध्य
स्थां श्वेतवर्णां श्वेतांबरानुलेपनस्रगाभरणां पंचवक्त्रां प्रतिवक्त्रं त्रिनेत्रां चंद्रशेखरां त्रिशूलखड्गखट्वांग
डमरुकांकचतुर्भुजां वृषभासनारूढां रुद्रदैवत्यां यजुर्वेदमुदाहरंतीं भुवर्लोकाधिष्ठात्रीं सावित्रीं नाम देव
तामथ सायं तां वृद्धां वृद्धादित्यमंडलमध्यस्थां श्यामवर्णां श्यामांबरानुलेपनस्रगाभरणां एकवक्त्रां शं
खचक्रगदापद्मांकचतुर्भुजां गरुडासनारूढां विष्णुदैवत्यां सामवेदमुदाहरंतीं स्वर्लोकाधिष्ठात्रीं सरस्व
तीं नाम देवतां ध्यात्वा बाह्यजपित्वेति संध्यादेवत्यावसिष्ठेन स्पष्टीकृत्वा या संध्या सा जगत्सूतिर्मायातीता ५९
हि निष्कला ईश्वरी केवला शक्तिः वेदत्रयसमुद्भवा ध्यात्वार्कमंडलागतां सावित्रीं वै जपेद्बुधः अनेना
* स्रगाभरणां शारच्चंद्रसहस्रप्रभां सर्वदेवमयीमिमां देवीं गायत्रीं एकामेव तिसृषु संध्यासु ध्यायेद्यदि भिन्नरूपां तां प्रातर्बालां बालादित्य+ १

त्रैर्यथांगंमात्मनिविन्यस्यात्मानंतद्रूपभावयेत् तद्यथा तत्सवितुर्हृदयायनमइतिहृदये वरेण्यंशिरसे
स्वाहेतिशिरसि भर्गोदेवस्यशिखायैवषडितिशिखायां धीमहिकवचायहुमित्युरसिधियोयोनोनेत्रत्रया
यवौषडितिनेत्रललाटदेशेषुविन्यस्याथप्रचोदयादस्त्रायफडितिकरतलेनास्त्रंप्राच्यादिदशसुदिक्षुन्यसे
देषांगन्यासएतमप्येकेनेछंतिसहिविधिर्वैदिकइत्यथमंत्रदेवतांध्यात्वाआगछंतुवरदेदेवीत्यावाह्यति
ष्ठन्नर्धनष्टेषुनक्षत्रेषुआमंडलदर्शनान्मंत्रार्थमनुसंदधानःप्रणवव्याहृतिपूर्वकांसावित्रींजपेदिति शुचि
देशमाहसंवर्त्तः गृहत्वेकगुणंजाप्यंनद्यांतुद्विगुणंस्मृतं गवांगोष्ठेदशगुणमग्न्यागारेशताधिकं सिद्धक्षे
त्रेषुतीर्थेषुदेवतानांचसन्निधौ सहस्रशतकोटीनांअनंतंविष्णुसन्निधौइति अभ्युक्षणलक्षणंतु मुष्टि
करोतियमोयमभ्युक्षणमितिस्मृतमितिज्ञेयं दर्भास्तरणंप्रागग्रतथा प्राक्कूलेषुततःस्थित्वादर्भेषुसु
समाहितइतिकूर्मपुराणात् अथासनांतराणि आचारप्रकाशेमंत्रखंडे यथोक्तासनमारूढोजपमंत्रां
स्समाचरेत् कुशाजिनांबरैर्युक्तैश्चतुरंगुलमूर्ध्वतः चतुरस्रंद्विहस्तंचसुदृढंमृदुशुनिर्मलं तत्रविशेषमा

समविकल्पमाहुः अत्रपर्वशब्दोरेखावचनः प्रदेशिन्याःपर्वणिउत्तम इति सूत्रवृत्तौतथैवोक्तत्वात्
अतोनामिकामध्यरेखामादिंकृत्वातदधःक्रमेणप्रादक्षिण्येनतर्जन्यादिरेखायांसमाप्तिः पर्वश
ब्दोत्रकांडवचनइतिकेचित्तन्मतेअनामिकाद्वितीयकांडप्रभृतिगणनात्तर्जन्यादिकांडेसमाप्तिः इत्थम
नुः वस्त्रेणाच्छाद्यतुकरंदक्षिणंयःसजपेत् तस्यस्यात्सफलंजप्यंतद्धीनमफलंस्मृतं अतएवतिर्य
क्साचिकाकेनचिद्बुधिमताद्वृद्धेनजशीलेनजपार्थेकल्पितासाचगोमुखीतिव्यवह्रियतेतस्यास्त्व
न्यत्किंचिन्मूलंनपश्यामः मंत्रार्थःपरिशिष्टे यःसवितानोस्माकंधियोधर्मादिविषयबुद्धीःप्रचोद
यात्प्रेरयेत्तद्वरेण्यंवरणीयंदेवस्यसवितुर्भर्गः पापभंजनंतेजोमयंरूपंवयंधीमहि ध्यायेमेति
पारिजातेसंध्याकल्पे प्रातर्नाभौकरौकृत्वामध्यान्हेहृदिसंस्थितौ सायंजपस्तुनासाग्रेत्रिसंध्यंजप
लक्षणं स्मृत्यंतरेतुसायंमुखसमौकरावित्युक्तं शौनकः कृत्वोत्तानौकरौप्रातःसायंचाधोमुखौक
रौ मध्येसंमुखहस्ताभ्यांजपएवमुदाहृतइति जपस्त्रिविधः नृसिंहपुराणे त्रिविधोजपयज्ञःस्या

तस्यभेदंनिबोधत वाचिकश्चउपांशुश्चमानसस्त्रिविधःस्मृतः त्रयाणांजपयज्ञानांश्रेयांस्यादुत्तरो
त्तरः वाचिकत्वोपांशुत्वयोर्लक्षणंपुराणेभिहितं यदुच्चनीचस्वरितैःशब्दैस्पष्टपदाक्षरैः मंत्रमुच्चा
रयेद्वाचावाचिकोयंजपस्मृतः शनैरुच्चारयेन्मंत्रमीषदोष्ठौप्रचालयेत् अपरैरश्रुतःकिंचित्स
उपांशुजपःस्मृतः विश्वामित्रः धियायदक्षरश्रेण्यावर्णाद्वर्णंपदात्पदं शब्दार्थचिंतनंभूयःक
थ्यतेमानसोजपः अत्रयद्यपिवाचिकादित्रिषुयथोत्तरंश्रैष्ठ्यमुक्तंतथाप्याश्वलायनानांउपां
शुत्वमेवजपानुमंत्रणाप्यायनोपस्थानान्युपांशुमंत्राश्चकर्मकरणाइतितत्सूत्रात् जपेप्रणवव्या
हृतिपूर्विकागायत्रीपूर्वोक्तपरिशिष्टात् प्रणवव्याहृतियुतांगायत्रींप्रजपेत्ततइतिव्यासवचना
च्च यद्यपिगृह्यकारमतेसायंअर्धास्तादारभ्यानक्षत्रदर्शनं प्रातरर्धनक्षत्रास्तादारभ्यासूर्योदयं
जपकर्तव्यताप्रतीयते तथापिसंख्याआवश्यकीअसंख्यातंतुयज्जपंतत्सर्वंस्यान्निरर्थकमि
तिसंख्याहीनस्यवैफल्यश्रवणात् परिशिष्टमालायाउक्तत्वाच्च जपसमाप्त्यवधिप्राप्तोमालाय

असमाप्तावपिजपंसमाप्यउपस्थानंकुर्यात् नखंडांकारयेन्मालांजपकर्मणिमानवइतिमालाखंडनंनिषे
धोयेषांसूत्रेवधिर्नोक्तस्तस्यराजपांतरपरोवा आनक्षत्रदर्शनाद्वामंडलदर्शनादित्युभयत्राङ्वर्ततेत
स्यआङ्मर्यादाभिविध्योरितिपाणिनिस्मरणात् उभयार्थत्वेपिप्रकृतेमर्यादार्थत्वमेवअभिविध्यर्थ
कत्वेआसायमाप्रातश्चजपप्रसंगात् तथाचनक्षत्रेसूर्ययोर्दर्शनंजपस्यावधिर्भवति नतुस्थानोप
वेशनयोः गायत्रीजपस्यैवमुख्यतयाप्रतिपाद्यत्वात् तेनेगोणकालेसंध्यानुष्ठानेपिजपस्यावश्यकत्वा
त्सायमुपविश्यैवप्रातस्तिष्ठन्नेवजपेदितिगम्यते प्रातस्तिष्ठतोजपेकारणमपिश्रूयतेऐतरेयब्राह्म
णे प्रत्युत्थेयावाआपःप्रतिवैश्रेयांसमायंतमुत्तिष्ठंतीति श्रेयांसंश्रेष्ठतममायंतंआगच्छंतंप्रत्यभि
मुखास्तिष्ठंतिलोकेपरत्रगुर्वादौश्रेष्ठेआगच्छतिसतिभृत्यादयउत्तिष्ठंतीतिसूर्येविश्वेश्वरेउदितेआगच्छ
तिकेनापिस्थातुंनोचितुंअतःकारणात्प्रातस्तिष्ठन्नेवजपेत् इतरकालयोरुपविश्यजपःसूर्यस्याभिमु ६१
खागमनाभावात् वृषाकपिरपि कन्यादानंचगोदानमुत्तराधारमेवच प्रातःसंध्याजपंचैवतिष्ठन्नो

र्कबिंबाभिव्यक्तं आदित्यशब्दवाच्यपरंब्रह्मरूपचिच्छक्तिरेव संध्यादेवतेत्युक्तं भवति आवाहनमंत्रः परिशिष्टे
आगच्छ वरदे देवि जप्येमे संन्निधो भव गायंतं त्रायते यस्माद्गायत्री त्वं ततः स्मृता व्यासः आवाहयेत गा
यत्रीं सर्वपापप्रणाशिनीं आगच्छ वरदे० स्मृता जप्येमेत्यत्र यकारविशिष्टः संन्निधावित्यत्र सत्संम्यंत
श्च पाठः समीचीनः अथ जपमालापरिशिष्टं जपं चाक्षसूत्रेण नासिकाया मध्यादारभ्य प्रदक्षिणं दश
भिरंगुलिपर्वभिर्वा गणयेत् यद्यप्यत्राविशेषेणाक्षमाला करमालयोर्विकल्प उक्तस्तथापि पर्वभिस्तु
जपेद्देवीं माला काम्यजपे स्मृता गायत्र्या वेदमूलत्वाद्वेदः पर्वसु गीयते आरभ्यानामिकामध्यं पर्वदेवीम
नुक्रमात् तर्जनीमूलपर्यंतं जपेद्दशसु पर्वसु मध्यमांगुलिमूले तु यत्पर्वद्वितयं भवेत् तं वै मेरुं विजानी
याज्जपे तं नातिलंघयेत् इति ब्रह्मयामलवचोनुरोधेन संध्यांग जपे करमाला पुरश्चरणजपेक्षमालेति
व्यवस्थितिर्ज्ञेयेति केचित् अन्ये तु ब्रह्मयामलवचनस्य शाखांतरे सावकाशत्वात् पश्चिममुखः सूर्याभि
मुखं वाक्षमालामादाय तां ध्यायं जपेदिति शंखस्मृत्यनुग्राहकपरिशिष्टादाश्वलायनामक्षकरमालयोः

दोषादिनिमित्तवशेनन्यूनसंख्याप्रतिपादकानिनारदस्मृत्यादिवचनान्यपिगौणकालसंख्यावंदनपराणिशा
खांतरपराणिचेतिकेचित् युक्तंतु यथाशौचनिमित्तेनउक्तादशसंख्याअविशेषेणसर्वैर्गृह्यतेतथाप्रदोषादि
निमित्तेनोक्ताष्टादिसंख्यासर्वैरपिग्राह्येति अत्रजपमालामणिसंख्यातत्संस्कारजपनियमाह्निकंचसर्वंनै
मित्तिकजपप्रकरणेवक्ष्यामः जपांतेउपविश्यपूर्ववत्षडंगंकुर्यात् अयंषडंगोयद्यपिपरिशिष्टे अथजातवे
दसेसुनवामसोमंतच्छंयोरावृणीमहेनमोब्रह्मणेनमोअस्त्वग्नयेइत्येताभिरुपस्थायेति शौनकोपि सायं
प्रातरुपस्थानंकुर्यान्मंत्रैर्यथाक्रमं जातवेदसेइत्येकातच्छंयोरावृणीमहे नमोब्रह्मणइत्येतेरुपति
ष्ठेत् दिशंप्रतिभगवान् त्र्यंबकमितिमंत्रेणनमोब्राह्मणइत्यथ इमंमेवरुणतत्वेतिसायंकाले
विशेषः मित्रस्यचर्षणीद्वाभ्यांप्रातःकालेविशेषतः आश्वलायनस्मृतौतु ऋग्भिश्चतसृभिर्मंत्रैर्गा
यत्रैरेवबहृचइत्युक्तं अत्रस्मृत्यंतरोक्तोपस्थानमंत्राणांपरिशिष्टोक्तोपस्थानानंतरंसंनिवेशः ६२
आगंतूनामंतेसंनिवेशइतिन्यायात् अतएवपारिजातादिप्रयोगेतथैवोक्तं आचारार्केतु

जातवेदसइत्यनंतरंस्मृत्युक्तमंत्राणांसंनिवेशः कृतः सन समीचीनइतिभाति यथाक्रममितिशौनकोक्त्या मध्ये
संनिवेशस्यात्यंतानुचितत्वात् उपस्थानंचादित्यस्यैव तदुक्तमाश्वलायनस्मृतौ अथोपतिष्ठेदादित्यमु
दयंसुसमाहितः भारतेपि तेतथैव महाराजदंशिता रणमूर्धनि संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे
केचित्तंध्योपस्थानमाहुः तत्रापिसंध्याशब्दः आदित्यशब्दवाच्यपर इतिभट्टोजीये उक्तत्वादविरोधः
अत्रयद्यपि जातवेदसे इमंमेवरुण इत्यादिभिरग्निवरुणाद्युपस्थानं लिंगबलात्प्राप्तं तथापिश्रुतेः प्राब
ल्यादादित्योपस्थानेतेषां विनियोगः॥ एतत्सर्वं तृतीयाध्याये ऐंद्र्यागार्हपत्यमुपतिष्ठतइति अत्रविचा
रितंउपस्थानलक्षणंवृत्तौमंत्रमुच्चारयन् एवमंत्रार्थत्वेनसंस्मरन् शेषिणंतन्मनाभूत्वास्यादेतद
नुमंत्रणंएतदेवाभिमंत्रस्यलक्षणंवेक्षणाधिकं अद्भिःसंस्पर्शनाधिक्यातदेवाप्यायनंस्मृतं
उपस्थानंतदेवस्यात्प्रणतिस्थानसंयुतमिति प्रणतिमुद्रालक्षणंव्यास आह नमस्काराभिधामु
द्राज्ञेयापाणीतुसंहतौ॥ कश्यपः॥ हस्ताभ्यांस्वस्तिकंकृत्वाप्रातस्तिष्ठेद्दिवाकरं मध्याह्नेतुत्र

ऊर्ध्वबाहुःसायंमुकुलितौकरौ उपस्थानान्तरकृत्यंपरिशिष्टे प्रदक्षिणंदिशःसाधिपानत्वाथसंध्यायैगायत्र्यै
 सवित्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्यश्चनमस्कृत्यततउत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ब्राह्मणेभ्योभ्यनु
ज्ञातागच्छदेवियथासुखमितिसंध्यांविसृज्यभद्रंनोअपिवातयमनइत्यृचाशांतिंचत्रिरुच्चार्यप्रदक्षिणं
परिक्रामन्सत्यलोकादापातालादालोकालोकपर्वताद्येसंतिब्राह्मणादेवास्तेभ्योनित्यंनमोनमइ
तिनमस्कृत्यभूमिमुपसंगृह्यगुरून्वृद्धांश्चोपसंगृह्णीयात् एवंसायं॰मिति अत्रदिक्शब्देनचत
स्रएवदिशोगृह्यंतइतिकेचित् तन्न परिशिष्टेवृषोत्सर्गप्रकरणेचतस्रोदिशउपस्थायेत्यत्रचतुर्ग्र
हणस्यवैयर्थ्यापातात् श्रुतावपिअवांतरदिङ्नमस्यविहितत्वाच्च अतोविशेषाद्दशदिग्ग्रहणंयुक्तं त
नमः त्रप्राच्यैदिशेइंद्रायनमः अग्नयेदिशेनमः अग्नयेनमः इत्यादिप्रयोगः पारिजातादौ अन्येतुप्राच्यैदिशे
इंद्रायचनमः इत्यादिप्रयोगमाहुः परिशिष्टस्वरसात्सेंद्रायैप्राच्यैदिशेनमः साग्निकायैआग्नेय्यैदिशे
नमइत्यादिरीत्याप्रयोगइत्यभियुक्ताः इदमेवयुक्तं केचित्तुप्राच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसं

समाचरेत् योगयाज्ञवल्क्यः ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत् वानप्रस्थो यतिश्चैव सहस्रा
दधिकं जपेत् अत्राहिताग्निशब्देन परिशेषाद्गृहस्थ उच्यत इति पारिजाते स्मृत्यंतरे सायंप्रातश्च म
ध्यान्हे सावित्रीं वाग्यतो जपेत् सहस्रपरमां देवीं शतमध्यां दशावरां व्यासः अष्टोत्तरशतं नित्यमष्टा
विंशतिरेव वा विधिना दशकं वापि त्रिकालेषु जपेद्बुधः आपद्यष्टसंख्येति स्मृत्यर्थसारे नारदः सर्वत्रै
व प्रदोषेषु गायत्रीमष्टसंख्यया अष्टाविंशत्यनध्याये जपेन्नाष्टोत्तरं शतं सुमंतुः अष्टम्यां च चतुर्दश्यां नि
त्यादर्धं जपेत्सुधीः प्रतिपत्सु तुरीयांशं पर्वण्यल्पतरं जपेत् चंद्रिकायां श्राद्धे प्रदोषे दर्शे च गायत्रीं दश
दशसंख्यया अष्टाविंशत्यनध्याये त्रयोदश्यां तु मानसं अत्रोक्तवचनानां व्यवस्था सूर्योदयनक्षत्रावधि
र्जपः काम्यः कामनाभावे ष्टोत्तरशतादिसंख्याग्रह इत्याचारादर्शः तन्न कामनाश्रुतेः अतोष्टोत्तरशतादिसं
ख्याप्रतिपादकानि योगयाज्ञवल्क्यादिवचनानि गौणकालसंध्यावंदनपराणि येषां गृह्ये जपावधिर्नोक्तस्तत्प
राणि चेति युक्तं वक्तुं अशक्तो दशाष्टादिसंख्या सर्वैरपि ग्राह्या नित्याकर्मणां यथाकथंचित्कर्तव्यत्वात् प्र

णः ४ मार्गशीर्षः ५ आर्द्रकः ६ पुनर्वसुः ७ तिष्यः ८ आश्लेषः ९ माघः १० पूर्वाफल्गुणः ११ उत्तराफ
ल्गुणः १२ हस्तः १३ चैत्रः १४ स्वातिः १५ विशाखः १६ अनूराधः १७ ज्येष्ठः १८ मूलकः १९ पूर्वाषाढः २०
उत्तराषाढः २१ अभिजितः २२ श्रवणः श्रावणः २३ श्रविष्ठः २४ शातभिषक्शातभिषजः २५ पूर्वाप्रो
ष्ठपदाः २६ उत्तराप्रोष्ठपादः २७ रैवतः २८ अत्र मूलं सुदर्शनभाष्ये स्पष्टं अस्य शर्मांतत्वं मुक्तं प्र
योगरत्ने कौस्तुभे च ततनक्षत्रचरणाक्षरघटितं नाम पठंति शिष्टाः अभिवादयामीति परस्मैपदं
केचित्कुर्वंति तदुपेक्ष्यं कर्तृगामिक्रियाफले आत्मनेपदस्यैव वक्तव्यत्वात् संध्यांते प्रार्थनामंत्रमा
ह पराशरः यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् तत्सर्वं क्षम्यतां देवि कश्यपप्रियवादिनी कुतूहले
संवर्तः स्वरमात्राविहीनं तु पदाक्षरविवर्जितं न्यूनाधिकं वा कृत्वा तु आभिर्गीर्भिरितीरयेत् ततः सकृ
देवाचमनं कर्मांत आचमनं चेति सामान्यमिति परिभाषायामविशेषोक्तेः अत्र द्विराचमनमिष्यते
तत्र विदधाति यथा संध्यारंभे सएवं द्विराचम्येति देवीपुराणेपि दाने प्रतिग्रहे होमे संध्यात्रितयवंद ६४

ने बलिकर्मणिचाचामेदादौद्विर्नांततोद्विजः अंतेद्विराचमनविधायकंपूर्वोक्तवचनंशाखांतरंपरं त
तःसंध्योपासनकर्मविष्णवेसमर्पणीयं तदुक्तंबृहन्नारदीयेनित्यंनैमित्तिकंकाम्यंयच्चान्यन्मोक्ष
साधनं विष्णोःसमर्पितंसर्वंसात्विकंसफलंभवेत् गीतायामपि यत्करोषियदश्नासियज्जुहो
षिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमिति केचनकर्मांताचमनात्पूर्वंकर्मेश्व
रार्पणंकुर्वंतितंनसमंजसं आचमनस्यकर्मांगत्वात्सांगकर्मणःईश्वरेसमर्पणीयस्योचितत्वा
त् समर्पणवाक्यंतु अनेनसंध्योपासनाख्येनकर्मणापरमेश्वरःप्रीयतामितिबह्वृचः युक्तं
तुइदंयत्कृतंप्रातःसंध्योपासनाख्यंकर्मतत्परमेश्वरायसमर्पयामीति विष्णोःसमर्पितंस
र्वमित्याद्युक्तवाक्यानुरोधात् कुशत्यागकालमाहधर्मप्रवृत्तौशौनकः मंत्राचमनांते वि
सृज्यदर्भानाचम्यकुशपाणिश्चमार्जयेत् आपोहिष्ठेतिनवभिर्ऋग्भिर्मार्जनंमाचरेत् ऋ
तंचेतितृचंवापिद्रुपदांवाजपेदृचं दक्षनासापुटेनैवपाप्मानमपसारयेत् तज्जलंनावलो

क्याथवामभागेस्मिंतोक्षिपेत् आचम्यदर्भान्विसृजेत् धृत्वादर्भानतःपरं पाणिभ्यांजलमादायगायत्र्या
६५ चाभिमंत्रितं आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति असावादित्यमंत्रेणप्रदक्षिणमतः
परं अपःस्पृष्ट्वादक्षिणेतुपश्चाद्दर्भान्विसर्जयेत् प्रयोगपारिजातेप्येवंपवित्रस्यतुकर्मसमर्पणो
त्तरंग्रंथिविस्रस्यशुचिदेशेक्षेपः धृतंपवित्रंकर्मांतेग्रंथिंमुक्त्वैवतत्यजेदितिवचनात् अथसंध्या
मंत्राणांऋषिदेवतछंदोविषयेपरिशिष्टं अथास्यमंत्राणांऋषिदेवतछंदांसिप्रणवस्यब्रह्माग्नि
र्दैवीगायत्रीव्याहृतीनांसप्तानांविश्वामित्रजमदग्निभरद्वाजगोतमात्रिवसिष्ठकश्यपाःप्रजाप
तिर्वासर्वासामग्निवाय्वादित्यायजुश्छंदःआपोहिनवत्रिशिरास्त्वाष्टःसिंधुद्वीपोवांबरीषआयं
गायत्र्यनुष्टुबंतंपंचमीवर्धमानासप्तमीप्रतिष्ठास्सूर्यश्चब्रह्मास्सूर्यमन्युमन्युपतिःप्रकृतिरापःपु
नंतुविष्णुरापोष्टी अग्निश्चरुद्रोग्निमन्युमन्युपतयश्चप्रकृतिः ऋतंतृचंमाधुछंदसोघमर्षणोभाव ६५
तत्रमानुष्टुभंजातवेदसेकश्यपोजातवेदाअग्निस्त्रिष्टुप् तच्छंयोःशंयुर्विश्वेदेवाःशक्करीनमोब्रह्मणे

त्येताभ्यश्च नमइत्यादितैत्तिरीयारण्यकमंत्रैर्दिगुपस्थानमाहुः तत्तैत्तिरीयाणामेव तथैव शिष्टसमाचारात्
उत्तमे शिखरे जातेत्यत्र रो[illegible]वीति मूर्धनीत्यत्र वासिनीति ब्राह्मणेभ्योभ्यनुज्ञातात्यत्र ब्रह्मणा समनुज्ञा
तेति ब्राह्मणैरभ्यनुज्ञातेति च क्वचित्पाठो दृश्यते स नारायणीयोपनिषद्भाष्यपरिशिष्टविरोधादुपेक्ष्यः
आसत्यलोकादापातालादिति पातालशब्दात्सर्वमप्याहुस्त्वार्यः लोकालोकपर्वताद्यैरूपेण चोच्चार्यं त
थैव बहुपुस्तकेषु दृष्टत्वात् उपसंग्रहणं नाम अमुकप्रवरान्वितामुकगोत्रोमुकशर्माहं भो अभिवा
दये इत्युक्त्वा दक्षिणोत्तरकर्णौ वामदक्षिणपाणिभ्यां स्पृष्ट्वा दक्षिणहस्तेन गुरोर्दक्षिणं पादं वामेन वामं
स्पृष्ट्वा शिरोवनमनमिति संध्याभिवादने नाक्षत्रनाम्नः प्रथमया तद्धितान्तेन च निर्देश इति सुदर्शना
चार्यः अत एवासावित्यस्यादिश्यनामनीद्विति सूत्रव्याख्यानावसरे देवत्रातोपि नत्रजात इत्यस्मि
न्नर्थे त[illegible]द्धित उत्पद्यते इति प्रकृत्य तस्मादेवं प्रयोगो भवति अनूराधो देवदत्त इति अथ तद्धितां
तानां नक्षत्रनाम्नां संग्रहः अश्वयुक् आश्वयुजः १ अपभरणः आपभरणः २ कृत्तिकः ३ रोहि

सूर्यमन्युमन्युपतिरात्रयोदेवताइतिचंद्रिकामदनपारिजातौ आपःपुनंत्वित्यस्याग्निश्चेत्यस्यचर्ष्याद
यःपरिशिष्टानुरूपाएवचंद्रिकायांरत्नमालायांचोक्ताः सूर्यश्चेत्यस्ययाज्ञवल्क्योपनिषदृषिःसू
र्यमन्युमन्युपतयोरात्रयश्चदेवताःगायत्रीपंक्तिर्विराजश्छंदांसिइत्यादिप्रकारांतरंआश्वलायनेः
नादर्त्तव्यंस्वगृह्यपरिशिष्टविरोधात् अथऋष्याद्युच्चारणेक्रमोबृहद्देवतानुक्रमणिकायांनियमो
यंजपेहोमेऋषिश्छंदोथदैवतं अन्यथाचेत्प्रयुंजानस्तत्फलंचात्रहीयते अर्थेप्सवःखल्वृषय
श्छंदोभिर्देवताःपुरा अभ्यधावन्निति छंदोमध्येत्वाकुर्महर्षयः ऋषिंतुप्रथमंब्रूयाछंदस्तुतदनंतरं
देवतामथमंत्राणांकर्मस्वेवमितिश्रुतिः तथारामवाजपेय्यांगृह्यकारोपि ऋषिमादौप्रयुंजीतछंदोम
ध्येनियोजयेत् देवतामवसानेचमंत्रज्ञोमंत्रसिद्धये सर्वानुक्रमण्यामपिब्राह्मणार्षेयछंदोदैवतवि
द्याजनाध्यापनाभ्यांश्रेयोधिगच्छतीति प्राचीनास्तुऋषिंदैवतछंदांस्यनुक्रमिष्यामइतिसर्वानुक्रमवा ६५
क्यंअथास्यमंत्राणामृषिदैवतछंदांसीतिपरिशिष्टवाक्यंचक्रमबोधकंमन्यमानाःप्रथमंऋषिःततोदेव

तातनश्छंदः एवंक्रमेणोच्चारणमाहुः अथ संध्याकालातिक्रमप्रायश्चित्तं तत्र स्कांदे उदयास्तमयादू
र्ध्वं यावत्स्याद्घटिकात्रयं तावत्संध्यामुपासीत प्रायश्चित्तमतःपरं इदं च श्रांतपरं अन्यथा प्रातःसंध्यां
सनक्षत्रां नोपास्ते यः प्रमादतः गायत्र्यष्टशतं तस्य प्रायश्चित्तं विशुद्धय इति कर्मप्रदीपवचो विरोधापत्तेः
प्रातःसंध्यां सनक्षत्रामिति सायंसंध्या तु सादित्यामित्येतदुपलक्षणमिति पृथ्वीचंद्रः तत्र यमः
प्राणायामत्रयं प्रातर्द्विगुणं संगवे स्मृतं मध्याह्ने त्रिगुणं प्रोक्तमपराह्णे चतुर्गुणं सायाह्ने पंचगु
णकं संध्यातिक्रमणे भवेत् यत्तु जामदग्न्यवचनं संध्याकाले त्वतिक्रांते स्नात्वाचम्य यथाविधि
जपेदष्टशतं देवीं ततः संध्यां समाचरेत् इति तत्प्राणायामाशक्तपरं एवं कर्मप्रदीपवचनमपि य
त्तु यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधि गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहित इति तद्बुध्या
सकृल्लोपविषयं यत्तु वसिष्ठवचनं कालातिक्रमणे चैव त्रिसंध्यमपि सर्वदा चतुर्थार्घ्यं प्रकुर्वन्भूतभानो
व्याहृतिसंपुटमिति तदल्पकालातिक्रमविषयं एकाहाद्यतिक्रमे जमदग्निः एकाहं समतिक्रम्य संध्यावंद

नकर्मतत् अहोरात्रोषितोभूत्वागायत्र्याअयुतंजपेत् द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणंस्मृतं त्रि
रात्रात्परतश्चेत्स्यात्कृच्छ्रइएवनसंशयः अथप्रायश्चित्तार्घेविशेषः तत्रप्रायश्चित्तार्घ्यंप्रधानार्घ्यं
प्रधानार्घ्यप्रधानार्घ्यप्रदानात्पूर्वंदद्यात् तदाहव्यासः प्रणवव्याहृतियुतांगायत्रींशिरसासह उ
च्चार्यहत्वार्घ्यमादौसंध्याकर्मसमाचरेत् तथा चतुरर्घ्यंतुगायत्र्यादत्वासंध्यांसमाचरेत् काला
तीतविशुध्यर्थंसंध्यासुमुसमाहितइति ननूक्तवचनद्वयेप्रायश्चित्तार्घ्यंदत्वासंध्याकर्मसमा
चरेदितिस्पष्टमुक्तेः संध्यारंभात्पूर्वमेवप्रायश्चित्तार्घ्यंदत्वासंध्यारंभंकुर्यादितिचेन्नसंध्यांभा
ष्येयदाकालातिपातिसंध्यावंदनंक्रियतेतदाप्रायश्चित्तार्घ्यंदत्वाततस्त्रीणिप्रधानार्घ्याणिदद्या
दित्युक्त इदंप्रायश्चित्तंसंध्यात्रयेपिसमानं चतुरर्घ्यंतुगायत्र्याशिरोव्याहृतिसंपुटं कालातीत
विशुध्यर्थंत्रिसंध्यासुसमाचरेदितिसंध्याभाष्यधृतवचनात् अथप्रयोगः अघमर्षणोत्तरकृत
व्याचमनानंतरंममामुकसंध्योपासनस्यमुख्यकालातिक्रमदोषपरिहारार्थंअर्घ्यप्रक्षेपणात्मकंप्रा 

प्रजापतिर्विश्वेदेवाजगती आकृष्णेनहिरण्यस्तूपः सविताग्निष्टुप् हंसः शुचिषदृसुवामदेवः सूर्योजग
त्युदुत्यंप्रस्कण्वः सूर्योगायत्रमंत्याश्चतस्त्रस्त्रिष्टुभः चित्रंदेवानांकुत्सः सूर्यस्त्रिष्टुप् तच्चक्षुर्वसिष्ठः
सूर्यः परउष्णिक् देवतास्मरणमेववाकुर्यादेवमन्यत्रव्याख्यातमिति प्रणवस्यब्रह्माग्निर्दैवीगाय
त्रीव्यासोपि प्रणवस्यऋषिर्ब्रह्मागायत्रीछंदएवचदेवोग्निःसर्वकर्मादौविनियोगःप्रकीर्तितःवच
नांतरेतुपरमात्मादेवतोक्ता परंतुगायत्रीहृदयेउक्तपरिशिष्टेचाग्निदेवतोक्तेराश्वलायनैरग्निदे
वतैवोच्चार्याकमलाकरनृसिंहावप्येवमूचतुः सप्तव्याहृतिऋष्यादिविषयेवचनांतरं विश्वामि
त्रोजमदग्निर्भरद्वाजोथगोतमः ऋषिरत्रिर्वसिष्ठश्चकश्यपश्चयथाक्रमादिति अत्रव्याहृ
तीनांसप्तानांविश्वामित्रभृगुभरद्वाजवसिष्ठगोतमकश्यपांगिरसाइतिक्वचित्पाठः परिशिष्टपुस्तकां
तरेदृश्यते परंतुवचनांतरैकवाक्यतयाआचारार्कादिबहुग्रंथानुरोधाच्चपूर्वपाठएवसमीची
नः सूर्यश्चेत्यस्यब्रह्माऋषिःप्रकृतिश्छंदःआपोदेवतेतिपृथ्वीचंद्रोदयःअग्निर्ऋषिः प्रकृतिश्छंदः

स्छंईक्षित मुदकं गोकर्णाकृतिना दक्षिणेन पाणिना दाय कनिष्ठांगुष्ठौ वितत्य तिस्रोंगुलीः संहतोर्ध्वाः कृत्वा
ब्राह्मेण तीर्थेन हृदयप्रापित्रिः पीत्वा हस्तं प्रक्षाल्य स्पृष्टोदकेनांगुष्ठमूलेनाकुंचितोष्ठं मुखंद्विः परिमृ
ज्य संहतमध्यमांगुलीभिः पुनर्मुखं प्रमृज्य हस्तं प्रक्षाल्य सव्यहस्तपादौ शिरश्चाभ्युक्ष्य स्पृष्टो
दकेन मध्यमांगुलित्रयाग्रेण मुखं उपस्पृश्य अंगुष्ठतर्जनीभ्यां नासाबिलद्वयं अंगुष्ठानामिका
भ्यां चक्षुषी कर्णौ चांगुष्ठकनिष्ठिकाभ्यां नाभिं करतलेन हृदयं सर्वांगुलीभिः शिरः सर्वांगुल्यग्रैः
असौ चाप उपस्पृशेत् एवं द्विराचम्य प्राणायामं कुर्यात् यथा पंचांगुलिभिः अंगुष्ठेन दक्षिणं पुटं क
निष्ठिकानामिकाभ्यां वामपुटं इत्येवं वा नासां धृत्वा वामरंध्रेण वायुमापूर्य पंचदशमात्रकालं कुंभ
कं कृत्वा दक्षिणरंध्रेण विसृजेत् एवं वारत्रयं कृत्वा वामरंध्रेण वायुमापूर्य निरोधेन कुंभके कृते प्रण
वस्य ब्रह्मा ऋषिः अग्निर्देवता दैवी गायत्री छंदः सप्तानां व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाज गोतमा
त्रिवसिष्ठकश्यपा ऋषयः अग्निवाय्वादित्य बृहस्पति वरुणेंद्र विश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुब्बृ ५८

हतीपंक्तीत्रिष्टुप्जगत्यश्छंदांसि गायत्र्यागाथिनोविश्वामित्रऋषिः सविता देवता गायत्रीछंदः गाय
त्रीशिरसः प्रजापतिर्ऋषिः ब्रह्माग्निवायव्यादित्या देवताः यजुश्छंदः प्राणायामेविनियोगः ॐ भूः ॐ
भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितु० यात् ॐ मापोज्योतीरसोमृतंब्रह्म भूर्भु
वः सुवरों एवंत्रिरुक्त्वा दक्षिणरंध्रेणवायुंशनैर्विसृजेत् एवंप्राणायामंकृत्वा देशकालौसंकीर्त्य ममोपा
त्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्यामुपासइष्ये इतिसंकल्प्य आपोहिष्ठेतितृचस्यांबरी
षः सिंधुद्वीपऋषिः आपोदेवता गायत्रीछंदः मार्जनेविनियोगः ॐ आपोहिष्ठामयोभुवः ॐ तान
ऊर्जेदधातन ॐ महेरणायचक्षसे ॐ योवःशिवतमोरसः ॐ तस्यभाजयतेहनः ॐ उशतीरिवमात
रः ॐ तस्माअरंगमामवः ॐ यस्यक्षयायजिन्वथ ॐ आपोजनयथाचनः इतिप्रतिपादंप्रणवयुतैर्न
वभिः पादैर्नद्यादौतदुत्थैर्गृहादौसुवर्णादिशुचिपात्रस्थैर्वामकरधृतपात्रस्थैर्वामहस्तस्थैर्वाजलैर्दर्भा
ग्रेदेवतीर्थेन मध्यमातर्जनीभ्यांवाउत्तानंशिरसि मार्जयेत् स्थिरेउदकाशयेतुतदुदकविभागंकल्पयि

त्वा ॐ गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधुकावेरीजलेस्मिन्संनिधंकुरुइति तत्रतीर्थान्यावा
ह्य मार्जनादिकुर्यात् ततोगोकर्णाकृतिहस्तेनजलंगृहीत्वा सूर्यश्चेत्यस्यब्रह्माऋषिः सूर्यमन्युमन्यु
पतयोदेवताःप्रकृतिश्छंदः मंत्राचमनेवि० ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापे
भ्योरक्षंतां यद्रात्र्यापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुंपतु यत्किंच
दुरितंमयिइदमहंमाममृतयोनौसूर्येज्योतिषिजुहोमिस्वाहेतिमंत्रमुच्चार्यहस[illegible]स्तस्थंजलंपिबे
त् इतिमंत्राचमनंकृत्वापुनराचम्य प्रणवस्यब्र० अग्नि० देवी० समस्तव्याहृतीनांप्रजापतिऋषिः
प्रजापतिर्देवताबृहतीछंदः गायत्र्यागा० आपोहिष्ठेतिनवर्चस्यसूक्तस्यांबरीषःसिंधुद्वीपऋषिः
आपोदेवतागायत्रीछंदः पंचमीवर्धमानासप्तमीप्रतिष्ठा अंत्येद्वेअनुष्टुभौ गायत्रीशिरसःप्रजा०मार्ज
नेविनि० ॐ ॐ इतिप्रथमं ॐ भूर्भुवःस्वः इतिद्वितीयं ॐ तत्सवितु० इतितृतीयं ॐ आपोहिष्ठा० महे ५९
र० ॐ योवःशिव० तरः ॐ तस्माअरं० चनः ॐ शन्नोदेवी० तु नः ॐ ईशानावा० षजं ॐ अप्सुमेसोमो

यश्चित्तं करिष्ये इति संकल्प्या संकल्प्य वा प्रणवस्य ब्रह्मा ऋषिः अग्निर्देवता देवी गायत्री छंदः व्याहृतीनां प्रजापतिर्बृहती गायत्र्या विश्वामित्रः सविता गायत्री शिरसः प्रजापतिर्ऋषिः ब्रह्माग्निवाय्वादित्या देवता यजुश्छंदः प्रायश्चित्तार्घ्यप्रदाने विनि० ॐ भूर्भुवः स्वः तत्सवितु० ॐ मापो ज्योती० सुवरों श्रीसूर्यायेदमर्घ्यं समर्पयामीति मंत्रेणैकं प्रायश्चित्तार्घ्यं दत्वा उक्तवत्प्रधानार्घ्यत्रयं दद्यात् यद्वा चतुरर्घ्यं गुगायत्र्या दद्यात् व्याहृतिसंयुतमिति वचनांतरात् प्रधानार्घ्यवदेव प्रायश्चित्तार्घ्यमंत्रः धर्माब्धिसारेतु प्रधानार्घ्यत्रयोत्तरं प्रायश्चित्तार्थं चतुर्थमुक्तं आश्वलायनसूत्रपरिशिष्टाविरोधि किंचिदावश्यकशास्त्रांतरपरिग्रहेण प्रातःसंध्योपासनप्रयोगः बहिर्ग्रामात्प्राच्यामुदीच्यां वा ईशा वा दिशि अनल्पमुदकाशयमेत्य स्वगृहे वा देवद्विजगोष्ठतुलस्यादिशुचिस्थले कुशाद्यासने शुचिर्भूतः प्राङ्मुखस्तूष्णीं दक्षिणोत्तरेणोपस्थेनोपविश्य प्रणवस्य ब्रह्मा ऋषिः अग्निर्देवता देवी गायत्री छंदः पवित्रधारणे वि० ॐ ॐ इति अनामिकयोर्मूलपर्वणोः पवित्रे धृत्वाचामेत् भूमिष्ठपादः अफेनबुद्बुदं प्रकृति

उत्धृत्य अंजलिं गोश्रृंगमात्रमुत्धृत्य जले तदभावे प्रोक्षितभूमौ क्षिपेत्तेन सार्धं कोटित्रयसंख्याकसंदेह
संज्ञकराक्षसवधो भवतु इति मनसा संचिंतयेत् ॐ मापो ज्योतीरितिशिरोमंत्रेण तत्तेजो वामनासापुटेना
कृष्य स्वस्थाने आगतं विभावयेत् एवं त्रीण्यर्घ्याणि दत्वा कालात्ययश्चेच्चतुर्थार्घ्यं प्रधानार्घ्यात्पूर्वं उ
त्तरं वा दद्यात् ततः सजलहस्तः ॐ असावादित्यो ब्रह्मेति प्रदक्षिणं परीयन् परिषिच्योपविश्याप
उपस्पृश्य दर्भान्दक्षिणभागे विसृजेत् ततः शुचिदेशे दर्भोदकेनाभ्युक्ष्य तत्र प्रागग्रान्दर्भानास्तीर्य
समस्तव्याहृतीनां प्र० आसनोपवेशने ॐ भूर्भुवः स्वः इति दक्षिणोत्तरिणापस्छेनोपविश्य प्राणा
याम त्रयं कृत्वा समस्तव्याहृतीनां प्रजा० आत्माभ्युक्षणे वि० ॐ भूर्भुवः स्वः इत्यात्मानं अभ्युक्ष्य प्रण
वस्य ब्र० समस्तव्याहृतीनां प्र० गायत्र्यागाथिनः० जपे विनि० ॐ तत्सवितुर्हृदयाय नमः इति म
ध्यमांगुलित्रयेण हृदयं स्पृशेत् ॐ वरेण्यं शिरसे स्वाहेति तर्जनीमध्यमाभ्यां न शिरसि ॐ भर्गो
देवस्य शिखायै वषडिति अंगुष्ठेन शिखायां ॐ धीमहि कवचाय हुं इति दशांगुलीभिः स्कंधावारभ्य ७०

उरःपर्यंतं ॐ धियोयोनः नेत्रत्रयाय वौषडिति मध्यमांगुलित्रयेण नेत्रललाटेषु ॐ प्रचोदयाद
स्त्रायफडिति करतलास्फोटनेनास्त्रंप्राच्यादिदंशसुदिक्षुन्यसेत् ततोमंत्रदेवतां ध्यायेत् य
थाबालांबालादित्यमंडुलमध्यस्थांरक्तवर्णांरक्तांबरानुलेपनस्रगाभरणांचतुर्वक्त्रांदंडकमंडल्व
क्षसूत्राभयांकचतुर्भुजांहंसासनारूढांब्रह्मदैवत्यांऋग्वेदमुदाहरंतींभूर्लोकाधिष्ठात्रींगायत्रीं
नामदेवतांध्यायामिइतिध्यात्वा ॐ आगच्छवरदेदेविजप्येमेसंनिधोभव गायंतंत्रायतेयस्मा
द्गायत्रीत्वंततःस्मृताइत्यावाह्यप्राङ्मुखस्तिष्ठन् यःसवितानःअस्माकंधियःधर्मादिविषयबुद्धीः
प्रचोदयात् प्रेरयेत् तद्वरेण्यंवरणीयंदेवस्यसवितुर्भर्गःपापभंजनंतेजोमयंरूपंवयंधीमहिध्या
येमहिइति मंत्रार्थानुसंधानपूर्वकंअर्धनष्टेषुनक्षत्रेषुमंडलदर्शनपर्यंतंनाभिसमकरधृतयाव
स्त्राछादितरुद्राक्षादिमालयाजपंगणयन्प्रणवव्याहृतिपूर्विकांगायत्रींजपेत् यद्वा अनामिका
मध्यपर्वारभ्यप्रदक्षिणंदशभिरंगुलिपर्वभिर्गणयेत् गौणकालसंध्यावंदनेतुअष्टोत्तरशताष्टा

विंशतिदशान्यतमासंख्या जपांते उपविश्यपूर्ववत्षडंगंकृत्वातिष्ठन्कृतांजलिः आदित्यमुपतिष्ठेत् जात
वेदसइत्यस्य मारीचः कश्यपोजातवेदाअग्निस्त्रिष्टुप् आदित्योपस्थानेवि० ॐ जातवेदसे० तच्छंयोः शं
युर्विश्वेदेवाः शक्करीआदित्योप० तच्छंयोरावृ० नमोब्रह्मणे इत्यस्य प्रजापतिर्विश्वेदेवाजगती० आदि
त्योप० ॐ नमोब्रह्मणे० मित्रस्येतिचतसृणां गाथिनोविश्वामित्रोमित्रोगायत्रीआदित्यो० ॐ मित्र
स्यचर्ष० त्र्यंबकमित्यस्य मैत्रावरुणिर्वसिष्ठोरुद्रस्त्रिष्टुप् आदित्योप० ॐ त्र्यंबकंय० ततोदक्षि
णावृत्ताधिपादिशोनमेत् यथा ॐ संध्यायैप्राच्यैदिशेनमः ॐ साग्निकायैआग्नेय्यैदिशेन० ॐ
सयमायैदक्षिणस्यैदिशेनमः ॐ सनिर्ऋतयेनैर्ऋत्यैदिशेनमः ॐ सवरुणायैपश्चिमायैदिशेन०
ॐ सवायुकायैवायव्यैदिशेनमः ॐ ससोमायैउदीच्यैदिशेन० ॐ सेशानायैऐशान्यैदिशेन० ॐ
सब्रह्मकायैऊर्ध्वायैदिशेनमः ॐ सनंतायैअधरस्यैदिशेनमः ॐ संध्यायैनमः ॐ गायत्र्यैन० ॐ
सावित्र्यैनमः ॐ सरस्वत्यैनमः ॐ सर्वाभ्योदेवताभ्योनमः इतिनमस्कृत्य उत्तमस्यवामदेवऋषिः

शंभुवं ॐ आपः प्रणीत० हृशो ॐ इदमापः ० नृतं ॐ आपो अर्चेसागइति प्रणवयुतैनवभिर्ऋग्भिः नव ॐ
आपोज्योती० भुवरों इति एकं एवं त्रयोदशमार्जनानि शिरसि कृत्वा हस्तेनोदकमादाय स्वदेहपरिषे
कं कृत्वा गोकर्णाकारहस्तेन जलमादाय नासिकाग्रे धारयन् कृष्णपुरुषाकारं पापपुरुषं अंतर्व्याप्य
स्थितं विचिंत्य संयतप्राणः ऋतं चेति तृचस्य माधुच्छंदसोघमर्षण ऋषिः भावकृतो देवता अनुष्टु
प्छंदः अघमर्षणे विनि० ॐ ऋतं च सत्यं चाभीद्धा स्वः इति पठित्वा दक्षिणनासापुटेन शनैः प्रा
णं रेचयेत् तं पापपुरुषं वज्रहतं पाणिस्थोदके पतितं ध्यात्वा तदुदकमनवेक्षमाणः स्ववामभागे भूमौ
तीव्रघातेन क्षिप्त्वा तं पापपुरुषं वज्रहतं सहस्रधा दलितं भावयेत् तत आचम्य दर्भांस्त्यक्त्वा नूतनदर्भा
न्आगय्यानंजलौ निधाय उदकपूर्णांजलिं कृत्वा आदित्याभिमुखस्तिष्ठन् द्वौ पादौ समौ कृत्वा अंजलौ
दक्षिणनासापुटेनाधारमंडलस्थं तेजः समागतं विभाव्य प्रणवस्य ब्रह्मा० समस्तव्याहृतीनां प्र० गा
यत्र्यागा० सूर्यार्घ्यदाने वि० ॐ भूर्भुवः स्वः तत्सवितु० यात् श्रीसूर्यायेदमर्घ्यं समर्पयामीति पार्ष्णी उ

आचा०दु
७२ त्रः कुमार्यंतेवासीवेति गोतमस्तुभार्यादिरग्निर्दायादिर्वेति कालद्वयमुक्तवान् अस्यार्थाभार्याशब्देन
विवाहोलक्ष्यतेयस्मिन्नग्नौभार्योद्वह्यतेतमग्निमारभ्ययस्मिन्नहनिपितृभ्रात्रादिभिर्दायविभागःक्रिय
ततदहरारभ्यवासायमुपक्रममग्निंपरिचरेत् दायविभागात्पूर्वमपिपितुर्ज्येष्ठभ्रातुर्वाकर्माण्युप
जीवतोनप्रत्यवायः गार्ग्योपि पितृपाकोपजीवीवाभ्रातृपाकोपजीवकः ज्ञानाध्ययननिष्ठोवानदुष्ये
ताग्निनाविनेति नचपाणिग्रहणादिगृह्यंपरिचरेदित्याश्वलायनसूत्रादाश्वलायनानांदारकालएवाग्नि
परिचरणं नदायाद्यकालइतिवाच्यं यदिवैवाह्योनगृहीतःदायविभागकालेगृह्यतेततःउक्तक्रियया
पश्चाद्गृहीतोभवतितथाविवाहाग्निमुपसमाधायेतिसूत्रेविवाहाग्निग्रहणंअन्याग्निनिवृत्त्यर्थंकथं
पुनरन्याग्निप्राप्तिशंकाउच्यते दायविभागकालेग्निःपरिगृह्यतेचेत्तदान्योप्यग्निःप्रसज्येतनंनि
वृत्त्यर्थमिदंइतिवृत्तावेवस्पष्टमुक्तेःदक्षः संध्याकर्मावसानेतुस्वयहोमोविधीयते स्वयंहोमेफलं ७२
यत्स्यात्तदन्येननलभ्यते भगवान् पत्नीकुमारीपुत्रोवाशिष्योवापियथाक्रमं पूर्वपूर्वस्याभावेवि

दध्यादुत्तरोत्तरः दक्षः ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथविट्पतिः एतैरेव हुतंयच्च तत्हुतंस्वयमेवतु

प विट्पतिर्जामाता एतैश्चयजमानानुज्ञया पत्न्यनुज्ञया वा होतव्यं तदुक्तं कौर्मे ऋत्विक्पुत्रोथवा पत्नी

शिष्यो वापि सहोदरः प्राप्यानुज्ञां विशेषेण जुहुयाच्च यथाविधीति विशेषेणेति वचनं समावश्यकं का

र्यं किंचिदस्ति मम काचिदापदस्ति वा त्वया होमः कार्यः इति विशेषतोनुज्ञापेक्षार्थं अन्येन होमो दंपत्योः

सन्निधाने अन्यतरसंध्याने वा कार्यः उभयोरसमक्षंतु अहुतमेव तदुक्तं स्मृत्यर्थसारे असमक्षंतु दं

पत्योर्होतव्यं नर्त्विगादिभिः द्वयोरप्यसमक्षंचेत् भवेत्हुतमनर्थकं त्यागस्तु स्वयंपत्न्या वा कार्यः पत्न्या

रजस्वलादिना अनधिकारे होमकर्तैव तदुक्तं स्मृत्यंतरे सन्निधौ यजमानः स्यादुद्देशत्यागकारकः

तदभावे तु पत्नी स्यादुद्देशत्यागकारिणी असन्निधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया उन्मादे प्रसवे च

तौ कुर्वीतानुज्ञया विना कार्यव्यासक्तावपि पर्वणि तु सायंहोमः प्रतिपत्प्रातर्होमश्च स्वयमेव पयसैव कार्यो

नर्त्विगादिना नान्यद्रव्येण यवाग्वा पयसा वा स्वयं पर्वणि जुहुयादृत्विजामेक इतरं कालमिति सूत्रात्

यदित्वशक्तिरसांविनिध्यंवातदान्योजुहुयादेवनतुसर्वथालोपः नित्यत्वात् आचारार्कप्रयोगचिंतामणिसंस्का
ररत्नमालास्वप्येवं शक्तोसान्निध्येचपर्वणिस्वयमजुहुतःप्रायश्चित्तंबृहस्पतिराह आहिताग्निरुपस्थानं
नकुर्याद्यस्तुपर्वणि ऋतेोनगच्छेद्भार्यांवासोपिकृच्छ्राधेमाचरेत् अत्रोपस्थानग्रहणंहोमोपलक्षणंअत्रय
द्यपिआहिताग्निग्रहणंकृतंतथापियआहिताग्नेर्धर्मःस्यात्सऔपासनिकस्यत्विति वचनात्स्मार्ताग्निमतो
प्यस्यप्राप्तिः अथप्रादुष्करणं तत्रप्रादुष्करणंनामाग्नेःप्रज्वलनमितिप्रयोगरत्ने तत्कालःश्रौतसूत्रे उ
त्सर्गेपराह्णेगार्हपत्यंप्रज्वल्येति अत्रापराह्णशब्देनान्हश्चतुर्थोभागोगृह्यतइतिवृत्तिः कारिकायामपिज्व
लयेदपराह्णेग्निमस्तंयातेदिवाकरे अत्रापराह्णशब्दस्तमयात्पूर्वकालीनदिनशेषवाचकइतिभाष्यं प्र
योगपारिजातेपरिशिष्टेपि अस्तमितआदित्येसायमग्नेःप्रादुष्करणमुदितेप्रातरिति अस्तमितेस्तंगच्छ
तीतिउदितेउदयंगच्छतीतिव्याख्यातंतेनैव अत्रयद्यपिसूत्रवृत्त्याशयाद्यामत्रयोर्ध्वंअस्तमयपर्यंतंय ७३
दाकदावासायंप्रादुष्करणंकर्तव्यमितिप्रतीयतेतथाप्युक्तकारिकाभाष्यपरिशिष्टेकवाक्यतयासायमस्ता

गायत्री देवता अनुष्टुप्छंदः संध्याविसर्जने वि० ॐ उत्तमे शिखरे जाते भूम्यां पर्वत मूर्धनि ब्राह्मणेभ्यो
भ्यनुज्ञाता गच्छ देवि यथासुखं इति संध्यां विसृज्य भद्रन्न इत्यस्य विमद ऋषिः परमात्मा देवता[illegible]वि
राट् छंदः पठने विनियोगः ॐ भद्रं नो अभिवातय मनः ॐ शांतिः शांतिः शांतिः इत्युच्चार्य प्रदक्षिणं परि
क्रामन् ॐ आसत्यलोकादापातालादालोकालोकपर्वताद्ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो न
मः इति नमस्कृत्य तत्र उपविश्य अमुकप्रवरान्वितामुकगोत्रोमुकशर्माहं भो अभिवादये इत्युक्त्वा द
क्षिणोत्तरकर्णौ वामदक्षिणपाणिभ्यां स्पृष्ट्वा तथैव स्वस्तिकाकारहस्ताभ्यां भूमिं संगृह्य शिरोवनमेत
इति गुरून्वृद्धांश्चोपसंगृह्य ॐ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् तत्सर्वं क्षम्यतां देव प्रसीद पर
मेश्वर इति संप्रार्थ्य सकृद्देवाचम्य विष्णुं स्मृत्वा अनेन कृतेन प्रातःसंध्योपासनेन श्रीपरमेश्वरः प्रीय
तां ॐ तत्सद्ब्रह्मार्पणमस्तु इति कर्मेश्वरार्पणं कृत्वा पवित्रग्रंथिं विस्रस्य शुचिदेशे क्षिपेदिति इति प्रातः
संध्याप्रयोगः अथ नित्योपासनविधिः तत्र गृह्यं पाणिग्रहणादि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पु

हरणंप्रादुष्करणमितियावत् एतच्चहोमकर्त्तुरुद्धरणासंभवेज्ञेयंइतिरत्नमालायांकुतूहलेतु अस्यचोद्धर
णस्ययःकर्तासएवहोमस्यान्यत्रयजमानात्इत्युक्तंइदंचश्रौतहोमविषयंतंत्रसमंत्रकोद्धरणस्यविहि
तत्वात्इतिकेचित् अथहोमकालः आश्वलायनः अस्तमितेहोमः तथा एवंप्रातरुपोदयंव्युषितउदि
तेवा उपोदयंआदित्योदयसमीपमित्यर्थः व्युषितेउषस्युदितेइत्यर्थः अनुदितइतियावत् उदितेआ
दित्यमंडलेकृत्स्नोदितइत्यर्थः एतेत्रयःप्रातर्होमप्रधानकालाः अत्रयद्यपिश्रुतौउदितेजुहोतिअनु
दितेजुहोतीतिपक्षद्वयस्यसाम्यतोक्तास्सूत्रेपिकालत्रयस्यसाम्यमुक्तंतथापिबह्वृचब्राह्मणेप्रातः
प्रातरनृतंतेवदंतिपुरोदयाज्जुव्हतियेग्निहोत्रमित्यादिअनुदितहोमनिंदापूर्वकंतस्मादुदितेहोत
व्यमितिसिद्धांतितत्वात्बह्वृचानांउदितहोमोमुख्यः विधानपारिजातेआन्हिकप्रकाशेचैवं प्रधा
नंयथामुख्यकालेसंपद्यतेतथांगानामप्युत्कर्षोवाइष्टव्यइतिदृत्तौ उदितादिस्वरूपंउक्तंकात्यायने ७४
न रेखामात्रस्तुदृश्येतरश्मिभिस्तुदिवाकरः उदितंतंविजानीयात्तत्रहोमंप्रकल्पयेत् रात्रेःषोडशकेभा

गेयहनक्षत्रभूषिते कालंत्वनुदितंज्ञात्वा तत्रहोमंसमाचरेत् तथाप्रभातसमयेनष्टेनक्षत्रमंडलेरविर्या
वन्नदृश्येतसमयाध्युषितःसत्विति उदितस्यात्नरावधिश्चंद्रिकायांकात्यायनेनोक्तः हस्तादूर्ध्वंरवि
र्यावद्गिरिंभित्वानगच्छति तावद्धोमविधिःपुण्योनान्योस्युदितहोमिनामिति अस्तमितस्वरूपमप्युक्तंते
नैव यावत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः लोहितत्वंचनापैतितावत्सायंतुहूयतइति अनुदि
तहोमीअर्घ्यांतांसंध्यांकृत्वासूर्योदयात्पूर्वंहुत्वागायत्रीजपेत् उदितहोमीतुसंध्यांसमाप्यहोमंकु
र्यादिति पृथ्वीचंद्रः उभयोःसंध्यांसमाप्यहोमइतिकल्पतरुः अनुकल्पकालमाहसूत्रकारः प्रदो
षांतोहोमकालःसंगवांतःप्रातस्तमतिनीयचतुर्गृहीतमाज्यंजुहुयादिति प्रदोषोनामरात्रेःपूर्वश्च
तुर्थोभागःतदंतःसायंहोमस्यकालः अह्नस्तृतीयोभागःसंगवःतदंतःप्रातर्होमकालः अत्रमु
ख्यकालातिक्रमेसमस्तव्याहृतिभिरेकाज्याहुति[redacted] प्रायश्चित्तविशेषस्ययत्रनोक्तोविधिर्भवे
त् होतव्याज्याहुतिस्तत्रभूर्भुवःस्वतिरीतिचेतिकारिकोक्तेः अनुकल्पकालातिक्रमेमनोज्योति

रिति मंत्रेण चतुर्गृहीताज्याहुतिरिति प्रयोगरत्ने आपदितु अनुकल्पकालेहोमेन प्रायश्चित्तमिति कुतूहले बौ
धायनेनतु आसायंकर्मणां प्रातरा प्रातः सायकर्मणा आहुतिर्नातपद्येत पार्वणं पार्वणांतरादित्युक्तं अनेन
स्थालीपाकस्यापि गौणकाल उक्तः अत्र यद्यपि स्वसूत्रे अनुकल्पकालातिक्रमे यदि सायं दोषा वस्तर्नमः
स्वाहेति यदि प्रातः प्रातर्वस्तर्नमः स्वाहेति चतुर्गृहीतहोमादिकं प्रायश्चित्तमस्ति तथापि तत्स्मार्ते न प्रा
प्नोति तत्रैव विशेषाम्नानादिति सागरे अथ होमद्रव्याणि आश्वलायनः हौम्यं च मांसवर्जं कामं तु व्रीहियव
तिलैरिति अत्र मांसनिषेधाच्छास्त्रांतरदृष्टमन्यदपि हौम्यं भवतीति वृत्तिः तच्च तत्रैव पयोदधि यवागूश्च
सर्पिरोदनतंडुलाः सोमो मांसं तथा तैलमापस्तानि दशैव तु सूत्रे कामग्रहणं पूर्वोक्तदशद्रव्याणामभावे व्रीहि
यवतिलानां प्राप्त्यर्थं अत्र पयसा नित्यहोम इति सूत्रात्तस्याभावेन्येषां पूर्वोक्तानां प्राप्तिः अत एव पर्वणि पयो
होमस्यानित्यत्वं व्रीह्यादीनि त्रीणि प्रत्येकं साधनानि न तु मिश्राणि गृह्यपरिशिष्टे पयोदधिसर्पिर्यवागूरो
दनं तंडुलाः सोमस्तैलमापो व्रीहयो यवास्तिला इति होम्यानि तंडुलानि वारश्यामाकयावनालानां व्रीहिशालि 

णि

स्पूर्वं प्रातरुदयात्पूर्वमेव प्रादुष्करणं नच श्रौतोक्तप्रादुष्करणकालस्य कथमत्र प्राप्तिरिति शक्यं तस्याग्निहो
त्रेण प्रादुष्करणहोमकालो व्याख्याताविति आचार्येणैवातिदेशस्य कृतत्वात् प्रातःप्रादुष्करणकालं आचार्यः
स्वयमेवाह एवं प्रातर्व्युष्टायामिति व्युष्टायामुषसि उदितायामादित्योदयात्प्रागित्यर्थः उदयात्पूर्वं घटि
काद्वयादिलक्षणो रात्रिशेषो व्युष्टशब्दवाच्य इति कारिकाभाष्ये कात्यायनः सूर्ये तु शैलमप्राप्ते षड्त्रिंशद्भि
रिहांगुलैः प्रादुष्करणमग्नीनां प्रातर्भासामदर्शने भासामदर्शन इत्येतत्प्रादुष्करणस्य गौणकालपरमु
न्नेयं कारिकाभविष्यविरोधात्॥ अतः सायं प्रातश्च प्रादुष्करणं कृत्यैव संध्यारंभः॥ कमलाकरस्तु भासाम
दर्शन इत्येतत्प्रादुष्करणस्य मुख्यकालपरत्वं मन्यमानः प्रातरर्घ्यांतां संध्यां विधाय प्रादुष्करणं कृत्वा जपा
दि संध्यां समाप्य ततो होम इत्याह एतत्प्रादुष्करणकालात्यये समस्तव्याहृतिभिरेकाज्याहुतिः
कार्येति भट्टाः होमासंभवे जपो वा अनाज्यवति कर्मणि जप आज्यवति होम इति रत्नमालायामुक्तेः उत्स्म
रणे दुहितृस्नुषयोरपि कर्तृत्वमुक्तं कात्यायनेन दुहितृस्नुषया वाग्निविवाहो न विरुध्यते विहारो वि

स्तर्जन्यंगुलवर्तुलाः अपाटिताश्च्चाद्विशास्वाः कृमिदोषविवर्जिताः ईदृशीर्होमयेत्प्राज्ञः प्राप्नोतिविपुलांश्रियं
 समिद्धोमेविशेषःसंग्रहे मूलतःकर्मनाशःस्यान्मध्यतःपुत्रनाशनं अग्रेणमुंचतोव्यारिरेकपाणेर्धनक्षयः मू
लमध्यममध्येनसमिद्धोमस्यलक्षणमितिमूलतः मूलेनमध्यतः मध्येनमूलतोमध्यतइत्युभयत्रापिमुंच
तइत्येतस्यान्वयः मूलमध्यमप्रदेशयोर्मध्यभागयोर्धृत्वासमिधोहोतव्याःएतदेवसमिद्धोमस्यसमिदभ्या
धानस्यचलक्षणंज्ञेयमिति अत्रैकपाणिनासमिद्धोमनिषेधेनसव्यपाण्यन्वारब्धदक्षिणपाणिनाहोम
विधिर्गम्यतइतिप्रयोगपारिजाते स्रुवधारणेविशेषोविधानमालायां अग्रेधृतोविनाशायधृतोमध्येप्र
जाक्षयी मूलेधृतस्तुहोतुस्तुमृतिंदद्यात्स्रुवोध्रुवं अग्रान्मध्याच्चमध्येतुमध्यान्मूलाच्चमध्यतः स्रुवःप्र
धार्योविद्वद्भिःसर्वकामार्थसिद्धयइति अयमर्थः दंडस्यपंचभागान्कृत्वाद्वितीयभागेचतुर्थभागेवास्रुव
धारणंकार्यमिति प्रयोगार्णवे कठिनद्रव्येहोमेतुमुष्टिनाधारणंस्रुचःद्रवद्रव्यस्यहोमेतुउत्तानांगुलि 
भिःस्मृतं स्रुवस्याप्युत्तानांगुलिभिरेवधारणं एतच्चस्रुक्स्रुवधारणंसौम्यतीर्थेनकार्यं स्रुवग्रहणंदैविकंसौम्ये

नेतिबौधायनोक्ते अत्रदैविकमितिविशेषणात्पित्र्यंस्रुवधारणाद्वित्ततीर्थेनैव स्रुवग्रहणंस्रुगुपलक्षणं सौ
म्यतीर्थलक्षणं बौधायनेनैवोक्तं अंगुलिमूलेसौम्यमिति सायंहोमेद्रव्येणैवप्रातर्होमइतिपूर्वंपरिशिष्टेउ
क्तं मंडनोपि सायंहोमेतुयद्द्रव्यंतदेवप्रातरिष्यते एवंकर्तृनियमेपि तथाचगदाधरभाष्ये श्रौताग्नि
मथवास्मार्तंसायंप्रातर्द्विजोत्तमः सायमन्यःप्रातरन्योजुहुयाल्लौकिकोभवेत् स्मृतिसारे सायंप्रातश्च
जुहुयादेकएवहुताशनं यद्यन्योजुहुयात्प्रातःसर्वथाग्निर्भयेद्ध्रुवं सायंप्रातश्चजुहुयादाहुतीनांचतुष्ट
यं एकएवाग्निहोत्रंचस्मार्ताग्निंचविशेषतः आचारप्रकाशेपरिशिष्टे सायमादिप्रातरंतमेकंकर्मप्रचक्षते
पौर्णमास्यादिदर्शांतमेकंकर्मजगुर्बुधाः गदाधरभाष्ये यजमानंविनानान्योजुहुयात्प्रातराहुतिमिति
एतदतिक्रमेकुतूहले कपालनाशनेचैवऋत्विग्द्रव्यविपर्यये पवित्रनाशनेचैवयत्किंचित्पात्रभेद
ने आज्याहुतिश्चहोतव्याव्याहृत्याप्रणवेनवेति अयंचद्रव्यकर्तृनियमःसमुदायसंकल्पपक्षएवे
तिप्रयोगार्णवे प्रातर्होमेयजमानंकर्त्तरिनायंनियमइतिकेचित् अयंचहोमःस्थंडिलेकार्यः अथ

खलु यत्र कचहोष्यंत्यादिषु मात्रावरं सर्वतः स्थंडिलमित्याचार्येण तस्यैवोक्तत्वात् शौनकेन तु आयतनमुक्तं
अरत्निमात्रं विज्ञेयमग्नेरायतनं शुभं श्रौते चौपासने वापि खातयोनिविवर्जितं मेखलाद्वितयं कार्यं रेखाल
स्नं तु बाह्यतः बाह्या द्व्यंगुलविस्ताराभ्यंतरा चतुरंगुला बाह्या षडंगुलोत्सेधाभ्यंतरा द्वादशांगुलेति शक्तौ
त्वाविरुद्धमन्यतो ग्राह्यमिति न्यायादनयोः समुच्चयः अशक्तौ स्थंडिलमेव नायतनं सूत्रे तस्यैव विहितत्वा
त् भट्टप्रभृतयस्तु स्थंडिलायतनयोः समविकल्पमाहुः तत्स्मृत्यपेक्षया कल्पसूत्रस्य प्रबलत्वाद्बा
धेन गतौ सत्यां बाधस्यायुक्तत्वात् च सुधीभिर्विचारणीयं स्थंडिलं च इषुमात्रावरमित्युक्तं इषुस्तु त्र्यरत्नि
रिषुः स्मृत इत्युक्तलक्षणः अरत्निस्तु कलांशरहितो हस्तः तस्मिन्पक्षे एकैकस्यां दिशि किंचिन्न्यून सप्तद
शांगुलप्रमाणो भुजः यदा तु आपस्तंबमताच्चतुर्विंशत्यंगुलो रत्निस्तदा एकैकस्यां दिशि अष्टादशांगुलप्र
माणो भुजः शारदातिलके हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनं अंगुलोत्सेधसंयुक्तं चतुरस्रं समंत ७७
त इति अंगुलोत्सेधमित्येकांगुलोच्चमिति केचित् अंगुष्ठं हित्वा यानि चतुरंगुलानि तावदुच्चमित्यन्ये कुं

यवगोधूमप्रियंगवः स्वरूपेणापि होम्यास्तिलाः स्वरूपेणैवशतंचतुःषष्टिर्वाहुतिर्व्रीहितुल्यानां तदर्धंतिलानांतदर्धं
सर्पिस्तैलयोः तैलंचतिलजर्तिलातसीकुसुंभानांयेनप्रथमांदेवतांजुहुयात्तेनैवद्वितीयांजुहुयात् येनच
सायंजुहुयात्तेनैवप्रातरिति तदर्धंसर्पिस्तैलयोरितितिलमानार्धतोलितमित्यर्थइतिकारिकाभाष्ये परि
माणांतरमाह बृहस्पतिः प्रस्थधान्यंचतुःषष्टेराहुतेःपरिकीर्तितं तिलानांचतदर्धंतु तंडुलाव्रीहिभिःसमाः
प्रस्थस्यचतुषष्टितमोभागइत्यर्थः अगस्त्यः इवइव्यस्य मानंस्याद्धारागोकर्णदीर्घिका सिद्धांतशेखरे
अन्नंग्रासंसमंप्रोक्तंलाजामुष्टिमितामताः होमेप्रकारउक्तःसंग्रहे इवंहविः स्रुवेणैवपाणिनांकठिनंहविः
अंगुल्यग्रैर्नहोतव्यंनकृत्वांगुलिभेदनं अंगुल्युत्तरपार्श्वेनहोतव्यमितिचस्मृतिः होमात्पूर्वंसमिधानं
पाक्षिकमुक्तंछंदोगपरिशिष्टे उपरिष्टादपिसमिंधनमेकइति एकइतिवचनात्पाक्षिकत्वं समिल्लक्षणं
स्मृत्यर्थसारे पलाशखदिराश्वत्थशम्युदुंबरजासमित् अपामार्गार्कदूर्वाश्चकुशाश्चेत्यपरेविदुः सत्व
चःसमिधःकार्याऋजुश्लक्ष्णसमास्तथाशस्तादशांगुलास्तास्तुद्वादशांगुलिकास्तथा आर्द्राःपक्वाःसमछेदा

शकलंतस्मिन्नभ्युक्ष्यस्थंडिलंजलैः निरस्यशकलंप्राच्यांपाणीप्रवाग्यत इति गृह्यपरिशिष्टेतु यज्ञियशाक
लमूलेनस्थंडिलमुल्लिख्यतत्रप्रागग्रंनिधायप्रोक्ष्याग्नेय्यांदिशिनिरस्य इत्युक्तंइदमेवाश्वलायनैः स्वीकार्यं
शौनकपरिशिष्टविरोधेपरिशिष्टमेवप्रबलंमितिपूर्वमेवसिद्धांतितत्वात् मेखलानामप्यंगुलमानमाय
तनभुजचतुर्विंशांशरूपंबोध्यं कुंडानांयच्चतुर्विंशोभागःसोंगुलसंज्ञकः विभज्यानेनकर्तव्यामे
खकंठनाभयइतिसोमशंभुक्तेः आयतेऽपिनेपिउपलेपनादिविधिमाहपरशुरामः तस्मिन्कुंडेतुगृ
ह्योक्ताकर्तव्याकुशकुंडिकालौकिकाग्निंसमानीयकुंडमध्येततोन्यसेदिति आयतनेभुजमानांतराणि
यथांतराण्येयानिविस्तरभयान्नेहोच्यंते अथप्रयोगक्रमः तत्रादौद्विराचमनंअंतेसकृदाचमनंप्रक
रणोक्तदेवीपुराणवचनात् परिशिष्टमतेतुआदावपिसकृदेवतद्बहिःकृत्वाविहारंप्रविशेत् नाग्निशा
लायामाचामेदितिनिषेधात् अतएवभट्टैःगौपासनप्रयोगेआचमनंनोक्तमितिकेचित् अन्येतुनिषे
धःशुद्ध्यर्थाचमनपरःकर्मांगाचमनंअग्निशालायामपिभवत्येवेत्याहुःइदमेवयुक्तं आहिताग्नेःगा ७८

गार्हपत्यस्यपश्चाङ्गारद्वाजेन सायंसंध्यावंदनस्योक्तत्वात् ततःप्राणायामः होमेपत्न्याअपिसां
न्निध्यमपेक्षितंपत्युर्नोयज्ञसंयोगइतिपाणिनिस्मृत्यापत्नीशब्दस्ययज्ञसंयोगएवोत्पन्नत्वात्
असमक्षंतुहोतव्यंदंपत्योर्नर्त्विगादिभिरितिवचनात्चसाचदक्षिणाभागे सर्वेषुधर्मकार्येषुपत्नीद
क्षिणतःसदा विप्रपादक्षालनेतुअभिषेकेचवामतइतिवचनात् ततःसंकल्पः अग्निरूपपरमेश्व
रप्रीत्यर्थंऔपासनंकरिष्यइतिभट्टाः ममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंऔपासनहोमंक
रिष्यइतिदिवाकरः सायमौपासनंपयसाहोष्यामीतिरत्नमाला न्यायविदस्तु गृह्यंपरिचरेदित्या
चार्येणोक्तत्वात्प्रातरग्निंपरिचरिष्यइत्याहुः ऋत्विगाद्यन्यकर्तृके होमेतु ममेत्यत्रयजमानस्येतिवा
च्यं करिष्येइत्यत्रकरिष्यामीतिसर्वत्रकर्तृगामिक्रियाफलाभावात् ततोऽग्निध्यानंपारिजाते हो
ष्यन्नग्नेर्विजानीयात्स्वरूपंश्रुतिचोदितं आश्वलायनः ध्यात्वासमित्थमभ्यर्च्यस्वस्थानस्थंहुताश
नं ततःपरिसमूहनादि तद्देशनियममाहकश्यपः अष्टांगुलमितेदेशेपरिषेचनमाचरेत् न

वांगुलिप्रमाणेतुविधिनापरिधीन्यसेत् दशांगुलिप्रमाणेतुपरिस्तीर्यकुशान्क्रमात् एकादशांगुलेदेशेगं
धपुष्पाक्षतादिभिः अर्चयेदितिशेषः स्मृत्यंतरेतु त्रिभिश्चैवचतुर्भिश्चपंचभिःषड्भिरंगुलैः सेचनंप
रिधींश्चैवस्तरणंपूजनंतथेत्युक्तं अत्राग्निक्षेत्रंबाह्यमेखलावा पादानावधिरिष्टइतिसंस्काररत्नमा
लायां सेचशेनेब्देपरिसमूहनमपिगृह्यं हेमाद्रौ एकमेखलकेकुंडेमेखलाधःपरिस्तृतिः द्विमे
खलेद्वितीयेस्यान्मध्यमेगुणमेखले कारिकायांतु अलंकरोतिपुष्पाद्यैरनलायतनंततइतिआयत
नस्यैवालंकरणंमुक्तं शिष्टाचारोप्येवं नित्यहोमपरिस्तरणानांत्यागाभावः पुनःपुनरुपयुंज्यादितिस्मृ
त्यर्थसारे होमद्रव्यस्याग्निहोत्रवाद्बहिरेवसंस्कारः होम्यंचाग्निहोत्रेणेतितत्धर्मातिदेशात् मंत्रास्तु
नभवंतिसर्वत्रगृह्यकर्मणिइतिकर्तव्यतामात्रादिदेशात् अत्रचान्वधिश्रयणंस्मृतिसामर्थ्याभ्यामि ७९
तिकातीयसूत्रा दधितंडुलसोमनेक्रव्रीहितिलानांनाधिश्रयणंतेनतत्रपर्यग्निकरणंप्रोक्षणंचद्वयमेव
पयःसर्पिर्यवाग्वोदनादीनांस्मृतितः अधिश्रयणंचभवत्येवेति अधिश्रयणानंतरमेवावज्वल्मते

हमार्तंडे कनकरुचिरकांत्यासन्मदास्थंडिलं वाकरमितचतुरस्रं कूर्मपृष्ठोन्नतं च बुधकुरुकृततुल्यैरंगुलैःकृन्
तं वांगुलमितमपिरम्यं स्वल्पहोमेमुदात्वं एवंस्थंडिलं कृत्वा उपलेपनादि कुर्यात् तदुक्तं गृह्ये उपलिप्योल्लि
ख्य षट्लेखा उदगायतां पश्चात्प्रागायते नानांतयो स्त्रिस्रो मध्ये तदभ्युक्ष्येति उपलपने कारणमुक्तं स्मृतिर
त्नाकरे पुराणे सर्वत्र[illegible]वसुधामेध्या सशैलचनकानना अथविष्णुपदाक्रांतोपलेपनमिदं कुतः पुरा
शक्रो हि वज्रेण वृत्रं हत्वा महासुरं तन्मेदसाहि निर्लिप्ता तदर्थमुपलेपनं तत्रैका प्रादेशमात्रा उदगायता
प्रागायते दक्षिणोत्तरयोर्द्वे असंस्पृष्टे मध्ये तिस्रः षड्ग्रहणं षट्स्वपि लेखालग्नेः प्रतिष्ठापनं यथा स्यादि
त्येवमर्थं ताश्च लेखा दक्षिणे षष्ठे अंगुलानि उदीच्या द्वे प्रतीच्यां चत्वारि प्राच्यामध इत्यंगुलानि त्यक्त्वा
कुर्यादिति भट्टाः अत्रांगुलं स्थंडिलव्यासचतुर्विंशोंश इति प्रयोगचिंतामणौ एतेन प्रादेशमात्रोदग्गाय
ते रेखाया अनुपपत्तिं वदंतो निरस्ताः प्रादेशमात्रां न्यूनां वेति वृत्तौ उल्लेखानंतरं कृत्यमाह कारिकाकारः
लिखितायेन शकलं यज्ञियं तन्निधाय च अद्भिरभ्युक्ष्य शकलं निरस्याप उपस्पृशेत् शौनकः निधाय

वस्त्रेणवाथपर्णेनपाणिशूर्पास्यदारुभिः नकुर्यादग्निधमनंनकुर्याद्व्यजनादिभिः भट्टैस्तूत्सर्गपत्यर्थेतौव्यज
८० नेनाप्यग्निसमिंधनमुक्तं संग्रहे धमनीमंतराकृत्वातृणंवाकाष्ठमेववा मुखेनाग्निंसमिंधीतमुखादग्निर
जायत उपस्थानमंत्रानाहशौनकः परिसमुह्याथपर्युक्ष्याप्युपतिष्ठेत्यविभुजं अग्नेःसूक्तैश्चसौरैश्च
प्राजापत्यैश्चनित्यशः अग्निंप्रजापतिंसायंप्रातःसूर्यंप्रजापतिं अग्नआयूंषितिसृग्भिर्द्वाभ्यामग्नेत्वमि
त्यथ सूर्योनइतिमंत्रेणह्युदुत्यंचद्वितीयया तृतीययाचित्रमितिनमोमित्रस्यचान्यया प्रजापते
नत्वदृचाततुंतन्वंद्वितीययाहिरण्यगर्भःसमितिह्युपतिष्ठेत्ऋतावानमितिकेचितंतुंतन्वन्नित्यस्यसर्वा
नुक्रमणिकायांअग्निदेवतोक्तेः प्रातरुपस्थानेइमंमंत्रंनपठंति अन्येतुतंतुंतन्वन्रजसोभानुमन्वि
ह्यीतिप्राजापत्यांशंसतीत्यैतरेयब्राह्मणेस्यप्रजापतिदेवतात्वोक्तेः प्रातरुपस्थानेयंमंत्रंपठनीयएवे
त्याहुः इदमेवयुक्तंशौनकेनतंतुंतन्वन्द्वितीयमित्युभयशेषत्वेनोक्तत्वात् आश्वलायनः प्रातःसायं ८
जपेन्मंत्रंओंचमेस्वरइत्यथ यद्वासायंप्रातरग्नेचन्नइतिचतसृभिर्वोपतिष्ठेदिति शौनकः उभयत्रोंच

मइत्येकेनैववोपस्थानमुक्तमान्हिकचंद्रिकायां उपस्थानोत्तरं वापरिस्तरणविसर्गपरिसमूहनादिकु
र्यादित्यप्युक्तं तत्रैवस्मृत्यर्थसारेचैवं उत्तरपरिषेकोत्तरमग्न्यर्चनं विश्वानिनइत्यादिभिः केचित्कुर्वंति त
तोवन्हिपूजनमुक्तंस्मृत्यंतरे गंधपुष्पादिभिर्वन्हिं होमांतेपरिपूजयेत् बहिरग्निमनुलक्ष्मीरुत्यपूजयेत्
नचायतनाद्दे कादशांगुलंषडंगुलंवास्थलंविहायतत्रकुर्यात् वायव्यांदिशीति संप्रदायः अग्निपूज
ने आरक्तगंधपुष्पाक्षतान्वर्जयेत् आरक्तपुष्पेषुजपापुष्पमेववाविवर्जयेदिति प्रायश्चित्तप्रदीपे वि
भूतिधारणमाहाश्वलायनः अभिवाद्यजपेद्देवीविभूतिंचैवधारयेत् विभूतिधारणेमानस्तोकेयंमंत्र
उच्यते त्र्यायुषमिति वा होमेनेत्यकेच महामखे वसिष्ठः ऐशान्याआहरेद्भस्मस्रुचावाथस्रवेणवा
वंदनंकारयेत्तेनशिरःकंठांसकेषुच कश्यपस्येति मंत्रेणयथानुक्रमयोगइति शांखायनसूत्रे आयु
षंपंचभिर्मंत्रैः प्रतिमंत्रंललाटकेहृदयेदक्षिणस्कंधेवामेचभस्मनात्रिपुंड्रंकरोतीति ततोन्यूनातिरि
क्तच्छिद्रत्वार्थं विष्णुंसंस्मरेत् अतैसकृदेवाचमनमित्युक्तं अथौपासनहोमप्रयोगः प्रादुष्कृतस्या

ग्नेः पश्चात्सपत्नीकः प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य ममोपात्त दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमौपासनं पयसा होष्यामी चत्वारिश्टंगा गौतमो वामदेवोग्निस्त्रिष्टुप् अग्नि मूर्तिध्याने विनि० ॐ चत्वारिश्टंगा० सप्तहस्त० सोदकेन पाणिना ईशानीमारभ्य प्रदक्षिणं पुनः पुनरुदकमादाय त्रिः परिसमूह्य परिस्तीर्य पर्युक्ष्य आयतनादुत्तरतः शरावादौ अंगारान पोह्य तेषु पयः अधित्य ज्वलता दर्भोल्मुकेनाष ज्वल्य दोहनपात्रक्षालनोदकं स्रुवं आनीय तेन प्रतिषिंचेत् ततः अवज्वलनोल्मुकेनैव त्रिः पर्यग्नि कृत्वा उल्मुकं पश्चिमायां निरस्याप उपस्पृश्य दुग्धं फेनोद्गमपर्यंतं श्रपयित्वा कषन्निवोद गुद्वास्य किंचित्कालमाकाशी धृत्वाग्नेरुदक्भूमौ विधायांगारानायतने विसृज्याग्नेः पश्चिमतः स्तीर्णकुशेषु समिधा सह हविर्निधाय विश्वानि न इति तृच स्यात्रेयो वसुश्रुतोग्निस्त्रिष्टु द्वाभ्यामर्चने त्ययोपस्थाने विनि० ॐ विश्वानि० ॐ सिंधुं न० ॐ अग्ने अ० ॐ अस्माकं० ॐ यस्त्वा ॐ अमर्त्यं० ॐ जातवेद० ॐ प्रजाभि० ॐ इत्यायतनं ऐशानी प्रभृत्य ष्टदिक्षु क्रमेण गंधपुष्पाक्षतैरलं 

नेवन्निः पर्यग्निं कुर्यादिति वृत्तौ उद्वासनवेलायां पर्यग्निकरणं कार्यमिति सिद्धांतभाष्ये अथाग्न्यर्चनं
आश्वलायनः विश्वानीत्यष्टभिः पादैः पूर्वतो दिक्षु चाष्टसु अर्चयेद्गंधपुष्पाद्यैरग्निं स्तुयादृचांत्यया
ऋग्विधानेपि विश्वानिनेति वै द्वाभ्यां ऋग्भ्यां यो वह्निमर्चति स तरत्यापदः सर्वाः फलं प्राप्नोति चाक्षयं
अग्न्यर्चनं ऐशान्या आरभ्य कार्यमिति प्र। योगसारे सर्वदिक्संबंध्यं कर्मापराजिताया आरभ्य कार्यमि
ति वृत्तौ उक्तत्वादिति तदाशयः ततः प्रधानहोमः तत्र गृह्यं अग्नये स्वाहेति सायं जुहुयात्सूर्याय स्वाहे
ति प्रातस्तूष्णीं द्वितीये उभयत्रेति तूष्णीं ग्रहणं प्रजापतिध्यानार्थमिति वृत्तिः उत्तरां तूष्णीं भूयसीमसंसृ
ष्टां प्रागुदग्वुत्तरतो वेति सूत्रे उक्तत्वात् उत्तराहुतौ आहुतिपरिमाणवाध इति सागरे विष्णुः बहुशु
ष्केधने चाग्नौ सुसमिद्धे हुताशने विधूमे लेलिहाने च होतव्यं कर्मसिद्धये योनर्चिषि जुहोत्यग्नौ व्यं
गारे चैव मानवः मंदाग्निरामयावी च दरिद्रो नाम जायते अग्निं समिंधनं वेणुधमन्या कार्यं तदुक्तं
संग्रहे वेणोरग्निप्रसूतित्वाद्वेणुरग्नेश्च पावनः तस्माद्वेणुधमन्यैव धमेदग्निं विचक्षणः देवलः

निनइत्यर्चयित्वावायव्यदेशे ॐ अग्नयेनमः इतिगंधपुष्पधूपदीपनैवेद्यानिसमर्प्य प्रदक्षिणीकृत्यउपवि
श्यमानस्तोकेतिविभूतिधृत्वाश्रद्धांमेधामितिसंप्रार्थ्यनमस्कृत्यमंत्रहीनंक्रियाहीनं० प्रमादात्कुर्व० इतिवि
ष्णुंसंस्मृत्यसकृदाचम्यअनेनसायमौपासनेनश्रीपरमेश्वरःप्रीयतामितिकर्मेश्वरायसमर्पयेदि
तिसायंहोमः अथप्रातर्होमेविशेषः प्रातरौपासनंपयसाहोष्यामिअग्निध्यानादिसमित्प्रक्षेपांतंकृ
त्वा ॐ सूर्यायस्वाहासूर्यायेदंनमेतिप्रथमाहुतिंसायंकालद्वितीयाहुतिवद्द्वितीयाहुतिंचकृत्वाउपस्था
नंकुर्यात्सूर्योनोदिवस्पात्वित्यस्यसै[illegible]सौर्यश्चक्षुः सूर्योगायत्रीसूर्योपस्थाने० ॐ सूर्योनो० उदुत्यंका
ण्वः सूर्योगायत्रीसूर्योप० ॐ उदुत्यंजा० चित्रंदेवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप्सूर्योप० ॐ चित्रं
दे० नमोमित्रस्येतिसौर्योभितपाः सूर्योजगतीसूर्योप० ॐ नमोमित्रस्य ॐ प्रजापतइत्यादिभिः प्राजाप
त्यैश्चोपस्थाय ॐ चमेस्वर० इत्युपस्थायस्वरः इत्युपस्थायपरिस्तरणविसर्गाद्याचमनांतंकृत्वानेनप्रात
रौपासनेनश्रीपरमेश्वरःप्रीयतामितीश्वरायार्पयेत् अथकेवलस्त्रैकौपासनहोमः आचम्यप्राणाना 

यम्य देशकालौ स्मृत्वाग्निद्रूपपरमेश्वरप्रीत्यर्थं औपासनं करिष्ये अग्निं परिसमूह्य परिस्तीर्य पर्युक्ष्य होम
द्रव्यं संस्कृत्य समिधा सह स्वाग्रे कुशेषु निधाय समिधं तूष्णीं अग्नावाधाय ॐ अग्नये स्वाहा अग्नय० ॐ
प्रजापतये० प्रजापतय इ० ततः परिस्तरणविसर्गपरिसमूहनपर्युक्षणानि कृत्वा विष्णुं संस्मृत्याचम्यानेन
नौपासनेनेन परमेश्वरः प्रीयतामितीश्वरार्पणं कुर्यादिति सायमौपासनं प्रातस्तु अग्निस्थाने सूर्यः अ
न्यत्समानं इति केवलस्त्रीकौपासनहोमः प्रातर्होमोत्तरं सौरजपमाह याज्ञवल्क्यः हुत्वाग्नीन्सूर्य
देवत्यां जपेन्मंत्रान्समाहितः ऋग्विधाने शौनकः ऋग्भिस्तु सार्धषष्ठीभिः सौरीभिः प्रत्यहं द्विजः उप
तिष्ठेद्द्विजः सूर्यं सर्वरोगैः प्रमुच्यते अत्र प्रत्यहमिति श्रवणान्नित्यत्वं इत्याचारेंदौ सौरजपविधिः अथ
पत्नीकुमारीकर्तृको होमः आचमन प्राणायामौ तूष्णीं कृत्वा देशकालौ अग्निद्रूपपरमे० औपासनं क
रिष्ये परिसमूह्य परिस्तीर्य पर्युक्ष्य होमद्रव्यं संस्कृत्य तत्समिधा सह स्वाग्रे कुशेषु निधाय तूष्णीं समित्धोमं
कृत्वा अग्नये स्वाहा अग्नय इ० प्रजापतये स्वाहा प्रजापतय इदं० प्रातरग्निस्थाने सूर्यः ततः परिस्तरणानि वि

स्त्रज्य परिसमूहनपर्युक्षणे कृत्वा विष्णुं स्मृत्वा तूष्णीमाचाम्य प्राणेनोपासनेन श्रीपरमेश्वरः प्रीयतामिति अनंतरे
तु तूष्णीमेवाहुतिद्वयं सायंप्रातर्जुहुयादन्यत्समानं स्मृत्यर्थसारे तु पत्नीकुमारीकर्तृकहोमे परिसमूहन
पर्युक्षणयोर्वर्ज्यत्वमुक्तं तत्स्वायेणापस्तंबविषयमिति भाति तेषां परिसमूहनपर्युक्षणयोः अदितेनुमन्य
स्वेत्यादिमंत्राम्नानात् इति सागरे इति पत्नीकुमारीक० हो० अथापत्काले होमद्वयसमासः गृह्यपरिशिष्टे
सायंप्रातर्होमौ सायंवा समस्येन्नतु प्रातः प्रातः सायं होमाविति आश्वलायनस्मृतिरपि सायंप्रातस्तनौ
होमौ उभौ सायं समस्यतु सायंकालस्य मुख्यत्वादग्निहोत्रमिति श्रुतिः समस्य सायमारभ्य जुहुयात्सा
यमाहुती परिषिच्याहुतीप्रातुहुत्वा तु परिषेचयेत् हविष्यांतं द्विदैवत्यमिति सूर्याग्निं दैवतं समस्ये पंच
भिर्ऋग्भिः प्राजापत्येन नित्यशः छंदोगपरिशिष्टे सायंहोमात्यये प्रातर्हुत्वा तां सायमाहुतिं प्रातर्होमं
ततः कुर्यादेष एवोत्तराविधिः अथपक्षहोमादयः मैत्रायणीयपरिशिष्टे तस्मादामयाव्या तोर्धमासा
याग्निहोत्रं जुहुयात् पक्षादौ पर्वणांते वा सायं च प्रातरेव च तु र्दश चतुर्गृहीतानि चतुरुन्नयेत् एका 

कृत्य ॐ यस्मै त्वं सुकृते जातवेद उ लोकम० इत्युपस्थाय उपस्थाविरोधेन दक्षिणजानु संपात्य तू
ष्णीं समिधौ अग्नौ प्रागायतां प्रक्षिप्याप उपस्पृश्य समिधि प्रदीप्तायां मूलतोऽंगुलप्रदेशे जान्वाच्यैव
सव्यपाणिमूर्ध्वांगुलिं हृदि निधाय ॐ अग्नये स्वाहा अग्नय इदं० जान्वाच्यैव पूर्वाऽऽहुतेरीशान्यामु
त्तरतो वा भूयसीं ॐ प्रजापतये इत्युपांशु ध्यात्वा स्वाहेत्युक्त्वा प्रजापतय इदं० ततोग्नेर्वायव्यदेशे
प्रह्वीभूतः स्थित्वा कृतांजलिरभिमीक्षमाणः अग्न आयूंषीति तिसृणां शतं वैश्वानसा ऋषयः अग्निः
पवमानो देवता गायत्री छंदः अग्न्युपस्थाने० ॐ अग्न आयूं० अग्ने त्वन्न इति च तसृणां गोपायना
बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्च क्रमेण ऋषयः अग्निर्देवता द्विपदा विराट् छंदः अग्न्युपस्था० ॐ अ
ग्ने त्वं नो० ४ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापत० ॐ प्रजापते० तंतुं तन्वन्देवाः प्रजापति
र्जगती प्रजापत्यु० ॐ तंतुं तन्वं० हिरण्यगर्भ इत्यस्य हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् प्रजापत्यु० ॐ हिर
ण्यगर्भः० ॐ ॐ चमे स्वर० इत्युपस्थायोपविश्य परिस्तरणान्युत्तरेण विसृज्य परिसमूह्य पर्युक्ष्य विश्वा

अथ प्रसंगात्किंचिद्गृह्याग्निविषये प्रोच्यते तत्रादावनुगतप्रायश्चित्तं नित्याधार्योग्निर्यद्यनुगच्छेदायत
नमध्ये यद्यूष्मास्ति तदा तैलादियत्नेन प्रत्यक्षं कुर्यात् यदि नोष्मा तदा भस्मापोह्यायतनं गोमयेनोपलि
प्य अऽनुगतं गृह्याग्निमुत्पादयिष्यामीति संकल्प्य उल्लिख्य श्रोत्रियागारात्स्वगृहाद्वापि अग्निमाहृत्य प्रति
ष्ठाप्य परिसमूहनादि कृत्वा पवित्रोत्पत्तिपूर्वकमाज्यं संस्कृत्यायाश्चेति स्रुवाहुतिं सर्वप्रायश्चित्ताहु
तिं च हुत्वा परिसमूहनादि कुर्यात् द्वादशरात्रपर्यंतं इदमेव प्रायश्चित्तं तदूर्ध्वं पुनः संधानं इत्यनुग
तप्रायश्चित्तं अथ होमप्रायश्चित्तानि तत्र पयोहोमे इदानींतनशिष्टैः सिद्धदुग्धस्वीकाराद्दोहनका
ले गवामुपवेशनादि प्रायश्चित्तानामप्रसंगात्तानि न लिख्यंते अधिश्रितं पयः स्थालीमूलेन यदि स्र
वति तदा गर्भं स्रवंतमगदमकर्माग्निर्होता पृथिव्यंतरिक्षं यतश्च्युतदग्नावेव तन्नाभिप्राप्नोति निर्ऋतिं
परस्तादित्यने[illegible]भिमंत्र्य दुग्धमप्सु प्रक्षिप्य सर्वप्रायश्चित्तं हुत्वा शेषेण जुहुयात् अशेषे पुनर्दुग्धमानीय जु
हुयात् अथ अधिश्रयणमारभ्या होमपर्यंतं सर्वावस्थायां पयसि स्कन्ने यदद्य दुग्धं पृथिवीमसृप्त यदोषधी ८४

रत्यस्तपद्यदापः पयोगृहेषुपयोअघ्न्यायांपयोवत्सेषुपयोअस्तुतन्मयीतिस्कंन्नंदक्षिणेनपाणिनाभिमृ
शन्जपेत् यावत्स्कंन्नंतावज्जलेप्रक्षिप्यस्थाल्यांहोमद्रव्यस्यापर्याप्तावपि[illegible] मात्रापचारेणतेनैवहोमः
सर्वस्कन्नेआज्यंसंस्कृत्यतेनहोमः मात्रापचारहोमेआज्यहोमइतिपक्षद्वये यांकांचिद्वारुणींजपित्वा
ययाकयाचिद्वारुण्याहोमःआकूतहोममंत्रयोरपवादोवारुणीअन्यस्मात्होमकालाद्यजमानस्यान
शनं गाणगारिमतेपुनर्होमंच तत्करणपक्षेशेषहोमतंत्रंसमाप्यपुनर्होमारंभंकुर्यात् अथाग्निहो
त्रमधिश्रितंयदिशब्दयेतदासमोषापाप्मानमित्यभिमंत्रयेत् ततःसर्वप्रायश्चित्तमितिकेचित् अथा
धिश्रितेपयआदिद्रव्यंविष्यंदनेनाग्निंभूमिंवाप्राप्यतेतदाशांत्यैशांतिर्वाअपइतितदुपर्युदकंसिच्य
दक्षिणेनाभिमृश्यदिवंतृतीयंदेवान्यज्ञोगात्ततोमाद्रविणमाष्टांतरिक्षंतृतीयंपितृयज्ञोगात्ततोमाद्र
विणमाष्टपृथिवींतृतीयंमनुष्यान्यज्ञोगात्ततोमाद्रविणमाष्टयतोरोजसास्कभितारजांसिवीर्येभिर्वी
रतरतमाशविष्ठयापत्येतेअप्रतीतासहोभिर्विष्णूअगन्वरुणापूर्वहूतावितिजपेत् उद्वासितेउद्वास्यमा

वा
नैपयोविष्यंदनेनाग्निंभूमिंवाप्राप्यते तदामहीद्यौरित्यनेनाहवनीयस्यभस्मांतेनिनयेत् ततोन्यद्द्रव्यमानीयसं
स्कृत्यहोमः शेषेणेतिकेचित् यदिविष्यंदनेनस्थाल्यांबहिर्गमनमात्रेणाग्निंभूमिंवानप्राप्यते तदानप्रायश्चि
त्तं अवज्वलनप्रभृतिआहोमपर्यंतंतंडुलादिद्रव्येस्कन्नेसमुद्रंवःप्रहिणोमिस्वांयोनिमपिगच्छतअरिष्टा
अस्माकंवीरामयिगावःसंतुगोपतौइत्यभिमंत्र्यजलेप्रक्षिप्यशेषेणजुहुयात् सर्वस्कन्नेपुनर्द्रव्यमुत्पाद्यहो
मः यदिकेशनखकीटादिना अन्यैर्वाबीभत्सोदुष्टंप्रजापतेनत्वदित्यृचावल्मीकद्वारेअप्सुवातूष्णींप्रक्षिप्या
न्यंद्रव्यंसंस्कृत्यहोमः अस्यापवादमाहगोपालः पिपीलिकामक्षिकाभिः क्षुद्रकीटैर्नदुष्यति तानुत्सृत्य
द्भिरभ्युक्ष्यतद्द्रुत्सृत्यजुहुयात् स्कंनापवादः कुतूहले सर्वमिदंप्रायश्चित्तं आकृतिपरिमाणद्रव्यस्कंदनए
वनन्यूनस्यआकृतिपरिमाणंतुप्राग्युक्तंचंद्रिकायांतुआकृतिपरिमाणान्यूनस्कंदेनस्कन्नानुमंत्रणंकृत्वा
सर्वप्रायश्चित्तमित्युक्तं प्रायश्चित्तप्रदीपे भस्मन्यग्नौहविर्धानेवेद्यांस्तीर्णेचबर्हिषि कूर्चेविप्रस्य ८५
पाणौचरकंनदोषोनविद्यतइति यद्यायतनाद्बहिःषड्विंशत्रिंदंगुलादर्वागग्निःसमरतएकदेशोवाबहिः

समित्सकृत्धोमइति तेनपर्वणिसायंकालेप्रतिपदिवासायंपक्षहोमारंभः भट्टैस्तुप्रतिपत्प्रभृत्येवसा
यमादिपक्षहोमारंभइत्युक्तं स्मृत्यर्थसारत्रिकांडमंडनयोः आमयाव्यार्तिमानापद्गतोवाध्वगतोपिवा
राष्ट्रभंगेधनाभावेगुरुगेहेवसन्नपि अन्येष्वेवंप्रकारेषुनिमित्तेषुच समासमग्निहोत्राणांयथासंभ
वमाचरेत् अनापदिपक्षहोमेतंतुमतीष्टिप्रायश्चित्तमित्युक्तंप्रदीपे त्रिकांडमंडनः पक्षहोमा
नशेषान्वाशेषहोमानथापिवा समस्यजुहुयादिति तथा एवंप्रतिपदोन्यत्रयत्रापदुपजायते त
थैवोपवसथ्याप्याग्रयणत्वापदिनश्यति तृतीयायांचतुर्थ्यांवापंचम्यामितरत्रवा दतादीनां
तदंतानांहोमानांस्यात्समस्यता आपदेवावधिर्होमसमासस्याभ्युपेयते पक्षत्रयंपक्षहोमसंत
तोपुनराहितिः तावतानापगच्छेच्चेदापत्पक्षेतृतीयके कृच्छ्रेणापिनिनिवर्त्यतत्रहोमान्दिनेदिने
पक्षांतरेपुनःकामंपक्षहोमादिकंचरेत् पक्षहोमादिप्रयोगस्तुहोमादिप्रयोगरत्नादाववगंतव्यः
अग्निसंरक्षणंगोशकृत्पिंडेनकार्यंतदुक्तं पारिजातेनतुसैश्चगोशकृत्पिंडैरग्निसंरक्षणंस्मृतं अ

आचा०दु

८५ सूर्यपूजाप्राशस्त्यंभविष्यत्पुराणे प्रदद्याद्गवांलक्षंदोग्ध्रीणांवेदपारगे एकाहमर्चयेद्भानुंतस्यपुरा
ण्यंततोधिकं तथा यःसूर्यंपूजयेन्नित्यंप्रणमेद्वापिभक्तितः तस्ययोगंचमोक्षंचब्रध्नस्तुष्टःप्रयच्छति
विशेषतश्चारोग्यफलकंसूर्यार्चनं आरोग्यंभास्करादिच्छेदितिवचनात् तच्चतृचमंत्रेणाराधनमुक्तंभ
विष्योत्तरपुराणेअर्जुनंप्रतिभगवताकृष्णेन उद्यन्नद्येतिमंत्रोयंसौरःपापप्रणाशनःरोगघ्नश्चद्विषत्
घ्नश्चभुक्तिमुक्तिफलप्रदः कण्वेनचपुरादृष्टोगुह्याद्गुह्यतरोमहान् पुत्रस्यरोगनाशायसर्वलोकहि
तायच तेनचाराधितोदेवस्तृचमंत्रेणभास्करइति अथश्रीभास्कररायोन्नीततृचभास्करानुसारिणी
संक्षेपेणतृचार्घ्यपद्धतिर्लिख्यते शुच्यासने उपविश्याचम्यगायत्र्यात्रिःप्राणानायम्य देशकालौ
संकीर्त्य ममामुकरोगनिरासद्वारारोग्यसिध्यर्थं श्रीसूर्यप्रीत्यर्थं वा उद्यन्नद्येति सूर्यदैवत्येन तृचे
नामुकसंख्याकाभिरावृत्तिभिरर्घ्यदानंकरिष्ये उत्तिष्ठंत्विहभूतानिभूमौतिष्ठतिभूपतिः सर्वेषाम ८६
विरोधेनब्रह्मकर्मसमारभे इतिभूतानिप्रार्थ्य ॐ पृथिवीत्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वं

त्र धारय मां देवि पवित्रं कुरु चासनं इत्यासनं प्रार्थ्य ॐ भूर्भुवः स्वरोमित्युपविश्य तुं नमः मत्यात्मने अस्त्रा
य फट् इति मंत्रेण तर्जन्यंगुष्ठजन्यदशच्छोटिकाभिर्दशदिशा बध्वा ॐ तीक्ष्णदंष्ट्र महाकाय कल्पांत
दहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति क्षेत्रपालानुज्ञां प्रार्थयेत् ब्रह्मरंध्रगते चंद्र
मंडलेमृतवर्षिणीं भवानीं भूमिशुध्यर्थं भावयेदमृतेश्वरीं ततस्तन्मौलिनिष्पंदसुधाकल्लोलवृष्टि
भिः चिंतयेमग्नमात्मानं भूमिशुद्धिरियं भवेत् इत्यांतरभूमिशुद्धिः ततो लं वं रं यं हं इति पंचभूतबीजा
नि कुंभके सकृदावर्तयेत् इति रहस्यभूतशुद्धिः ततो हृदि हस्तं दत्वा आं सोहं इति त्रिः पठेत् इति
प्राणप्रतिष्ठा ततः अंजलिं बध्वा अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं
ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं इति मातृकाः पठन् जल्पंतर्गता विभाव्य मूर्धादिव्या
पकं त्रिर्न्यसेत् इति मातृकान्यासः अस्य च भूतशुद्ध्यादिमातृकान्यासांतस्यैकदिनक्रियमाणकर्मा
णि प्रति तंत्रेणोपकारकत्वमतः कर्मांतरारंभे तदारंभे न पुनः करणमिति अर्घं च षडंगः ॐ श्री उद्यन्नद्य॰

मित्ररविभ्यांनमः अंगुष्ठाभ्यांनमः ॐश्रीं हृद्रोगं॰ नाशय सूर्यभानुभ्यांनमः तर्जनीभ्यां॰ ॐश्रुं केषुमे॰ द्ध्म 
सिखगपूषभ्यांनमः मध्यमाभ्यांनमः ॐश्रैं अथोहारि॰ ध्मसिहिरण्यगर्भमरीचिभ्यां॰ अनामिकाभ्यां॰
ॐश्रौं उदगादय॰ सहआदित्यसवितृभ्यां॰ कनिष्ठिकाभ्यां॰ ॐश्रः द्विषंतंमह्यं॰ रधंअर्कभास्कराभ्यां॰
करतलकरपृष्ठाभ्यां॰ एवंहृदयादिन्यासः इत्यर्धर्चषडंगःन्यासः अथपूजा गुंगुरुभ्योनमः गंगणप
तयेनमः श्रींश्रीसूर्याय॰ इतिनत्वातृचमष्टाविंशतिवारंयथावाजपित्वास्वाग्रेस्वनाभिसंमितंदेवतापी
ठंसंस्थाप्यस्ववामभागेक्षालितमाधारंनिधायतत्रक्षालितांवर्धनींस्थूलांनिक्षिप्यतांशुद्धोदकैः कर्पूरवासि
तेरापूर्यक्षालितेनपिधानेनापिदध्यात् ततःस्वस्यदेवतायाश्चमध्यगांमिन्यांतिर्यकूवीथ्यांगोमयोपलिप्ता
यांवामभागेकलशंसंस्थाप्यशुद्धजलेनगायत्र्यापूर्याक्षतान्निक्षिप्य ॐउदकुंभायनमइति गंधादिभिः
संपूज्यकलशस्यमुखेविष्णुरित्यभिमंत्र्यघंटायैनमइतिघंटांसंपूज्यआगमार्थंतुदेवानामितितांवादयित्वा
कलशोदकेनआपोहिष्ठेतित्रिभिःआत्मानंपूजासंभारान्देवगृहंचसंप्रोक्ष्यपूर्वस्थापितपीठेमहापात्रेसूर्यप्रति 
मांसूर्यकांतंद्वादशदलेनावृतमष्टदलंसकर्णिकंयंत्रंवानिक्षिपेत् जलसांनिध्येजलएववायंत्रचिंतनंक

पनेत्तच प्रायश्चित्तं जुहुयात् समाप्तिपर्यंतंस्थितियोग्यस्तदाइदंतएकंजनित्रे इति मंत्रेणायतनने प्रक्षिपे
त् ततआज्यं संस्कृत्य समस्तव्याहृतिभिः सर्वप्रायश्चित्तंजुहुयात् षड्त्रिंशदंगुलातिक्रमेपास्थि कूर्च
रुः पूर्णाहुतिर्वा अग्नेर्जलादिनाउपहतौ यदिस्क्रं डोपघातः स्यादग्नीनांतत्र तत्रतु पुनस्त्वेतिसाभिं
धानंपुनस्त्वेति स्रुवाहुतिः प्रयत्नं विनैवाग्नौप्रज्वलिते उद्दीप्यस्वमानोहिंऽसीदितिद्वाभ्यांसमिद्द
ध्या यमभावाद[illegible]तु नात्र स्वाहाकारः प्रधानाहुत्योः संसर्गे सर्वप्रायश्चित्तं विशेषानभिधानात् अनाज्य
होमे सर्वत्र प्रायश्चित्तं मंत्रजपो वेति पूर्वमुक्तं इतिहोमप्रायश्चित्तानि इतिशांडिल्यकुलसंभवमाटे इत्यु
पनामकनामात्मजत्र्यंबककविरचिते आचारेंदौ नित्यौपासनविधिः अथसूर्यार्चनं तदुक्तंपारिजाते
प्रातःसंध्यावसाने तु नित्यंसूर्यं समर्चयेदिति अत्र यद्यपि प्रातः संध्यावसाने इत्युक्तं तथापि होमोत्तर
मेव सूर्यार्चनं प्रातः संध्यावसाने तु स्वयंहोमो विधीयत इति दक्षवचमाहोमस्यापि संध्यावसाने कर्तव्य
त्वा तदेति क्रमे प्रायश्चित्त विधानाच्च यस्यतु नाग्निपरिग्रहः तेन संध्यावसानएव सूर्यार्चनंकर्तव्यं

यामीत्युक्त्वा हृदि ध्यातां मूर्तिं तेजोरूपां श्वासमार्गेण पुष्पांजलौ समानीय पुरःकल्पितमूर्तेर्ब्रह्मरंध्रे पुष्पांजलि
ना सह तेजः प्रक्षिप्य द्वाराप्रवेश्य सर्वावयवभावेन परिणमयेत्॥ ॐ आदित्यं च सहस्रांशुं प्रभातीनसमुद्भवं लोक
नाथं जगच्चक्षुः सूर्यमावाहयाम्यहं श्रीसूर्यायावाहनं समर्पयामि नम इत्यक्षतान् निक्षिपेत् इत्या
वाहनं ॐ कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः यस्मादग्निस्वरूपस्त्वं ततः पाहि दिवाकर श्रीसू
र्यायासनं समर्पयामि नमः इति मंडलस्योत्तरतो दद्यात् २ ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते
अनुकंपय मां भक्त्या गृहाणार्घ्यं नमोस्तु ते श्रीसूर्यायार्घ्यं स० इति पद्मे देवशिरसि वा गंधपुष्पाक्षतय
वकुशाग्रतिलसर्षपदूर्वासहितजलरूपमर्घ्यं तैजसेन पात्रेण दद्यात् ३ ॐ उदुत्यं जात० सूर्यं श्रीसूर्या
य पाद्यं स० इत्यासनमंडलयोर्मध्ये पद्मे वा श्यामाकदूर्वाकमलविष्णुक्रांतासहितं केवलं वा सलिलं पाद्यं
दद्यात् ४ ॐ अपत्ये ता० क्षसे श्रीसूर्यायाचमनं स इति पद्मे जातिलवंगकंकोलमिश्रितेन कर्पूरादिवा
सितेन केवलजलेन वा तैजसपात्रेणाचमनं दद्यात् ५ ॐ अदृश्रमस्य० यथा श्रीसूर्याय स्नानं स० इति

कस्तूरीगोचनाकुंकुमादिमिश्रितंजलंमंडलेकेसरेदद्यात् अत्रार्घ्यादिषुप्रक्षेप्यद्रव्यालाभेतंडुलानेवततद्भा
वनायाक्षिपेत् ६ ॐ तरणिर्विश्व० रोचनंश्रीसूर्यायवस्त्रंस० इतिपद्मस्यबहिर्भागेद्वारादौवस्त्रंनिवेदयेत्
७ ॐ प्रत्यङ्दे० दृशेसूर्यायोपवीतंस० इतिवस्त्रस्थानेदद्यात् ८ ॐ येनापावः श्यसि श्रीसूर्यायगंधान्स०
इतिपद्मेदद्यात् ९ ॐ विद्यामेषिसूर्य श्रीसूर्यायपुष्पाणिस० इत्यूर्ध्वमुखानिपुष्पाणिपद्मेदद्यात् १० अथा
वरणपूजा तत्रकर्णिकायां ॐ सूर्यायनमः प्रागादिद्वादशकलेषु ॐ मित्रायनमः ॐ रवयेनमः ॐ सू
र्यायनमः ॐ भानवेनमः ॐ खगाय० ॐ पूष्णे० ॐ हिरण्यगर्भा० ॐ मरीचे० ॐ आदित्याय० ॐ सवित्रे ॐ अ
र्काय० ॐ भास्कराय० दक्षिणपार्श्वे ॐ दंडाय० वामपार्श्वे ॐ पिंगलाय० अग्रे ॐ अरुणसारथये तृचेन
सूर्यायपुष्पांजलिंदत्वा अभीष्टसिद्धिंमेदेहिशरणागतवत्सला भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनं
इतिकलशजलेनदेवस्यदक्षिणहस्ते आवरणपूजांसमर्प्यनमेत् इत्यावरणपूजा ॐ समत्वाहरिता०
क्षणश्रीसूर्यायधूपंसमर्पया० इतिदेवस्यपादामुखेनधूपंप्रदर्श्यदेवस्यवामतोधूपपात्रंस्थापयेत् ११

ॐ अयुक्तसप्त० क्तिभिः श्रीसूर्यायदीपं स० इतिदेवस्यदक्षाभिमुखेनदीपंप्रदर्श्यदेवस्यदक्षिणतोदीपपात्रं
स्थापयेत् १२ देवस्यपुरतोवामेदक्षिणेवाकृतमंडलेनैवेद्यभृतंपात्रंनिधाय ॐ उद्वयंतमस० उत्तमंश्रीसू
र्यायनैवेद्यंसमर्पयामिनमः १३ इत्युक्त्वा ॐ प्राणायस्वाहेत्यादिपठित्वाश्रीसूर्यायपानीयमिदंस० नै
वेद्यपात्रमुत्तरतोनिधायश्रीसूर्यायगंडूषाणिनिमांत्समर्पयामिनमः श्रीसूर्यायहस्तप्रक्षालनमि० श्री
सूर्यायाचमनीयमिदं० श्रीसूर्यायमुखेप्रोंछनंइदं० इतिसर्वंसमर्पितंविभावयेत् ॐ उद्यन्नद्य० श्रा
यश्रीसूर्यायफलानि० १४ ॐ श्रुकेषुमे० ध्मसिश्रीसूर्यायतांबूलंस० १५ ततःश्रीसूर्यायप्रसन्नार्घ्यंस०
इत्यर्घ्यंदत्वा ॐ उदगा० र्द्धंश्रीसूर्यायदक्षिणांस० १६ ततस्त्वचेनपुष्पांजलिंदत्वाकूपाकूपारतुल्य
स्वथचनदनदीखेयकासावापीथापातालंप्रविष्टेदेशाशतगुणितेरश्मिर्वारिमूरियाहंयाहंनिषिंचन्स्तु
खयसित्वषितान्पादपानूपादहीनोनेषातेदानधाटीनिरूपधिकरणावेतिभानोनविस्मः १ विकर्त्तनो ८९
विवस्वांश्वमार्तंडोभास्करोरविलोकप्रकाशकः श्रीमान्लोकचक्षुर्ग्रहेश्वरः लोकसाक्षीत्रिलोकेशः क

लशोदकेनमूलेनप्रोक्षेततः ॐ आंआधारायनमः ॐ कूं कूर्मायनमः ॐ शेंशेषायनमः ॐ वं वराहाय०
ॐ पृंपृथिव्येनमः ओं कंकंदाय० ॐ नांनालाय० ॐ पंपद्माय० ओंपंपत्रेभ्यो० ॐ कंकर्णिकाकेसरेभ्यो०
इतिदशदेवताः यंत्रस्योत्तरतः पूजयेत् अत्रपूजनंनामगंधपुष्पाक्षतानांकेवलाक्षतानांवा देवताध्यानपुरः
सरंततत्स्थानेप्रक्षेपः ततः अरुणाग्रेसरंहेमद्युतिकुंडलभूषितं तेजोराशिंश्रियायुक्तंतप्तकांचनसन्निभं
द्विभुजं पद्महस्तंचपद्मरागविभूषितं सिंदूरारुणमीशानंवामार्धदयितंरविं पाशांकुशधरंदेवंवक्षस्थकम
लं प्रसन्नवदनंशांतंकमलासनसंस्थितं सप्ताश्वेनैकचक्रेणरथेनचविराजितं चंद्रादिभिर्ग्रहैर्युक्तंके
यूरादिविभूषितं नानाविधैरावरणदैवतैरभितोवृतं ततोपिदूरेतद्रश्मिदग्धदेहंनिजामयं रोगानन्या
नपिमुक्तः कंपमानान्कृतांजलीन् ब्रह्मैवसच्चिदानंदमितिध्यायेद्दिवाकरं एवंहृदियंत्रेचचिंतयेत् इ
तिचिंतयेत् ध्यानं गंधपुष्पाक्षतयुतमंजलिंप्रसूतंहृदिकृत्वा ॐ एहिसूर्यसहस्रांशोतेजोराशेजगत्पते
अनुकंपयमांभक्त्याप्रसीदपरमेश्वर इतित्रिरुच्चार्य ॐ उद्यंनद्य० रथं० भगवान्नागच्छागच्छ ॐ आवाह

यदक्षिणमणिबंधायनमः ॐ ह्रीं आरोहंनुत्तरांदिवंरवयेदक्षिणकोष्ठाय० ॐ ह्रूं हृद्रोगं० सूर्यायदक्षिण
हस्तायनमः ॐ ह्रैं हरिमाणंचनाशयभानवेदक्षिणकूर्पाय० ॐ ह्रौं शुकेषुमे० खगायदक्षिणकरतला
य० ॐ ह्रः रोपणाका० पूष्णोदक्षिणकरपृष्ठाय० ॐ अ ह्रां अथोहारिद्रवे० हिरण्यगर्भायवाममणि
बंधाय ॐ ह्रीं हरिमाणंनिदध्मसिमरीचयेवामप्रकोष्ठाय० ॐ ह्रूं उदगा० आदित्यायवामहस्ताय ॐ
ह्रैं विश्वेन० सवित्रेवामकूर्पाय० ॐ ह्रौं द्विषंतं० अर्कायवामकरतलाय ॐ ह्रः मोअहं० भास्करायवाम
करपृष्ठाय० इतिकरशुद्धिन्यासंकृत्वाद्वादशांगुलवीस्तीर्णंषोडशांगुलदीर्घंषडंगुलोच्चंमध्येष्टदलक
मलयुक्तंव्यावहारिकचतुःषष्टितोलात्मकमागधप्रस्थोदकयाहितामर्घ्यपात्रंकलशजलेनापूर्य
तन्नांगुष्ठानामिकाभ्यांरक्तचंदनंरक्तपुष्पमेकंदशाषड्वारक्ततंडुलानूएकांदूर्वांयवांस्तिलांश्चक्षिप्त्वाह
स्तद्वयेनतस्माच्छनैःशिरःपर्यंतंनीत्वासूर्यचितानासाग्रमवलोकयन् ॐ ह्रीं उद्यंन्नद्यमित्रमहः ह्रां
मित्रायनमइतिसूर्यंदृष्ट्वामनसानत्वाइदमर्घ्यंसमर्पयामिइतिदेवशिरसिप्रक्षिपेत् एवमग्रेप्यर्घ्यं ९०

पूरणादिमक्षेपांतं ॐ क्रीं आरोहन्नुत्तरान्दिवं क्रीं रवये नमः इद॰ ॐ हृद्रोगं मम सूर्य ह्रूं सूर्याय॰ ॐ क्रैं ह
रिमाणं च नाशय॰ क्रैं भानवे न॰ ॐ क्रौं शुकेषु मे हरिमाणं क्रौं खगाय न॰ ॐ क्रः रोपणाकासु दध्मसि क्रः
पूष्णे नमः इ॰ ॐ क्रां अथो हारिद्रवेषु मे क्रां हिरण्यगर्भाय नमः ॐ क्रीं हरिमाणं निदध्मसि क्रीं मरी
चये न॰ ॐ ह्रूं उदगादयमादित्यः ह्रूं आदित्याय॰ ॐ क्रैं विश्वेन सहसा सह क्रैं सवित्रे न॰ ॐ क्रौं
द्विषंतं मह्यं रंधयन् क्रौं अर्काय॰ ॐ क्रः मो अहं द्विषते रधं क्रः भास्कराय॰ अथार्धर्चशः ॐ क्रां क्रीं
उद्यन्निद्य॰ दिवं क्रां क्रीं मित्ररविभ्यां॰ इद॰ ॐ ह्रूं क्रैं हृद्रोगं म॰ शय ह्रूं क्रैं सूर्यभानुभ्यां॰ ॐ क्रौं क्रः
शुकेषु मे॰ दध्मसि क्रौं क्रः खगपूषभ्यां॰ ॐ क्रां क्रीं अथो हारिद्रवे॰ दध्मसि क्रां क्रीं हिरण्यगर्भमरीचि
भ्यां न॰ ह्रूं क्रैं उदगादय॰ सहह्रूं क्रैं आदित्यसवितृभ्यां॰ ॐ क्रौं क्रः द्विषंतं मह्यं॰ रधं क्रौं क्रः अर्कभास्कराभ्यां॰
अथत्र्यृचशः ॐ क्रां क्रीं ह्रूं क्रैं उद्यन्नद्य॰ शय क्रां क्रीं ह्रूं क्रैं मित्ररविसूर्यभानुभ्यां॰ ॐ क्रौं क्रः क्रां क्रीं शुकेषु मे॰ ध्मसि
क्रौं क्रः क्रौं क्रीं खगपूषहिरण्यगर्भमरीभ्यां॰ ॐ ह्रूं क्रैं क्रौं क्रः उदगादय॰ रधं ह्रूं क्रैं क्रौं क्रः आदित्यसवि[illegible]त्रर्क

भास्करेभ्यो न० ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः २ उद्यं न द्य० ३ र धं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः २ मित्ररविसूर्यभानुखगपूषहिर
ण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नमः इदम० एवं त्रीण्यर्घ्याणि दद्यात् २४ एवं प्रत्यहं द्वादशाष्टत्रयः
इत्युत्तमः पक्षः षडिति मध्यमः तिस्र इति निकृष्टः यथाशक्तीति ततोपि चरमः प्रात्यहिकात् द्विगुणं रवि
वासरे एवमभीप्सितां संख्यां समाप्य पूर्वोक्ताधर्चं षडंगं स्वशरीरे न्यस्य पंचभिरुपचारै रुक्तमंत्रैरेव
संपूज्यार्घ्यपात्रे ऽर्घ्यजलं गृहीत्वा सूर्यगायत्र्याभिमंत्र्य पाययेद्वा नमः सवित्रे जगदेकचक्षुषे जगत्प्रसू
तिस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने इति पुष्पांजलिं द
त्वा आकृष्णेनेति स्तुत्वा सवितादिति संप्रार्थ्य रविः कर्ता रविर्भोक्ता रविः सर्वमिदं जगत् रविर्जयति
सर्वत्र यो रविः सोहमेव हि त्वमेवाहमहं त्वं च सच्चिन्मात्रवपुर्धरः आवयोरंतरभ्रांतिस्त्वत्प्रसादात्प्र
णश्यतीत्युक्त्वा सूर्यपिंडमात्मानं ध्यावरणदेवतास्तेजोमयीः कृत्वा सूर्यतनुं प्रविष्टा विभाव्य क्षणं ९१
ध्यात्वा नत्वा तालत्रयेण देवं प्रबोध्य तेजोमयमात्रं विभाव्य उद्यन्नद्येत्यृचं मुंचोर्य श्रीसूर्यं सांगसप

र्ताहर्तातमिस्नहा तपनःपावनश्चैवशुचिःसप्ताश्ववाहनः गभस्तिहस्तोब्रह्माचसर्वदेवनमस्कृतः
इतिस्तुत्वोत्थायदक्षिणंहस्तंप्रसार्यशिरोदक्षभुजमूलेनमथित्वादक्षकटिंचकिंचिद्विनाम्यप्रादक्षिण्ये
नसप्तवारंवेष्टयेत् ततोदेवस्यसाक्षादभिमुखभागेपरिहृत्यकिंचित्पार्श्वभागस्थोदेवाभिमुखसूर्ध्वे
बाहुंदंडवद्भूमौनिपत्यहृदयंचिबुकंवक्त्रंनासिकाग्रंललाटकंब्रह्मरंध्रंदक्षवामौकर्णौचक्रमशो
भुवि स्पर्शयेत्सनमस्कारःकायिकाष्टांगईरितः इतिरित्याकायिकं श्रीसूर्यायनमइतिकथनं
रूपंवाचिकंमतोयमुत्कृष्टयइतिभावनरूपंमानसिकंचनमस्कुर्यात् नैवेद्यात्कथं तांशंजलंमाठरा
दिभ्योनिवेद्यमंत्रहीनंक्रियाहीनंभक्तिहीनंचयन्मया कृतंत्वदाश्रितंकर्मकृपयातत्प्रपूरयइतिप्रार्थ्य
नत्वाभास्करायविद्महेमहद्द्युतिकरायधीमहि तंनोआदित्यःप्रचोदयात्इतिद्वादशवारंजपेत् इ
तिपूजाविधिः ततनिषीदतियथाभूमौपूर्वजानुःक्रमेलकः पादाग्रंपश्चिमस्थानेगुल्फस्थतुयथाक्र
मं उष्ट्रासिकाख्यमुपवेशनंसौरार्घ्यकर्मणीत्युक्तलक्षणमुपविश्य ॐ ह्रां उद्यन्नद्यमित्रमहः मित्रा

९२ वैष्णवैर्वारुणैः सौरैः पावमानीभिरेव च क्षपयेदाशुपापानिकामांश्चनिखिलांल्लभेत् गौडैर्विशेषतोघो
रान्ब्रह्महत्यादिकानपि क्षपयेत्पौरुषेणापिकामांश्चेष्ठतिदुर्लभात् सर्वमंत्राणामादौमंत्रसिद्धये
पुरश्चरणमवश्यंकर्तव्यं तथाचवैशंपायनः पुरश्चरणसंपन्नोमंत्रोहिफलदायकः किंहोमैःकिंज
पैःश्चैवकिंमंत्रन्यासविस्तरैः रहस्यानांहिमंत्राणांयदिनस्यात्पुरस्क्रिया तच्चपंचांगमुक्तंमंत्रको
मुद्यां जपोहोमस्तर्पणंचमार्जनंविप्रभोजनं मंत्रविद्भिस्तुपंचांगपुरश्चरणमीरितं एतत्संख्याप्युक्ता
तत्रैव होमोजपदशांशेनतद्दशांशेनतर्पणं मार्जनंतद्दशांशेनतद्दशांशेनभोजनं महोदधीटीकायां
पंचांगपुरश्चरणमितिकनीयान्पक्षः अभिषेकवर्ज्यंमध्यमः तर्पणाभिषेकवर्जस्त्र्यंगउत्तमःपक्षः
नारदः संख्यापूर्तौनिजैर्ईव्येजपसंख्यादशांशतः यथोक्तकुंडेजुहुयात् तथाविधिसमाहितः
अथवाप्रत्यहंजप्त्वाजुहुयात्तद्दशांशतः होमाशक्तौब्राह्मणानांपुरश्चरणसंख्याद्विगुणोजपइति ९२
मुख्यःपक्षः होमसंख्याद्विगुणोजपइतिगौणः क्षत्रियादीनांत्रिगुणादिजपः एवंतर्पणेपि जपलक्ष

णमाहकुंभसंभवः गुरोर्लब्धस्यमंत्रस्यशश्वदावर्तनंहितत् अंतरंगाक्षराणांचन्यासपूर्वोजपः
स्मृतः अंगेतिसुतीक्ष्णसंबोधनं अक्षराणांअंतरावर्तनंजपइतिसंबंधः वायवीयसंहितायां ए
वमुक्तविधानेनविलंबत्वरितंविनाउक्तसंख्यंजपंकुर्यात्सुरश्वरणसिद्धये देवतागुरुमंत्राणामैक्यं
संभावयन्धिया जपेदेकमनाः प्रातःकालान्मध्यंदिनावधियत्संख्ययासमारब्धंतत्कर्त्तव्यंदि
नेदिने यदिन्यूनाधिकंकुर्यात्व्रतभ्रष्टोभवेन्नरः तथाजपदेशास्तत्रैव सूर्यस्याग्नेर्गुरोरिंदो
र्दीपस्यचजलस्यवा विप्राणांवागवांवापि संनिधौशस्यतेजपः अथवानिवसेत्तत्रयत्रचित्तप्रसीद
ति कूर्मपुराणेपि गुह्यकाराक्षसासिद्धाहरंतिप्रसभंयतः एकांतेतुशुभेदेशेतस्माज्जप्यंसदाचरे
त् आसनविधेरावश्यकत्वमुक्तंसिद्धांतशेखरे आसनंप्रोक्ष्यसंपूज्यजपंतत्रसमाचरेत् आसनो
पवेशनप्रकारजपोपांशुत्वादिचसंध्याप्रकरणोक्तमत्रानुसंधेयं भूतशुद्धेरप्यावश्यकत्वमुक्तं
कुंभसंभवेनभूतशुद्धिविहीनेनकृतापूजाभिचारवत् विपरीतंफलंदद्यात्अभक्त्यापूजनंयथेति

प्राणप्रतिष्ठापनमप्युक्तेमारसंग्रहे भूतशुद्धिं विधायेत्थं ततोवैस्थापयेदसून् असून्प्राणान् अंतर्मातृ
काबहिर्मातृकान्यासावपितत्रैवकृत्वांतर्मातृकान्यासंबहिर्न्यासंततश्चरेत् न्यासस्यावश्यकत्वमु
क्तंगौतमीये ध्यानंजपार्चनाहोमाःसिद्धमंत्रकृताअपि अंगविन्यासविधुरानदास्यंतिफलान्यमी
कपिलपंचरात्रे ऋषिछंदोदेवतानांविन्यासेनविनायदाजपःसंसाधितोप्येषतत्रतुच्छफलंभवेदिति
अथमुद्राः तत्रबहिर्न्यासमुद्रादक्षिणामूर्तिसंहितायांपुष्पैरनामया[illegible]वापिमनसावान्यसेदणून्
अणून्मंत्रान् अत्रैवंव्यवस्था पुष्पैर्देवतामूर्तौअनामयास्वदेहे मनसामूलाधारादिचक्रेषु तत्र
करस्पर्शासंभवात् अनामयासांगुष्ठया अंगुष्ठानामिकाभ्यांतुन्यासःसर्वत्रसंमतइतियद्यवाहि
नीवचनात्तु अंगन्यासमुद्रास्तुतंत्रराजादौ प्रसारितमनंगुष्ठंतर्जन्यादिचतुष्टयं हृदिमूर्धनिचां
गुष्ठहीनोमुष्टिःशिखातले चकारात्हृदयवदेवमूर्धनिस्कंधमारभ्यनाभ्यंतादशांगुल्यस्तुवर्मणि तर्ज
न्यादित्रयंनेत्रत्रयेनेत्रद्वयेद्वयं प्रसारिताभ्यांहस्ताभ्यांकृत्वातालत्रयंसुधीः तर्जन्यंगुष्ठयोरग्रेस्फा
लयन्बंधयन्दिशः एषास्त्रमुद्रासंप्रोक्ताविष्णोरेताःप्रकीर्तिताइति मुष्टीविनिर्गतांगुष्ठौसंयुक्तौहृदिवि ९३

रिवारं विसर्जयामि नमः स्वस्थानं गच्छ गच्छेत्युक्त्वा विसर्जयेत् न वा विसर्जनं ततन आचम्यानेन सूर्यार्घ्य
दानेन श्रीपरमेश्वरः प्रीयतां तृचमंत्रेण नमस्कारा अपि कार्याः तत्रेदमर्घ्यं समर्पयामीति पल्लववर्जि
ताः पूर्वोक्ता एव मंत्राः इत्याचारेंदौ सूर्यार्चनं समाप्तं अथ प्रसंगान्नैमित्तिकजपविधिरुच्यते तत्का
ल उक्त आश्वलायनाचार्येण न जपेत्संध्ययोरेवं कार्थी ब्राह्मणः क्वचित् प्राग्वा पश्चाच्च तत्कालात्ति
ष्ठतः कामजपः सदेति तत्कालात् तद्विधिरुच्यते अमृत्युविनाशार्थं चतुर्वारमनुक्रमन् सावित्रीं प्रजपे
न्नित्यं सहस्रं ध्यानतत्परः शतादप्यधिकायुः स्याज्जपेनानेन मानवः श्रीमानरोगी विरजा विद्वान्
ज्येष्ठश्च बंधुमान् कपिलसंहितायां नमकं चमकं चैव रौद्रसूक्तं विशेषतः तमुष्टुहीत्यृचं वापि
सद्योजातादिपंचकं पंचाक्षरं महामंत्रं जपेदनुदिनं सुधीः आयुरारोग्यमैश्वर्यं संततीः पूर्णजीव
नं संपत्समृद्धिसौख्यं च लभते षण्मासनात् दीर्घरोगी जपेदुद्वं नित्यं प्रातरुदङ्मुखः आरो
गी पूर्णजीवी च भवेत्षण्मासयोगतः उदङ्मुखो जपेत्कामी निष्कामः प्राङ्मुखो जपेत् आचार्यः

९४ र्तिता चतुःपंचाशिकावत्समध्यमासाप्रकीर्तिता अधमाप्रोच्यतेनित्यंसप्तविंशतिसंख्ययेति अयुतादि
संख्यजपेतु नखंडांकारयेन्मालांजपकर्मणिमानवः इतिमालाखंडननिषेधादेतासांमालानांजपसाध
नत्वासंभवेनशतसंख्यमणिघटितमालायाविधानाभावेपि अनायत्याशतसंख्यमणिघटितैवमालात्र
कल्पनीयाअयुतादिजपेप्रोक्तामालाक्षैःशतसंख्यकैरितिवचनादितिकेचित् अन्येतु अयुतादिसंख्य
जपेशतसंख्यवर्णमालेवद्रष्टव्या ननुमणिमयीएतस्यामालायाअखंडायाअत्रासंभवात् शतसंख्यम
णिमालाप्रतिपादकवचनस्यनिर्मूलत्वाच्चेत्याहुः अष्टोत्तरशताष्टोत्तरसहस्रादिसंख्योपयुक्ताकरमालाभै
रवीतंत्रे अनामामध्यमारभ्यकनिष्ठानुक्रमेणतु मध्यमामूलपर्यंताकरमालाप्रकीर्तितेति अनामाम
ध्यमूलमध्यायानामाद्यमध्यमूलपर्यंतमितिनवसुपर्वसुगणनायांकृतायांनववारंमंत्रजपोभवति एवं
द्वादशवारंपुनःपुनरावर्तनेनाष्टोत्तरशतजपोभवति द्वादशोत्तरशतावृत्त्याष्टोत्तरसहस्रजपोभवति इत्थ ९४
मयुतादिष्वप्यूहनीयंजपस्याष्टोत्तरशतादिविषयेकारणमुक्तंऐतरेयब्राह्मणे तस्मादेतेषुकर्मस्वष्टावष्टा

वनूच्यंतदंद्रियाणांवीर्याणामवरुध्येइति शतादिसंख्योपयोगिनीकरमालोक्तातंत्रसारे अनामामूल
मारभ्यप्रादक्षिण्येनवैक्रमात् मध्यमामूलपर्यंतंजपेद्दशसुपर्वसु तथा अंगुलीर्नवियुंजीतकिंचिदाकुं
चितेतले अंगुलीनांवियोगेतुछिद्रेषुस्रवतेजपः अंगुल्यग्रेषुचयज्जप्तंयज्जप्तंमेरुलंघितं पर्वसंधिषुय
ज्जप्तंतत्सर्वंनिष्फलंभवेत् अक्षमालारचनप्रकारःयोगिनीतंत्रे ततोद्विजेंद्रपुण्यस्त्रीनिमितंग्रंथि
वर्जितं त्रिगुणंत्रिगुणीकृत्यसूत्रंप्रक्षाल्ययत्नतः तदंतरे ब्राह्मण्याचसुवासिन्यातदभावेन्यवर्णया
कार्पासनिर्मितंसूत्रंत्रिगुणंत्रिगुणीकृतं प्रक्षाल्यतत्रमालायांमणीन्युक्त्यानियोजयेत् अन्यच्चसूत्रां
तरेषुतुस्फोल्यमानयोर्नियमोनहि कार्पासव्यतिरिक्तेषुसूत्रेषु पाद्मे गोपुछावयवाकारामक्षमालं
विधायच मेर्वाख्यंयोजयेत्दक्षमेकंमूलायसूत्रके ग्रंथिंकुर्यात्तदग्रेणकीर्तिताचाक्षमालिका माला
सूत्रंसमत्कुमारीये यथाश्रुक्लंतथारक्तंपट्टसूत्रंमथापिवा मंत्रशास्त्र स्वयंग्रंथितमालातुशक्तस्यापिश्रि
यंहरेत्इति वराहसंहितायां अक्षान्यथोक्तान्संहृत्यविधिधान्दोषवर्जितान् क्षालितान्पंचगव्येनपंचवे

दांतविघया सद्योजाताद्यैः पंचब्रह्ममंत्रैरित्यर्थः आरोपयेत्थेमसूत्रे द्विगुणत्रिगुणीकृते सूत्रेवाराजतेक्षौमे
शणकेशादिवर्जिते कार्पासेवायथालाभंक्षालितेपरिशोभिते पृष्ठेनपृष्ठभागंचमुखेनमुखमेवच परस्प
रंतुसन्नत्थामणयः सदृशाःशुभाः सूत्रेणवासुवर्णस्य मध्येमध्येचसांतराइति अथमालासंस्कार
स्तत्रचिंतामणौ कुशोदकैःपंचगव्यैर्मालांप्रक्षालयेत्सुधीः अश्वत्थपत्रनवकेमालांसंस्थापयेत्ततः मा
तृकास्तत्रविन्यस्यसद्योजातादिपंचभिः अभिमंत्र्यततोमालांपंचगव्येनवारिभिः प्रथमेनतुमंत्रेण
तांमालांक्षालयेत्पुनः उद्वर्तयेद्द्वितीयेनचंदनेनसुगंधिना गुग्गुल्वगरुभिर्मालांतृतीयेनसुधूपयेत्
कस्तूरीचंदनाद्यैस्तुचतुर्थेनानुलेपयेत् सवान्मणीन्पंचमेनमंत्रेणत्वभिमंत्रयेत् तृतीयेनततोमेरुं
शतवारमभिमंत्रयेत् ततस्तैःपंचभिर्मंत्रैर्मालांसम्यक्प्रपूजयेत् अथप्रयोगः देशकालौस्मृत्वाजप
मालासंस्कारंकरिष्ये कुशोदकसहितैःपंचगव्यैर्मालांप्रक्षाल्यपद्माकारवत्संस्थापितेअश्वत्थपत्र ९५
नवकेमालांनिधाय अंआंइंईंइत्यादिहंक्षंइत्यंताःपंचाशन्मातृकाविन्यस्य ॐ सद्योजातंॐ वामदे

न्यसेत् निस्तर्जनीतादृशौतुशिरस्यथशिखातले निरंगुष्ठकनिष्ठौतौनिरंगुष्ठप्रदेशिनी मुष्टीपृथ
क्कृतौस्कंधात् इंतंवर्मणिस्मृतौ तर्जन्यादित्रयंनेत्रेतलास्फाटोस्त्रईरितः शैवीषडंगमुद्रोक्ते
ति शाक्तेरंगमुद्रास्तुगायत्रीजपप्रकरणेउक्ताः ऋष्यादिन्यासमुद्राअपितत्रैव ऋषिछंदोदेवता
नांन्यासेत्वंगुलयास्मृताः चतस्रोंगुष्ठरहिताइतिविद्वत्प्रभाषितं अथजपमालागौतमः अंगुल्या
जपसंख्यानमेकमेकमुदाहृतं रेखयाष्टगुणंप्रोक्तंजीवैर्दशगुणाधिकं शतंस्याछंखमणिभिःप्रवा
स्फा लैश्वसहस्रकं टिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरुच्य
ते कुशग्रंथ्याचरुद्राक्षैरनंतफलमुच्यते आचारप्रकाशेस्कांदे प्रवालमुक्तास्फटिकैर्जसंकोटिफल
प्रदं तुलसीमणिनायेनगणितंचाक्षयंभवेत् अगस्तिसंहितायां तुलसीकाष्ठघटितैर्मणिभिर्जप
मालिका सर्वकर्मणिसर्वेषामीप्सितार्थफलप्रदा मणिसंख्यामाहप्रजापतिः अष्टोत्तरशतंकुर्यात्
चतुःपंचाशिकातथा सप्तविंशतिकाकार्यातत्तोनैवाधिकाहिता अष्टोत्तरहिताप्रमालाउत्तमासाप्रकी

जपेदिमि शक्तिमंत्रेणसंयंथ्यशिवमंत्रंजपेच्छिवे ध्रुवेणमातृकाभिर्वाग्रथ्यतेमणयोयदि तदासर्वेपिज
प्तव्यामनवोमालयातया ध्रुवःप्रणवः प्रमादाद्गलिताहस्तान्मालाछिन्नाथवाभवेत् स्पृष्टावास्याल्लि
षित्येनमूलमष्टशतंजपेत् मूलमितिशेषः तंत्रांतरे जपकालेप्रगोप्तव्यानियमेनसुमेधसा परदृ
ष्टिगतामालानिष्फलाजपकर्मणि जपकालेक्षमालांतुगुरवेपिनदर्शयेत् मध्यमानामिकांगुष्ठैर्गृही
त्वाजमाचरेत् शैवागमे तर्जन्यानस्पृशेत्सूत्रंकंपयेन्नचघर्षयेत् नस्पृशेद्वामहस्तेनकरभ्रष्टांन
कारयेत् अक्षाणांचालनेंगुष्ठेनान्यमक्षंनसंस्पृशेत् जपकालेसदाविद्वान्मेरुंनैवविलंघयेत् परि
वर्त्तनकालेचसंघट्टंनैवकारयेत् कलिःखटखटाशब्देदोलमानेचलन्मतिः चलितेचैवविद्वेषःस्फुटि
तेव्याधिसंभवः हस्तच्युतेमहाविघ्नःसूत्रच्छेदेविनश्यति चलितेमध्यमातोंगुल्यंतरगते अंगुष्ठेनाक्ष
मालांचचालयेन्मध्यमाग्रतइतिवचनात् तथा कासेक्षुतेचजृंभायांएकमावर्तनंत्यजेत् प्रमादात्तर्ज
नीस्पर्शोभवेदावर्तनंत्यजेत् आवर्तनंमंत्रस्य जपन्निषिद्धसंस्पर्शेक्षालयित्वापुनर्जपेत् उत्तरतंत्रे ज ९६

पादौपूजयेन्मालांतोयैरभ्युक्ष्ययत्नतः विधायमंडपस्यांतः सहस्तगतांचवा इष्टमंत्रेणमालायाः
प्रोक्षणंपरिकीर्तितं ॐ मांमालेमहामायेसर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धि
दाभव पूजयित्वाततोमालांगृह्णीयाद्दक्षिणेकरे बीजंगाणपतंपूर्वमुच्चार्यतदनंतरं अविघ्नंकुरु
मालेत्वंमितितांप्रार्थयेद्द्विजः मालांस्त्वहृदयासंनेधृत्वादक्षिणपाणिना देवींविचिंतयन्जाप्यंकु
र्याद्धासेननस्पृशेत् जपांतेतांनमस्कृत्यविदध्यान्मस्तकेततः त्वंमालेसर्वदेवानांप्रीतिदाशुभदाभ
व शिवंकुरुष्वमेभद्रेयशोवीर्यंचसर्वदा पुष्करंशिखिबीजस्थंसूक्ष्मसूक्ष्मान्वितंभवेत् आकाशशशि
संयुक्तंसिध्यैहृदयसंयुतं ह्रींसिध्यैनमइति एषपंचाक्षरोमंत्रोमालायाःपरिकीर्तितः ग्रहणेस्था
पनेचैवपूजनेविनियोजयेत् नधारयेत्करेमूर्ध्निकंठेवाजमालिकां जपकालेजपंकृत्वासदाशुद्धस्थ
लेक्षिपेत् बाह्यैरुपचारैरिष्टदेवतांसंपूज्यजपंकुर्यात् यद्वामानसैरुपचारैःपूजनंतत्प्रकारःप्रपं
चसारे प्रथममुभयकरांगुष्ठाग्रेणउभयकनिष्ठिकयोःमध्यमपर्वणोःस्पृशन् ॐ गंधंपरिकल्प

ष्पं
यामीत्युक्त्वागंधोपचारंसमर्पयेत् पुनस्तथैवतर्जन्यग्रद्वयेनांगुष्ठमध्यदेशसंस्पर्शपूर्वकं ॐ पु[illegible]समर्पयामी
ति पुष्पमुद्रयापुष्पोपचारं समर्पयेत् पुनरितरास्वतिसृष्वप्यंगुलीषु तर्जन्यादिषु अंगुष्ठाग्रेण मध्यदेशसं
स्पर्श पूर्वकं धूपदीपनैवेद्यमुद्राः क्रमेण तत्तन्नाम्ना पूर्ववदेव समर्पयेत् एवमेव सर्वत्र मानसपूजाप्रक
रः अथवा कल्पांतरोक्तप्रकारेण गंधाद्युपचारमंत्राः लंपृथिव्यात्मने नारायणाय सत्यं गंधं कल्पया
मि हंआकाशात्मने वासुदेवाय ब्रह्मपुष्पं कल्पयामि यंवाय्वात्मने संकर्षणाय धूपं कल्पयामि
रंअग्न्यात्मने प्रद्युम्नाय दीपं कल्पयामि वंअंबात्मने अनिरुद्धाय आनंदनैवेद्यं कल्पयामि मुद्रास्तुप्र
र्विक्ताएव यद्वाकेवलनैवेद्यमुद्राप्रदर्शनं तदुक्तं क्रमदीपिकायां ततो निवेद्यमुद्रिकां प्रधानयाकरद्व
ये स्पृशन्ननामिकां निजं मनुं जपन्प्रदर्शयेत् प्रधानयेत्यंगुष्ठेन व्यासः जपकालेन भाषेत व्रतहोमादि
केषु च एतेष्वेवावसक्तस्तु यथागच्छन्द्विजोत्तमः अभिवाद्य ततो विप्रं योगक्षेमं च कीर्तयेदिति यथागमवेला
यां तन्मनस्कः सन्नेव गच्छति तद्वज्जपादिष्वपि तन्मनस्क एव भवेदित्यर्थः विप्रमभिवाद्य तेन विप्रेणयो

ॐ अघोरेभ्यो० ॐ तत्पुरुषाय० ॐ ईशान० इति पंच मंत्रैरभिमंत्र्य सद्योजातेति मंत्रेण मालां पंचगव्येन प्रोक्ष्य शी
त जलेन प्रक्षाल्य वामदेवेति चंदनेनाघृष्य अघोरेति गुग्गुल्वगुरुभिर्धूपयित्वा तत्पुरुषेति कस्तूरीचंदना
दिनालेपयित्वा ईशान इति मंत्रेण प्रतिमणि मंत्रावृत्त्या सर्वान्मणीनभिमंत्र्याघोरेभ्य इत्यनेन मेरुं शतवा
रमभिमंत्रयेत् ततएतैरेव पंचभिर्मंत्रैर्गंधादिपंचोपचारैर्मालां प्रपूजयेदिति केचित्तु मंत्रयेत्पंचभिर्मंत्रै
र्वा प्रत्येकं तु शतंशतं इति यामलवचनात् प्रतिमणि शतवारमभिमंत्रणमाहुः प्रतिमणि दशवारं चे
ति धर्माब्धिसारः ग्रंथांतरे प्राणानां स्थापनं कुर्यात्तत्रावाह्येष्टदेवतां इष्टदेवतां यदीयमंत्रजपस्तां
मूलेनाभ्यर्च्याभिमंत्र्य मातृकावर्णैश्च मूलतः मातृकावर्णैर्मूलेन च मालामभिमंत्र्येत्यर्थः आज्याहु
तिरष्टशतं मूलेन जुहुयात्ततः संपाताज्यं तु मालायां प्रत्याहुति विनिक्षिपेत् होमाशक्तौ तु मूलेन मा
लाया अभिमंत्रणं होमसंख्याद्विगुणितसंख्यया साधकश्चरेत् अन्यच्च तंत्रांतरे यन्मंत्रस्य जपार्
थं सा माला संस्कृता सुया तन्मंत्रस्यैव कुर्वीत जपं नान्यस्य कस्यचित् शिवमंत्रेण संग्रंथ्य शक्तिमंत्र

रीभीमाशाक्तिभ्योनमः दक्षिणस्तने रक्तदंतिकादुर्गाभ्रामरीबीजेभ्योनमः वामस्तने अग्निवायुभगतत्त्वे
भ्योनमः हृदये न्यासेजपेच विनियोगायनमः सर्वांगे ऐं हृदयायनमः ह्रीं शिरसेस्वाहा क्लीं शिखायैवषट्
चामुंडायैकवचायहुं विच्चेनेत्रत्रयायवौषट् ऐं ह्रीं क्लीं चामुंडायैविच्चे अस्त्रायफट् अथध्यानं खड्गं
चक्रगदेषुचापपरिघान् शूलंभुशुंडीशिरः शंखंसंदधतींकरैस्त्रिनयनांसर्वांगभूषावृतां नीलाश्मद्युतिमा
स्यपाददशकांसेवेमहाकालिकां यामस्तौच्छयितेहरौकमलजोहंतुंमधुंकैटभं १ अक्षस्रक्परशुंगदेषुकु
लिशंपद्मंधनुःकुंडिकांदंडंशक्तिमसिंचचर्मजलजंघंटांसुराभाजनं शूलंपाशसुदर्शनेचदधतींहस्तैःप्रवाल
प्रभांसेवेसैरिभमर्दनीमिहमहालक्ष्मींसरोजस्थितां २ घंटांशूलहलानिशंखमुसलेचक्रंधनुःसायकंहस्ता
ब्जैर्दधतींघनांतविलसच्छीतांशुतुल्यप्रभां गौरीदेहसमुद्भवांत्रिजगतांमाधारभूतांमहापूर्वामत्रसरस्वती
मनुभजेशुंभादिदैत्यार्दिनीं ३ पूर्वोक्तप्रकारेणमानसैःपंचोपचारैरभ्यर्च्य जपमालांकंचित्पात्रेसंस्था
प्यशुद्धोदकेनमूलेनप्रोक्ष्य ॐ मांमालेमहामायेसर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धि ९९

गंक्षेमंचकीर्तयेदित्यर्थः अलब्धलाभोयोगःलब्धस्यलक्षणंक्षेमः एतदितिरिक्तवाग्यमलोपेतुवैष्णव्यव
जपइतिपूर्वकं फेत्कारिणीतंत्रे जपकालेयदापश्येदशुचिंमंत्रउत्तमः प्राणायामंततः कृत्वाजपशे
षंसमापयेत् यदाचैवंभवेन्मंत्रीस्वयमेवाशुचिःपुनः स्नात्वाचम्ययथापूर्वंन्यासंकृत्वाजपेदिति
न्यासोधिकारसंपादकः एतेनमूत्रोत्सर्गादावशुचित्वसंभवश्चेत्स्नानं अन्यथाप्राणायामषडंगन्या
सान्कृत्वाशेषंसमापयेदितिप्रदीयते कपिलपंचरात्रे विक्षेपादथवालस्याज्जपहोमार्चनांतरा उ
त्तिष्ठतितदान्यासंषडंगंविन्यसेत्पुनः सिद्धार्यादिशोधनंमंत्रविशेषेनदपवादः मंत्रसंस्कारःपुर
श्चरणधर्माश्चयंथांतराज्ज्ञेयाः विस्तरभियानात्रलिख्यंते अथमालासंख्यानेवर्ज्यपदार्थान्ग्राह्यगु
टिकांचाहसंग्रहकारः नाक्षतैर्नचपर्वैर्वानधान्यैर्नचपुष्पकैः नमृन्मयैःफलैर्वापिजपसंख्यांनकारये
त् लाक्षांकुसीदंसिंदूरंचंदनंचकरीषकं संमेल्यगुटिकांकृत्वाजपसंख्यांतुकारयेत् अथनवार्णवि
धिःडामरतंत्रे नवबीजनिबद्धोयंमंत्रस्त्रैलोक्यपावनः एतंजपतियोमंत्रीफलंतस्यवदाम्यहं वश्याभवं

तिकामिन्योराजानोनुचराइव नहस्तिसर्पदावाग्निचोरशत्रुभयंभवेत् सर्वाःसमृद्धयस्तस्यजायंतेचं
डिकाज्ञया नश्यंतिदारुणारोगाः सत्यंसत्यंनसंशयः अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीर्व्यवस्थिता
तस्मात्सुसिद्धःसर्वेषांसर्वदिक्षुप्रदीपकः अनेनास्यसिद्धादिविचारोनास्तीतिस्थापितं अथमंत्रोत्था
रः ऐंबीजमादींदुसमानदीप्तिंह्रींसूर्यतेजोद्युतिमप्रमेयं क्लींभूतवैश्वानरतुल्यरूपंतृतीयमानल्प
सुखायचिंत्यं चामुत्थजांबूनदकांतितुर्यंमुंपंचमंरक्ततरंप्रकल्प्यं स्याड्डाषडुग्रोर्तिहरंमुनीतंयै
सप्तमंकृष्णतरंरिपुघ्नं विपांडुरंत्वष्टममादिसिद्धंच्चेधूम्रवर्णंनवमंविशालं ऐंह्रींक्लीं चामुंडायै
विच्चेइतिनवाक्षरोमंत्राः नवाक्षरस्यऋषयोब्रह्मविष्णुमहेश्वराः छंदांस्युक्तानिमुनिभिर्गायत्र्युष्णि
गनुष्टुभः देव्यःप्रोक्तामहापूर्वाःकालीलक्ष्मीसरस्वति नंदाशाकंभरीभीमाःशक्तयोस्यमनोस्मृताः
स्याद्रक्तदंतिकादुर्गाभ्रामर्योबीजसंचयः अग्निवायुभगास्तत्त्वंफलंवेदत्रयोद्भवं भगुःसूर्यःसर्वाभी 
ष्टप्रसिध्यर्थंविनियोगउदाहृतः ऋषिछंदोदेवतानिकास्यहृत्सुप्रविन्यसेत् शक्तिबीजानिस्तन

योस्तत्वानि हृदयेपुनः मंत्राणांपल्लवोवासा मंत्राणांप्रणवःशिरः शिरःपल्लवसंयुक्तोमंत्रकामदुघोभवेत्
अस्मिन्नवार्णरे आदौप्रणवोज्यः शिरःपल्लवसंयुक्त इतिसमनंतरलिखितवचनात् न्यासहीनोभवेन्मं
त्रोमृतःस्याच्छिरसाविनेतिवचनाच्च नवशिरोवत्पल्लवस्यांप्यावश्यकत्वोक्तेस्तद्योगोपि कर्तव्य इति वाच्यं
अस्यवैदिकत्वेन ओंकारमुखगो मंत्रोवेदागमसमुद्भवो पल्लवस्त्वागमेमंत्रे वैदिकेनास्तिपल्लव इतिडामरेत
न्निषेधात् वैदिकत्वं तुभास्कररायैर्गुप्तवत्यामुक्तं ततःषडंगंकुर्वीतविभक्तैर्मूलवर्णकैः एकेनैकेन चैकेन
चतुर्भिर्युगलेन च समस्तेन च मंत्रेण कुर्यागानिषट्सुधीः यद्वा मयाबीजे चंडिकायेहृदयादिनमोंतकं
अथवा ऐंह्रींक्लींचंडिकायेव्यस्तेनसमस्तेनषडंगकाविति अथप्रयोगः आचम्यप्राणानायम्यशुचौदेशेकंब
लाद्यासने ॐ पृथ्वित्वयेत्युपविश्यस्वस्तिकाद्यासनंबध्वादेशकालौसंकीर्त्यश्रीमहाकालीमहालक्ष्मीमहा
सरस्वत्यात्मकचंडिकाप्रीतिद्वारासर्वाभीष्टसिध्यर्थंनवार्णजपंकरिष्ये अस्यश्रीनवार्णमंत्रस्यब्रह्मविष्णुम
हेश्वराऋषयः गायत्र्युष्णिगनुष्टुभश्छंदांसि श्रीमहाकालीमहालक्ष्मीमहासरस्वत्योदेवताः नंदाशाकंभ

१०० इतिनवार्णविधिः अस्यच तुर्लक्षात्मकंपुरश्चरणं एवंध्यात्वाजपेल्लक्षचतुष्कंतद्दशांशतः पायसान्नेनजु
हुयात्पूजितेहेमरेतसीतिमहोदधावुक्तेः यद्वा आश्विनस्यसितेपक्षेआरभ्याष्टमितिथिंसुधीः अष्टम्यंतं
जपेल्लक्षंजुहुयात्तद्दशांशतः इतिगुमवत्युक्तप्रकारेणपुरश्चरणं अथशिवपंचाक्षरविधानं तत्रमंत्रोद्धा
रः शिवार्चनचंद्रिकायांहृदयंवपरंसाक्षिलांसोनंतांतिकोमरुत् पंचाक्षरोमनुःप्रोक्तःस्ताराद्योयंषडक्षरः
ब्रह्मोत्तरखंडेशिवपंचाक्षरंप्रक्रम्यमहापातकदावाग्निःसोयंमंत्रःषडक्षरःप्रणवेनविनामंत्रःसोयंपंचाक्ष
रोमंत्रःस्त्रीभिःशूद्रैश्चसंकीर्णैर्धार्यतेमुक्तिकांक्षिभिः नास्यदीक्षानहोमश्चनसंस्कारोनतर्पणं नकालनि
यमश्चात्रजप्यःसर्वैरयंमनुः स्कंदपुराणेसूतसंहितायांनैमिषीयाऊचुः भगवन्देवदेवस्यनीलकंठस्यशूलि
नः ब्रूहिपूजाविधिंविद्वन्कृपयाभुक्तिमुक्तिदं इतिप्रश्नेसूतःकथकः वक्ष्येपूजाविधिंविप्राइत्युपक्रम्यश्रीम
त्पंचाक्षरेणैवप्रणवेनयुतेनत्विति पूजासाधनमंत्रमभिधायआश्रमभेदेनतथास्त्रीणांचमंत्रेविशेषंदर्शयति १००
प्रणवेनमहादेवंसर्वज्ञंसर्वकारणं ब्रह्मचारीगृहस्थश्चवानप्रस्थश्चसुव्रतः एवंदिनेदिनेदेवंपूजयेदंबिका

पतिं प्रणवेनेति प्रणवयुक्तेन पंचाक्षरेणेत्यर्थः सन्यासी देवदेवेशं प्रणवेनैव पूजयेत् नमोंतेन शिवेनैव स्त्री
णां पूजा विधीयते शिवेन मंत्रेण विरक्तानां च शूद्राणामेव पूजा प्रकीर्तितेति पारिजाते भाले त्रिपुंड्रकं भाति
गले रुद्राक्षमालिका वक्त्रे षडक्षरो मंत्रः स रुद्रो नात्र संशयः एवं च ब्रह्मचारी गृहस्थ वानप्रस्थानां ॐ नमः शि
वायेति प्रणवाद्यः षडक्षरः स्त्रीशूद्राणां तु शिवाय नमः नमः शिवायेति वा सन्यासीनां तु केवलः प्रणवः अस्य प्रणव
योगेन षडक्षरत्वेपि पंचाक्षर मंत्र जपं करिष्य इत्येव संकल्पः पंचाक्षरः सप्रणवो द्विजराज्ञो विधीयत इति वासि
ष्ठादि वचनैः पंचाक्षरस्य प्रणव साहित्य विधानात् शिवार्चन चंद्रिकायां वामदेव मुनिश्छंदः पंक्तिरीशोस्य देवता
षड्भिर्वर्णैः षडंगानि कुर्यान्मंत्रस्य देशिकः जपकाल नियमः रामकल्पे सर्वेषां श्रुतिमूलानां नित्य नैमित्तिकात्मकं
कर्मणामविरोधेषु कालेषु जप इष्यते शिवगीतायामपि ब्राह्ममुहूर्तमारभ्य आमध्याह्नं जपेन्मनुं अतऊर्ध्वं कृते
जप्ये विनाशो भवति ध्रुवं पुरश्चरं विधायेवं सर्वकामफलेष्वपि नित्य नैमित्तिके वापि तपश्चर्यासु वा पुनः सर्वदैव ज
पः कार्यो न दोषस्त्वत्र कश्चनेति तथा स्थाननियमोपि तत्रैव बिल्वमूले समाश्रित्य यो मंत्रान्विविधान्जपेत् ए

केकदिवसेनैवतत्पुरश्चरणंभवेत् यस्तुबिल्ववनेनित्यंकुटींकृत्वाजपेन्नरः सर्वेमंत्राःप्रसिध्यंतिजपमात्रेणके
१०१ वलं अथप्रयोगः आचम्यप्राणानायम्यकंबलाद्यासनेपृथ्वित्वयेत्युदङ्मुखउपविश्यप स्मस्वस्तिकाद्यासनंबध्वा
देशकालावनुकीर्त्यममश्रीशिवसाक्षात्कारसिद्धिपूर्वकधर्मार्थकाममोक्षार्थसिध्यर्थंश्रीसदाशिवप्रीत्यर्थंवाश्री
शिवपंचाक्षरविद्योपासनंकरिष्ये अस्याश्रीशिवपंचाक्षरविद्यायाःवामदेवऋषिःपंक्तिश्छंदः श्रीसदाशिवादे
वताममचतुर्विधपुरुषार्थसिध्यर्थजपेविनियोगः वामदेवर्षयेनमः शिरसिपंक्तिछंदसेनमोमुखेसदाशिव
देवतायैनमोहृदयेममचतुर्विधपुरुषार्थसिध्यर्थजपेविनियोगायनमः करसंपुटे ॐ हृदयायनमः नंशिर०
मंशिखायै० शिंकवचायहुं० वांनेत्रत्रयाय० यंअस्त्राय० यद्वा ॐ ॐ सर्वज्ञशक्तिधाम्नेहृदयायनमः ॐ
नंनित्यतृप्तशक्तिधाम्नेशिरसे ॐ मंअनादिबोधशक्तिधाम्नेशिखायै ॐ शिंस्वतंत्रशक्तिधाम्नेकवचा
यहुं ॐ वांअलुप्तशक्तिधाम्नेनेत्रत्रयाय ॐ यंअनंतशक्तिधाम्नेअस्त्राय० अथध्यानं ध्यायेन्नित्यं १०१
महेशंरजतगिरिनिभंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतिहस्तंप्रसंनं पद्मासीनंसमं

दाभवेतिसंप्रार्थ्यह्रींसिध्यैनमः इतिमंत्रेणपुनःपुनरावृत्तेनगंधादिभिः पंचभिर्गंधपुष्पाभ्यामेववासंपूज्यगंअवि
घ्नंकुरुमालेत्वंगृह्णामिदक्षिणेकरे जपकालेतुसततंप्रसीदममसिध्यैइतिदक्षिणहस्तेनवस्त्रादिनाछादि
तांमालांगृहीत्वास्वहृदयसमीपेधृत्वामध्यमामध्यपर्वावलंबिनींतांतर्जन्यावामहस्तेनचास्पृशन् एकमणि
ग्रहणेन्यमनुपाददानः क्रमादंगुष्ठाग्रेणमणीन्परिवर्तयन्महासरस्वतिचित्तेमहालक्ष्मीसदात्मिके महाक
ल्यानंदरूपेत्वतज्ज्ञानसिद्धये अनुसंदध्महेचंडिवयंत्वांहृदयांबुजेइतिमंत्रार्थमनुसंदधानःइष्टसंख्यंमंत्रंमा
रंभेप्रोक्तसंख्यावधौचप्रणवपुटितंजपित्वात्वंमालेसर्वदेवानांप्रीतिदाशुभदाभव शिवंकुरुष्वमेभद्रेयशोवी
र्यंचसर्वदाइतिसंप्रार्थ्यह्रींसिध्यैनमइतिमालांशिरसिनिधायसुगुप्तस्थलेनिदध्यात् अथपुनर्न्यासादिमा
नसपूजांतंविधायगुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपंसिद्धिर्भवतुमेदेवित्वत्प्रसादान्मयिस्थिरेतिज
लधारयादेव्यादक्षिणहस्तेजपंनिवेदयेत् यस्त्वन्यदीयंजपंकरोतितदामयीत्यत्रयजमानइत्यूहइतिके
चित् अंतेसकृदाचम्यानेननवार्णजपेनश्रीमहाकालीमहालक्ष्मीमहासरस्वत्यात्मकचंडिकाप्रीयतां

मूलांतेतुपदेदेयंसिंचामीत्यभिषेचने ॐ ऐंह्रींक्लींचामुंडायैविच्चेचंडिकांतर्पयामिनमः ॐ ऐंह्रींक्लींचामुंडायैविच्चेचं
डिकामभिषिंचामीति यद्वा ॐ ऐंह्रींक्लींचामुंडायैविच्चेनमश्चंडिकामभिषिंचामीत्यभिषेके विशेषउक्तः पुरश्चर
णचंडिकायांस्वमूर्धन्यभिषेकइत्यपितत्रैव अन्यत्रतुदेवतायाः शिरसिवाभिषेकइत्युक्तं इतिशांडिल्यकुल
संभवमाटेइत्युपनामकनारायणात्मजत्र्यंबकविरचितेआचारेंदौनैमित्तिकजपप्रकरणं अथपुराणश्रवणं च
तुर्वर्गचिंतामणौसर्वपापविनिर्मुक्तिकरणेयस्यस्यमानसं वर्ततेविधिवत्तेनपुराणंश्रूयतेध्रुवं प्रातःकालेसमु
त्थायदंतधावनपूर्वकं प्रातःस्नानंविधायैवजुहुयाज्जातवेदसं कृताह्निकंसमाहूयवक्तारंशीलकोविदं सं
भाव्यासनदानेननमस्कुर्यात्समंजसा तत्रनमस्कारमंत्रः नमस्तेभगवन्व्यासवेदशास्त्रार्थकोविद ब्रह्मवि
ष्णुमहेशानांमूर्तेसत्यवतीसुतेतिश्रीमद्भागवतेपि तएकदातुमुनयःप्रातर्हुतहुताग्नयः सत्कृतंसूतमासीनंप
प्रच्छुरिदमादरादिति अनेनप्रातर्होमोत्तरंपुराणंश्रोतव्यमितिलभ्यते दक्षस्तुकालांतरमाह इतिहासपुराणाद्यैःष
ष्ठसप्तमकौनयेदिति सर्वपुराणेषुश्रीमद्भागवतंअवश्यंनित्यंश्रोतव्यं तदुक्तंपद्मपुराणे अंबरीषंप्रतिगौतमेन
अंबरीषशुकप्रोक्तंनित्यंभगवतंशृणु पठस्वस्वमुखेनापियदीछसिभवक्षयमिति अथप्रयोगः आचम्यप्राणान १०२

यम्यदेशकालौसंकीर्त्यसकलपातकक्षयपूर्वकमोक्षसिध्यर्थंश्रीमद्भागवतश्रवणंकरिष्ये ॐसरस्वत्यैनमइ
तिगंधादिभिःपुस्तकंसंपूज्य ॐव्यासस्वरूपिणेवाचकायनमइतिवाचकंगंधादिभिःसंपूज्यनमस्तेभगवन्नि
तिश्लोकेननमस्कृत्यतन्मुखात्एकाग्रमनाःपुराणंशृणुयात् इत्याचारेंदौपुराणश्रवणविधिः अथनित्यदा
नविधिरभिधीयते याज्ञवल्क्यः दातव्यंप्रत्यहंपात्रेनिमित्तेषुविशेषतः याचितेनापिदातव्यंश्रद्धापूतं
तुशक्तितः स्मृतिरत्नावल्यां दातव्यंप्रत्यहंपात्रेस्वल्पःशक्त्यनुसारतः गौरवंप्राप्यतेदानात्ननुवित्तस्य
संग्रहात् आयासतःप्रलब्धस्यप्राणेभ्योपिगरीयसः गतिरेकैववित्तस्यदानमण्वपियत्नतः विद्याह
समानार्योबह्व्यःसंतिबहुप्रजाः सैकैवविरलाकाचिद्याद्दातृबुधवीरसूः ग्रासादर्धतरोग्रासोस्त्वर्थिभ्यः
किंनदीयते इच्छानुरूपोविभवःकदाकस्यभविष्यति अंजनस्यक्षयंदृष्ट्वावल्मीकस्यचसंचयं अवं
ध्यंदिवसंकुर्याद्दानाध्ययनकर्मभिः॥ महाभारतेभीष्मोयुधिष्ठिरंप्रत्याह एकस्मिन्नप्यतिक्रांतेदिनेदान
विवर्जिते दस्युभिर्मुषितस्येहयुक्तमाक्रंदितुंभृशं तस्माद्विभवानुसारतःपूगीफलादिकमपिप्र

त्यहं देयमिति तात्पर्यार्थः अत्र प्रत्यह शब्दश्रवणादहनियदावादानमिति केचित् भट्टदिनकरस्तु उषोयेते
मयामेषु युंजते मनोदानाय सूरयः इति मंत्रलिंगदर्शनात्थो मात्पूर्वं नित्यं दानमाह इदं च नित्यं प्रत्यह शब्द
श्रवणात् इत्याचारेंदो नित्य दानविधिः अथ प्रातर्नित्यं सुवर्णाज्य दानं मदनरत्ने विष्णुपुराणे स्वमात्मा
नं घृते पश्येद्यदीच्छेच्चिरजीवनं भविष्ये कांस्यपात्रस्थिताज्ये च आत्मरूपं निरीक्ष्य च ससुवर्णं द्विजो दद्या
त्सर्वविघ्नोपशांतये हेमाद्रौ आयुष्यमथवर्चस्यं सौभाग्यं शत्रुतापनं दुष्टप्रनाशनं धन्यं घृतावेक्षणमु
च्यते प्रयोगचिंतामणौ दद्यात्पूर्वमुखो दानं गृह्णीयादुत्तरामुखः आयुर्विवर्धते दातुः ग्रहीतुः क्षीयते न
तत् नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः संप्रदेयं प्रयच्छंति कन्यादाने तु पुंस्त्रयं अथ प्रयोगः आ
चमनादि देशकालकीर्तनांते मम मेत च्छरीरावच्छिन्न समस्त पापक्षय सर्वग्रहपीडाशांति शरी
रोत्थार्तिनाशमनःप्रसादायुरारोग्यादि सर्वसौख्य कामोहं ससुवर्ण कांस्यपात्रस्थाज्य दा १०३
नं करिष्ये स्वयं प्राङ्मुखः उदङ्मुखं द्विजं संपूज्य रूपं रूपमिति मंत्रेण स्वप्रतिरूपमाज्यं

तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं मानसैः पंचोपचारैरभ्य
र्च्य नवार्णोक्तप्रकारेण मालाग्रहणादि कृत्वा इष्टसंख्यां जपित्वा मालाप्रार्थनादि सर्वं उत्तरांगं नवार्णवत्कृत्वा सकृ
दाचम्य अनेन शिवपंचाक्षरविद्योपासनेन श्रीसांबसदाशिवः प्रीयतां अस्य चतुर्विंशतिलक्षात्मकं पुरश्चरणं
तत्वलक्षं जपेन्मंत्रं दीक्षितः शैववर्त्मना तावत्संख्यासहस्राणि जुहुयात्पायसैः शुभैः ततः सिद्धो भवेन्मंत्रः साध
काभीष्टसिद्धिद इति वचनात् यद्वा लक्षषट्कं जपेद्व्रतनियमस्थो जितेंद्रियः तावत्सहस्रं जुहुयात्तिलैः शुद्धैर्घृ
तप्लुतैः पायसैः पायसैः क्षीरवृक्षोत्थसमिद्भिर्वा गणेश्वरेति वचनात्षट्लक्षात्मकं पुरश्चरणं इति शिवपंचाक्ष
रविधानं अथ पुरश्चरणानुकल्पश्चंडिकायां चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः स्पर्शादिमोक्षपर्यंतं
जपेन्मंत्रं समाहितः जपाद्दशांशतो होमस्तथा होमात्तु तर्पणं तर्पणस्य दशांशेन मार्जनं कथितं किल होमवि
धिस्तु वैदिकः प्रसिद्धः तांत्रिकस्तु मत्कृते सामान्यविधौ द्रष्टव्यः तर्पणमार्जनयोर्विधिर्महोदधौ एवं हो
मं समाप्याथ तर्पयेद्देवतां जलैः आवाह्य तद्दशांशेन तर्पणादभिषेचनं तर्पयामि नमश्चेति द्वितीयांतेष्टपूर्वकं

क्यस्य धर्मस्य दानासंभवः भूमिदानावपिसमानत्वात् देवतानांगुरूणांच्च मातापित्रोस्तथैव
 पुण्यंदेयंप्रयत्नेन ना पुण्यं नोदितंक्वचित् इतिस्मृत्यंतरेपि धर्मदानश्रवणाच्चेति अथ
देवपूजातत्कालःस्मृत्यंतरे प्रातर्होमंच कृत्वैव कृत्वावाब्रह्मवादकं यद्वामाध्याह्निकंकृ
त्वापूजयेत्पुरुषोत्तममिति मात्स्येतु प्रातर्मध्यंदिनेसायंदेवपूजांसमाचरेत् अथा
क्तोविस्तरेणैवप्रातःसंपूज्यकेशवं मध्याह्नेचैवसायंच पुष्पांजलिमपिक्षिपेत् इत्यु
क्तं एकपाकवतां पुत्रपितृभ्रातॄणामपिपृथग्देवतार्चनमाहाचार्यः पृथगप्येकपा
कानांब्रह्मयज्ञोद्विजातीनां अग्निहोत्रंसुराचार्चा संध्यानित्यंभवेत्तथा निर्णय
सिंधौबृहस्पतिस्तुएकपाकेनवसतां पितृदेवद्विजार्चनं एकंभवेद्विभक्तानां त 
देवास्याद्गृहेगृहेइत्याह देवसंख्याविशेषनिषेध आचारप्रकाशे गृहेलिंगद्वयं

नार्च्यंगणेशत्रयमेवच शक्तित्रयंतथामत्स्यकूर्मादिदशकंगृहे द्वौशंखौनार्चयेच्चैवशालग्रामशिलाद्वयं द्वेचक्रेद्वारकायास्तुतथासूर्यद्वयंबुधः एतेषांपूजनेनित्यमुद्वेगंप्राप्नुयाद्गृहीति अन्यत्रतुचक्रांकमिथुनंपूज्यंनैकंचक्रांकमर्चयेदित्युक्तेतेनविकल्पः वाराहे गृहेग्निदग्धाभग्नाश्चनार्चाःपूज्याःवसुंधरेति निर्णयसिंधौ शालग्रामाःसमाःपूज्याःसमेषुद्वितयंनहि विषमानैवपूज्यास्तुविषमेष्वेकएवहि शालग्रामशिलाभग्नापूजनीयासचक्रका खंडितास्फुटितावापिशालग्रामशिलाशुभा चमत्कारचिंतामणौ नार्च्यागृहेश्मजामूर्तिश्चतुरंगुलतोधिका नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता पंचायतनपूजापक्षेतत्स्थापनप्रकारंबोपदेवआह शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांबिकास्थापिताः देव्यांविष्णुशिवैकदंतरवयोलंबोदरेजेश्वरेनार्याःशंकरभागतोतिसुखदाव्यस्तास्तुतेहानिदाः इनःसूर्यः अजोविष्णुः आर्यादुर्गा शंकरभागईशानदिक्तामारभ्योक्तरीत्यास्थापिताअतिसुखदानान्यथेत्यर्थः अत्रदिक्स्वरूपमुक्तंप्रयोगपारिजातेमंत्रशास्त्रे देवस्यमुखमारभ्यदिशांप्राचीप्रकल्प

येत् तदादिपरिवाराणांअंगाद्यावरणस्थितिः विष्णुयामलेपि पूज्यपूजकयोर्मध्ये प्राचीप्रोक्ताविचक्षणैः
प्राच्येवप्राचीसोद्दिष्टा मुक्तावैदेवापूजनमिति आचारमयूखेतु पूज्यपूजकांतः प्राचीआगमोक्तपूजायामे
वतत्परिभाषायामुक्तत्वात् वैदिकपूजायांतु यत्रैवभानुस्तुवियत्युदेतिप्राचींतुतांवेदविदोवदंतीतिगौत
मोक्तप्रसिद्धप्राच्येवग्राह्येत्युक्तं बहुशिष्टाचारानुसारादिदमेवयुक्तं पूजाक्रमेतुविवदंते तत्रतावद्गविविं
नायकचंडीईशोविष्णुस्तुपंचमः अनुक्रमेणपूज्यंतेव्युत्क्रमेणमहद्भयमितिपाद्मोक्तपाठक्रमानुसारेणपू
जाकार्येतिकेचिदाहुः राघवभट्टास्तु मुख्येपुष्पांजलिंदत्वागणेशाद्यर्चनंभवेत् गणे[illegible]शाएवमुख्यश्चे
तत्रसूर्यक्रमाद्भवेदितिवचनात् गणेशमारभ्येवसर्वत्रांगपूजा गणेशस्यमुख्यत्वेतुसूर्यमारभ्येतिमन्यंते
अत्रपुष्पांजलिशब्देनतदंतापूजालक्ष्यते पुष्पांजल्यंतरंवाविधीयतेइति वस्तुतस्तुअयंपूजायामेवज्ञे
यः तत्रैवोक्तत्वात् वैदिकपूजायांतुस्थापनक्रमएव अतएववाजपेययाजिभिः विष्णुशिवगणेशसूर्यदु १०५
र्गाभ्योनमइतिश्लिष्टमंत्र उक्तोविष्णुपंचायतने अथोपचाराः तेचअष्टोत्तरशतंचतुःषष्टिअष्टादशषोडशद

वलोक्य आज्यंतेजः समुद्दिष्टमाज्यंपापहरंशुभं आज्येनदेवतास्तृप्यंतिआज्येदेवाःप्रतिष्ठिता यालक्ष्मीर्यच्चमेदौस्थं
सर्वांगेसमुपस्थितं तत्सर्वंनाशयाज्यत्वंश्रियमायुश्चवर्धयइत्युच्चार्यसंकल्पोक्तफलकामः इदंसमुवर्णकांस्य
पात्रस्थाज्यंविष्णुदेवत्यं अमुकगोत्रायामुकशर्मणेतुभ्यमहंसंप्रददेइतिजलपूर्वकंद्विजहस्तेदद्यात् दानसां
गतार्थंयथाशक्तिदक्षिणांदद्यात् अनेनकांस्यपात्रदाननापिनित्यदानसिद्धिः यथाकाम्याग्निहोत्रेणनित्या
ग्निहोत्रस्येति स्वमात्मानंघृतेपश्येदितिविष्णुपुराणवचनेकेवलावलोकतस्यैवविहितत्वादशक्तावलोक
नमात्रंनदानं इतिसमुवर्णकांस्यपात्रस्थाज्यदानं अथात्रप्रसंगाद्गोदानसमान्युच्यंते तत्रयाज्ञवल्क्यः
श्रांतसंवाहनंरोगिपरिचर्यासुरार्चनं पादशौचं द्विजोच्छिष्टमार्जनंगोप्रदासमं श्रांतस्यासनशयनदाने
नश्रमापनयनं रोगिणांपरिचर्यायथाशक्त्यौषधदानेनसुरार्चनंप्रसिद्धं पादशौचं द्विजानांसमानाम
धिकानांवातेषामेवोच्छिष्टसंमार्जनंएतानिगोदानसमानीत्यर्थः तथा गृहधान्याभयोपानछत्रमाल्यानुले
पनं यानंवृक्षंप्रियंशा[illegible]य्यांदत्वात्यंतंसुखीभवेत् अभयंभीतत्राणं माल्यंमल्लिकादि अनुलेपनंकुंकुम
चंदनादिवृक्षसमुपजीव्यमाम्रादिकं प्रियंयद्यस्यप्रियंधर्मादिकं शेषंप्रसिद्धं नचहिरण्यादिवस्त्वस्तेनदातुमश

निर्माल्यमपनोदयेत् शंखलक्षणमुक्तंक्रियासारे मस्तांबुप्रमितःशंखःश्रेष्ठस्तत्र्यंगुलःसर्व
कः मध्यःस्यादर्धप्रमितःकनिष्ठःक्रमशोभवेत् सुश्वेतःशांशुशिखरःस्निग्धोदीर्घांबुपङ्क्तिः
शंखस्यादर्चनेयोग्योयोसावलिकचक्षुषः अलिकचक्षुःस्त्रियंबकः तथाचतथैवताम्रस्फटि
कशंखेषुसुवर्णकलधौतयोः नविद्यतेभिन्नदोषोऽव्येधन्येषुविद्यते कलधौतंरजतं शंखःशु
द्धोभवेत्तत्क्रतुषाभ्यांघर्षणेनचेति अथोपकरणलक्षणंपारिजाते सपर्याविष्टरंब्रह्मन्हस्तमा
नोन्नतंशुभं यद्वान्यूनसमुत्सेधंयथावित्तानुसारतः सपर्याविष्टरंसिंहासनं सिंहपादयु
तंयद्वाहस्तिपादचतुष्टयं शार्दूलपादमथवाहेमरत्नपरिष्कृतं चतुरस्रंमध्यमेतुसरसीरुहवि
स्तृतं तपनीयमयंयद्वारजतादिविनिर्मितं दारुजंवामणिच्छन्नंस्वर्णपिष्टैर्विराजितं लोहजा
न्दीपिकास्तंभान्चतुर्हस्तप्रमाणकान् त्रिहस्तानेकहस्तान्वाद्विहस्तान्वायथाबलं ताम्रजान्वा
जतीयान्वायुग्मैस्तैःस्नेहधारकैः युग्मैर्वावृत्तिविस्तीर्णैर्बध्यस्तैर्वापरिष्कृतान् स्नेहाधारगतैःक्षि

द्मपद्मकोशैरलंकृतान् कुर्यादर्घ्यादिपात्राणि सौवर्णानीतराणि च राजतान्युभयाभावे शुद्धताम्रम
यानि वा तथा कार्तस्वरमयं वृत्तं राजतं वाथ पावनं अरत्निमानविस्तारं मध्येऽष्टदलसंयुतं प्रतिप
द्मदलं मध्ये सुषिराणि शतं भवेत् अष्टोत्तरशतं भूयः पर्यन्तदलमध्यतः खचितं च महारत्नैरेवं धा
रासहस्रकं धाराष्टकेन चायुक्तं अभिषेकाय कल्पयेत् व्याकोशपंकजाकारं शुद्धमुत्तमलोहजं आ
ढपरिमाणांभःपूरयोग्यं महाबिलं हस्तदीर्घजलस्राविपार्श्वमानोपशोभितं कल्पयेदपरं स्नानपात्रं
मुक्तापरिष्कृतं यद्वा शंखनिभाकारं अग्रतो जलनालकं धूपपात्रं सरोजाभं सुवर्णादिविनिर्मितं पाद
योरपि तस्य स्यादुत्सेधश्चतुरंगुलः अनेकसुषिरं तस्य पिधानं संहतं भवेत् अथवा विकसत्पद्मसदृ
शाकारशोभितं दीपपात्रं तथा नालमध्ये कुमुदकुड्मलं वर्त्याधारैः शतेनापि युक्तमष्टाभिरेव च विंशत्या
चाष्टभिश्चैव द्वाभ्यां वा दशभिश्च वा अष्टभिर्वा यथाशक्ति कल्पयेच्छिल्पिवित्तमः तथा नैवेद्यपात्रं व
क्ष्यामि केशवाय महात्मने हैरण्यं राजतं ताम्रं कांस्यं मृन्मयमेव वा पालाशं पद्मपत्रं वा पात्रं विष्णोरति

का

प्रियं तथानीराजनक्रियापात्र्योहेमादिद्रव्यनिर्मिताः त्रितालायतविस्तीर्णावृतमध्यसरोरुहाः नववा
सप्तवापंचतिस्रस्त्वावृतिर्भवेत् वाराहे शृणुतत्वेनमेदेविप्रियपात्राणियानिमे सौवर्णंराजतंताम्रं
कांस्यंचैवतुयद्भवेत् सर्वेभ्योप्यधिकंताम्रंतदेवममरोचते इत्युपकरणलक्षणं अथवाहनाद्युपचा
रलक्षणं तत्रावाहनंमहोदधौ मूलमुच्चार्यहृदयात्सुषुम्नावर्त्मनामहः द्वारेणब्रह्मरंध्रस्यनासारंध्र
विनिर्गतं पुष्पांजलौमातृकाब्जेयोजयित्वाविनिक्षिपेत् मूर्तौपुष्पांजलिंचैतत्तदावाहनमुदीरितं अथा
सनं तत्तावत्सप्तविधं पौष्पंदारवंवास्त्रंचार्मणंकौशतैजसंशैलंचेति पौष्पंपुष्पौघरचितंकुशसू
त्रेणवेष्टितं अहिफेनादिकुसुमैर्निर्गंधैरचितंनहि यज्ञदारुसमुद्भूतमासनंमसृणंशुभं सुदर्शना
तिविस्तीर्णंदारवंतत्प्रचक्षते वास्त्रंचार्मणंचप्रसिद्धं यदासनंकुशमयंतत्तुकौशमितिस्मृतं आय
संसीसकंकांस्यंत्यक्त्वाताम्रादितैजसं शैलंरत्नमयंचारुशिलामयमपिस्मृतं पौष्पेषुतत्तद्देवस्य
प्रीतिदैःकुसुमैर्वरं दारवेचांदनंश्रेष्ठंवास्त्रेकांबलमुत्तमं चार्मणेशांबरंशस्तंतैजसेषुहिरण्मयं शैले १०७

शापंचेतिषड्विधाः तत्रचतुःषष्टिरष्टोत्तरशतंचप्रायेणदेवीविषयएवोपलभ्यंतेतेचग्रंथांतराज्ज्ञेयाः षोड
शसंख्यातुसंख्येयभेदान्नानाविधादृश्यतेतत्राश्वलायनैर्वक्ष्यमाणपरिशिष्टोक्ताएवषोडशोपचाराग्रा
ह्याः दशोपचारास्तुज्ञानमालायां अर्घ्यःपाद्यमाचमनंमधुपर्कासनानिच गंधादिपंचकंचेति उपचा
रादशोदिताः पंचोपचाराअपितत्रैव गंधपुष्पेअपिधूपदीपौनैवेद्यंपंचमस्मृतं सर्वोपचारासंभवेगं
धपुष्पमात्रेणैवपूजाकार्येतितिथितत्वेस्थितं सूर्योदयात्पूर्वंघंटादिवाद्यैर्देवंप्रबोधयेत् तदुक्तंपाद्मे प्र
बोधमज्जनेधूपेदीपनैवेद्ययोस्तथा नीराजनेचकुर्वीतघंटावाद्यंहिपूजकः तथाचद्योते विनातूर्यादि
घोषेणद्वारस्योद्घाटनंमम महापराधंजानीयाद्द्वात्रिंशदितिमेप्रियेदिति तत्रैव वैनतेयांकिताघंटासु
दर्शनयुतापिवा अत्रवैनतेयपदंतत्तद्वाहनाद्युपलक्षणं तेनशिवादेर्नंदित्रिशूलादियुताबोध्या नि
र्माल्यापसरणंसूर्योदयात्पूर्वंमुक्तंस्मृत्यंतरेदेवायतनसनिर्माल्यापसरणेरुदयात्परं द्वादशग्रामसंभू
तंपातकंतस्यमस्तके स्कांदे मध्यमानामिकामध्येपुष्पंसंगृह्यपूजयेत् अंगुष्ठतर्जन्यग्राभ्यां

१०८ सूर्येतरेभ्यः शंखेनवेतित्वचभास्करे महोदधौतु हेमत्र्योदुंबराञ्जरीतिदारुसमुद्भवं पालाशंपद्मपत्रं
वास्मृतंपाद्यादिभाजनं अशक्तावर्घ्यपात्रेणपाद्यादीनिनिवेदयेत् पाद्यादीदेवशरीरेदेयानितदुक्तं त्व
चभास्करे प्रतिमादिषुयद्योग्यंगात्रेदातुंचतत्तनौ दद्यादयोग्यंपुरतोनैवेद्यंभोजनादिकं तत्रापिपा
द्यंपादोपर्येवदद्यात् मूलश्लोकनमोमंत्रैपाद्यंपादांबुजेर्पयेदितिमहोदधावुक्तत्वात् इतिपाद्यं अ
थार्घ्यं महोदधौ अर्घ्यपात्रेक्षिपेद्दूर्वातिलदर्भाग्रसर्षपान् यवपुष्पाक्षतानांधंमूर्ध्नितेनार्घ्यमाच
रेत् यद्वारत्नकोशे कुशाक्षततिलव्रीहियवमाषप्रियंगवः सिद्धार्थकसमायुक्तस्त्वर्घ्यस्यतुविशेष
तः महोदधौ विहायशंकरंसूर्यमर्घ्येशंखःप्रशस्यते इत्यर्घ्यं अथाचमनीयंत्वचभास्करे उदकंदी
यतेयत्तुप्रसन्नंफेनवर्जितं आचमनायदेवेभ्यस्तदाचमनमुच्यते जातीलवंगकंकोलैर्मतमाचम
नीयकंकेवलंतोयमेवैतद्दद्याद्वान्यैरमिश्रितं जाजीजातीफलं तथाचमनपात्रेपिदद्याज्जातीफलंमुने १०८
इतिवचनांतरात् यद्वारत्नकोशे एलालवंगगोक्षीरंकंकोलंचचतुर्थकं आचाममितिविज्ञेयंयथा

लाभंप्रगृह्यच इदंमुखेयं दद्यादाचमनंवस्त्रेइतिमहोदधावुक्तेः तथाचतत्रैव पाद्यादिद्रव्याभावेतुतत्स्म
रन्नक्षतान्क्षिपेत् इत्याचमनीयं अथमधुपर्कः तत्रभास्करे दधिसर्पिर्जलंक्षौद्रंसितेत्येभिस्तुपंचभिः प्रो
च्यतेमधुपर्कोयंसर्वदेवौघतुष्टिदः जलंतुसर्वतःस्वल्पंसितादधिघृतंसमं सर्वेषामधिकंक्षौद्रंमधुपर्के
प्रयोजयेत् दधिक्षौद्रमितिद्वाभ्यांमधुपर्कंपरेजगुः यद्वारत्नकोकशे इक्षुर्मधुघृतंचैवपयोदधिस
हैवतु प्रस्थप्रमाणंवाग्राह्यंमधुपर्कमिहोच्यते इहकांस्यपात्रंप्रशस्तं अयंचमुखेदेयः पात्रेतुमधुप
र्कस्यदध्याज्यंचमधुक्षिपेत् मूलश्लोकसुधामंत्रैर्दद्यात्तंवदनेप्रभोरितिमहोदधावुक्तेः मधुपर्कोत्तरं
अंगत्वेनाचमनीयं इतिमधुपर्कः अथपंचामृतस्नानानि तत्रदुग्धदध्याज्यशर्करामधूनि दुग्धदध्याज्य
मधुशर्कराइतिवाक्रमइतिमहार्णवेपंचद्रव्याणि समान्येवेत्यपितत्रैवोक्तं पंचद्रव्यालाभेसंग्रहे मधु
दध्नामलाभेतुघृतस्यचनराधिप क्षीरस्नानेनचैकेनसर्वंसंपूर्णतांव्रजेत् अभ्यंगमाहमहोदधिः गं
धतैलंततोदद्यादिति ततउद्वर्तनंरत्नकोशे शालिपिष्टंचगंधांश्चपलालस्यतुभस्मकं शिलाचूर्णंतुसंप्रो

र्कं अथोद्वर्तनमाहरेदिति नरसिंहपुराणेपि यवगोधूमयोश्चूर्णैरुद्वर्त्योष्णेनवारिणा प्रक्षाल्यदेवदेवे
शंवारुणंलोकमाप्नुयात् पादपीठंतुयोभक्त्याबिल्वपत्रैर्निघर्षयेत् उष्णांबुनाचप्रक्षाल्य सर्वपापैः
प्रमुच्यते महोदधौ हरिद्राद्यैस्तमुद्वर्त्यस्नापयेदुभयंपठन् इत्युद्वर्तनं अथस्नानं मंत्रतंत्रप्रकाशे
अक्षतागंधपुष्पाणिस्नानपात्रेतथात्रयं विष्णुधर्मेपुष्पोदकेनगोविंदंतथागंधोदकेनच स्नापयित्वान
रोभक्त्यायुगंस्वर्गा[illegible]धिपोभवेत् जलेनवस्त्रपूतेनयस्नापतिकेशवं सर्वपापविनिर्मुक्तः शताब्दं
मोदतेदिवि स्नानोत्तरंवापंचामृतस्नानादीतिकेचित् प्रयोगपारिजातेव्यासः प्रतिमापट्टयंत्राणां
नित्यस्नानंनकारयेत् कारयेत्सर्वदिवसेयदावामलधारणं लेप्यादिमूर्तौस्नानेविशेषस्त्रिचभास्क
रे सद्यः स्निग्धेमृन्मयेवासर्पिःसिंदूरजेतथा श्रीचंदननिघर्षेवालेपनेप्रतिमातनौ अंतिकस्था
पितेखड्गेस्नापयेद्दर्पणेथवा कमलाकराह्निकेनृसिंहपरिचर्यायां जन्मप्रभृतियत्किंचित्सुकृतंतुस
मर्जितं नश्यतिद्वादशीदिने हरेर्निर्माल्यलंघनात् स्नानंयोहरयोदद्याद्द्वादश्यांवैष्णवोदिवा ज

रत्नभवंश्रेष्ठंअतर्वेदिभुवंकुशीयान्येवासनानिदेवतायाविहितान्येवसाधकस्यापिपोष्यभिन्नानिद्विरदंदं
तसहितानि परिमाणेतुविशेषः चतुर्विंशत्यंगुलेनदीर्घंकाष्ठासनंमतं षोडशांगुलविस्तीर्णंउछ्रायेच
तुरंगुलंषडंगुलंवाकुर्यात्सूर्वोक्तंसिद्धिदायकं षडंगुलाधिकंकुर्यान्नोछ्रितंतुकदाचन बहुदीर्घंबहु
छ्रायंतथैववहुविस्तृतं दारुभूमिसमंप्रोक्तमन्यदास्तरणंमतं अत्रभूमिसममित्यनेनतत्रजपपूजादि
निषेधउक्तस्तदुपर्यासनांतरावश्यकताचसिध्यति स्वस्योपवेशनेयदिस्थलाभावस्तदायैवपूजाकार्या दो
यद्यासितुंनसंस्थानंविद्यतेतोयमध्यतः अन्यत्रवातदास्थित्वादेवपूजांसमाचरेत् इत्यासनं अथ
पाद्यं आहामरसिंहः पादार्थमुदकंपाद्यंपाद्यंपादार्थवारिणी विष्णुपादोदकधारणपानादिविधिष्वपि
पादोदकशब्देनपाद्यस्यैवग्रहणंनस्नानीयादिजलानामितिभक्तिमीमांसातंत्रेशांडिल्यमुनिनापादोदकं
तुपाद्यमव्याप्तेरित्यधिकरणेनिर्णीतं पाद्यद्रव्याणिरत्नकोशे पद्मंचविष्णुपर्णींचदूर्वांश्यामाकमेवच
चत्वारिपाद्यद्रव्याणिलब्धंवापिसमाचरेत् केवलंतोयमेवैतदितुक्कचित् ततेजसोपात्रेणसर्वेभ्योदेयं

घंटाशब्दानेरैःकार्यःसर्ववाद्यमयीयतः श्रीमद्भागवते चंदनोशीरकर्पूरकुंकुमागरुवासितैः सलिलैःस्नाप
 येन्मंत्रैर्नित्यदाविभवेसति स्वर्णघर्मानुवाकेनमहापुरुषविद्यते पौरुषेणापिसूक्तेनसामनीराजनादिभिः रुकं
दे स्नानकालेतुदेवस्यअगरुंदहतेतुयः सप्तजन्मार्जितंपापमतिक्रम्यहरिंविशेत् आचारद्योते देवंस्नाम
ईगात्रंतुवस्त्रेणपरिमार्जयेत् तस्यजन्मार्जितस्यापिभवेत्पापस्यमार्जनं इत्यभिषेकः अथवस्त्रं नरसिं
हपुराणे वस्त्राभ्यामच्युतंभक्त्यापरिधाप्यविचित्रकं सोमलोकेरमित्वातुविष्णुलोकेमहीयते तच्चभा
स्करे रक्तंकौशेयकंदेव्याःपीतकौशेयकंहरेः रक्तकंबलकःशंभोःपरमप्रीतिसाधनः कार्पासंसर्वतोभद्रं
चित्रंसर्वसुरप्रियं नैकांतरक्तंश्रीविष्णोःशंभोर्नैकांतनीलकं नीत्यारक्तंतुयद्वस्त्रंसर्वथातन्निषिध्य
ते विचित्रेवाससिपुनर्नीलीरागोनदोषकृत् देव्याएवचतादृग्वैनान्यस्मैतुकदाचन महोदधौ पी
तंविष्णोःसितंशंभोरक्तंविघ्नार्कशक्तिषु सच्छिद्रंमलिनंजीर्णंत्यजेत्तैलादिदूषितं वितस्तिमात्रंवस्त्रमि 
तिदानहीरावल्यां वस्त्रालंकारादिनप्रत्यहमपूर्वंवस्त्रमभ्युक्षणाल्लुभ्येदपरंतुदिनेदिनइतितत्वसाग

रसंहितोक्तेः अपरंपत्रपुष्पादि निर्माल्यंनभवेद्वस्त्रस्वर्णवस्त्रस्वर्णरत्नविभूषण मितिविद्याधरीयनिबंधा
च्च वस्त्रेनिषिद्धंवाराहे नीलीरंजितवस्त्रंयोमर्त्योमह्यंनिवेदयेत् नवमंक्षालितंचैवसन्विरंरौरवेवसेत्
अस्यापवादः स्मृत्यंतरे ऊर्णायांपट्टवस्त्रेवानीलीरागोनदुष्यति इतिवस्त्रं अथयज्ञोपवीतंदानेनसुरेभ्यो
ब्राह्मणायच भवेद्विप्रश्चतुर्वेदीशुद्धधीर्नात्रसंशयः पारिजाते कृतंशास्त्रोक्तविधिनासौवर्णंदेवमानतः
त्रिवृतंग्रंथिसंयुक्तंउपवीतमितिस्मृतं बृहन्नारदीये त्रिवृतंशुक्लपीतंवापट्टसूत्रादिनिर्मितंदत्वोपवीतंरु
द्रायभवेद्वेदांतपारगः इदंयज्ञोपवीतंपुंदैवतेभ्योदेयमितितत्रैवभास्करे यज्ञोपवीतमपिप्रत्यहंनापूर्वं
वस्त्रसमत्वादितिहरनाथः अथालंकाराः तत्रभास्करे किरीटंचशिरोरत्नंकुंडलंचललाटकेइत्यादि
नापुराणादिभेदेनबहवोभेदाअलंकाराणांतत्रतत्रप्रतिपादिताः घंटाचामरकुंभादिपात्रोपकरणादिकं
प्रावरःपात्रंनपात्रंचगंडूषोगृहमेवच पर्यंकादियदन्यच्चसर्वंतदुपभूषणं शिरोगतानिचेद्दद्यात्सौ
वर्णान्येवसर्वदा ग्रैवेयैकादिकंसर्वंसौवर्णंराजतंतुवा निवेदनीयंदेवेभ्योनान्यत्तैजससंभवंशिति

रंगादिसंजातपात्रोपकरणादिकं दद्यादायसवर्जंतु भूषणंनकदाचन सर्वंताम्रमयेदद्याद्यत्किंचिद्भूष
णादिकं सर्वत्रस्वर्णवताम्रमर्घ्यपात्रेततोधिकं ताम्रेदेवाःप्रमोदंतेताम्रेदेवाःसदास्थिताः सर्वदो
षप्रतीकारंतस्मात्ताम्रंप्रयोजयेत् इत्यलंकाराः अथगंधाः तत्रसर्वदेवसाधारणगंधाष्टकंरत्नको[illegible]
मांसीमलयजंचैवकुंकुमोशीरमेवच ह्रीबेरंचैवकोष्ठंतुकर्पूरंचागरुंतथा गंधद्रव्याणिचाष्टौतुगृ
हीत्वाचविशेषतइति देवताभेदेनगंधाष्टकानिशारदायां चंदनागरुकर्पूरचोरकुंकुमरोचनं
जटामांसीमुरयुतंशा●क्तेगंधाष्टकंमतं चंदनागरुकर्पूरतमालजलकुंकुमं कुशीतकुष्ठसंयुक्तंशै
वंगंधाष्टकंमतं चंदनागरुह्रीबेरकुंकुमंकुष्टसेव्यकौ जटामांसीमुरयुतंविष्णोर्गंधाष्टकंमतं त्वचभा
स्करे सेव्यकुंकुंकुमंकुष्टह्रीबेरागरुचंदनं जटामांसीमुरश्चेतिसौरगंधाष्टकंमतं मदनरत्नेगारुडे
कस्तूरिकायाद्वौभागौचत्वारश्चंदनस्यतु कुंकुमस्यत्रयश्चैकंशशिनःस्याच्चतुःसमः शशीकर्पूरः १११
कर्पूरंचंदनंदर्पःकुंकुमंचसमांशकंसर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभं मंत्रराजानुष्टुब्विधाने

न्मप्रभृतियत्किंचित्सुकृतंतुसमर्जितं नश्यतिद्वादशीदिने त्पुण्यंबाष्कलायतुगच्छति इतिदिवास्नाननिषेधात्
रात्रौसायंसंध्योपासनानंतरंस्नानादिषोडशोपचारैः पूजाकार्यादिवातुपंचोपचारैरेवेति अत्रवैष्णवग्रहणा
द्विष्णुदीक्षावतामेवायंनियमइतिकेचित् इतिस्नानं अथाभिषेकोमहोदधौ ततःसहस्रंशंखेनशतंवाश
क्तितोपिवा गंधयुक्तोदकैरीशमभिषिंचेन्मनुंजपन् तत्रांतरे महाभिषेकंसर्वत्रशंखेनैवप्रकल्पयेत्
सर्वत्रैवप्रशस्तोब्जः शिवसूर्यार्चनंविना आदित्यपुराणे उद्धरिण्याजलंयाह्यंनाम्बुशंखंनिमज्जयेत्
शंखस्यपृष्ठसंलग्नंपयःपापकरंध्रुवं शिवार्चनचंद्रिकायां शिवंगवयशृंगेणकेशवंशंखवारिणा विघ्नार्कौ
ताम्रपात्रेणस्वर्णेनजगदंबिकां अभिषेकपात्रलक्षणमुक्तंप्राक् स्कांदे कपिलाक्षीरमादायशंखेकृत्वा
जनार्दनं यज्ञायुतसहस्रस्यप्लावयित्वालभेत्फलं तत्रताम्रमूर्तौगव्याभिषेकोननिषिद्धः तदुक्तंषड्विंश
न्मते स्नानतर्पणदानेषुताम्रेगव्यंनदुष्यति होमकार्येतथादोहेपाकेचपरिवेषणे स्कांदे वादित्रनिनदैः
स्तवैर्गीतमंगलसंस्तवैः यःस्नापयतिदेवेशंजीवन्मुक्तोभवेद्धिमः वादित्राणामभावेतुपूजाकालेचसर्वदा

बंधगर्वयोः सएवद्रव्यवचनः पुंसिभूम्निचगद्यतइतिविश्वकोशात् वराहपुराणस्थचातुर्मास्यमाहा
त्म्ये द्रवीभूतंघृतंचैवद्रवीभूतंचचंदनं नार्पयेन्ममनुष्यर्थंघनीभूतंतदर्पयेत् इतिगंधाः अथपुष्पा
णि तत्रविष्णोआचारप्रकाशेस्कांदे वासंतीमल्लिकापुष्पंतथाचैववार्षिकीतुया कुसुमंयूथिकेद्वेच
तथाचैववातिमुक्तं केतकंपंचकंचैवमाद्यंवृत्तकमेवच पुरंध्रीमंजरीपुष्पंचूतपुष्पंतथैवच पा
टलायास्तथापुष्पंनीलमिंदीवरंतथा बंधुजीवकपुष्पंचकुसुमंकुकुमस्यच जातीपुष्पाणिसर्वा
णिकुंदपुष्पंतथैवच कुमुदेश्वेतरक्तेचश्वेतरक्तेतथांबुजे एवमादीनिपुष्पाणिदातव्यानिसदाह
रेः तथामंजरीसहकारस्यकेशवोपरिनारदइच्छंतियेमहाभागागोकोटिफलभागिनः वामनपुराणे
जातीशताव्हासुमनाकुंदंचांबुपटंतथा बाणंचचंपकाशोकंकरवीरंचयूथिका पारिभद्रंपाटला
चबकुलंगिरिशालिनी तिलकंजासुवनजंपीतकंतगरंतथा एतानिसुप्रशस्तानिकुसुमान्यच्युता ११२
र्चने सुरभीणितथान्यानिवर्जयित्वातुकेतकीं अत्रविहितप्रतिषिद्धत्वात्केतक्याविकल्पएवं

तिकेचित् अन्येतुनिषेधेकेतकपदंधत्तूरपरंवनकेतकपरंवेत्याहुः शतान्हाअशोकः अंबुपटःकर्णिकारः
जासुवनजंजपागिरिशालिनीश्वेतकुटजायूथिकाजुयी विष्णुरहस्ये मल्लिकांतुदिवारात्रौनक्तंसंपाकं
यूथिके नघावर्तंचार्धरात्रेमालतीप्रातरेवच इतराणिचपुष्पाणिदिवाभागवतर्पयेत् मल्लिकावेल
मोगरा जटमल्लग्रंथे येषांत्वसंतिपुष्पाणिप्रशस्तान्यर्चनेहरे पल्लवाअपितेषांस्युःशस्ताअर्चावि
धौहरेः अथपत्राणि अपामार्गस्यप्रथमंभृंगराजमतःपरं तस्माच्चखादिरंश्रेष्ठंशमीपत्रमतःपरं
दूर्वापत्रंतथाश्रेष्ठंततोपिकुशपात्रकं तस्माद्दमनकंश्रेष्ठंततोबिल्वपत्रादपिहरेस्तुलसी पत्रमुत्तमं
एतेषांतुयथालाभपत्रैश्चैवार्चयेद्धरिं ससर्वपापनिर्मुक्तोविष्णुलोकेमहीयते तथाबिल्वपत्रैररवं
डैश्चसकृद्देवंप्रपूज्यवै सर्वपापविनिर्मुक्तोममलोकेसतिष्ठति विष्णुरहस्येच सकृदभ्यर्च्यगोविंदं
बिल्वपत्रेणमानवः मुक्तिभागीनिरातंकः कृष्णस्यानुचरोभवेत् पाद्मे तावद्गर्जंतिपुष्पाणितथामु
क्तामयानिच यावन्नप्राप्यतेपुण्यातुलसीविष्णुवल्लभा स्कांदे मणिकांचनपुष्पाणितथामुक्तामया

निच तुलसीदलपत्रस्य कलांनार्हंतिषोडशीं पाद्मे तुलसींप्राप्ययोनित्यंनकरोतिमयार्चनं तस्याहंप्र
तिगृण्हातिनपूजांशतवार्षिकीं तथा तुलसीदलजामालामेकादश्यांविशेषतः मुच्यतेसर्वपापेभ्योयद्य
पिब्रह्महाभवेत् तन्मूलमृत्तिकांचांगेकृत्वास्नातिदिनेदिने दशाश्वमेधावभृथस्नानजंलभतेफलं
भविष्यत्पुराणे अर्कः कर्णिकारस्तुकिंकिरातोहरेस्तथा किंकिरातःपीताम्लकः विहितप्रतिषिद्ध
मित्यर्थः अथनिषिद्धानिज्ञानमालायां कलिकाभिस्तथानेज्यंविनाचंपकपंकजैः शुष्कैर्नपूजये
द्विष्णुंपत्रैःपुष्पैःफलैरपिविष्णुधर्मोत्तरे नगृहेकरवीरोत्थैःकुसुमैरर्चयेद्धरिं पतितैर्मुकुलैर्म्लानै
श्वासैर्वाजंतुदूषिभिः आघ्रातैरंगसंस्पृष्टैर्नूषितैश्चैवनार्चयेत् अत्रगृहेऽकरवीरोत्थैरित्यस्यारो
पितवशात्गृहजातैरित्यर्थः बंधूककरवीरेतुनगृहेरोपयेत्क्वचिदितिवामनोक्त्यैकवाक्यत्वादिति
आचारसारेतुयथाश्रुतमेवयुक्तमित्युक्तं तथा अन्यायतनजातानिकटकानितथैवच रक्तान्य 
कालजातानिचैत्यवृक्षोद्भवानिच श्मशानजातपुष्पाणिनैवदेयानिकर्हिचित् तथा॥ करानीतं

शांतिकेपौष्टिकेनित्येगंधस्याद्यक्षकर्दमः त्रिपलंचंदनंप्रोक्तंकुंकुमंतत्समंस्मृतं तदर्धंकर्पूरंज्ञेयं
घनसारश्चतत्समः पलेनैकेनकस्तूरीमलेनाक्षघक्षकर्दमः यथालाभानिमान्विद्वान्कल्पयेत्संख्य
यानया एकंकर्तुमशक्तश्चेदेकैकेनापिपूजयेत् चंद्रिकायांपाद्मे गंधेष्यश्चंदनंश्रेष्ठंचंदनाद
गुरुर्वरः कृष्णागरुःस्ततःश्रेष्ठःकुंकुमंतुततोवरमिति आचारसारेगारुडेयोददातिहरेर्नित्यंतुलसी
काष्ठचंदनं युगानिवसते स्वर्गेअनंतानिनरोत्तमः सर्वेषामपिदेवानांतुलसीकाष्ठचंदनं पि
तृणांचविशेषेणसदाभीष्टंहरेर्यथा तुलसीदललग्नेनचंदनेनजनार्दनं विलेपयतियोनित्यंलभ
तेचिंतितंफलं गंधपात्रमुक्तंस्कंदपुराणे विलेपयतिदेवेशंशंखेकृत्वातुचंदनं परंगत्वापरांप्री
तिंकरोतिशतवार्षिकी शंखेशंखपात्रेशंखपात्रस्थितंगंधंमंत्रैर्दद्यात्कनिष्ठयेतिपादार्थादर्शोक्ते
ताम्रपात्रनिषेधःसंग्रहे हस्तधृतानिपुष्पाणिताम्रपात्रेचचंदनं गंधोदकंचर्मपात्रेनिषिद्धंसर्व
कर्मसु अत्रगंधान्समर्पयामीतिबहुवचनांताःप्रयोगःकर्तव्यः गंधोगंधकआमोदेदेहलेशेसं

नेनाक्षतनिषेधोवतरति अथशिवेविहितपुष्पाणि आचारप्रकाशे अर्कपुष्पेतथैकस्मिंछिवायविनि
वेदिते दशदत्वासुवर्णस्ययत्फलंतदवाप्नुयात् यत्फलंतदवाप्नुयात् अर्कपुष्पसहस्रेभ्यः करविरंवि
शिष्यते: करवीरसहस्रेशोबिल्वपत्रंविशिष्यते बिल्वपत्रसहस्रेभ्योद्रोणपुष्पंविशिष्यते द्रोणपुष्प
सहस्रेभ्यो:अपामार्गंविशिष्यते अपामार्गसहस्रेभ्यः कुशपुष्पंविशिष्यते कुशपुष्पसहस्रेभ्यःशमीपु
ष्पंविशिष्यते तथा पद्मपुष्पसहस्रेभ्योबकपुष्पंविशिष्यते बकपुष्पसहस्रेभ्यएकंधत्तूरकंवरं
बकोबकुलः तथा चंपकोशीरतगरंतथावैनागकेसरं पुन्नागंकिंकरातंचद्रोणपुष्पंतथाशुभं शि
शपोदुंबरश्चैवजपामल्लीतथैवच मल्लीवेलमोगरा पुष्पाणियज्ञवृक्षस्यतथाबिल्वंप्रियंशुभे कुंकु
मस्यचपुष्पाणितथावैकंकतस्यच नीलंचकुमुदंचैवतथारक्तोत्पलानिच सुरभीणिचसर्वाणिस्थल
जान्योदकानिच गृण्हामिशिरसादेवियोमेभक्त्यानिवेदयेत् नीलोत्पलसहस्रयोमेमालांमयच्छि ११४
शिवायविधिवद्भक्त्यानस्यपुण्यफलंशृणु कल्पकोटिसहस्राणिकल्पकोटिशतानिच वसेच्छिवपु

रिश्रीमान्शिवतुल्यपराक्रमः सुरभीणिचसर्वाणीति सर्वपदंनिषिद्धेतरविषयंअन्यनिषेधानर्थक्या
पातात् अत्रविशेषोलैंगे मणिमुक्ताप्रवालैस्तुरत्नैरप्यर्चनंकृतं नगृह्णामिविनादेविबिल्वपत्रैर्वरा
नने तत्वसागरसंहितायां विष्णोर्यानीहचोक्तानिपुष्पाण्यपिचपत्रिकाः केतकीपुष्पमेकंतुविनाता
न्यखिलान्यपि शस्तान्येवसुरश्रेष्ठशंकराराधनेपिहि विहितप्रतिषिद्धाधिकारेभविष्यत्पुराणे कुं
दंपलाशकुसुमंदूर्वांचशिवपूजने तिलकंमालतीबाणस्तुलसीभृंगराजकं तमालंशिवदुर्गार्थंनिषि
द्धंविहितंभवेत् बाणः करसलाइतिप्रसिद्धः अगस्तिरतिमुक्तश्चातिरीटंचहरेहरौ अथनिषिद्धानि
आदित्यपुराणे शिवेकुंदंमदंतींचयूथींबंधूककेतकं जपांरक्तांत्रिसंध्येद्वेसिंदूरेकुटजानिच माल
तींघुसृणेरक्तहयारिंवर्बरींत्यजेत् यूथीजुयी बंधूकदुपारी त्रिसंध्येतिसेंगी रक्तहयारिः आरक्त
करवीरः उग्रगंधमगंधंचकृमिकेशादिदूषितं अशुद्धपात्रेपाण्यंगवासोभिःकुत्सितात्मभिः आ
नीतंनार्पयेच्छंभोःप्रमादादपिदोषकृत् कलिकाभिस्तथान्येज्यंविनाचंपकपंकजैरिति अत्रकुं

कुंदनिषेधः माघेतरविषयः माघेच कुंद कुसुमैरिति तत्र विशेषतो विधानात् इत्याचारसारे वस्तुतस्तु
पूर्वोक्त भविष्यद्वचनात् माघातिरिक्ते विहित प्रतिषिद्धः कुंदः माघे विहित एव केतकनिषेधस्तु रात्रे
रन्यत्र ज्ञेयः तदुक्तं भविष्यत्पुराणे केतकानि कदंबानि रात्रौ देयानि शंकरे दिवा शेषाणि देया
नि दिवा रात्रौ च मल्लिकेति तथा शिवधर्मेषु कपित्थं लकुचं तडी शिरीषं च बिभीतकं धातकी निं
बपत्रं च गृंजनं च विसर्जयेत् भविष्यत्पुराणे धत्तूरः शिंशपा पुष्पं मंदारश्चापराजिता सूर्यवि
ष्णोर्न विहितं दमनं शिवसूर्ययोः अत्र महेशादयः सर्वे पुष्पनिषेधा वसंतेतर विषया वसंते तत्र
तोषाते सर्वैः पुष्पैर्मनोरमैः पूजिते तु महादेवे अश्वमेधफलं लभेत् इति तत्र सर्वेषां विधानादित्याकु
वस्तुतो निषेधा नित्यपूजाविषयाः कामनापुरस्कृतेन वचनेन कथं वाध्या इति निषेधस्य वसंतेत
र विषयत्वमयुक्तं अथ गणपतौ विहित पुष्पाणि पारिजाते विघ्नेशमर्चयेद्रक्तैर्वस्त्रभूषणमाल्य ११५
कैः पत्रपुष्पफलादीनि शिववि॰ष्णुसमर्चने च शस्तानि तानि विघ्नेश्वरं प्रति आदित्यपुराणे द्विर

परानीतंआनीतंचार्कपत्रके एरंडपत्रेवानीतंतत्पुष्पंसकलंत्यजेत् करोवामःपटोधोवस्त्रंदेवोप
रिधृतंयच्चवामहस्तेधृतंचयत् अधोवस्त्रधृतंयच्चतत्पुष्पंपरिवर्जयेत् इतिपंचायतनसारात्
तथा नार्कंनोन्मत्तकंकिंचितथैवगिरिकर्णिकां नकंठकारिकापुष्पमच्युतायनिवेदयेत्
कुटजंशाल्मलीपुष्पंशिरीषंचजनार्दने समर्पितंभयंशोकंनिःस्वांतंचप्रयच्छति तथा क्र
कचस्यचपुष्पाणितथाधत्तूरकस्यच कृष्णंचकुटजंचार्कंनचदेयंजनार्दने क्रकचःकर
वीरःमहोदधौअक्षतानर्कधत्तूरौविष्णोर्नैवार्पयेत्सुधीः अक्षतानामयवाः अक्षतास्तुयवाः
प्रोक्ताइतिपदार्थादर्शेउक्तत्वात् अयंअक्षतानिषेधः शालग्रामशिलायामेवविष्णुपूजने
शालग्रामशिलामेवनाक्षतैरर्चयेद्द्विजइतिचंद्रिकाधृतवचनेनोपसंहारात् अयमपिचनिषेधः
पंचायतनातिरिक्तइतिहेमाद्रिः महोदधिव्याख्यायांतु अक्षतांस्तंडुलादीन्तेषांतिलकोपर्यर्पणे
नदोषइत्युक्तं शालग्राममणौयंत्रेनित्यपूजांसमाचरेदितिमहोदध्युक्तत्वाच्छालग्रामेदेवतांतरपूज

लीकांचनारजं निषिद्धविहितंसूर्येतगरकंटकारिका अगस्त्यंकिंशुकंतद्वत्पूजायांभास्करस्यतु तुलसीका
लतुलसीतथारक्तंचचंदनं केतकीपुष्पपत्रंचसद्यस्तुष्टिकरंरवेः कुशेशयंकमलं बकंबकुलंकिंशुकःपला
शःपुनागःउंडीण नेपालीकानेवालीकुब्जकंआघाडा वासंतीचमेलीशतपत्रिका शेवतीविचकितोमुकु
रः आम्रातकोनामआम्रसदृशःगौडदेशेशूर्पालकक्षेत्रेच अंबडाइतिभाषयाप्रसिद्धः नागकेसरं ना
गचाफा कैरवंकुमुदं सिहास्यकंआटरूपः पाटलापाडळकुंकुमंकरडीति कर्णिकारःलघुवाहवाति
लकःतिलकवृक्षः बाणःकृष्णकुरंटकःकदंबःकळंबः कांचनारः अपटाआचारप्रकाशे चंपकोरात
कः कुंदोवाणोवर्बरमल्लिका अशोकस्तिलकोरोध्रःकुरुंटश्चाटरूषकः अटरूषकःअडोळसाबर्बरम
ल्लिकाबर्वरीतिप्रसिद्धा पूजार्थंभास्करस्येष्टानीत्यनुषंगः अथनिषिद्धानितत्रैव कृष्णालोन्मतकंकां
चीतथाचगिरिकर्णिका नकंटकारिका डोलि॰ तथा धत्तूरंशिंशपापुष्पंमंदारश्चापराजिता सूर्य
विष्णोर्नविहितंदमनंशिवसूर्ययोः अथदेव्यांविहितपुष्पाणिदेवीपुराणे शृणुश[illegible]क्रमवक्ष्यामिपुष्पा

ध्यायंसमासतः ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुंकुमैः सितरक्तैश्च कुसुमैस्तथापद्मैश्चपांडुरैः किंशु
केस्तरगैश्चवकिंकिरातैःसचंपकैः बकुलैश्चैवमंदारैः कुंदपुष्पैस्तिरीटकैः करवीरार्कपुष्पैश्चशोंशिपे
श्चापराजितैः सितैरक्तैस्तथापीतैःकृष्णैश्चैवचतुर्विधैः धत्तूरकातिमुक्तैश्चबंधूकागस्तिसंभवैः म
दंतैसिंधुवारैश्चसुरभीमरुबकैस्तथा लताभिर्ब्रह्मवृक्षस्यदूर्वांकुरैश्चकोमलैः मंजरीभिःकुशानांच
बिल्वपत्रैःसुशोभनैः किंकिरातःपीतपुष्पकास्व्योवढरइतिप्रसिद्धः मंदारोनिंबःश्वेतार्कोवातिरीट
कोलोध्रः अतिमुक्तःचमेलीसिंधुवारःनिर्गुंडी नदूर्वयायजेदुर्गामितिज्ञानमालोक्तेर्विहितप्रतिषिद्धदू
र्वा महोदधिटीकायांतुशक्तौदूर्वानिषिद्धामहालक्ष्म्यास्तुदूर्वाप्रशस्तेत्युक्तेअर्कमंदारयोरपिविहितप्रति
षिद्धत्वंदेवीनामर्कमंदारोसूर्यस्यतगरंतथेतिपराशरेणनिषिद्धेषुपरिगणनाद्यद्वार्कमंदारनिषेधोदुर्गे
तरदेवीविषयःदुर्गापूजाधिकारेतयोपाठात् कदंबैरर्चयेद्दात्रौमल्लिकोभयतःशुभा दिवाशेषाणिपुष्पा
णियथालाभेनयोजयेत् मल्लिकामुत्पलंपुष्पंशमींपुनागपंचकं अशोकंकर्णिकारंचद्रोणपुष्पंविशे

षतः पारिजाते यानिपुष्पाणिचोक्तानिशंकरस्यार्चनेपुरा तानिगौर्याःप्रशस्तानित्वपामार्गंविशेषतः शि
वार्चनेनिषिद्धानिपत्रपुष्पफलानिच तानिदेव्याःप्रशस्तानि अनुक्तानिविशेषतः नित्यंगौर्याःप्रशस्ता
निरक्तपुष्पाणिसर्वदा शुक्लान्यपिचसर्वाणिगंधवंतिस्मृतानिवै भविष्यत्पुराणे पाटलाचशमीप
त्रंदुर्गायास्तुहिताहितं जयःकाशःश्वेतपद्मःश्वेतमंदारकंतथा दुर्गायाश्चैवविष्णोश्चनिषिद्धंबि
हितंभवेत् जयोजयंती अथपुष्पावचयः तत्रहारीतः समित्पुष्पकुशादीनिब्राह्मणःस्वयमाहरेत्
शूद्रानीतैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः अत्रशूद्रानीतैःक्रयक्रीतैरितिसामानाधिकरण्येनसंबंधः
अन्यथावेतनदानेनक्रयत्वाविशेषादारामादेःस्वयमपिपुष्पाहरणेदोषापत्तेःकुशेष्वप्येवं अतोद्विजे
भ्यःकुशादिक्रयेनदोषःस्वयमितिशक्तपरं तेनैवनियमसिद्धौशूद्रानीतनिषेधानुपपत्तेःतेनस्वाशक्तौ
शिष्यपुत्राद्याहरणेप्यदोषः पारिजाते अस्वामिकवनानीतंस्वीकृतंविक्रयेणच पुष्पंतद्देवपूजायांनिष्फ ११७
लंयाचितंतुयत् अस्वामिकवननियमोद्विजेतरपरः द्विजस्तुणेधःपुष्पाणिसर्वतःस्वयदाहरेदितियाज्ञ

दोह्यातकः शिशुजीवायनपराशिवा सुधायोगानदुद्भूताद्दूर्वागणपतिप्रिया दूर्वासप्तपत्रयुतावाऽ
च्छिन्नाग्राग्राह्येतिरत्नमालायां साचप्रादेशमात्राषडंगुलावेतिजयसिंहकल्पद्रुमे अथनिषिद्धानिआ
चारप्रकाशे करणीगणपतेस्त्याज्यायतः करिमुखोहितः तच्चभास्करे नतुलस्यागणाधीशमेकविंश
तिकंविना एकविंशतिपत्रांतुर्गतत्वातुलस्यास्तावत्तामर्पणेनतुलसीनिषेधः पार्थक्येनार्पयेदित्यर्थः
अथसूर्येविहितपुष्पाणिपुष्पमालायां जातीकुंदशमीकुशेशयकुशाशोकंकिंशुकंपुंनागंकरवीरचं
पकजपानेपालिकाकुब्जकंवासंतीशतपत्रिकाविचकिलंमंदारमर्कोद्भवंपीताम्रातकनागकेसरभि
दंपुष्पंरवेःशस्यते लोध्रंकैरवमुत्पलंचसकलंसिंहास्यकंपाटलायूथीकुंकुमकर्णिकारतिलकंबाणं
कदंबंजपा काशंकेसरकेतकीमरुबकंद्रोणंत्रिसंध्याह्वयं पुष्पंशस्तमिदंचपूजनविधौसर्वंसहस्रा
र्चिषः तमालतुलसीबिल्वशमीभृंगारजोद्भवंकेतकीदूर्वयोर्धाय्याः पत्रंदिनकरप्रियं ज्ञानमालायांतु
बिल्वपत्रैर्दिवाकरंनार्चयेदितिनिषेधउक्तोतोविहितप्रतिषिद्धत्वाद्विकल्पः पुष्पशस्तंभृंगराजशात्म

न्वंतिते छिंदंतिहरेःशिरः विष्णुधर्मोत्तरेतु रविवारंविनादूर्वांतुलसींद्वादशींविना जीवितस्याविनाशायप्रविचिन्व
तधर्मविदित्युक्तं अयंनिषेधोनकृष्णतुलस्याः८ तुलसीकोलतुलसीतथारक्तंचचंदनं केतकीपुष्पपत्रंचजीर
कंकृष्णजीरकमितिवदित्याचारसारे रुद्रयामले देवार्थंतुलसीछेदोहोमार्थंसमिधस्तथा इंदुक्षयेनदुष्येत
गवार्थेतृणस्यच बिल्वग्रहणेमंत्रः अमृतोद्भवश्रीवृक्षमहादेवप्रियःसदा गृह्णामितवपत्राणिशिवपूजा
र्थमादरात् अत्रनिषिद्धदिनानिलैंगे अमारिक्तासुसंक्रात्यामष्टम्यामिंदुवासरे बिल्वपत्रंनचछिंद्या
छिंद्याच्चेन्नरकंव्रजेत् पारिजाते पत्रेणैतत्समाद्येपुष्पंवैसंचितःपुरा अंतेचप्रक्षिपेत्पत्रंपुष्परक्षाकरंभीत
पुष्पंवस्त्रेणबध्नीयाच्छिरसानवेद्बुधः नयेत्पत्रपटेनैवपाणिनालंव्यसंयतः इतिपुष्पाद्यवचयः अथपु
ष्पार्पणविधिः तत्रपुष्पदानंकराभ्यामितिकेचित् तन्न अत्रदक्षिणकरनियमात् पुष्पांजलावंजलिवि
धेश्चयत्तु यजन्कराभ्यांयज्ञेशमितियच्चतावेवकेवलोभ्लाघ्योनतत्पूजाकरोकराविततत्कथंविलक्ष्यकर ११८
द्वयव्यापारानुवादइतिटोडरानंदः पुष्पांजलिपुरमित्याचारसारः मध्यमानामिकांगुष्ठैःपुष्पार्पणंमध्य

मानामिकांगुष्ठैः पुष्पं संगृह्य पूजयेदिति चिंतामणिधृतवचनात् तत्र च भास्करे पात्रं वा यदि वा पुष्पं फलं नेष्ट
मधोमुखं पुष्पांजलिविधिं हित्वा यथोत्पन्नं तथार्पणं दूर्वास्वाभिमुखाग्रा स्युर्बिल्वपत्रं त्वधःकृतं पुष्पां
जलौ नायं निषेधः अधःकृतमनुत्तानं दूर्वा मुखसंमुखाग्रतो ऽक्ष्या बिल्वे तथा नेति सिध्यति प्रतिष्ठासा
रदीपिकायां पूजायां पुष्पमूर्ध्वमुखं फलं संमुखं तुलस्यादिपत्रमात्माभिमुखाग्रं न्युब्जं समर्पणीयं बिल्व
पत्रं तु देवाभिमुखाग्रं न्युब्जं समर्पणीयं तथा च स्कांदवाराहयोः अच्छिद्रैश्च नवैः शुद्धैः संवृतैः परितो
न्वितैः वामपत्रे स्थितो ब्रह्मा पद्मनाभश्च दक्षिणे मध्यपत्रे स्थितो रुद्रः सांवः संसारमोचकः पृष्ठभागे
स्थिता यक्षास्त्वभक्तानां निषेधकाः इंद्रादयो लोकपालाः वृंताग्रे परिकीर्तिताः पूर्वभागे मृतं न्यस्तं देवैर्ब्र
ह्मादिभिः पुरा अतो वै पूर्वभागेन पूजयेद्गिरिजापतिं वाराहे पुष्पं चाधोमुखं नेष्टं तुलसीबिल्ववर्जितं
तस्माच्चाधोमुखं देयं बिल्वपत्रं च शंकरे स्कांदेपि पुष्पमूर्ध्वमधं योज्यं पत्रं योज्यं त्वधोमुखं फलं तु सं
मुखं योज्यं यथोत्पन्नं तथार्पयेदिति शिवरहस्ये तु बिल्वे पत्रस मुत्तानमुदगग्रं जलान्वितं अर्पयेत्

रम्याभक्त्याशिवायपरमात्मने अत्रनिर्गलितोर्थः पुष्पांजलिंविनापुष्पमूर्ध्वमुखंसर्वसंमतं तुलसीपत्रंस्वा
भिमुखाग्रंन्युब्जमेवबिल्वपत्रंदेवाभिमुखाग्रंन्युब्जंउतानमुदग्ग्रंवेति इतरपत्राणामप्यूर्ध्वमुखाधोमु
खत्वयोर्विकल्पः फलंदेवाभिमुखाग्रं धर्माब्धिसारेतु बिल्वपत्रंस्वाभिमुखाग्रंन्युब्जमर्पयेत्‌इत्युक्तं
शारदायां लक्षपूजासुसर्वासुपुष्पमेकैकमर्पयेत्‌ समुदायेनचेत्पूजालक्षपुष्पार्पणंनतत्‌ लक्षपुष्पा
देपुष्पाद्यर्पणंयथेष्टमितिपंचायतनसारः इतिपुष्पार्पणविधिः अथपुष्पपर्युषितविचारः निर्णयसिं
धौभविष्येप्रहरंतिष्ठतेजातीकरवीरमहर्निशं जातीप्रहरात्‌करवीरमहोरात्रात्पश्चाद्देवादुत्तारणीय
मित्यर्थइतिपुरुषार्थचिंतामणौ आचारसारेतु अवचयोत्तरंजातीपुष्पंप्रहरपर्यंतंपूजार्हमित्युक्तं
तुलस्यांबिल्वपत्रेषुसर्वेषुजलजेषुच नपर्युषितदोषोस्तिमालाकारगृहेषुच पारिजाते ऽलंपर्युषितं
त्याज्यंपत्राणिकुसुमानिच तुलस्यगस्त्यबिल्वानिगांगंवारिनदुष्यति अत्रविशेषः स्कांदे पालाशंदिन ११९
मेकंचचंपकंचदिनत्रयं पंचाहंबिल्वपत्रंचदशाहंतुलसीदलं अपर्युषितमित्यनुषंगः वोपदेवस्त्व

वल्क्योक्तेः वानस्पत्ये फले दार्वग्न्यर्थं च गोतृणं देवतार्थं च मुंकुमं मस्तेयं मनुरब्रवीदिति मभूक्तेश्च एतन्नित्यपू
जापरं पारक्यारामसंजातैः कुसुमैरर्चयेत्सुरान् तेन पापेन लिप्येयं यदेतदनृतं भवेदिति नारदीयादिति पंचाय
तनसारः हारीतः स्नानं कृत्वा तु ये केचित्पुष्पं चिन्वंति मानवाः देवतास्तं न गृह्णाति भस्मी भवति काष्ठवत्
तन्मध्यान्हस्नानपरं अस्नात्वा तुलसीं त्वा देवतापितृकर्मणि तत्सर्वं निष्फलं यातिपंचगव्येन शुध्यते ति पा
द्मोक्तेरिति चंद्रिकामदनरत्नयोः अत्र तुलसीपदं पुष्पमात्रंपरं शिष्टाचारानुरोधादिति रुद्रधरः पारि
जाते प्रक्षाल्य पादौ पाणी च आचम्य च कृतांजलिः प्रादपाभिमुखो भूत्वा प्रणवादिनमोंतकं विसृज्य पु
ष्पमेकं तु वाचावरुणमुच्चरेत् व्योमाय च पृथिव्यै च द्विद्वित्रिपुष्पं यथाक्रमं पूर्वं पूर्वमुखो भूत्वा पुष्पं संचिनुयाच्छु
भं तुलसीग्रहणमंत्रः तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया केशवार्थं विचिन्वामि वरदा भव शोभने त्वदंग
संभवैः पत्रैः पूजयामि यथा हरिं तथा कुरु विचित्रांगि कलौ मलविनाशिनि तुलसीग्रहणे निषेधकालः निर्णयसिं
धौ स्मृतिसारे वैधृतौ च व्यतीपाते भौमभार्गवभानुषु पर्वद्वये च संक्रांतौ द्वादश्यां सूतकद्वये तुलसीं ये विचि

गतं महोदधौ मलिनंतनुसंस्पृष्टंआघ्रातंस्वविकाशितं शुष्कंपर्युषितंकृष्णंभूमिगंनार्पयेत्सुमं यथोक्तपुष्प
१२० पत्राद्यलाभेपारिजाते यद्वापर्युषितैश्चापिपुष्पाद्यैरविकारिभिः गंधोदकेनचास्त्रेणत्रिःप्रोक्ष्यैवप्रपूजये
त् अस्त्रंकइति शिवरहस्ये शुष्कैपर्युषितैःपत्रैरपिबिल्वस्यनारद पुजयेद्गिरिजानाथंअलाभे
रत्नतोनरः सुवर्णबिल्वपत्रंचदलंचरजतंतथा नहिपर्युषितंयस्माच्छुध्यमेवस्वयंततः चंडिकायां
भविष्येतुलसीबिल्वनिर्गुंडीजं[redacted]बासमलकंतथा पंचबिल्वमितिप्रोक्तमर्चयेदिंदुशेखरं मा
लायांपर्युषितत्वंनास्तितदाह अन्यशेषंपर्युषितंवर्जयेद्यज्ञकर्मणि ग्रथितानिचपुष्पाणिनैवपर्युषि
तानिवै स्कांदे अर्पितान्यपिबिल्वानिप्रक्षाल्यापिपुनःपुनः शंकरायार्पणीयानिनवानियदिक्वचि
त् इतिपुष्पपर्युषितविचारः इतिपुष्पाणि अथधूपः तृचभास्करे नासाक्षिरंध्रसुखदःसुगंधोतिमनो
हरः दह्यमानस्यकाष्ठस्यपवित्रस्येतरस्यवा परागस्याभवाधूपोनिस्तापोयस्यजायते सधूपइतिवि १२०
ज्ञेयोदेवानांप्रीतिदायकः भविष्ये अगरुंचंदनंमुस्तासिह्लाकंदृषणंतथा सममोगंतुकर्तव्यंधूपोय

ममृताह्वयः शिह्लकंशिलारसइतिप्रसिद्धः दूषणंकस्तूरीतथा षड्भागकुष्ठंद्विगुणोगुडश्चलाक्षात्त्रयंपंच
नखस्यभागाः हरीतकीसर्जरसःसमांसीभागैकमेकंत्रिलवंशिलाजं घनस्यचत्वारिपुरस्यचैको धूपो
दशांगःकथितोमुनीद्रैः सर्जरसःराळमांसीजटामांसी घनःकर्पूरः पुरःगुग्गुलुः बृहन्नारदीये शंकर
स्याथवाविष्णोर्घृतयुक्तंचगुग्गुलं दद्यात्भक्त्यानरोयस्तुसर्वपापैःप्रमुच्यते नारसिंहे कृष्णागरुस
मुत्थेनधूपेनश्रीधरालयं धूपयेद्वैष्णवोयस्तुसमुक्तोनरकार्णवात् महोदधौ धूपयेद्दक्षहस्तेन
देवतानाभिदेशतः पादाभिमुखेनधूपःप्रदर्शनीयः सचदेवस्यपुरतोवामतोवास्थापनीयइतित्रच
भास्करे विधानपारिजाते वनस्पतीतिमंत्रेणदेवपादौचधूपयेत् धूपयेद्व्यजनेनैवनकरेणनवाससा
इतिधूपः अथदीपः तत्रभास्करे पद्मसूत्रभवाद्दर्भगर्भसूत्रभवातथा शाणजाबादरावापिफलकोशो
द्भवातथा वर्तिकादीपकृत्येषुसदापंचविधास्मृता दीपवृक्षास्तुकर्तव्यास्तैजसावापिकाष्ठजाः वृक्षेषु
दीपादातव्यानतुभूमौकदाचन दक्षिणावर्तवर्तिस्तुदीपउत्तमईरितः वृक्षेण रहितोदीपोमध्यमःप

रिकीर्तितः विहीनः पात्रतैलाभ्यां अधमः परिकीर्तितः दीपवृक्षाः ठाणवयी समयीति भाषया प्रसिद्धाः महे
रध्रौ दीपमुद्रा दर्शनं च तद्यानं नेत्रदेशतः भूयः पक्षेतु वर्तीनां विषमा वर्तिका मता धूपदीपो दक्षिणत
स्तैलदीपस्तु वामतः सितवर्तियुतो दक्षे वामांगे रक्तवर्तिकः वर्तीनां बहुत्वपक्षे विषमाख्याद्याः
सितवर्तियुतस्तैलदीपोपि दक्षिणतः रक्तवर्ति घृतदीपोपि वामत इत्यर्थः आचारप्रकाशे घृतेन
वाथतैलेन दीपं प्रज्वालयेन्नरः विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु विहाय सकलं पापं स
हस्रादित्यसंनिभः ज्योतिष्मता विमानेन विष्णुलोके महीयते भविष्योत्तरे प्रज्वाल्य देवदेव
स्य कर्पूरेण तु दीपकं अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् दीपे शलाकां प्रज्वाल्य तेन दीप
प्रज्वालनं कार्यं न तु साक्षाद्दीपेन दीपं प्रज्वाल्य दरिद्री व्याधिमान्भवेदिति लैंगे दोषस्योक्तेः शाक
लकारिकायां दक्षिणाभिमुखं दीपं स्थापयेन्न कदाचन प्रत्यङ्मुखं तथा नैव दोषः स्यादेकदीप
के दीपस्याभिमुखो दीपः सुखायुःश्रीधनप्रदः गृहे चैवापि देवे च प्राङ्मुखो वाप्युदङ्मुखः संग्र

१२१

न्यथा आह बिल्वापामार्गजातितुलसीशमिशताकेतकीभृंगदूर्वामंदांभोजाहिदर्भामुनितिलतगरब्रह्मक
ल्हारमल्ली चंपाश्वारातिकुंभीदमनमरुबकाबिल्वतोह्यानिशस्त्रात्रिंशत् ३० न्ये३ का१ र्य६ री६ शो११ द
धि४ निधि९ वसु८ भू१ भू१ यमा२ भूयएवं अस्यार्थः शताशतावरी मंदः मंदारः अहिर्नागचंपकः मुनि
रगस्त्यः अश्वारातिः करवीरः कुंभीपाटला बिल्वमारभ्याहिपर्यंतंगणयित्वादर्भमारभ्याः पुनस्त्रिश
दादिगणयेदिति स्मृतिसारावल्यां कुशापुष्पस्यरजतसुवर्णकृतयोरपि नपर्युषितदोस्तितीर्थतोय
स्यचैवहि विष्णुधर्मोत्तरे समित्पुष्पकुशादीनिवहतोनाभिवादयेत् तत्धारीचैवनान्यान्हिनिर्माल्यं
तद्भवेतयोः आपस्तंबोपि समित्पुष्पकुशाग्र्यंबुमृदन्नाक्षपाणिकं जपंहोमंचकुर्वाणंनाभिवाद्येतवैद्वि
जं शंखः नोदकुंभहस्तोभिवादयेन्नभिक्षांचरन्नपुष्पाज्यहस्तोनाशुचिर्नजपन्नदेवपितृकार्यंकुर्वन्नश
यानइति आचाररत्नेतु सर्वेष्वापिनमस्कार्याः सर्वावस्थासुचैवहीति आचारप्रकाशे देवोपरिधृतं
यच्चवामहस्तेचयत्धृतं अधोवस्त्रधृतंयच्चजलेंतःक्षालितंचयत् देवतास्तन्नगृण्हंतिपुष्पंनिर्माल्यतां

मानसंप्रवरंस्मृतं अत्रपरमान्नप्रियःसूर्योगणेशोलड्डुकप्रियइत्यादितत्तद्देवताप्रियपदार्थानामावश्यक
१२२ तार्थमेषोक्तिर्नेतरपरिसंख्या स्मृतिरत्नावल्यां नैवेद्यस्यत्वलाभेतुफलान्यपिनिवेदयेत् पारिजाते शि
वपूजाविधौ परमान्नंहरिद्रान्नंदध्यन्नंकृसरोदनं गुडौदनंचमुद्गान्नंइत्यन्नंषड्विधंस्मृतं तंडुलत्रिगु
णंदुग्धंदुग्धार्धंजीवनीयकं तदर्धंगुडचूर्णंतुपरमान्नमितिस्मृतं संस्कृतंमथितंगव्यंतडुलानांचतुर्गुणं
ईषत्धरिद्रयायुक्तंमरीचाजातिसंयुतं एतदुक्तंहरिद्रान्नंसुपक्षोदसंयुतं लवणार्द्रकसंयुक्तंएतदध्योद
नंस्मृतं मरीचक्षोदःमरीचकणःतंडुलार्धंमुद्गभिन्नंवारिणासहसंपचेत् युक्तंमरीचचूर्णेनतिलचूर्णं
विनिक्षिपेत् इदंकृसरनामान्नंइत्याख्यातंसुरेश्वर पूर्वोक्तपायसेयुज्याद्दुग्धार्धंगुडखंडकं अयमर्थः
पूर्वोक्तपायसवत्तंडुलत्रिगुणदुग्धदुग्धार्धजलयोगेदुग्धार्धगुडंयोजयित्वापचेदित्यर्थः इतरथागु
डौदनमितिभिन्नसंज्ञानुपपत्तिः तदर्धमाज्यंमोचायाःफलमेतद्गुडौदनं तंडुलस्यत्रिभागेकमुद्गखंडे १२२
नमिश्रितं पक्वंयदेतत्मुद्गान्नंआख्यातंचचतुर्मुखं विनाशुद्धान्नमन्येषांप्रदध्याल्लवणंबुधः गा

रुडे नैवेद्यंतुलसीमिश्रंघंटाद्यैर्जयनिस्वनैः नीराजनैश्चहरयेदद्यादापोशनंततः स्कांदे दद्याच्छ्रीहरये
नित्यंयद्यदिष्टमथात्मनः प्रक्षिप्यतुलसींप्रोक्ष्यसमस्तंत्वभिमंत्रयेत् गोविंदराजीयेब्रह्मांडे पत्रंपु
ष्पंफलंतोयंअन्नपानीयमौषधं अनिवेद्यनभुंजीतयदाहारायकल्पितं कौर्मेपि अनर्पयित्वागोविंदे
येर्भुक्तंधर्मवर्जितैः श्वुनोविष्ठासमंचान्नंनीरंचसुरयासमं अत्रानिवेदितभक्षणनिषेधात्सर्वान्ननिवेदन
मित्याचारसारे महोदधौ निवेदयामिभवनेजुषाणेदंहविर्हरे षोडशार्णमितिप्रोच्यग्रासमुद्रांप्रदर्शयेत्
वामहस्तेनपद्माभांप्राणाद्यादक्षिणेनतु कनिष्ठानामिकांगुष्ठैर्मुद्राप्राणस्यकीर्तिता तर्जनीमध्यमांगुष्ठैर
पानस्यतुमुद्रिका अनामामध्यमांगुष्ठैरुदानस्यतुसास्मृता तर्जन्यनामामध्याभिःसांगुष्ठाभिश्चतुर्थि
का सर्वाभिःसासमानस्यप्राणाद्यान्ङेद्विठान्वितान् तारपूर्वान्जपन्मुद्राः प्राणादीनांप्रदर्शयेत् ततोज
जवनिकांदत्वाब्रह्मेशाद्यैरिदंपठन् देवस्यपुरतःचतुरस्रंमंडलंकृत्वातदुपरियंत्रिकांनिधायतस्यांपरिविष्ट
सं नैवेद्यपात्रंस्थाप्यनिवेदयेदितिपारिजातः पूर्वापोशनमुत्तरापोशनंचसमंत्रकमुक्तंतच्चभास्करे आ

चारचंद्रोदये अथमुक्तवतेदद्याज्जलैःकर्पूरवासितैः आचमनंतुतांबूलचंदनैःकरमार्जनं अथतांबूलोमु
खवासाख्यःपारिजाते श्वेतपत्रंचचूर्णंचचक्रमुकाणांफलानिच नारिकेलफलोपेतं मातुलुंगसमायुतं
एलालवंगकंकोलैर्मुखवासंप्रचक्षते पर्णानिमगधदेशोद्भवानिपक्कानिअन्यानिवादक्षिणदेशोद्भवाः
क्रमुकाःसुगंधिखादिरोप्राण्यंगजंचूर्णंकर्पूरनागरैलालवंगकेशरजातीफलपत्रपनसनारीकेलशकल
मरीचादिकंचेतियथायोग्यंमिलितंपर्णादिचतुष्टयमेववातांबूलपदवाच्यं अथस्तुतिःसाचप्रयोगेव
क्ष्यते अथनमस्कारः त्रिस्थलीसेतौप्राणायामाःसर्वदेवेषुपंचसप्तत्रयोपिवा वराहपुराणे प्रणम्यदंड
वद्भूमौनमस्कारेणयोर्चयेत् सयांगतिमवाप्नोतिनतांक्रतुशतैरपि नमस्कारेणचैकेनत्वष्टांगेनहरिंव्रजे
त् नारसिंहे पद्भ्यांकराभ्यांशिरसापंचांगाप्रणतिःस्मृता दोर्भ्यांपद्भ्यांचजानुभ्यांउरसातथा मनसावचसाभ
क्त्याप्रणामोष्टांगईरितः गोविंदराजीयेभविष्ये अग्रेपृष्ठेवामभागेसमीपेगर्भमंदिरेजपहोमनमस्कारान्न
कुर्याद्देवतालये वाराहे वस्त्रप्रावृत्तदेहस्तुयोनरःप्रणमेत मां सदासंजायतेमूर्खः सप्तजन्मनिभामिनि

ष्मां

हे मध्यमानामिकांगुष्ठैर्धृत्वादीपंसुपूजितं नेत्रप्रदेशोषड्वारंभ्रामयन्देवमर्चयेदिति तंत्रसारे दीपंदक्षिण
तोदद्यात्पुरतोवानवामतः वामतस्तुतथाधूपमग्रेवानतुदक्षिणे नैवेद्यंदक्षिणेवामेपुरतोवानपृष्ठतः दीपप्र
लोपनंपुरुषस्यनिषिद्धं दीपप्रलोपनंपुंसांकू[illegible]ांडछेदनंस्त्रियाः अचिरेणैवकालेनवंशछेदोभवेद्ध्रुवं आ
चारप्रकाशेपाद्मे शंखोदकंहरेर्भुक्तंनिर्माल्यंपादयोर्जलं चंदनंधूपशेषस्तुब्रह्महत्यापहारकः धू
पंचारार्तिकंविष्णोःकराभ्यांयस्तुवंदते कुलकोटिंसमुद्धृत्ययातिविष्णोःपरंपदं उपचारभिन्नकाले
दीपस्पर्शेतुपातालखंडे स्पृष्ट्वादीपमनाचम्यपूजनंचानृतेनयत् अपराधइति अथनैवेद्यं तच्च
भास्करे निवेदनीयंय[illegible]द्रव्यंप्रशस्तंप्रयतंतथा तद्भक्त्याद्यंपंचविधंनैवेद्यमितिगद्यते भक्ष्यंभो
ज्यंचलेह्यंचपेयंचोष्यंचपंचमं बृहन्नारदीये हविःशाल्योदनंदिव्यमाज्ययुक्तंसशर्करं नैवेद्यंदेवदे
वायविष्णवेविनिवेदयेत् संस्कृतंचान्नमाज्याद्यैर्दधिक्षीरमधूनिच फलमूलव्यंजनादिमोदकंचनिवेद
येत् फलानामप्यभावेतुतृणगुल्मौषधीरपि ओषधीनामलाभेतुतोयान्यपिनिवेदयेत् तदलाभेतुसर्वत्र

नवप्रदक्षिणोपेतं यः कुर्यात्तुप्रदक्षिणं त्रिंशत्सहस्रसंख्याकं प्रदक्षिणफलं लभेदिति तत्रैव पदं पदां
तरेन्यस्य करौ चलनवर्जितौ स्तुतिर्वाचि हृदि ध्यानं चतुरंगं प्रदक्षिणं एकां गणाधिपे दद्यात् द्वे सू
र्ये त्रीणि शंकरे चत्वारि केशवे दद्यात् सप्ताश्वत्थे प्रदक्षिणं वाराहे प्रदक्षिणं न कर्त्तव्यं पुरतः पृष्ठद
र्शनात् चक्रवद्भ्रमयेद्गंगं पृष्ठतो गं न दर्शयेत् हलायुधे एकहस्तप्रणामं च एका चैव प्रदक्षिणा
अकाले दर्शनं चैव पुण्यं हंति पुराकृतं चंडीविनायकयोरेकापि प्रदक्षिणा कार्या विशिष्य विधानात्
इति प्रदक्षिणाः अथ फलानि विष्णुधर्मे फलानि दत्वा देवेभ्यः सफलां विंदते श्रियं पारिजाते
कदलीनारिकेलाम्रपनसानां फलानि च जंबूफले क्षुदंडानि सुपक्कानि शुभानि चेति दद्यादिति शेषः
अथ प्रदक्षिणा तत्र मत्यहं दक्षिणारहितं देवार्चनं कार्यमिति हेमाद्रिः पूजासाफल्यार्थं सदक्षिणं
कार्यमिति महार्णवे ऋग्विधाने दानकमलाकरे देवे दत्वा तु तांबूलं देवे दत्वा तु दक्षिणां तत्सर्वं ब्राह्म
णे दद्यादिति अथ नीराजनं आरार्तिकं सकर्पूरं ये कुर्वंति दिने दिने ते प्राप्नुवंति सायुज्यं नात्र कार्या वि

ना

चारणा पारिजाते बकुवर्तिसमायुक्तं वलितं केशवोपरि कुर्यादारार्तिकं यस्तु कल्पकोटिदिवं व्रजेत्
नीराजं प्रभाविष्णोर्येषांगाणि संस्पृशेत् यज्ञावभृथलक्षाणां स्नानजं लभते फलं मदनपारिजाते उ
वीरादायहस्ताभ्यां आपादतलमस्तकं त्रिःपरिभ्राम्यदेवेशं बहिरेनं ततः क्षिपेत् देवाभिमुख्येन न
ववारं भ्रामणमिति त्वचभास्करे अथपुष्पांजलिः कमलाकराह्निके नानावेदोक्तमंत्रैश्च अंतेपु
ष्पांजलिं क्षिपेदिति ततो नैवेद्यस्य शतांशं विष्वक्सेनादिभ्यो दद्यात् संग्रहे विष्वक्सेनाय दातव्य
नैवेद्यस्य शतांशकं पादोदकं प्रसादं च लिंगे चंडेश्वराय तु अथनिर्माल्यधारणविधिः तत्र स्कांदे
विष्णुमूर्ध्नि स्थितं पुष्पं शिरसा यो वहेन्नरः अपर्युषितपापस्तु भवेद्युगचतुष्टयं बृहन्नारदीयेपि त्व
दित्रूपं मुखेनाम नैवेद्यमुदरे हरेः पादोदकं च निर्माल्यं मस्तके यस्य सोच्युतः अथशिवनिर्माल्यग्र
हणविचारो धर्माब्धिसारे अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं जलं फलं शालग्रामशिलासंगात्सर्वं याति
पवित्रतां शैवसौरनैवेद्यभक्षणे चांद्रायणं अन्यनिर्माल्येप्यनापद्येवं इदं च ज्योतिर्लिंगस्वयंभूसिद्धप्रतिष्ठापि

तलिंगातिरिक्तस्थावरलिंगविषयं ज्योतिर्लिंगादौ तु पूजकेन दत्तं फलतीर्थादिकं भक्त्या शुध्यर्थं ग्राह्यमन्नलोभे
१२५ न पंचायतनस्थितचरलिंगेषु प्रतिमासु च अन्नादेरपि स्वयं ग्रहणेपि न दोषः ज्योतिर्लिंगाद्यन्यस्थिर
लिंगेषु तीर्थोदकचंदनमात्रं श्रद्धावद्भिः शिवोपासकैरेव ग्राह्यं ज्योतिर्लिंगादौ पूजकदत्तमन्नमपि भक्ष्य
मिति केचित् स्कांदे शंखमध्यस्थितं तोयं भ्रामितं केशवोपरि अंगलग्नं मनुष्याणां ब्रह्महत्यायुतं
दहेदिति अथ तीर्थविधिः तत्र पूजापटले उदकं चंदनं चक्रं शंखं च तुलसीदलं घंटा पुरुषसूक्तं
वताम्रपात्रमथाष्टमं शालग्रामशिला चैव नवभी[illegible]स्तीर्थमुच्यत इति यस्य यस्य यदाराध्यदैवतं
तेन तेन तस्यैव तीर्थनैवेद्यादि ग्राह्यमिति केचित् पाद्मे पीते घृते च शिरसि सर्वास्तुष्यंति देवताः प्रा
यश्चित्तं हि पापानां कलौ पादोदकं हरेरिति भविष्ये विष्णुपादाभिषिक्तं यः पात्रेणैव पिबेज्जलं स
र्वपापविनिर्मुक्तः स याति परमां गतिं यः पादसलिलं विष्णोः करेण पिबते यदि स मूढो नकं याति यावदिं
द्राश्चतुर्दश अगस्त्यः शालग्रामशिलातोयमपीत्वा यस्तु मस्तके प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्य १२५

हृदंपरिधानीयात्परमित्याचारसारः इतिनमस्कारः अथप्रदक्षिणाः तत्रभास्करे प्रसार्यदक्षिणंहस्तंस्व
यंनम्रशिराःपुनः दर्शयन्दक्षिणंपार्श्वंमनसापिचदक्षिणः सकृत्त्रिर्वावेष्टयेद्यत्तत्प्रदक्षिणमुच्यते ए
काचंड्यांरवेःसप्ततिस्रोदद्याद्विनायके चतस्रोविष्णवेदेयाःशिवस्यार्धंप्रदक्षिणा अर्धंसोमसूत्रांतमि
त्यर्थः शिवंप्रदक्षिणीकुर्वन्सोमसूत्रंनलंघयेदितिवचनांतरात् तथा सव्यंव्रजेत्ततोसव्यंप्रणालींनैवलं
घयेदिति इदंस्थिरलिंगेचरेतुसव्येनैवेतिपुरुषार्थचिंतामणौ सोमसूत्रलंघनापवादआचारसारे तृणैः
काष्ठैस्तथापर्णैःपाषाणेर्वेष्टकादिभिः अंतर्धानंपुनःकृत्वासोमसूत्रंतुलंघयेत् तत्प्रमाणंतत्रैव प्रासा
दविस्तारसमानसूत्रंसोमस्यसूत्रंदिशिसोमसूत्रं मंडपाउदीच्यांदिशिप्रासादविस्तारसमानसूत्रंसोमसू
त्रमित्यर्थः बृहन्नारदीये सोमसूत्रद्वयंयत्रयत्रवाविष्णुमंदिरं अपसव्यंनकुर्वीतकुर्वीतैवप्रदक्षिण
मिति सचंडशिवविशेषःपारिजाते स्थानेचंडस्यसंकल्प्यसंकल्प्यवृषभादोप्रदक्षिणं सव्येसव्यंविजा
नीयादपसव्येपसव्यकं वृषंचंडेवृषेभूयःसोमसूत्रेपुनर्वृषे चंडेचसोमसूत्रेचपुनश्चंडेपुनर्वृषे

नित्यक्रियानिवर्तेत काम्यनैमित्तिकैः सहेति कालिकापुराणवचनात् एकादश्यादिव्रतदिने श्राद्धदिने च
श्राद्धात्पूर्वं तीर्थप्राशनं न कर्तव्यमिति केचित् तन्न देहः शुध्यति चाप्यात्मा पीत्वा पादोदकं हरेः नित्ये नै
मित्तिके काम्ये पीत्वा भुक्त्वा न दुष्यतीति कमलाकरधृतस्मृत्यंतरवचोविरोधेन कालिकापुराणवच
नस्य रागप्राप्तविषयतात् एकादशीभिन्नदिने त्रिवारं तीर्थं ग्राह्यं एकादश्यां तु सकृत् एकादशी
दिने चैव तथैव हरिवासरे त्रिवारं न पिबेत्तोयं शालग्रामशिलोद्भवमिति गारुडे त्रिवारप्राशननिषे
धादेकादश्यामेकवारं तीर्थं च तुलसीं विनेति संग्रहवचने सकृत्प्राशनविधानाच्च आन्हिकप्रदीपे
स्मृतकेमृतके चैव आशौचं नैव विद्यते तेषां पादोदकं मूर्ध्नि प्राशनं ये च कुर्वतेति अथ नैवेद्य
ग्रहणं श्रीमद्भागवते त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः उच्छिष्टभोजनो दासास्तव मायां
जयेमहि पाद्मे गौरीं प्रतिशिववाक्यं अग्निष्टोमसहस्रैश्च वाजपेयशतैरपि यत्फलं लभते देवि
विष्णोर्नैवेद्यभक्षणात् नैवेद्यमन्नं भोजनकाले भुंजीत तदुक्तं कौर्मे मध्यान्हे विधिवत्पूज्य श्री

विष्णुं वैष्णवो नमः नैवेद्यं शिरसा नत्वा श्लोकमेतमुदीरयेत् यस्योच्छिष्टं हि वांछंति ब्रह्माद्या ऋषयोमलाः सिद्धाद्याश्च हरेस्तस्य वयमुच्छिष्टभोजिनः तिथ्यालोके तु मंत्रांतरं उच्छिष्टभोजिनस्तस्य वयमक्लिष्टकारिणः येन लीलावराहेण हिरण्याक्षो निपातित इति यत्तु आचारदर्शे सात्वतेभ्यस्तु तद्देयं विष्णवे यन्निवेदितमिति ब्राह्मं तदन्येन निवेदितविषयं अनिवेद्य न भोक्तव्यं विष्णवे तु कदाचनेति बृहन्नारदीये न अहृये न विवेद्यैव भोक्तव्यमित्यर्थात् क्त्वाप्रत्ययेनाभिषुत्यकृत्वा भक्षयंतीतिवन्निवेदनसमानकर्तृके भक्षणोक्तेः पारिजाते मुखवाद्यकृतो ये तु देवतायतने नराः विमानशतसंयुक्ताः कल्पं स्वर्गाधिवासिनः करशब्दं प्रकुर्वंति देवतायतने तु ये ते सर्वपापनिर्मुक्ताः विमाने शायुगद्वयं देवतायतने ये तु घंटानादं प्रकुर्वते तेषां पुण्यं निगदितुं कः समर्थोस्ति पंडितः तालादिकांस्यनिनदं कुर्वन्विष्णुगृहे नरः यत्फलं लभते तेराजन्शृणु वदतो मम सर्वपापविनिर्मुक्तौ विमानशतसंकुलः गीयमानश्च गंधर्वैः विष्णुना सह मोदते शिलाचूर्णेन यो मर्त्यो देवतायतने नृप करोति स्वस्तिकादीनि तेषां पुण्यं निशामय

यावंत्यः कणिकाभूमौस्मिन्सारविकुलोद्भव तावद्युगसहस्राणि हरिसालोक्यमश्नुते देवतायतनेनराजन्
कृत्वासंमार्जनंनरः यत्फलमवाप्नोतितन्मेनिगदतः शृणु यावंत्यः पांसुकणिकाः सम्यक्संमार्जिता
नृप तावद्युगसहस्राणि विष्णुलोकेमहीयते मृद्वाधातुविकारैर्वापर्णकैर्गोमयेनवा उपलेपनकृद्य
स्तु नरोवैमातिकोभवेत् अथवैखानसाचार्योक्तद्वात्रिंशदपराधाउच्यंते अपराधास्तथाविष्णोर्द्वात्रिं
शत्परिकीर्तिताः यानैर्वापादुकैर्वापिगमनंभगवद्गृहे देवोत्सवाद्यसेवाच अप्रमाणामस्तदग्रतः ए
कहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणं उच्छिष्टेचतथाशौचेभगवद्वंदनादिकं पादप्रसारणंचाग्रेतथाप
र्यंकबंधनं शयनंभाषणंचैव मिथ्याभाषणमेवच उच्चैर्भाषावृथाजल्पोरोदनादिचविग्रहः निग्रहा
नुग्रहौचैवस्त्रीषु सत्कृतभाषणं अश्लीलकथनंचैव अधोवायुविमोचनं कंबलास्तरणंचैवपरनिंदा
परस्तुतिः शक्तौगौणोपचारश्च अनिवेदितभक्षणं तत्तत्कालभवानांच फलादीनामनर्पणं विनियु १२७
क्तविशिष्टस्याप्रदानंव्यंजनादिनः गुरोर्मौनंनिजस्तोत्रंदेवतानिंदनंतथा तमेवप्रणमेप्राज्ञोविष्णुर्हे

ते यानितु केवलकरेणैवप्राशनविधायकवचनान्युपलभ्यंतेतानिवैष्णवपराणि प्राशनेमंत्रस्तुतद
स्यप्रियमितिवैदिकः अस्यार्थः अभिप्रियंसर्वप्रकारैःप्रियंतत्पाथः अस्यांपिबेयंकिंनत् यत्रपायसि
पीयमानेइतिशेषः नरःदेवयवः देवत्वंप्राप्तुंरछवः मदंतिहृष्यंतिपुनस्तत्किंयदस्यविष्णोःपरमेपदेम
ध्वः मधुरसस्यउत्सःनिष्यंदःमधुरसरूपेणपरिणमतेसहिपुरुषइत्थाइत्थंप्रकारेणउरुक्रमस्यविष्णोः
बंधुःसखाइति अस्यमंत्रस्यतीर्थपानेंलिंगाद्विनियोगः यथास्योनंतेसदनंकरोमिीति मंत्रस्यपु
रोडाशसदनकरणे पौराणंमंत्रांतरंप्रयोगेवक्ष्यतेयदासर्वदुरितक्षयकामः स्मृत्यंतरोक्तविप्रपा
म दसलिलंपिबेतदाक्रमःपाद्मे विष्णुपादोदकात्पूर्वंविप्रपादोदकंपिबेत् विरुध्यमाचरेद्यस्तुब्रह्महास
निगद्यते गारुडे विष्णोःपादोदकंपीत्वाकोटिजन्माघनाशनं तदेवाष्टगुणंपापंभूमौबिंदुनिपातनादि
ति कमलाकरेविष्णुरहस्ये विष्णुपादोदकंपीत्वापश्चाद्श्रुचिशंकया यश्चाचमतिसंमोहाद्ब्रह्मह
त्यांसविंदतीति श्राधैकादश्यांदौतीर्थग्रहणविचारः तत्रजलस्यापिनरश्रेष्ठप्राशनाद्वेषजाहृते

ति गृह्यसूत्रस्थचैत्ययज्ञव्याख्यावसरेचितेभवश्चैत्यइतिकारेणोक्तं अथगृहस्थस्यविशेषमाह गृहस्थोऽह
हरहरिष्यान्देवानिष्टाभीष्टानर्थांश्चिनोतितस्यतेहरहश्चैत्याः इष्टान्देवानिष्टाभीष्टानर्थांश्चिनोतिसं
गृण्हातिततस्तेदेवास्तस्याहरहश्चैत्याः पूज्याभवंति गणपत्यादीनांपाठेनैवदेवत्वेसिद्धेदेवावितिवच
नंयक्षिण्याःदेः सकाशादभीष्टार्थसिद्धावपितद्यजनमहरहर्माभूदित्येवमर्थं अथचैत्यानाह तेगण
पतिर्वास्कंदोवासूर्योवासरस्वतीवागौरीपतिर्वान्योवायोभिमतस्तएतेयथारुचिसमस्तावेज्यंते प्रत्ये
कंवाशब्दोपादानंतत्तदुपासकान्प्रतितत्प्राधान्यद्योतनार्थं अन्योवेत्यत्रान्यशब्देनदेवएवगृह्यते
पूर्ववाक्येदेवानित्युक्तेः योभिमतइतिसर्वत्रसंबध्यते ततश्चगणपत्यादीनांमध्येयःस्वस्याभिमत
स्तंयजेत एतइत्यत्रैकशेषः यथारुचीत्यस्यद्वौवाइत्येतेबहवाइज्यंतेइतिफलितोर्थः अन्यत्स्पष्टं अ
थपक्षांतरमाह केचिद्गणपतिमादित्यंशिवंशक्तिमच्युतंपंचकमेववाहरहर्यजंतेपंचकमितिगण १२८
पत्यादिप्रधानमेकैकंएतद्देवपंचायतनमितिव्यवह्रियते अविवक्षितःक्रमोयं पंचायतनस्थापन

क्रमस्तु पूर्वमुक्तः अथपूज्याधिकरणान्याह तानप्सुवाग्नौवासूर्येवास्वहृदयेवास्थंडिलेवाप्रतिमासुवा
यजेत वाशब्दाभ्यामोधिकारिभेदेनसर्वेषांप्राधान्यद्योतनार्थः आचार्येणात्रयद्यप्यविशेषेणपूजाधि
करणषट्कमुक्तंतथाप्यधिकारिभेदेनव्यवस्थेयं कर्म्मिणामग्नौजलेसर्वैर्योगिभिर्हृदयेहरिः सूर्येम
नीषिभिः पूज्यस्थंडिलेभावितात्मभिः स्थानेष्वेतेषुपूज्यतइतिनारदोक्तेः नन्वग्नौपाद्यादिदानेनाग्नि
नाशः प्रसज्येततत्कथंपूजनंसंभवतीत्याकांक्षायांतत्रस्थानभेदेनार्चनप्रकारमाहसएव हविषा
ग्नौजलेपुष्पैर्ध्यानेनहृदयेर्चयेत् जपेनसूर्यबिंबेतुस्थंडिलेविनतात्मभिः वाद्यैर्ईव्यगणैरन्यैःप्र
तिमांपूजयेत्सदेति प्रतिमास्वक्षणिकासुनावाहनविसर्जनेभवतः प्रत्यहमितिशेषः अक्षणिकासु
धातुपाषाणादिनिर्मितासुस्थिरासुनावाहनविसर्जनेभवतः तत्रप्रतिष्ठाकालएवदेवताया आवाहि
तत्वात्क्षणिकासुमृत्तिकादिनिर्मितासुतेभवतइत्यर्थसिद्धंस्वाकृतिषुहिशस्तासु नावाहनविसर्ज
नेभवतइत्यत्रापिसंबध्यते मध्यगतस्याविशेषाग्रहणात् स्वाकृतिषुस्वयंभ्वादिषुशालग्रामादिषुच

शस्तास्वितिवचनं अशस्तासुपूजनंमाभूदित्येवमर्थं ततश्चशालग्रामादीनांतच्छास्त्रेणसलक्षणादिकंज्ञात्वा
शास्तानामेवपूजनंकार्यमितिसिद्धं उक्तंचचक्रांकितहरेश्चापिशालग्रामस्यलक्षणं यथायोग्यंविचार्यैव
ग्रहीतव्यःप्रयत्नतइति अशस्तायाःपूजनेकोटरापूजकंहंतीत्यादिदोषाअपिस्पष्टतराएवननुस्वाकृतिषु
प्रत्यहमावाहनविसर्जनेकुतोनभवतइत्यतआह देवतानित्यंसन्निहिताइति यतस्तासुदेवतानित्यंसन्नि
हिताःसंतिइतिहेतोस्तेनभवतः उक्तंचशालग्रामविषये शालग्रामशिलायांतुनित्यंसन्निहितोहरिः त
स्मादावाहनंचैवप्रत्यहंनविसर्जनमिति बाणलिंगविषयेभविष्यत्पुराणं बाणलिंगानिराजेंद्रख्यातानि
भुवनत्रये नप्रतिष्ठानसंस्कारस्तेषामावाहनंनचेति अयंनिषेधः शालग्रामशिलासुविष्णोरेवपूजा
यांदेवतांतरस्यतत्रपूजायामावाहनमावश्यकं एवंबाणेशिवस्यैवहिंगुलापीठेद्भवपाषाणेदेव्याए
वएवंमातृपुरस्थपाषाणेपि।शोणनर्मदापाषाणयोर्विनायकस्यैवेत्यादि बोध्यमितिपरमरहस्यमिति 
तृचभास्करे आस्थिरायांविकल्पःव्यवस्थितोयं यस्यांधात्वादिनिर्मितायांचलप्रतिमायांप्रतिष्ठा

न्नैविनेतरानिति अन्येप्यपराधास्तत्प्रायश्चित्तानिचपारिजातादौज्ञेयानिविस्तृतिभीतेर्नलिखितानिअपराधा
पवादः पारिजाते अपराधाः परिज्ञेयाः प्रतिमाद्यर्चनेसदा शालग्रामेचचक्रांके पूजायांतेनसंतिहि अपरा
धप्रायश्चित्तंपातालखंडे सहस्रनामपाठाच्चगीतापारायणादपि तुलसीपूजनाच्चापि अपराधनि
वारणं स्मृतिकौस्तुभेपाद्मे अपराधसहस्राणि अपराधशतानिच पद्मेनैकेनदेवेशः क्षमतेहरिर
र्चितः अथपूजाविधौसव्याख्यानमाश्वलायनगृह्यपरिशिष्टं अथाहोमोहरहश्चैत्यमहः अथश
ब्द आनंतर्यार्थः आचार्येण गृह्यपरिशिष्टे होमसहितश्चैत्ययज्ञापरनामकोग्रहयज्ञ उक्तः इदानीं हो
मरहितश्चैत्ययज्ञापरनामकः पूजायज्ञ उच्यते यस्तुइदानीतनक्वचित्पुस्तकेषु अथहोमइतिपाठो
दृश्यतेसलेखकप्रमादादितिभाति केवलहोमशब्दात्होमराहित्यरूपविवक्षितार्थानुपलब्धेः अहर
हरितिवीप्सावचनं सर्वेषामाश्रमिणांनित्यत्वप्रदर्शनार्थं चैत्ययज्ञइत्यस्यार्थोग्रहयज्ञप्रकरणेआचा
र्येणस्वेनैवोक्तः अथग्रहयज्ञश्चैत्यश्चैत्यमुपयाचितमुच्यते तत्रभवाः शांतिपुष्टिदादेवताश्चैत्याइ

ब्रास्त्व त्रभूतत्रूपाः मंत्रलिंगात् ऋचेर्जपो मनुष्यगंधनिवारणार्थः तेभ्योवैदेवाअपेवाबीभत्संत मनुष्यगं
धातएतेधाय्येअंतरदधतयेभ्योमातेवापिचइतीत्यैतरेयब्राह्मणात् शुच्यावासनेपृथ्वित्वयाधृ० सनमि
त्युपविश्यायतप्राणः कर्मसंकल्प्यस्मृतितः प्राप्तावपिशुच्यावासनेइतियदुक्तंतेनेतज्ज्ञाप्यते अर्चनवि
धौयदुक्तंआसनंतदेवग्राह्यमिति॰ तेनान्यत्रशुचित्वेपिकंबलासनंस्यात्रनिषेधइतिगम्यते द्वात्रिंश
दपराधेषुकंबलास्तरणस्यपरिगणितत्वात् पूर्ववस्त्रासनेषूक्तंकंबलासनंदेवनासननविषयमितिनवि
रोधः नार्चायांदार्वासनोपवेशनमित्याचारदीपेमहत्कमलाकरः आयतप्राणः कृतप्राणायामः क
र्मसंकल्प्यदेवतार्चनंकरिष्यइतिसंकल्प्यशुचिशंखादिपात्रंसपवित्रमद्भिः प्रणवेनपूरयित्वागंधाक्षतपु
ष्पाणिप्रक्षिप्यसावित्र्याभिमंत्र्यतीर्थान्यावाह्याभ्यर्च्यपवित्रपुष्पपाणिस्तदुदकेनापोहिष्ठीयाभिरा
त्मानमायतनंयजमानांगानिचाभ्युक्ष्य शुचिसुप्रलक्षितं आदिपदेनसुवर्णादिपात्रंगृह्यते विष्णुपू
जायांशंखोतिप्रशस्तः पुरतोवासुदेवस्यसपुष्पंसजलाक्षतं शंखमभ्यर्चितंतिष्ठेत्तस्यलक्ष्मीर्नदुर्लभेति १३०
स्कांदात् शंखालाभेपात्रांतरं विष्णिवतरदेवतापूजायांशंखोवापात्रांतरमितिबोध्यं अत्रपवित्रशब्देनपा

देशमात्रं द्दर्भद्दयात्मकंपाकयज्ञनंत्रेयप्रसिद्धंतदेवयाह्यं केचित्तुसुवर्णमयंपवित्रंवैहिरण्यमितिश्रुतेरित्याहुः
तुलसीपत्रदूर्वादियत्पवित्रंतदित्यन्ये तीर्थावाहनमन्त्रस्तुप्रयोगेवक्ष्यते यजनांगानिपूजासंभाराः अ
भ्युक्षणलक्षणंप्रागुक्तं प्रथमयर्चात्मनः द्वितीययादेवतायतनस्य तृतीययासंभाराणामितियथा
संख्यं अपिवाऽपोहिष्ठीयाभिरितिबहुवचननिर्देशान्मृचांतेत्माद्यभ्युक्षणं क्रियांगोदककुंभंगंधा
दिभिरभ्यर्च्यतेनोदकेनाबर्थान्कुर्वीत क्रियांगानिपाद्यादीनितदर्थमुदकुंभंगंधादिभिरभ्यर्च्यतदुद
केनपाद्यादीन्युदककार्याणिकुर्वीत अंगन्यासोप्यत्रावश्यकः देवोभूत्वायजेद्देवंनादेवोदेवमर्चयेदि
तिवचनात् देवोभूत्वान्यासंकृत्वेत्यर्थः न्यासेनतुभवेत्सोपिस्वयमेवजनार्दनइतिशौनकोक्तेः के[illegible]
न्निदपात्रानुक्तत्वान्न्यासेविकल्पमाहुः अथपूजामंत्रान्याह नमोंतेननाम्नानाममंत्रेणेत्यर्थः तल्ल
क्षणं ॐकारादिसमायुक्तंनमस्कारांतकीर्तनं स्वनामसर्वसत्वानांमंत्रइत्यभिधीयतइति ॐ विष्णो
वेनमः ॐ शिवायनमइत्यादि युगपदनेकदेवतापूजनेसमुदितमंत्रोपिकैश्चिदुक्तः यथा ॐ शिव

विष्णुभ्यां नमः ॐ विष्णुशिवगणेशसूर्यलक्ष्मीभ्यो नमः इत्यादिः तल्लिंगमंत्रेण वा वैदिकेनेति शेषः ग
णानां त्वेत्यादिमंत्रपाठेनैव तल्लिंगमंत्रत्वे सिध्धे तल्लिंगमंत्रेणेति वचनं परिगणिते तरदेवतायागेपि तल्लिं
गमंत्रं ज्ञात्वा तेन यजेतेति ज्ञापनार्थं वाशब्दो विकल्पार्थः केचिद्वाशब्दं समुच्चयार्थं मन्यंते ऋग्गते
श्लिष्टमंत्रमुच्चार्य पाद्यादि निवेदयेदित्याचारार्कोक्तेः क्रमेणोपचारादर्घात्पुष्पोदकेन पाठदेवक्र
मसिद्धेयक्रमेणेत्युक्तं तदेतेनैव क्रमेण शास्त्रांतरोक्तक्रमेणेति ज्ञापनार्थं उपचारान्पुष्पोदकेन
दद्यात् महोदधावपि आह्वानाद्युपचारेषु प्रत्येकं पुष्पपाथसी दत्वा प्रक्षाल्य च करं उपचारांतरं च
रेत् तथाहि मंत्रांते उपचारं समर्प्य पात्रे पुष्पोदकं गृहीत्वा तद्देवाग्रे क्षिप्त्वा हस्तं प्रक्षाल्योपचारां
तरं चरेत् पाद्योदकमर्घ्यं च पात्रांतरेण सगंधाक्षतकुसुमं दद्यात् पाद्यदानेर्घ्यदाने चायं विशेषः उद
कुंभोदकं तत्तदुपचारपर्याप्तं पात्रांतरे कृत्वा तत्र गंधाक्षतपुष्पं प्रक्षिप्य दद्यादिति अत्र पात्रांतरेणेत्युक्त १३१
त्वादन्यत्रोदकुंभेनैवेति गम्यते सति संभवे पूर्वोक्तपदार्थानपि पाद्यादिषु क्षिपेत् अथोपचारानाह

कालएवनित्यंदेवतासांनिध्यार्थमावाहनंकृतंस्यात्तत्रनप्रत्यहमावाहनविसर्जनेभवतः तदभावेतद्द्वयम
पिप्रत्यहंभवतीति स्थंडिलेतुभयंभवतिस्पष्टं प्रतिमांप्राङ्मुखींकल्पयित्वेतिशेषः उदङ्मुखोयजेत
स्थिरप्रतिमाविषयमिदं यस्यांदिशिप्रतिमामुखंतामेवदिशंप्राचींकल्पयित्वातदनुरोधेनप्रतिमा
यादक्षिणभागेउदङ्मुखोभूत्वायजेतेत्यर्थः अन्यत्रप्राङ्मुखः चलप्रतिमादावित्यर्थः संभृतसंभा
रं यजनभवनमेत्य यजनभवनंदेवागारं संभृतसंभारमित्यनेनपूर्वमेवशास्त्रांतरोक्तप्रकारेणतत्त
द्देवतोक्तान्पूजासंभारान्संभृत्यदेवागारेनिदध्यादितिसिद्धंदेवागारप्रवेशात्पूर्वंकर्मांगत्वेनाचमनंक
र्तव्यंदेवसमीपेतन्निषेधात् तच्चसकृदेवआचांतइतिभाषाखंडेअविशेषेणोक्तत्वात् अत्रद्विराचमन
मिष्यतेतत्रविदधातियथासंध्योपासनेएवंद्विराचम्येति यत्तुदानेभोजनकालेचसंध्ययोरुभयोपि
आचांतःपुनराचामेज्जपहोमर्चनादिष्विति द्विराचमनविधायकंव्यासवचनंतद्बह्वृचेतरान्प्रतिसार्थकं
द्वारदेशेस्थित्वाहस्ततालत्रयेणापसर्पंतुयेभूतायेभूताभूमिसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतुशि
वाज्ञयेतिविघ्नानुद्वास्यप्रविश्ययेभ्योमातामधुमत्पिन्वतेपयएवापित्रेविश्वदेवायवृष्णइतिजपित्वा वि

ल्पयेदिति तस्मात्पदार्थालाभेमनसासंपादनपक्षएवाचार्यस्याभिमतः आसनंमनसापरिकल्पयामीत्यादि
प्रयोगोबोध्यः अनेकपदार्थकेतांबूलादौकिंचिद्द्रव्यालाभेतत्र द्रव्यंमनसासंकल्प्यलब्धंनिवेदयेत्
१३२ द्रव्याणामप्यलाभेतु तत्रद्रव्यंस्मरेद्बुधइतिवचनात् षोडशोमानुपचारानितिवक्ष्यमाणत्वादत्रोक्तो
पचाराणांषोडशातिरिक्तत्वाच्चपूर्वापरविरोधइति माशंकांपरिहर्तुमाहस्वयमेवाचार्यः आचमनंनपृथ
गुपचारः प्रणामस्तोत्रांगंप्रदक्षिणादिविसर्जनांगं अत्राचमनशब्देनद्वितीयादिगृह्यते प्रथमंतूपचा
रएव अन्यथाषोडशसंख्यानुपपत्तेः एवंचस्नानोत्तरंपदाचमनमुक्तंतत्स्नानांगमेव एवमुत्तरत्रा
पि पानार्थंजलमपिनपृथगुपचारः किंतुनैवेद्यांतर्गतमेवनैवेद्योत्तराचमनीययोर्मध्येपाठात्
स्तोत्रमुपचारः तदंगंप्रणामः प्रदक्षिणादिविसर्जनांगंतच्चविसर्जनात्पूर्वमेव तदंतेदेवतासांनिध्याभा
वात् आदिशब्देनफलदक्षिणानीराजनादेःसमर्पणंयथालाभं एवमुपचाराणांषोडशत्वमुपपन्नं अ १३२
थगणपत्यादीनांपूजनमंत्रानाह अथमंत्रागणानांत्वेतिगणपतेःकुमारश्चित्पितरमितिस्कंदस्याक्रु

र्त

ष्योन रजमेत्यादित्यस्य पाक्मानः सरस्वतीति सरस्वत्या जातवेदस इति शक्रे त्र्यंबकं २ यजामह इति
रुद्रस्य गंधद्वारामिति श्रियइदंविष्णुरिति विष्णोः स्पष्टं इति गणपत्यादीनां ततल्लिंगकाम्मंत्रानुक्त्वेदानीं
गणपत्यादीनां सर्वेषामविशेषेण पूजनमंत्रा उच्यंते षोडशेमानुपचारान्पौरुषेणैव सूक्तेन प्रत्यृचं सर्वे
नैव प्रयुंजते इमानिति वचनं पुरुषसूक्तमंत्रार्चनपक्षेपि इमानेव पूर्वोक्तानुपचारान्दद्यान्नशांस्त्रां
तरोक्तानिज्ञापनार्थं तेन शौनकीयऋग्विधानोक्तेपुरुषसूक्तार्चनविधौ येन नमस्कारप्रदक्षिणा
सहिताः षोडशोपचारा उक्ताः ते त्र नादेव्या इति सिद्धं पौरुषेणैव सूक्तेनेति नान्येन षोडशर्चेन सू
क्तेनेत्यर्थः सर्वत्रैव सर्वासु देवतास्वित्यर्थः प्रयुंजते यज्ञविदः ननु देव्याः पूजने कथमेते मंत्रा पुरु
षपदघटिता उपयुज्यते उच्यते वैदिकमंत्राणां ब्रह्मपरत्वात्तस्य च सर्वव्यापकत्वाद्वैदिकमंत्राः सर्वत्रो
पयुक्तुं शक्याः दृश्यते च सर्वानुक्रमण्यां जातवेदस इति मंत्रेग्निर्देवता मंत्रलिंगेनापि सैव अस्मिन्
चैत्ययज्ञे तु जातवेदस इति शक्रेरित्युक्त्वा ऊरी कृचिद्दुर्गापि तद्वदत्रापि ज्ञेयं उक्तंच शौनकी

१३३ यत्तऋग्विधाने आनुष्टुभस्यसूक्तस्यत्रिष्टुबंतस्यदेवता पुरुषोयोजगद्बीजमृषिर्नारायणःस्मृतइति तस्माज्जग
द्बीजरूपेनस्त्रीपुरुषभेदइतिज्ञातेनकश्चिद्विरोधइति अथमतांतरेणान्यानपिसर्वासांदेवतानांसाधारण
मंत्रानाह अन्येसाविच्यावाजातवेदस्यावाप्राजापत्ययावाव्याहृतिभिर्वाप्रणवेनैववाकुर्वंति चैत्ययज्ञ
मितिशेषः अत्रापिमंत्राणांसाधारण्यंपूर्ववद्व्याख्येयं प्रत्येकंवाशब्दस्तुल्यविकल्पद्योतनार्थएवकारः
प्रणवेतिप्राशस्त्यद्योतकः सएषदेवयज्ञः अन्वर्थसंज्ञेयं अहरहर्गोदानसंमितः प्रत्यहंगोदानस्यप्राजा
पत्यप्रत्याम्नायफलत्वात् पापभीरुणाचैत्ययज्ञानुष्ठानेभ्यस्तेप्रत्यहमेकैकंप्राजापत्यंभवतीतिज्ञेयं अथा
स्ययज्ञस्यकाम्यत्वंदर्शयन्नाह सर्वाभीष्टप्रदःस्वर्ग्योपवर्ग्यश्च अपवर्गोमोक्षः शेषंस्पष्टंकाम्यत्वे
तिनित्यानुष्ठानस्यकाम्येनैवसिद्धिः यथाकाम्याग्निहोत्रेणनित्यस्यसिद्धिस्तद्वत् एवंचास्ययज्ञनि
त्यत्वंप्रायश्चित्तत्वंचेतित्रैविध्यंसिद्धं तस्मादेनमहरहःकुर्वीत पुनर्विधानप्रकरणेप्रत्यवायप्रदर्शनार्थं १३३
प्रत्यवायस्तुकूर्मपुराणे योमोहादथवालस्यादकृत्वादेवतार्चनं भुंक्तेसयातिनरकान्कृमिर्भूत्वाहजायत

आवाहनमासनंपाद्यमर्घ्यमाचमनीयंस्नानमाचमनीयंवस्त्रमाचमनीयमुपवीतमाचमनीयंगंधपुष्पंधूपं
दीपंनैवेद्यंपानार्थंजलमुत्तरमाचमनीयंमुखवासंस्तोत्रंप्रणामंप्रदक्षिणांविसर्जनंकुर्यात् स्थिरादि
प्रतिमाशालग्रामादिषुआवाहनविसर्जनेनस्तः तत्रतत्स्थानेपुष्पांजलिंसमर्पयेत् उक्तंचमंत्रराजानु
ष्टुब्विधाने आवाहनऋचादद्यात्पूर्वंपुष्पांजलिंहरेः तस्यैवोन्मुखताप्राप्त्यैयागेचोद्वासनऋचा अंते
पुष्पांजलिंदद्याद्यागसंपूर्तिसिद्धयइति वस्त्रमित्येकवचनंजात्यभिप्रायं वस्त्रद्वयमितिशास्त्रांतरे
दर्शनात् उपवीत्यमित्यत्रापितथैव पुष्पमित्यत्रापिचतथैव पुष्पशब्दश्चपत्रादीनामुपलक्षणार्थः
ततश्चयथालाभंपुष्पाणितुलसीपत्रदूर्वांकुरादीनितत्तद्देवप्रियाणिचार्पयेत् नैवेद्यशब्देनान्नमेवगृह्य
तेपृथगन्नेनवेत्यग्रेवक्ष्यमाणत्वात् तच्चवैश्वदेवयोग्यं तच्छेषेणतद्विधानात् मुखवासप्रणामप्रदक्षि
णालक्षणानिप्रागुक्तानिषेधाःप्रसिद्धाः असंपन्नंमनसासंपादयेत् मनसासंपादनंप्रतिनिधिव्याहृत्य
र्थं प्रतिनिधिस्तुपारिजातेउक्तः तत्तद्द्रव्यंतुसंकल्प्यपुष्पैर्वापिसमर्चयेत् अर्चनेषुविहीनंयत्तत्तोयेनप्रक

ज्यदेवताध्यायन्समाहितमनाःप्रणतिमुद्र्यानम्रोभूत्वादेवागारंप्रविश्यदेवाग्रेतिष्ठन् येभ्योमातेत्य
स्यगयःप्लातोविश्वेदेवाजगती एवापित्र इत्यस्यवामदेवोबृहस्पतिस्त्रिष्टुप् मनुष्यगंधनिवारणार्थं
जपेवि ॐ येभ्योमाता १ ॐ एवापित्रे १ इतिजपित्वादेवान्नमस्कृत्य देवस्याग्रभागेपृथ्वीतिमंत्रस्यमेरु
पृष्ठऋषिःकूर्मोदेवतासुतलंछंदःआसनोपवेशने ॐ पृथ्वित्वया०सनंइत्यासनेउपवेश्यप्राणानाय
देशकालौस्मृत्वाममगोदानजन्यफलसमफलसर्वाभीष्टस्वर्गापवर्गफलप्राप्तिद्वाराश्रीपर०र्थंविष्णु
शिवगणेशसूर्यदुर्गार्चनंकरिष्ये कामाभावेनफलोल्लेखः तत्रममोपात्तदुरितक्षयप्रीत्यर्थं विष्णुशि
वगणेशसूर्यदुर्गार्चनंकरिष्ये कामाभावेनफलोल्लेखः तत्रमामोपात्तदुरितक्षयइत्येवसंकल्पः
ततःप्रक्षालितघंटांगंधपुष्पादिभिरलंकृत्य आगमार्थं रक्षसांकुरुघंटेवरंन्नादंदेवतास्थानसंनि
धौ इतिसंप्रार्थ्यवादयित्वातांनिधायप्रक्षालितेशंखेदर्भद्वयात्मकंपवित्रंनिधायतदभावेसौवर्णदूर्वातु १३७
लसीपत्रादीनिधायप्रणवेनाद्भिःपूरयित्वागंधाक्षतपुष्पाणिप्रक्षिप्यसावित्र्याभिमंत्र्यपृथिव्यांयोनिती

र्थानिस्थावराणिचराणिच तानितीर्थानिशंखेस्मिन्विशंतुब्रह्मशासनात् इतितीर्थान्यावाह्य ॐ शंखायनमः
इतिगंधपुष्पादिभिरभ्यर्च्य त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे निर्मितःसर्वदेवानांपांचजन्यनमोस्तुते
इतिनमस्कुर्यात् पाद्मांतरेतु तानितीर्थानिपात्रेस्मिन्नित्यूहः तूष्णीनमस्कारः शंखस्थपवित्रंपुष्पंचदक्षिण
हस्तेकृत्वा आपोहिष्ठेतितृचं० गायत्रीआत्माद्यभ्युक्षणेवि० ॐ आपोहिष्ठा० चनः शंखोदकेनात्मानमभ्युक्ष्यदे
वागारंपूजासंभारांश्चाभ्युक्षेत् ततः पूजाकलशंशुद्धोदकपूरितं ॐ उदकुंभायनमः इतिमंत्रेणगंधादिभि
रभ्यर्च्य ॐ कलशस्यमुखेवि० मूलेत्वस्यस्थितो० कुक्षौतु० ऋग्वेदो० अंगैश्च० अत्रगा० आयांतु० गंगेच
य० नर्मदेसिंधु० इत्यभिमंत्र्यप्रार्थयेत् देवतानवसं० भवसर्वदा अपिवागंगेचयमुने० कुरुइतिमंत्रेणैवाभि
मंत्र्यप्रार्थयेत् अत्रानुक्तत्वात् कलशपूजनंविनानैवकिंचिदितिवा अथन्यासपक्षेसहस्रशीर्षेतिषोडश
र्चस्यसूक्तस्यनारायणः पुरुषोनुष्टुप् अंत्यात्रिष्टुप्न्यासांगन्यासेवि० ॐ सहस्रशी० वामकरायनमः इति
वामकरएवमुत्तरत्र ॐ पुरुषदक्षिणकरे ॐ एतावा० वामपादे ॐ त्रिपादूर्ध्व० दक्षिणपादे ॐ तस्माद्विरा

वामजानौ ॐ यत्पुरुषेण० दक्षिणजानौ ॐ तंयज्ञंब० वामकट्यां ॐ तस्माद्यज्ञा० दक्षिणकट्यां तस्माद्यज्ञा
त्सर्वहुतऋचः नाभौ ॐ तस्मादश्वा० हृदये ॐ यत्पुरुषंव्य० कंठे ॐ ब्राह्मणोस्य वामबाहौ ॐ चंद्रमा० द
क्षिणबाहौ ॐ नाभ्याआसी० मुखे ॐ सप्तास्या० अक्ष्णोः ॐ यज्ञेनय० मूर्ध्नि अथपंचांगन्यासः ॐ ब्राह्म
णो० हृदये ॐ चंद्रमाशिरसि ॐ नाभ्याआ० शिखायांॐ सप्तास्या० कवचे ॐ यज्ञेन० अस्त्रे एवमेवदेवांगे
पुष्पतुलसीपत्रादिनान्यासंकृत्वाकलावाषोडशैरुपचारैःसंपूजयेत् ॐ सहस्रशीर्षेतिषोडशपूजायांविनियोगः
ॐ सहस्रशीर्षा० ॐ विष्णुशिवगणेशसूर्यदुर्गाभ्योनमः पुष्पांजलिंसमर्पयामि इतिपुष्पांजलिंसमर्प्य देवाग्रे
पुष्पोदकंक्षिपेत् एवमुत्तरत्रापि ॐ श्रीसूर्यगणेशमहालक्ष्मीशिवविष्णुभ्योनमइतिवामंत्रः ॐ पुरुषएवे० ॐ
श्रीविष्णुशिवगणेशसूर्यमहालक्ष्मीभ्योनमः आसनंसमर्पयामितदभावेआसनंमनसापरिकल्पयामीति
वदन्मनसासंपादयेत् एवमुत्तरत्राप्युपचाराभावेमनसासमर्पणं ॐ एतावान० इतिकलशस्थमुदकंकिं
चित्पात्रांतरेवनीयपूर्वोक्तपदार्थयुतंगंधाक्षतपुष्पयुतंवाकृत्वातेनपाद्यंदद्यात् ॐ त्रिपादूर्ध्वउ० इतिपा
त्रांतरावनीतंजलंपूर्वोक्तार्घ्यपदार्थयुतंगंधपुष्पाक्षतसहितंवाकृत्वातेनार्घ्यंदद्यात् ॐ तस्माद्विरा० इ १३५

इतिप्रायश्चित्तंतुसकृदकरणेर्धकृच्छ्रंउपवासत्रयंएकउपवासः अष्टोत्तरशतंगायत्रीजपोवेतिशक्त्यनुसा
रेणबोध्यं तमेनंवैश्वदेवंकृतशेषेणवापृथगन्नेनवाकुर्यात् एतच्छब्देनषोडशोपचारांतर्गतंनैवेद्यंगृ
ह्यते अनेननैवेद्यप्राधान्यमपिद्योतितं ततश्चसंकटेप्रधानेमुख्यितेसतिप्रत्यवायाभावइतिवैश्वदेवं
कृत्वातच्छेषेणनैवेद्यंकुर्यात् अथवानैवेद्यार्थंपृथक्पाकंकुर्यात् अद्यःपक्षोमाध्यान्हिकपूजावि
षयः द्वितीयःकालांतरपूजाविषयइतिवाव्यवस्थाबोध्या नास्यशेषेणवैश्वदेवंकुर्याद्धुतशेषेणेत्युक्ते
नैवेद्यशेषेणवैश्वदेवस्यप्रतिषेधसिद्धेःपुनर्वचनंनैवेद्यशेषेणयद्वैश्वदेवातिरिक्तंकर्मतत्सर्वंकुर्यादि
त्येवमर्थं ततश्चमनुष्ययज्ञनित्यश्राद्धादिकर्तव्यमितिसिद्धं अथात्रानेकपक्षत्वेपिबह्वाचारात्पु
रुषसूक्तमंत्रनाममंत्रैःशालग्रामादिविष्णुपंचायतनदेवतार्चनपक्षमाश्रित्यप्रयोगोलिख्यते स्नात्वादि
नाशुचिर्भूत्वाबद्धशिखःशुक्लवस्त्रधरोदेवागाराद्बहिःसकृदाचम्यद्वारदेशेस्थित्वाअपसर्पंतुवामदेवःशि
वोनुष्टुप् भूतादिविघ्नोद्वासनेवि० ॐअपसर्पंतुयेभूताये० ज्ञयाइतिहस्ततालत्रयेणविघ्नानुद्वास्यप्र

णंनाममंत्रेण ॐ तंयज्ञं इतिवस्त्रद्वयं आचमनीयं ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं० इतियज्ञोपवीतयुगं आ
चमनीयं ॐ तस्माद्यज्ञात्सर्वहुतऋचः सामानि० गंधान्समर्प० ॐ तस्मादश्वा० पुष्पाणितुलसीपत्रबि
ल्वपत्रदूर्वांकुरादिचयथासंभवंदद्यात् ॐ यत्पुरुषंव्यद० धूपंपाददेशंदर्शयन् घंटाशब्दयन्घंटाशब्दं
कुर्वन्समर्प्यदेवदक्षिणभागेसंस्थापयेत् ततोदेवस्यपुरतोवामेदक्षिणेवाचतुरस्रमंडलेयंत्रिकायां
नैवेद्यपात्रंसंस्थाप्यगायत्र्यातुलसीपत्रेणप्रोक्ष्यतुलसीपत्रंनैवेद्योपरिसंस्थाप्य ॐ चंद्रमा ॐ प्राणा
यस्वाहेत्यादिमंत्रैर्घंटांवादयन्नैवेद्यंसमर्पयेत् पानार्थंजलंनाममंत्रेणउत्तरमाचमनीयंचंदनेन
करोद्वर्तनंफलंचसमर्प्य ॐ नाभ्याआसी इतिमुखवासंसम० ॐ सप्तास्यास० इतिमंत्रमुच्चार्यस्तो
त्रंपठेत् तच्चतनदेवलोकसूक्तपुरुषसूक्तोत्तरनारायणादिवैदिकं अथवाऋग्विधानोक्तंम
हापुरुषविद्याख्यंसूक्तं ॐ जितंतेपुंडरीकाक्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुष १३६
पूर्वज१ नमोहिरण्यगर्भायप्रधानाव्यक्तरूपिणे ॐ नमोवासुदेवायशुद्धज्ञानस्वरूपिणे२ दे

वानांदानवानांचसामान्यमधिदैवतं सर्वदाचरणद्वंद्वंव्रजामिशरणंतव ३ एकस्त्वमसिलोकस्यस्रष्टासं
हारकस्तथा अध्यक्षश्चानुमंताच गुणमायासमावृतः संसारसागरंघोरमनंतंक्लेशसाधनं त्वामेवशरणं
प्राप्यनिस्तरंतिमनीषिणः ५ नतेरूपंनचाकारोनायुधानिनचास्पदं तथापिपुरुषाकारोभक्तानांत्वंप्र
काशसे ६ नैवकिंचित्परोक्षंतेप्रत्यक्षोसिनकस्यचित् नैवकिंचिदसिद्धंतेनचसिद्धोसिकस्यचित्
७ कार्याणांकारणंपूर्वंवचसांवाच्यमुत्तमं योगिनांपरमांसिद्धिंवदंतिपरमर्षयः ८ अहंभीतोस्मिदे
वेशसंसारेस्मिन्भयावहे पाहिमांपुंडरीकाक्षनजानेशरणंपरं ९ कालेष्वपिचसर्वेषुदिक्षुसर्वासुचाच्यु
शरीरेपिगतेचापिवर्धतेमेमहद्भयं १० त्वत्पादकमलादन्यन्नमेजन्मांतरेष्वपि निमित्तंकुशलस्यास्ति ये
नगच्छामिसद्गतिं ११ विज्ञानंयदिदंप्राप्तंयदिदंज्ञानमर्जितं जन्मांतरेपिमेदेवमाभूदस्यपरिक्षयः १२
दुर्गतावपिजातायांत्वंगतिस्त्वंमतिर्मम यदिनाथंचविंदेयंतावतास्मिकृतीसदा १३ अकामकलुषंचित्तंम
मतेपादयोःस्थितं कामयेवैष्णवत्वंतुसर्वजन्मसुकेवलं १४ पुरुषस्यहरेःसूक्तंस्वर्ग्यंधन्यंयशस्करं

आत्मज्ञानमिदंप्रोक्तंयोगज्ञानमिदंपरं १५ इत्येवमनयास्तुत्यादेवदेवंदिनेदिने किंकरोस्मीतिचात्मानंदेवायैवनि
वेदयेत् १६ ततःशिवादीनांतत्तदुक्तस्तोत्राणिपठित्वा तदंगे ॐ नमोस्त्वनंताय० नमःइत्यादिमंत्रैर्देवान्नम
स्कुर्यात् यानिकानिचपापानिजन्मांतरकृतानिच तानितानिविनश्यंतुप्रदक्षिणपदेपदे इतिप्रदक्षिणत्रयम
धिकंवा ततोनाममंत्रेणदक्षिणांसमर्प्य श्रियेजातइत्यस्यकण्वःश्रीस्त्रिष्टुप्नीराजनसमर्पणेवि० ॐश्रिये
जातः नीराजनंसमर्प्य ॐ यज्ञेनयज्ञमयजंत० इतिपुष्पांजलिंसमर्प्य ततोविष्वक्सेनादिभ्योनिर्माल्यंनैवेद्यस्य
शनांशंजलेदद्यात् तत्रकेचिच्छास्त्रांतरोक्तान्मंत्रान्पठंति तेयथा विष्वक्सेनोथवाक्रूराःसनकाद्याःशुकादयः
महाविष्णुप्रसादोयंसर्वगृण्हंतुवैष्णवः १ बाणरावणचंडीशनंदिभृंगिरटादयः सदाशिवप्रसादोयंसर्वेगृह्णंतु
शांभवाः २ गणशोगालवोगार्ग्योमंगलश्चसुधाकरः गणेशस्यप्रसादोयंसर्वेगृण्हंतु भागिनः ३ छायासंज्ञाश्र
ड्देयादंडमांठरकादय दिवाकरप्रसादोयंब्राध्नागृह्णंतुशेषकं ४ शक्तिरुच्छिष्टचांडालीसोमसूर्यहुताशनाः म १३७
हालक्ष्मीप्रसादोयंसर्वेगृह्णंतुशाक्तिकाः ५ अपिवामंत्रंविनैवविष्वक्सेनाद्युद्देशेननिर्माल्यादिजलेसमर्पये

ति पूर्वोक्ताचमनीयं पदार्थयुतं केवलजलेन वाचमनीयं दद्यात् ॐ यत्पुरुषेण ह० इति स्नानोक्तपदार्थ
युतेन केवलजलेन वा स्नानं इदानीं सति संभवे सुगंधतैलाभ्यंगपंचामृतस्नानान्यपि दद्यात् कनिक्रदिति
सूक्तेन सुगंधतैलाभ्यंगं कृत्वा उद्वर्तनेनोद्वर्त्य उष्णोदकेनाभिषिच्य आप्यायस्वेत्यस्य राहूगणो गोतमः
सोमो गायत्री पयःस्नाने वि० ॐ आप्याय० इति पयसा संस्नाप्य शुद्धवारिणा स्नापयेत् दधिक्राव्ण इत्य
स्य वामदेवो दधिक्रावानुष्टुप् दधिस्नापने ॐ दधिक्राव्णो० इति दध्ना संस्ना स्नाप्य शुद्धोदकेन च संस्ना
प्य घृतं मिमिक्ष इत्यस्य गृत्समदः प्रियस्त्रिष्टुप् घृतस्नाने ॐ घृतं मिमिक्षे० इति घृतेन स्नापयित्वा शु
द्धोदकेन च संस्थाप्य मधुवाता इत्यस्य गोतमो विश्वेदेवा गायत्री मधुस्नापने ॐ मधुवाता० इति मधुना सं
स्नाप्य शुद्धोदकेन च संस्नाप्य स्वादुः पवस्वेत्यस्य वेनो भार्गवो विश्वेदेवा जगती शर्करास्नापने ॐ स्वादुः प
व० इति शर्करया स्नापयित्वा शुद्धोदकेन च संस्नाप्य ततो देवाय चंदनतुलसीपत्रपुष्पाणि समर्प्य घंटावादनपूर्व
कं पुरुषसूक्तेन शंखोदकेनाभिषेकं कुर्यात् ॐ विष्णुशिवः आचमनीयं स० एवमुत्तरत्रापि अंगोपचारसमर्प

त्रंलिंगमस्तकंकृत्वा त्रिगुणिततत्सूत्रवेष्टनार्हंलिंगस्थौल्यंस्थौल्यसूत्रपरिमितंपीठोच्चत्वंपीठविस्तारंचकृत्वा
त्रिगुणिततत्सूत्रवेष्टनार्हंपीठस्थौल्यंपीठोच्चतासूत्रतृतीयांशेनपीठोच्चतामध्यप्रदेशेलिंगस्थौल्यद्विगुणस्थौल्यं
एकवप्रंद्विवप्रंत्रिवप्रंसमंवापीठंकृत्वापीठस्योत्तरदिग्भागेलिंगोच्चतासमदीर्घंपीठार्धदीर्घंवामूलेतत्समविस्ता
रंअग्रेतदर्धविस्तारंगोमुखाकारंप्रणालंकुर्यात् लिंगमस्तकविस्तारषष्ठांशेनपीठस्यप्रणालशाष्ठांशेनप्र
णालस्यचसमंतादुपरितनबर्हिभागंत्यक्त्वाआसमंतात्तत्परिमाणकंखातंकुर्यादिति पंचसूत्रंविधानंच
पार्थिवेनविचारयेत् यथाकथंचिद्विधिनारमणीयंतुकारयेत् पङ्कजंबूफलाकारंसर्वकामप्रदंशिवं
इतिवचनात् पार्थिवलिंगातिरिक्तलिंगेपंचसूत्रविधानमावश्यकमितिबोध्यं अखंडंस्थावरंलिंगंद्वि
खंडंचरमेवच येकुर्वंतिनरामूढानपूजाफलभागिनइत्यादिवचनात्स्थावरंद्विखंडमेवचरालिंगमखं
डेमेवकार्यंचरलिंगेष्वपिरत्नलिंगसहस्रस्यपूजयायत्फलंभवेत् ततःशतगुणंपुण्यंधातुलिंगस्यपूज १३९
नेइत्यादिवचनैःरत्नधातुमृत्पाषाणपारदलिंगानियथोत्तरप्रशस्तान्युक्तानितथापिकेवलपारदलिंगस्य

दुर्लभत्वात्तसकृत्वस्थुलानूदं दृढिमेति नहीयते बाणलिंगमितिश्रोक्तं शेषंनामर्दमुच्यते इतिलक्षणलक्षितबा
णलिंगस्यापि दुर्लभत्वात् सुवर्णादिलिंगेपंचसूत्रं संपादनस्यावश्यकत्वात्तस्य च दुःसंपादकत्वात्पार्थिवं तु
कलौ युगे इतिवचनेन कलौ पार्थिवस्यैव श्रेष्ठत्वप्रतिपादनात तत्र पंचसूत्रत्वाभावेपि दोषाभावाच्चायुष्मान्बल
लमान्श्रीमान् पुत्रवान्धनवान्सुखीवरमिष्टं लभेल्लिंगं पार्थिवं यः समर्चयेत् इतिनंदीपुराणे प्राशस्त्यप्रति
पादनात्पार्थिवलिंगपूजनं प्रशस्ततरं तत्र शिवपूजनं भस्मरुद्राक्षधारणं विना न कार्यं तदुक्तं लैंगे विनाभस्म
त्रिपुंड्रेण विना रुद्राक्षमालया पूजितोपि महादेवो न तस्य फलदो भवेत् तथा निर्णयसिंधौ विनामंत्रे
ण यो धत्ते रुद्राक्षं भुवि मानवः स याति नरकान्घोरान्यावदिंद्राश्चतुर्दश पंचामृतं पंचगव्यं स्नानकाले
प्रयोजयेत् रुद्राक्षस्य प्रतिष्ठायां मंत्रं पंचाक्षरं तथा त्र्यंबकादिमंत्रं च तथा तत्र प्रयोजयेत् यद्वा ॐ
अघोर ॐ ह्रीं अघोरतर ॐ ह्रौं ह्रां नमस्ते रुद्ररूप ह्रें स्वाहा अनेनाभिमंत्र्य धारये पुरुषार्थप्रबोधे तु
प्रक्षाल्य गंधतोयेन पंचगव्येन चोपरि शिवांभसा च प्रक्षाल्य श्रीरुद्रेणाभिषेचयेत् रुद्राक्षाणां प्रतिष्ठे

आ०त्रा०दु०

यमेवंवैदिकसमंता अथवावैदिकमतेप्रतिष्ठानैवविघ्नइत्युक्तं वोपदेवः रुद्राक्षान्कंठदेशे
१३९ दशनपरिमितान्मस्तकेविंशतिद्वेषट्षट् कर्णप्रदेशेकरयुगलकृतेद्वादशाद्वादशैव बा
ह्वोरिंद्रोःकलाभिर्नयनयुगकृतेएकमेकं शिखायांवक्षस्पष्टाधिकं यःकलयतिशतकंस
स्वयंनीलकंठः प्रजापतिः सप्तविंशतिरुद्राक्षमालयादेहसंस्थया यत्करोतिनरःपुण्यंस
र्वंकोटिगुणंभवेत् उपचारनिर्णयः निर्माल्यग्रहणाग्रहणविचारस्त्वपूर्वमुक्तः स्कांदे ए
कंमोचाफलंपक्वंयःशिवायनिवेदयेत् सर्वभस्ममहाभोगैःशिवलोकेमहीयते मोचाकद
ली गौतमः रात्रावुदङ्मुखःकुर्याद्देवकार्यंसदैवहि शिवार्चनंसदाप्येवंशुचिःकुर्यादुद
ङ्मुखः सदारात्रौदिवाचेत्यर्थः रुद्रयामलेपि नप्राचीमग्रतःशंभोर्नोदीचींशक्तिसंश्रितां १३९
नप्रतीचींयतःपृष्ठमनोदक्षंसमाश्रयेत् इदंचरलिंगविषयं तदुक्तंक्रियासारे चरलिंगर्च
येद्देवंपूर्वाभिवदनंबुधः स्थिरलिंगेयथाकृतमुखमादौनर्थार्चयेत् अथपार्थिवलिंगपूजा

त् ततः सजलं शंखं देवोपरि भ्रामयित्वा शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि अंगलग्नं मनुष्याणां ब्रह्महत्यां व्य
पोहति इति शंखस्थमुदकं स्वशिरस्यभ्युक्ष्य ततो देवतीर्थं हृद्गमं पात्रांतरेण पिबन्नरकेण तत्र वैदिकमंत्रः ॐ त
दस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदंति उरुक्रमस्य स हि बंधुरित्था विष्णोः पदे परमे मध्व उत्सः य
द्वा अकालमृत्युह० १ कालमृत्युहरं पुण्यं हत्याकोटिविनाशमं व्याधिघ्नं पुण्यं पास्ये विष्णुपादावनेजनं त
तः शिरसि तीर्थं धृत्वा देवमनेकधा संप्रार्थयेत् आवाहनं न० १ मंत्रहीनं० २ अन्यथा शरणं ना० रक्ष मां परमेश्व
र ३ भूमौ स्खलितपादानां भूमिरेवावलंबनं त्वयि जातापराधानां त्वमेव शरणं शिव ४ मत्समो नास्ति पापिष्ठ
स्त्वत्समो नास्ति पापहा इति ज्ञात्वा महादेव यथेच्छसि तथा कुरु ५ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ततो देव
शिरस्थपुष्पं स्वशिरसि धृत्वा पूजावशिष्टं चंदनादि प्रसादत्वेन धृत्वा नैवेद्यमन्नं काले भुंजीतेति अयमेवार्चनवि
धिराश्वलायनैरनुष्ठेयः बह्वृक्त्वं वेतिवचनात् इति परिशिष्टोक्तदेवपूजाप्रयोगः अथ शिवपूजा सा च लिंगे प्र
शस्ता मूलपाणौ लिंगे वरं प्राणपरित्यागः शिरसो वापि कर्तनं न चैवापूज्य भुंजीत शिवलिंगे महेश्वरमिति त
च्च लिंगं द्विविधं स्थावरं चरं च तत्र पंचसूत्रं कार्यं तल्लक्षणं पुरुषार्थचिंतामणौ लिंगोच्चताप्रमाणसूत्रसमानसू

नामसुमुख्यान्यष्टनामान्युक्तानि तदनुक्रमः शिवपुराणे शिवोमहेश्वरश्चैवरुद्रोविष्णुःपितामहः संसार
वैद्यः सर्वज्ञः परमात्मेतिमुख्यतः नामाष्टकमिदंतस्यप्रतिपादितमीशितुरिति एतैरष्टनामभिः पूजाका
लेबिल्वपत्राण्यर्पयेत् लिंगपूजांतेकर्तव्यंमहोदधौ लिंगपूजां विधायाग्रे स्तोत्रंवाशतरुद्रियां प्रजपेत
न्मना नाभूत्वाशिवे स्वं विनिवेदयेत् इतिपार्थिवपूजाविधिः अथपूजानुकल्पाः तत्रपारिजाते दद्यात्पुरु
षसूक्तेनयः पुष्पाण्यपएववा अर्चितंतेनवैसर्वं त्रैलोक्यंसचराचरं ऋग्विधाने सहस्रशीर्षासूक्तंतु
त्रिवारंचदिनेदिने विष्ण्वादिसर्वदेवानांसर्वार्चनफलंलभेत् महोदधौ अशक्तःकारयेत्पूजांदद्यार्च
नसाधनं दानाशक्तः समर्चंतंपश्येत्तत्परमानसः केवलनैवेद्यसमर्पणेनैवपूजासिद्धिरितिपरिशिष्टव्या
ख्यायांपूर्वंउक्तं गंधपुष्पसमर्पणमात्रेणपूजासिद्धिरित्यपिपूर्वमुक्तं इत्याचारेंदौपूजानुकल्पाः अथ
पूजाधिकारिणः लैंगे ब्राह्मणस्यैवपूज्योहंशुचेरप्यशुचेपि स्त्रीशूद्रकरसंस्पर्शोवज्रादपिसुदुःसहइ
ति अत्रकेचित्स्त्रीशूद्रपदमसत्स्त्रीशूद्रपरं मद्यपस्तुसमासाद्यममकर्मपरायणः तस्यपापंप्रवक्ष्यामिस्त्र

णुमुंदरितत्वतः एकजन्मभवेत्रूद्रश्चांडालः सप्तजन्मस्वितिवाराहोक्तेयेकवाक्यत्वाद्विष्णुमंत्रदीक्षितादि
सस्त्रीशूद्रैस्तु स्पर्शवत्यपिपूजाकार्येत्याहुः भट्टास्तुस्पर्शसहितपूजायानिषेधार्थत्वमविशेषेणमन्यंते
वस्तुतस्तुस्त्रीशूद्रादिस्पर्शनिषेधः प्रतिष्ठितलिंगशालग्रामविषयः यदाप्रतिष्ठितंलिंगेमंत्रविद्भिर्यथावि
धि तदाप्रभृतिशूद्रश्चयोषिद्वापिनसंस्पृशेदितिबृहन्नारदीयेप्रकरणवाक्याभ्यांप्रतिष्ठितयोरेवविष्णुलिं
गयोः स्पर्शनिषेधाभिधानात् एतेनस्त्रीणामनुपनीतानांशूद्राणांच्चजनेश्वरस्यशनैनाधिकारोस्तिवि
ष्णोर्वाशंकरस्यच शूद्रोवानुपनीतोवास्त्रियोवापतितोपिवा केशवंचशिवंवापिस्पृष्ट्वानरकमश्नुतेइ
तिनिषेधाअपिव्याख्याताः इतिपूजाधिकारिणः अथपुराणपूजा तत्रस्कंदपुराणं वैष्णवानितुशास्त्रा
णियेर्चयंतिसदागृहे धन्यास्तेमानवालोकेविष्णुस्तेषांवरप्रदः धारयंतिगृहेनित्यंशास्त्रंभागवतंहिये
कल्पकोटिसहस्राणिविष्णुलोकेवसंतिते अथगुरुपूजास्मृत्यर्थसारे एवंदेवार्चनंकृत्वागुरुंसंपूज्यय
त्नतः पुष्पांजलिंदत्वाप्रणम्याथनित्यदानंस्वशक्तितः कृत्वाद्वधान्नमस्कृतकर्त्तव्यंमंगलेक्षणं मात्स्ये त

त्रोपदेष्टारमपिपूजयेच्चततोगुरुं नपूज्यतेगुरुर्यत्रनरैस्तत्राफलाक्रियेति अथतुलसीपूजास्कांदे दृष्टास्पृ
ष्टाथवाध्याताकीर्तितानमितास्तुता रोपितासिंचितानित्यंपूजितातुलसीशुभा तथाधात्रीफलंचतुलसीमृ
त्तिकाद्वारकाद्भवा सफलंजीवितंतस्यत्रितयंयस्यवेश्मनि इतिमाटइत्युपनामकत्र्यंबकविरचितेआ
चारेंदौपूजाप्रकरणंसमाप्तं अथमंगलदर्शनादिमनुः अग्निचित्कपिलासत्रीराजाभिक्षुर्महोदधि दृष्ट
मात्राःपुनंत्येतेतस्मात्पश्येत्सदाबुधः कपिलाकपिलवर्णाधेनुरितिमाधवः नारदोपि लोकेस्मिन्मंगला
न्यष्टौब्राह्मणोगोहुताशनः हिरण्यंसर्पिरादित्यआपोराजातथाष्टमः एतानिसततंपश्येन्नमस्येदर्चये
तुयः प्रदक्षिणंतुकुर्वीत तथास्यायुर्नहीयते वामनपुराणे होमंचकृत्वालभनंशुभानांततोबहिनिर्गमनं
प्रशस्तंदूर्वांचसपिर्दधिचोदकुंभंसुवर्णं मृद्गोमयंस्वस्तिकमक्षतांश्चचैलंमधुब्राह्मणकन्यकांच श्वेता
निपुष्पाणितथाशमींचहुताशनंचंदनमर्कबिंबं अश्वत्थवृक्षंचसमालभेत ततश्चकुर्यान्निजजातिधर्मं भ १७१
रद्वाजोपि कंडूयपृष्ठतोगांतुकृत्वाचाश्वत्थवंदनं उपगम्यगुरून्सर्वान्विप्रांश्चैवाभिवादयेदिति प्रदक्षि

प्रयोगः देशकालौ स्मृत्वा मम चतुर्विधपुरुषार्थसिध्यर्थं पार्थिवलिंगपूजनमहं करिष्ये ॐ हराय नम इ
ति मृदमाहृत्य शोधितायां तस्यां जलप्रक्षेपेण संपीड्य तेन पिंडेन ॐ महेश्वराय नम इति लिंगं कुर्यात्
तच्च लिंगमशीतिगुंजात्मककर्षादधिकपरिमाणमंगुष्ठमात्रं ततोधिकं वा कार्यं न न्यूनं ॐ शूलपाणये
नमः शिव इह प्रतिष्ठितो भवेति सबिल्वपत्रे पूजापीठे प्रतिष्ठाप्य ध्यायेन्नित्यं महेशं इति ध्यात्वा ॐ पिनाक
धृषे नमः श्रीसांबशिव इहागच्छेह प्रतिष्ठेह संनिहितो भवेत्यावाहयेत् इह द्विजानां सर्वत्र मूलमंत्रोपि ज्ञेयः
ततः ॐ नमः शिवायेति मूलमंत्रेण पाद्यमर्घ्यमाचमनं दत्वा पशुपतये नम इति मूलेन च स्नानं वस्त्रमुपवी
तं गंधान्पुष्पं धूपदीपनैवेद्यफलतांबूलनीराजनमंत्रपुष्पांजलीन्दत्वा शर्वाय क्षितिमूर्तये नम इति प्राच्यां
पूजयेत् भवाय जलमूर्तये नम इति ईशान्यां रुद्रायाग्निमूर्तये नम इत्युदीच्यां उग्राय वायुमूर्तये नम इति
वायव्यां भीमायाकाशमूर्तये नम इति प्रतीच्यां ईशानाय सूर्यमूर्तये नमः इत्याग्नेय्यां ततः स्तुत्वा नम
स्कृत्य महादेवाय नम इति विसर्जयेत् इति विस्तरस्तु पुरुषार्थचिंतामणौ ज्ञेयः दानधर्मस्थशिवसहस्र

तदुक्तंषड्विंशन्मते वेदस्वीकरणंपूर्वं विचारोभ्यसनंजपः तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधेति या
ज्ञवल्क्यः वेदार्थानधिगच्छेच्चशास्त्राणिविविधानिच विविधानिधर्मशास्त्रादीनिनतुबौद्धादिसंम
तानि अवेक्षेतचशास्त्राणिधर्मादीनिद्विजोत्तमइतिकौर्मात् एतस्मिन्नेवभागेकृत्यांतरमाहदक्षः
समित्पुष्पकुशादीनांसकालःसमुदाहृतइति इतिद्वितीयभागकृत्यं अथतृतीयभागकृत्यं दक्षःतृती
येचतथाभागेपोष्यवर्गार्थसाधनमितिकुर्यादितिशेषः पोष्यवर्गंसएवाह मातापितागुरुर्भार्याप्रजाही
नःसमाश्रितः अभ्यागतोतिथिश्चाग्निःपोष्यवर्गउदाहृतः मनुरपि वृद्धौचमातापितरौसाध्वीभार्या
शिशुःसुतः अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत् दानप्रकाशे ज्ञातिर्बंधुजनःक्षीणस्तथानाथःसमा
श्रितः अन्योपिधनयुक्तस्यपोष्यवर्गउदाहृतः ज्ञातिःसपिंडः बंधुःपितृबंधादिः द्वयेर्विशेषणंक्षीणइति
अनाथःपोषकरहितः इदंसमाश्रितविशेषणं कौर्मे उपेयादीश्वरंचाथयोगक्षेमार्थसिद्धये साधये
द्विविधानर्थान्कुटुंबार्थंततोद्विजइतिश्वरंराजानं अन्यंवासमर्थं अप्राप्तस्यप्रापणंयोगः प्राप्तस्य

पालनं क्षेमएतच्चधनसाधनं यथावृत्तिकार्यं तदाह मनुः यात्रामात्रप्रसिध्यर्थं स्वैः कर्मभिः रागतं
अक्लेशेन शरीरस्य कुर्वीत धनसंचयं अगर्हितानि याजनादीनि तदुक्तं तेनैव षण्णांतु कर्मणाम
स्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अत्र विशेषः श्रीमद्भा
गवते प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोरिति
वृत्यंतरमाह गौतमः कृषिवाणिज्ये वा स्वयं कृते कुसीदं चेति कुसीदं वृध्यर्थं द्रव्यप्रयोगः तत्र या
ज्ञवल्क्यः अशीतिभागो वृद्धिस्यान्मासि मासि सबंधके वर्णक्रमाच्छतं द्वित्रिचतुः पंचकमन्यथे
ति चतुर्विंशतिमत्ते कुसूलकुंभीधान्यो वा त्र्याहिको श्वस्तनोपि वा जीवेद्वापि शिलोंछेन श्रेयानेषां
परः परः स्वकुटुंबपोषणे द्वादशाहपर्याप्तधान्य कुसूलधान्यः षडहपर्याप्तधान्यः कुंभीधान्यः
त्र्याहिकाश्वस्तनौ प्रसिद्धौ अश्वस्तनिकवृत्तिः कलौ वर्ज्या अश्वस्तनिकता तथेति माधवीय कलि
वर्ज्यपाठात् श्रीमद्भागवते वार्ताविचित्रा शालीनं यायावर शिलोंच्छनं विप्रवृत्तिश्चतुर्धेयं श्रेय

सीचोत्तरोत्तरा वार्ताविचित्राः कृष्यादिरूपाः शालीनं धार्म्यंविनैवप्राप्तमयाचितं यायावरंप्रत्यहंधान्यया
च्ञा शिलंशालिक्षेत्रादौस्वामित्यक्तकणिशोपादानं उंछंनंआपणादिपतितकणोपादानं शिलोंछन
द्वयमेकीकृत्यचतुर्धेत्युक्तंश्रेयसीउत्तमा शिलोंछवृत्तिः कलौवर्ज्येतिग्रंथांतरे चतुर्विंशतिमते रा
जप्रतिग्रहोघोरोमध्वास्वादो[illegible]विषोपमः पुत्रमांसंवरंभोक्तुंनतुराजप्रतिग्रहः एतच्चोछास्त्रवर्ति
राजविषयं तथाचयाज्ञवल्क्यः नराज्ञःप्रतिगृण्हीयाल्लुब्धस्योछास्त्रवर्तिनइति धर्मिष्ठराजप्रति
ग्रहस्तुज्यायानेवतदाहनारदः शुचीनामशुचीनांचसन्निपातोयथांभसि समुद्रेसमतांयातितद्व
द्राज्ञांधनागमः यथाग्नौसंस्थितंसर्वंशुद्धिमायातिकांचनं एवंप्रतिग्रहाःसर्वेशुचितांयांतिराजनी
ति इदंचानापदि आपदितुलुब्धादेरपिराजप्रतिग्रहेनदोषः तदुक्तंचतुर्विंशतिमते सीदंश्चेत्प्र
स्य तिगृण्हीयात्ब्राह्मणेभ्यस्ततोन्नृपात् ततस्तुवैश्यशूद्रेभ्यःशंखव[illegible]वचनंयथेति दुर्भिक्षेदारुणेप्र १४३
तिकुटुंबेसीदतिक्षुधा असतःप्रतिगृण्हीयादात्मवृत्त्यर्थमेवचेति द्रव्यतोवर्ज्यप्रतिग्रहमाहमनुः

णार्हाणि स्मृतिदीपिकायां चित्रभानुमनड्वाहं देवं गोष्ठं चतुष्पथं ब्राह्मणं धार्मिकं चैव नित्यं कुर्यात्प्रदक्षिण
मिति चित्रभानुरग्निः रक्षणमात्रेण शुद्धिप्रदान्पदार्थानाह पराशरः अरणिं कृष्णमार्जारं चंदनं सुमणिं घृ
तं तिलान्कृष्णाजिनं छागं गृहे चैतानि रक्षयेदिति अथ धार्याण्याह भरद्वाजः विष्णुक्रांतां शमीं दूर्वां चंद
नं शंकपुष्पिकां सिद्धार्थांश्च प्रियंगूंश्च प्रातः शिरसि धारयेत् रत्नावल्यां धार्याणि शिरसा नित्यं पुष्पाणि
श्रियमिच्छतेति छागलेयः यतीनां दर्शनं चैव स्पर्शनं भाषणं तथा कुर्वाणः पूयते नित्यं तस्मात्पश्ये
त नित्यशः इति मंगलदर्शनादि एतावदष्टधा विभक्तस्यान्ह आद्यभागे कर्तव्यं दिवसस्याद्यभागे तु सर्व
मेतत्समाचरेदिति दक्षोक्तेः इति माटे इत्युपनामक नारायणात्मजत्र्यंबकविरचिते आचारेंदौ अष्टधा
विभक्तदिवसस्य प्रथमभागकृत्यं नर्तुं सस्रुतिवारिधेस्त्रिजगतां नौर्नाम यस्य प्रभोर्येनेदं सकलं वि
भाति सततं जातं स्थितं संहृतं यश्चैतन्यघनः प्रमाणपुरतो वेदांतवेद्यो विभुस्तं वंदे सहजप्रकाशममलं
श्रीरामचंद्रं परं अथ द्वितीयभागकृत्यं दक्षस्मृतौ द्वितीये च तथा भागे वेदाभ्यासो विधीयते सपंचधा

तनंविद्याभृतकाध्यापनादिकुसीदंस्वयंकृतावृद्धिः शकटंधान्यादिवाहनेनजीवनसाधनं एवंगिरिस्तृ
णादिना अनूपंजलप्रायदेशः शाकादिना तथाविक्रेयविषयेनारदः ब्राह्मणस्यतुविक्रेयंशुष्कदा
रुतृणानिच गंधद्रव्येरकावेत्रतूलंमूलंकुशादृते अविक्रेयाणिआहयाज्ञवल्क्यः फलोपलक्षौ
मसोममनुष्यापूपवीरुधः तिलौदनरसक्षारान्दधिक्षीरंघृतंजलं शस्त्रासवमधूच्छिष्टमधुलाक्षास
बर्हिषः मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः कौशेयनीलीलवणमांसैकशफसीसकान् शाक
द्रोषधिपिण्याकपशुगंधांस्तथैवच वैश्यवृत्यापिजीवन्नोविक्रीणीतकदाचन सर्वानेतान्वैश्य
वृत्याजीवन्ब्राह्मणःकदाचिदपिनोविक्रीणीत क्षत्रियादेस्तुनदोषः अतएवनारदेनवैश्यवृत्ता
वविक्रेयंब्राह्मणस्यपयोदधीतिब्राह्मणग्रहणं द्विजेभ्योगोरसादेःक्रयोपिनिषिद्धः तदुक्तं
पराशरपुराणे पिण्याकंसक्तवस्तैलंगव्यंतक्रादिकंतथा शूद्रादेवतुसंग्राह्यंनद्विजेभ्यःकदाच १४४
नेतिप्रतिप्रसवमाह धर्मार्थंविक्रेयंनेयास्तिलाधान्येनतत्समाः तिलन्यायोरसेपियोजनीयः अ

अतएवमनुः रसारसैर्निमातव्या नत्वेवलवणंरसैः कृतान्नंचकृतान्नेन तिलाधान्येनतत्समाइति अन्येन
चान्नस्यमनुष्याणांमनुष्यैरसानांचरसैः गंधानांचगंधैः विद्ययाविद्यानामिति आपदुक्तक्षात्रादिधर्म
मपेक्ष्यब्राह्मणादेर्विगुणोपिस्वधर्मएवश्रेयान् यदुक्तंमनुनावरंस्वधर्मोविगुणोनपारक्यस्वनुष्ठितः
परधर्मेणजीवन्हिसद्यःपततिजातितइति इत्यापद्वृत्तयः धनार्जनार्थंप्रवासप्रसक्तौतद्विधिः का
रिकायां कश्चिद्धनार्थीसूक्तेनवयमुत्वापथस्पते धनार्थीधनमर्जयितुंप्रवृत्तः पूर्ववत्प्रत्यृचं
होमंकुर्यात्तदुक्तंवाजपेत् केवगृह्याग्निमतोमासद्वयावधिप्रवासः उक्तंचपैठीनसिना प्रस्तवली
कृतधर्मस्यपीड्यमानस्यशत्रुभिः मासद्वयंप्रवासोस्तिपरतोनाहिताग्निवत् मासद्वयोपर्यनाहिता
ग्नेःआहिताग्निवत्प्रवासोनास्तीतितुर्यपादार्थः मासद्वयावधिप्रवासेहोमार्थंद्विजंपरिकल्प्यप्रसवेदि
त्याहकात्यायनः निक्षिप्याग्निंस्वदारेषुपरिकल्प्यर्त्विजंतथा प्रसवेत्कार्यवान्विप्रोवृथैवनचिरंवसेदि
ति अत्रकार्यवानितिधर्मार्थीनतुतपोर्थी धनान्यर्जयितुंयुक्तःप्रवासोप्यग्निहोत्रिणः धनैर्य
त्तंभवेदिज्यातपार्थंनतुव्रजेदितिसत्यव्रतोक्तेः तीर्थाद्यकरणेकारणमाहमंडनः ब्रह्माविष्णुःशिवः

कुर्यादित्युक्तयुक्तेः प्रवासादेत्य पुत्रस्य शिरः परिगृह्येत्यादिगृह्यसूत्रे उक्तत्वाच्चेक्षणप्रपरनपुत्रशिरोवघ्राणान्येव
कार्याणि नान्यदुपस्थानादीति संस्काररत्नमालायां तु सर्वोपि प्रवासविधिर्गौणत्वेर्कृताकृतः तत्र करणे त्वभ्युद
यः अकरणे प्रत्यवायाभाव इति ज्ञेयं करणपक्षे सर्वदा कर्तव्य एवेत्युक्तं इदानींतनशिष्टैरकरणपक्ष एव स्वी
कृतः अथ सभार्यस्य प्रवासे प्रसक्ते अग्निसमारोपणविधिः कालहोमानंतरं अयं ते योनिरित्यस्य गाथि
पुत्रो विश्वामित्रोग्निस्त्रिष्टुप् अग्निसमारोपणे ॐ अयं ते गिरः इत्यनेनारणिद्वयेग्निं समारोपयेत् अ
थवा नेनैवाश्वत्थसमिधि समारोपयेत् तत्र प्रादुष्करणकाले अरणी समारोपे [illegible] अरणी निर्मंथ्य प्र
त्यवरोह जातवेद इत्यनेन स्थंडिलेग्निं प्रतिष्ठापयेत् अश्वत्थसमि[illegible]समारोप[illegible]णपक्षे श्रोत्रियागाराद
ग्निमाहृत्य संस्कृते स्थंडिले प्रतिष्ठाप्य प्रत्यवरोहेति मंत्रेण तां समिधं निदध्यादिति संकटे केवलपत्न्यापि प्र
वासोपस्थानमकृत्वैव प्रवासः कर्तव्य एवेति प्रायश्चित्तकुतूहलादौ अथात्र प्रसंगात्पुनराधाननिमित्ता
नि कात्यायनः विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति होमकालात्ययेतस्य पुनराधानमर्हति अत्र

सीमागृहसीमानतुग्रामसीमा तदुक्तंत्रिकांडमंडनेन विहारकालेयदिकार्यलोभात्पत्नीतुसीमानमतीत्य
गच्छेत् निःसंशयोग्निःखलुनाशमेति गृहस्यसीमात्रविवक्षितोर्थइतिशौनकः अग्नावननुगतेयत्रहोमकाल
द्वयंव्रजेत् उभयोर्विप्रवासेवालौकिकोग्निर्विधीयते गोविंदार्णवेतु द्वादशाहेकृतेहोमेस्थालीपाकत्रयेत
था पिंडयज्ञात्ययेचैव अग्निर्नश्यतिवैध्रुवं श्रौतहोमत्रयेलोपेपुनराधानमिष्यते अश्वलायनानांतु
द्वादशदिनंहोमलोपएवाग्निनाशः भगवान् प्रोषितेतुयदापत्नीयदिग्रामांतरंव्रजेत् होमकालेयदिप्राप्ता
नसादोषेणयुज्यते अथतत्रैववसतिर्होमकालव्यतिक्रमः लौकिकोग्निर्विधीयेतकाठकश्रुतिदर्शनादिति
मंडनः संध्यावदन्यथाप्यग्नीन्हित्वाचेद्दंपतीगतौ ग्रामंवाप्यथसीमांतंतत्रैकेग्नीनातान्विदु ः अन्येग्रा
मांतरंगत्वानत्वतिक्रममात्रतः सीम्नित्वतिक्रमादेवकेवलान्नाशमब्रुवन् यदोभावप्यतिक्रम्यसीमांप्रत्या
गतौपुनः उदयास्तमयात्पूर्वंननाशोत्रेतिकेचन तथा पत्न्यंतरेथचापत्योर्हुताशनसमीगते तदापत्नी
यथाकाममतिक्रामेन्नदीमपि असमुद्रगामिनीमितिकेचित् अत्वंस्वयमजुह्वानोहावयेदृत्विगादिना

तस्यस्यात्पुनराधेयंपवित्रेष्टिरथापिवेति यज्ञपार्श्वे गजोष्ट्रवृषभंनारीसमारुह्योथवापुमान् योजनेयोज
 नेकृच्छ्रमग्निश्चापिविनश्यति प्रायश्चित्तप्रदीपे आहिताग्निस्तुयोमोहादनुगच्छेच्छवंयदि तदाग्नीनांवि
नाशःस्यादितिप्राकुर्मनीषिणइति इदमन्यगोत्रविषयं आहिताग्निःप्रमादाद्यःप्रेतानुगमनंयदि अग्नि
नाशंविजानीयात्सपिंडेतुनदोषकृदितिप्रायश्चित्तकेशवीकरोक्तेः आहिताग्नेःप्रमादाच्चेच्छवानुगम
नंयदि अग्निनाशंविजानीयात्सगोत्रेषुनदोषकृदितिप्रयोगदर्पणेस्मृतिवचनात् चवाहिनीपत्यता
वपि असपिंडशवानुगमनेशवस्पर्शेचपुनराधानमिति आहिताग्निग्रहणंसाग्निकोपलक्षणमितिकेचि
त् एवमन्यान्यपिनिमित्तानि ग्रंथांतरेभ्यो ज्ञातव्यानिविस्तृतीभीतेर्नात्रलिखितानि इतिपुनराधाननि
मित्तानि अथार्जितधनस्यविभागः दानधर्मे धर्मेणार्थःसमाहार्योधर्मलब्धंत्रिधाधनं कर्तव्यंधर्म
परमंमानवेन प्रयत्नतः एके[illegible]नांशेनधर्मार्थश्चर्तव्योभूतिमिच्छता एकेनांशेनकामार्थएकमं
शंविवर्धयेत् कामःकुटुंबस्यात्मनश्चावश्यकोभोगः वर्धयेदित्यनेनप्रनेनधनांतरमर्जयेदित्य 

दि ततोगृहानीक्षेतगृहा विभितोपवस्यत्स्येवोस्मासुच प्रजायध्वंमाचवोगोपतीरिषदिति मंत्रेण ततःप्रपद्येत
गृहानहंसुमनसः प्रपद्येवीरघ्नोवीरवतः सुवीरानूइरांवहंतोघृतमुक्षमाणास्तेषहंसुमनासंविशानीति शिवंश
ग्मंशंयोःशंयोरिति मंत्रेण गच्छन्सर्वान्पदार्थाननुवीक्षमाणस्त्रिरावृत्य मंत्रंब्रूयात् ततःपुत्रस्यशिरःपरि
गृह्यमूर्धनित्रिरवघ्रायजपति अंगादंगासं० शतमिति तस्मिन्नहनि अवगतमप्यप्रियंप्रवासादागता
यननिवेदयेयुः इतिकेवलसाग्निकस्यपुरुषस्यप्रवासविधि अयंचश्रौतसूत्रेउक्तः अस्यचश्रौतोक्तम
विरुद्धंयन्गृह्यंतुशातशास्त्विदमितिकारिकोक्तेः स्मार्तेपिप्राप्तिः अथसंक्षिप्तप्रकारःप्रयोगरत्ने होमांते
पूर्वोक्तमंत्रैरुपस्थायपुनः प्रवासार्थमभयंवोभयंमेस्त्विति मंत्रेणाग्निमुपस्थाय प्रोष्यपुनःस्वगृहसमीप
मेत्य ॐ गृहामा० इतिगृहंनिरीक्ष्य ॐ गृहानहं० इतिगृहंप्रविश्य ॐ शिवंशग्मं० इतिपुनस्त्रिरनुवी
क्ष्यहोमकालेउपस्थानांतंकृत्वा ॐ अभयंवोभयंमेस्त्वितिपुनरग्निमुपतिष्ठेत् ततःपुत्रशिरोवघ्राणा
दिसमानमिति वस्तुतस्तु गृहानीक्षेताप्यनाहिताग्निरिति सूत्रवृत्तौईक्षणंप्रपदनंचानाहिताग्निरपि

तधनविभागः इति माटेइत्युपनामकनारायणात्मजत्र्यंबकविरचिते आचारेंदौ अष्टधाविभक्तस्य दि
नस्य पोष्यवर्गार्थसाधनंनाम तृतीयभागकृत्यं अथ चतुर्थभागकृत्यं दक्षः चतुर्थे तु दिवाभागे स्नाना
र्थं मृदमाहरेत् तिलपुष्पकुशादींश्च स्नायाच्चाकृत्रिमे जले व्यासः स्नानं मध्यंदिने कुर्यात्सुजीर्णा
न्नो निरामयः न भुक्त्वालंकृतोऽरोगी नाज्ञातांभसि नाकुले निरामय इत्यनेन आमययुक्तो न स्नायादि
त्युक्तं भवति अथ गृह्यपरिशिष्टं अथ मध्यंदिने तीर्थमेत्य धौतपादपाणिमुखो द्विराचम्यायतप्राणः
स्नानसंकल्प्य ऋजुदर्भपाणिः शुचौ देशे खनित्रेण भुवं गायत्र्यस्त्रेण खात्वोपरि मृदं चतुरंगुलिमुद्वास्या
धस्तान्मृदं तथा खात्वा गायत्र्यादाय गर्तमुद्वासितया प्रतिपूर्य मुदमुपात्तां शुचौ तीरे निधाय गायत्र्या प्रोक्ष्य
तच्छिरसा त्रेधा विभज्यैकेन मूर्ध्न आनाभेरपरेण चाधस्तादात्मानमनुलिप्याप्लुत्य क्षालयित्वादित्यं निरी
क्ष्य तं ध्यायं स्नायादेतन्मलस्नानमाकुर्य तीरे द्विराचम्य तृतीयमस्त्रेणादाय सव्ये पाणौ कृत्वा व्याहृति १४८
भिस्त्रेधा विभज्य दक्षिणं भागमस्त्रेण दिक्षु दशसु विनिक्षिप्योत्तरं तीर्थे क्षिप्त्वा तृतीयं गायत्र्याभिमंत्रितमा

दित्याय दर्शयित्वा तेन मूर्ध्न आपादात् गायत्र्या प्रणवेन वा सर्वांगमनुलिप्य सुमित्रिया न आप ओषधयः
संत्विति सकृदद्भिरात्मानमभिषिच्य दुर्मित्र्यास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्म इति मृच्छेषमद्भिः प्र
क्षालयेदथ वरुणप्रार्थनादिना तर्पणांते नोक्तेन विधिना स्नाया नास्मित्यागन्नस्नयज्ञतर्पणाद्वस्त्रं निष्पीड
येदपुत्रादयो ह्यंते तर्प्या इत्येष स्नानविधिस्तदेतदसंभवेद्भिरेव कुर्याद्धोमादिषु च न च गृहे मृदा स्नायादिति
गायत्र्यस्त्रेण प्रचोदयादिति पदं गायत्र्यस्त्रमंत्रः भौमादिष्विति भौमभानुवारादिषिद्धकालेषु ते च पारि
• जाते नंदायां भार्गवदिने कृत्तिकासु मघासु च भरण्यां भानुवारे च गजच्छायाह्वये तथा अयनद्वितये
चैव मन्वादिषु युगादिषु मृदा स्नानं पिंडदानं न कुर्यात्तिलतर्पणं मन्वादियुगादयः स्तूतरत्र तिलतर्पणे
वक्ष्यंते दक्षः प्रक्षाल्य यज्ञसूत्रं तु मृद्भिरद्भिः शनैः शनैः आपादमस्तकं देहं तथैव क्षालयेद्बुधः एतच्च म
लापकर्षणं स्नानं तटे कार्यं तदुक्तं नृसिंहपुराणे शुचौ देशे समभ्युक्ष्य स्थापयेत्कुशमृत्तिकाः मृत्तोयेन
स्वकं देहं बहिः संशोध्य यत्नतः अथ मध्याह्नस्नानप्रयोगः तीर्थमेत्य प्रक्षालितपादपाणिमुखः द्वि

१४९ राचम्यप्राणानायम्यदेशकालौस्मृत्वाआत्मनःकायवाङ्मनः कृतकर्मदोषपरिहारद्वाराआयुरभिवृद्धिद्वा
रश्रीपरमेश्वरप्रीत्यर्थंमध्यान्हस्नानंकरिष्येइतिसंकल्प्य ऋजुदर्भपाणिःशुचौदेशेॐप्रचोदयादिति
मंत्रेणखनित्रेणभूमिंखात्वाउपरिमृदंचतुरंगुलामुद्धास्याथ तान्मृदंपूर्ववत्पुनः खातातंगायत्र्यादायगर्तं
मुद्वासितयामृदाप्रतिपूर्ययातांमृदंदर्भान्तिलान्यवांतंडुलांश्चशुचौतीरेनिधायमृदंगायत्र्याप्रोक्ष्यआवृ
तेन ॐ मापोज्यो० सुवरोमितिगायत्रीशिरसात्रिधाविभज्यएकेनभागेनमूर्धादिनाभिपर्यंतंद्विती
येननाभेरधःपादपर्यंतंअनुलिप्यअपआलुत्यांगानिक्षालयित्वादित्यंनिरीक्षंतंध्यायन्स्नात्वातीरआ
गत्यद्विराचम्य ॐ प्रचोदयादितितृतीयंमृद्भागमादायसव्येपाणौनिधाय ॐ भूरितिदक्षिणभागं ॐ
भुवइतिमध्यमभागं ॐ स्वरितिउत्तरभागंविधाय ॐ प्रचोदयादितिमंत्रेणावृत्तेनदक्षिणंभागंदश
सुदिक्षुनिक्षिप्योत्तरभागंतीर्थेतूष्णींक्षिप्त्वामध्यमभागंगायत्र्यादित्यायप्रदर्श्यतेनमूर्धादिपादपर्यंतं १४९
गायत्र्याप्रणवेनवासर्वांगमनुलिप्य० सुमित्रानआपओषधयःसंत्वितिदक्षिणेनपाणिनाद्भिरात्मान

र्थः प्राप्यते तथाच विदेशगमनाद्युपयोगितयाशस्त्रवाहनादिसंपादकतयासेवादिसंपादकतयावाब्राह्म
णादीनांधनसाधनत्वंधनस्येतिबोध्यं अयंच औचित्यावर्जितेविभागप्रकारः अन्यथानियमादृष्टकल्प
नापत्तेरतः स्वल्पतरपरिजनस्येतोप्यधिकदानेबहुतरपरिजनस्यस्वल्पार्जनेइतोपिन्यून ~~गोमतोगोदाना~~
~~नुपपत्तेः प्रकारांतरंशिवधर्मे~~ दानेवानप्रत्यवायः अतएवएकांगांदशगुर्दद्याद्दशदद्याच्चगोशतीत्यादाव
न्यादृशोपिप्रकारउक्तः नचायंगोमात्रपरः पूर्ववचनंतुतदितरपरमितिवाच्यं दशान्यूनगोमतोगोदाना
नुपपत्तेः प्रकारांतरंशिवधर्मे तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत् भागद्वयंतुधर्मार्थंनि
त्यंजीवितंयतः वित्तस्यभागपंचकंकृत्वाभागत्रयंजीवनार्थंभागद्वयंदानार्थमितिहेमाद्रिः अत्रार्जित
सर्वधनस्यायंपंचधाविभागइतिकेचित् भक्ष्यावशिष्टस्येत्यन्ये तत्रजीवनायेतिदुर्भिक्षादावितिव्या
ख्येयं श्रीमद्भागवते धर्माययशसेनायकामायस्वजनायच पंचधाविभजन्वित्तमिहामुत्रचमो
दते एतेषांवचनानामविरोधः कृपणोदारभेदेनेतिकश्चित् स्वल्पाधिकपरिजनपरतयेत्यपरे इत्यर्जि

ध्यंदिने प्रबलमधीयीतेति यएवंविद्वान्महारात्रउषस्युदितइति एवंच ब्रह्मयज्ञः सर्वकालंभवति नतु रात्रौ निषेधः
१५० तथाच सूत्रं तस्यद्वावनध्यायौ यदात्माशुचिर्यद्देशश्शुचिरिति तथाश्रुतिरपिग्रामेमनसास्वाध्यायमधीयीत
दिवानक्तंचेति तेनपितृतर्पणमपि रात्रौ सिद्धं तस्य ब्रह्मयज्ञांगत्वात्सूत्रे गृहानेत्य यद्ददाति सादक्षिणेत्यंतेन
ब्रह्मयज्ञोपसंहारात् अवगाहं ब्रह्मयज्ञमिति ~~स्मृतिसंग्रहवचनेनमध्यान्हसंध्योत्तरं~~ रात्रिनिषेधकं वचनंतच्छा
खांतरपरं अत्रकेचित् आवर्तनेवगाह्यापः कुशपाणिस्तुबह्वृचः ततोमध्यान्हिकीं संध्यां ब्रह्मयज्ञमतःपर
मिति स्मृतिसंग्रहवचनेन मध्यान्हसंध्योत्तरं ब्रह्मयज्ञइत्याहुः तदाश्वलायनेतरविषयं आश्वलायनानांतु त
त्सूत्रे अथस्वाध्यायविधिरित्युपक्रम्यापआप्लुत्येति मध्ये मध्यान्हस्नानमुक्त्वा ततोब्रह्मयज्ञो ब्रह्मयज्ञोक्तेर
वांतरप्रकरणात्स्नानं ब्रह्मयज्ञांगंतयोर्मध्ये न संध्याअंगांगिनोरनंगेन व्यवायापत्तेः कर्मणि कर्मांतरारंभा
योगात् पूर्वोक्तशौनकवचनेपि ब्रह्मयज्ञोत्तरमेव संध्योक्तेश्च ब्रह्मयज्ञोत्तरमेव संध्या नचैवमंते यद्ददाति १५७
सादक्षिणेत्युक्तेस्तावत्पर्यंतमवांतरप्रकरणाद्ब्रह्मयज्ञोत्तरमपि संध्या नस्यादिति ददातीत्यस्याविधायक

त्वात् अतएववृत्तिकृदन्यथाहद्यादित्येवावक्ष्यदिति उक्तवान् अथेतिकर्तव्यता योगयाज्ञवल्क्यः
प्रदक्षिणंसमावृत्यनमस्कृत्योपविश्यचेति श्रुतिश्चदक्षिणतउपवीत्युपविश्येति दक्षिणतःप्रदक्षिणंकृत्वे
त्यर्थइतिमाधवः ततआचमनंतच्चश्रौतंआहाश्वलायनः मध्यान्हेचपुनःस्नात्वाधौतशुक्लांबरावृतः
शुच्युक्तविधिनाचम्यप्राङासीनःकुशासने तत्प्रकारःश्रुतौ ब्रह्मयज्ञंप्रकृत्यहस्ताववनिज्यत्रिराचा
मेत्द्विःपरिमृज्यसकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभ्येति अत्रसकृदुपस्पृश्येत्यस्यानं
तरंसव्यंपाणिंपादौप्रोक्षेदित्यध्याहर्तव्यं उत्तरस्मिन्फलवाक्येतथानुक्रमणात् प्रकारांतरंषट्कर्मचंद्रि
कायां देव्याःपादैस्त्रिभिःपीत्वाअब्लिंगैर्नवधास्पृशेत् सप्तव्याहृतिगायत्रीशिरोमंत्रोद्विधाकृतः एतेस
मस्यचतुर्विंशतिमंत्राभवंतितेषांविनियोगः केशवादीनामिवद्रष्टव्यः अन्यच्छ्रुत्याचमनंस्मृत्यंतरे तदोंका
रेणाचमनंयद्वाव्याहृतिभिर्भवेत्सावित्र्यावापिकर्तव्यमितिव्यासेनभाषितमि ति यद्वा श्रौतस्मार्तपौरा
णेषुइच्छयाअन्यतमंकर्तव्यंयथेष्टंवाविधीयतइति आचमनप्रकरणेपूर्वमुक्तत्वात् आहशौनकः प्राणाया

मेर्दग्धदोषः शुक्लांबरः शुचिः यथाविध्यप आचम्य आरोहेद्दर्भसंस्तरं अत्र कंबलाद्यासननिषेध उक्तः पारिजाते सं
ग्रहे नकुर्यादासनस्थोपि ब्रह्मयज्ञं कदाचन तथैवाचमनं प्रोक्तं तथैव ब्राह्मणार्चनं ततः संकल्पः सचतानेता
न्यत्नानहरहः कुर्वीतेत्याश्वलायनोक्तेः ब्रह्मयज्ञं करिष्य इत्येव पारिजातेप्येवं अतएव दानप्रकाशे महानवि
धौ महादानमहं करिष्ये इत्येव संकल्पः महादानमखं कुर्यादित्युपक्रमात् षोडशैतानि यः कुर्यान्महादानानि
मानव इत्युपसंहाराच्चेत्युक्तं अत्राद्यौ तयोरप उपस्पर्शनं मंत्रश्चोक्तः पारिजाते स्मृतिसंग्रहे प्रदक्षिणं समावृत्य
नमस्कृत्योपविश्य च वाग्यतः सोत्तरीयश्च स्पृशेद्विद्युदसीत्यपः विद्युदसीत्यस्य ऋषिरग्निर्वैसमुदाहृतः वाच्य
मानुष्टुभं छंदो वरुणो देवता स्मृता नमो ब्रह्मण इत्येतां त्रिरुक्त्वा समापयेत् अपो वृष्टिरसि स्पृष्ट्वाचांते जलमुपस्
शेत् वृष्टिरसीति मंत्रस्य ऋषिरग्निरिति स्मृतः देवः प्रजापतिस्तस्य छंदोनुष्टुप् प्रकीर्तितमिति आचाररत्ने तु
ब्रह्मयज्ञस्याद्यंतयोर्विद्युद्वृष्टिमंत्रौ पठनीयौ सर्वेषु यज्ञक्रतुषु होष्यन्नपः स्पृशेत् विद्युदसि विद्य मे पाप्मानमिति 
अथ हुत्वापः स्पृशेद्वृष्टिरसि वृश्च मे पाप्मानमिति वक्ष्यमाणो वेष्टावेति तैत्तिरीयश्रुते श्रुतिभाष्ये माधवप्येवं इ

मभिषिच्य ओं दुर्मित्रास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति मंत्रेणांगानि प्रक्षाल्याचम्य प्रातःस्नानवद्वरुणप्रार्थना
दितर्पणांतं वस्त्रनिष्पीडनवर्जं कुर्यात् प्रावरणवस्त्रं तीरे निधाय ब्रह्मयज्ञांगतर्पणांते ये के चास्मदिति मंत्रेण तं
निष्पीडयेदिति मृत्तिकास्नानासंभवे भौमादिपूर्वोक्तनिषिद्धदिने गृहे च मृत्तिकास्नानं जले नैव कुर्यादेतच्छक्तौ
अशक्तौ तु प्रातर्वत्स्नानमात्रं कुर्यादिति कमलाकरः अत्राप्यशक्तौ पूर्वोक्तपरिशिष्टप्रकारेण मंत्रस्नानं कुर्यात् स्मृ
तिरूपेणाहाचार्यः स्नानं वाह्णिकं चैव क्वचित्कर्तुं न शक्यते तत्रादौ ब्रह्मयज्ञार्थं मंत्रस्नानं विधीयत इति इदं म
ध्यान्हस्नानं प्रातःस्नानापेक्षया अत्यावश्यकमाश्वलायनानां अप आप्लुत्येति ब्रह्मयज्ञप्रकरणे तत्सूत्रे उक्तत्वा
त् इति मध्याह्नस्नानप्रयोगः अथ ब्रह्मयज्ञः तत्कालमाह बृहस्पतिः स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रात
राहुतेः वैश्वदेवावसाने वा नान्यदर्त्ते निमित्तत इति अत्र प्रातराहुतेः पश्चादिति शाखांतरविषयं आश्वलायनैस्तु
धनार्जनोत्तरकालमेव कर्तव्यतया उक्तत्वात्तदीयैस्तथैवानुष्ठेयं यदाह प्रातरेवाजयित्वैवमहायज्ञांस्ततश्चरेत्
स्वगृह्यविधिना कृत्वा ब्रह्मयज्ञं समाचरेत् ततो माध्यान्हिकीं संध्यां कृत्वा तु गृहमाविशेदिति तैत्तीरीयश्रुतौ म

नं विधाय तस्मिन्प्रागग्रे पवित्रे निधाय दक्षिणं पाणिं न्यंचं प्रागंगुलिं कृत्वा तेन संदध्यादित्यर्थ इति वृत्तिः यस्तु प
वित्रे लक्षणैर्युक्ते कृत्वाच्छिन्नाग्रता द्विके तयोरेकैकमेकैकपाणिनाधारयेत्पृथक् एवं पवित्रवंतौ द्वौ पाणी कृ
त्वा द्वयोरथ सव्यस्य पाणेरंगुष्ठप्रदेशिन्योस्तु मध्यतः दक्षिणस्यांगुलीर्न्यस्येच्च तस्यांगुष्ठवर्जिताः तथा स
व्यकरांगुष्ठं दक्षिणांगुष्ठवेष्टितं कुर्वंस्तच्चैवं संबद्धौ पाणी दक्षिणसक्थनि निधाय स्वस्य हृदये पश्यन् केवल
मंबरमिति शौनकोक्तो विशेषः स स्वसूत्रवृत्तिविरुद्धत्वादाश्वलायनैर्नादरणीयः दक्षिणसक्थिनिधानमा
त्रमविरुद्धत्वादपेक्षितत्वाच्च ग्राह्यं गृह्यं द्यावापृथिव्योः संधिमीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं म
न्येत तथा युक्तोऽधीयीत स्वाध्यायं मां पूर्वा व्याहृतयः सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वामिति तृतीयमिति प्र
णवमादौ सकृदुक्त्वा ततस्तिस्रो व्याहृतीः समस्ता ब्रूयादिति वृत्तिः तृतीया वृत्तौ धीमहि धियइत्यत्र सस्वरः सं
धिर्विस्वरो वेति रत्नमालायां प्रतिगायत्रीप्रणवव्याहृतिशंकानकार्या उपाकर्मण्येव तथा विधानात् ततो
ध्येतव्यमाह गृह्यकारः अथ स्वाध्यायमधीयीत ऋचो यजूंषि सामान्यथर्वांगिरसा ब्राह्मणानि कल्पा
गाथा नाराशंसीरितिहासपुराणानीति सूत्राण्येव कल्पा इत्युच्यते गाथा नाम ऋग्विशेषा इंद्रगाथादयः

१५२

दं तैत्तिरीयमात्रपरं अन्यथा बह्वृचस्य वैश्वदेवादावपि तदापत्तेः होष्यन्नित्युक्तेः सहोमकेष्वेव यज्ञेष्विदमिति केचिदित्युक्तं तत्पारिजातधृतस्मृतिसारवचनादर्शनमूलकमिति वक्तुं युक्तं स्मृतिसारवचनेन सर्वेषामविशेषेण तत्प्राप्तेः इदमत्र गृह्यं अथ स्वाध्यायविधिः प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवंतौ विज्ञायत इति महदिति बह्विन्त्यर्थः प्राक्कूलानां प्रागग्राणामित्यर्थः दक्षिणोत्तरेणोपस्थं कुर्यादपेत्वकत्वादिति वृत्तिः तेन पेत्वके सव्योत्तर्युपस्थं सिद्धं भवति स्मृतिरूपेणाहाचार्यः दक्षिणं चोपविश्योरुं वामगुल्फोपरि न्यसेत् वामोरौ दक्षिणं गुल्फं तच्चोपस्थमुदीरितं वामपादांगुष्ठोपरि दक्षिणपादांगुष्ठं निधाय पादपार्ष्णिमेलनेनोपस्थमिति पृथ्वीचंद्रोदयः इतरेतरपादव्यत्यासेनोपवेशने तदिति स्मृतिमंजर्यां मदनपारिजाते च अत्राद्यपक्ष एव सूत्रवृत्तिसंमतत्वादाश्वलायनानां मुख्यः द्वितीयस्तीरादौ स्थलसंकोचे योज्यः तृतीयस्त्वाश्वलायनातिरिक्तपरः दक्षिणः उत्तरः ययोः पाण्योस्तौ दक्षिणोत्तरौ पाणी पवित्रे प्रादेशमात्रे सव्यं पाणिं प्रागंगुलिं उत्ता

तीस्त्रिस्त्रः सावित्रींच तदित्यृचं मनसैतामनुस्मृत्य वेदादीन्त्समुपक्रमेदिति याज्ञवल्क्योपि वेदाथर्वपुराणानि
सेतिहासानि शक्तितः जपयज्ञप्रसिध्यर्थं विद्यामाध्यात्मिकीं जपेदिति मत्स्यहं वेदादिपाठो नास्तीति पृथ्वीचं
द्रः वेदादिपाठपक्षे यजुरादिः इषेत्वेत्यारभ्य कर्मण इत्यंतो यजुः अग्न आयाहि वीतय इति ऋ[illegible] क्सामा
दिः शंनोदेवीरभिष्टय इत्यृगथर्वादिः गोपथब्राह्मणे तथैव दर्शनात् गायत्रीपाठानंतरं अग्निमीळ इति
सूक्तं पठित्वा संहिताब्राह्मणषडंगानि एकं समाप्यापरमिति अध्यायं सूक्तमृचं वा यथाशक्ति क्रमशः पठेत्
मंत्रब्राह्मणादीनि भागशः सर्वाणि यथाशक्ति प्रतिदिनं पठेदिति केचिदिति धर्माब्धिसारः स्वशाखाध्ययनं
विप्र ब्रह्मयज्ञ इति स्मृत इति लैंगादनेकशाखाध्यायिनोपि स्वशाखामात्राध्ययनाद्ब्रह्मयज्ञसिद्धिरपरार्कः शा
खाध्ययनाभावे तैत्तिरीयब्राह्मणे एकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठत इति शौनकोपि ततो याव
त्वतिज्ञातं अध्यायं सूक्तमेव वा ऋचं वाप्यंततस्ततोवश्यमधीयीति स्वशक्तित इति अग्निस्मृतौ अवेदविन्महा
यज्ञान्कर्तुमिच्छंतु यो द्विजः ताख्याहृतिसंयुक्तां सावित्रीं त्रिः समुच्चरेदिति श्रुतिरपि ऋचमपि ब्रह्मयज्ञं कु

र्यादिति अस्मिन्पक्षे सावित्रीपर्यंतं सावित्र्या ब्रह्मयज्ञकमिति ऋग्विधाने अग्निमीळे जपेत्सूक्तं पापघ्नं श्रीकरं
परं पारायणफलं तस्य वेदानां स्यात्सहस्रशः मात्स्ये ब्रह्मयज्ञे जपेत्सूक्तं पौरुषं चिंतयन्हरिं स सर्वान्जपते वे
दांस्तां गोपागान्द्विजोत्तमः सूक्ताद्यन्यतमं पाठविशेषं शक्तितः पूर्वमभिसंधाय ब्रह्मयज्ञं कुर्यादिति तदुक्तं
शौनकेन यावतं मंत्रसंध्येतुं शक्यं स्वाध्यायमात्मनः तावंतमनुवाकं वा सूक्तं वर्गमथापि वा संकल्पम
नसा पूर्वमिममध्येष्य इत्यथेति कालविशेषेण स्वरविशेषमाह स एव मंद्रमेव जपेत्प्रातः मध्यं मध्यंदि
ने स्थिते उच्चैरेवापराण्ये तु संध्याकाल उपारमेदिति इदं नद्यादिविषयं ग्रामे चेद्विशेषः श्रूयते ग्रामे मनसा
स्वाध्यायमधीयीतेति अत्रर्ष्यादिस्मरणं निषिद्धं तदुक्तं कृष्णभट्टीये संग्रहे न च स्मरेदृषिं छंदः श्राद्धे वै
तानिके मखे ब्रह्मयज्ञे च वै तद्वत्तथोंकारं तु नोच्चरेदिति अत्र प्रणवोच्चारणनिषेधो मध्यविषयः सूत्रे आदा
वोंकारोच्चारणस्य विधानादंते पि परिधानीयां त्रिः पठित्वा प्रणवं वदेदिति श्रुत्या तस्य विधानात् आश्वलायन
स्तु ऋषिं छंदो दैवतं च विनियोगं तथैव च अविदित्वा जपेद्यस्तु महानर्थमवाप्नुयादिति ब्रह्मयज्ञे ऋष्यादि
स्मरणं कुर्यादित्याह एवं चर्ष्यादिस्मरणस्य विधिनिषेधोभयद्रूपत्वाद्विकल्प एव श्रेयान् अत एव पारिजा

नादयउभयविधाबहवः प्रयोगादृश्यंते इदानींतनशिष्टास्तुब्रह्मयज्ञेऋष्यादिस्मरणंनैवकुर्वंतीत्यकरण
पक्षएवसमी[redacted]ःचीनः अत्रानध्यायदोषोनास्तीत्याहमनुः वेदोपाकरणेचैवस्वाध्यायेचैवनित्यके नानु
रोधोस्त्यनध्यायेहोममंत्रेषुचैवहीति अनध्यायविशेषेष्वल्पपाठमाहापस्तंबः अथयदिवातोवावायात्स्तन
येद्वाविद्योतेतवास्फूर्जेद्वैकांवर्चमेकंवायजुरेकंवासामाभिव्याहरेदिति अनध्यायांतरेष्वप्यल्पपाठएवेतिसां
कामदनरत्नमदनपारिजाताः अनध्यायेस्वल्पंपर्वण्यल्पतरंपठेदितिदेवजातीये गृह्ये तस्यद्वावनध्या
यौयदात्माशुचिर्यद्देशः नस्यब्रह्मयज्ञस्यद्वावेवानध्यायौ यदात्माशुचिस्सूतकेनमृतकेनवामलादिनावा
यदाचदेशोशुचिः अमेध्यादिनातेनोभयत्रैवेत्यर्थइतिवृत्तिः पूर्वोक्तोपवेशनासंभवेएवंवाब्रह्मयज्ञंकु
र्यादितिश्रुतिमेवाहाचार्यः अथापिविज्ञायतेसयदितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधीतेते
नतेनहास्यक्रतुनेष्टंभवतीति नत्वंगाशक्याप्रधानंपरित्याज्यमित्यर्थइतिमाधवपारिजातौनशयानो
धीयीत नाष्टम्यामधीयीतेत्यादिनिषेधोनित्यस्वाध्यायस्यैव नब्रह्मयज्ञस्येतिश्रुतिरेवाहेतिवृत्तिः

१५४

यदिंद्राद्रो[redacted]दाशराज्ञइतींद्रगाथाः पंचर्चः नाराशंस्यश्चत्रृच एव इदंजनाउपश्रुतेत्यादयः इतिहासं महाभार
तं यत्रस्थित्युत्पत्तिप्रलयाः कथ्यंते तत्पुराणमितिवृत्तिः तत्रब्रह्मपुराणस्य प्राथमिकत्वात्तदादिश्लोकमारभ्यप
ठनीयमितिकेचित् अन्येतुवारुणींजपित्वावारुण्याजुहुयादितिसूत्रव्याख्यानेअत्राविशेषाद्येकेचनवारु
ण्योभवतइतिवृत्तिकदुक्तत्वातद्वदत्रापिपुराणेषुयत्किमपिपुराणंपठनीयं अतएवश्रीमद्भागवताद्यश्लोक
मेवपठंतिशिष्टागृह्यंसयावन्मन्येततावदधीत्येतयापरिदधाति नमोब्रह्मणे॰ करोमीति ऋगादीनांदश
कमध्येतव्यमित्युक्तं तत्रनियमेनदशानामृगादीनामध्ययनेप्राप्तेइदमुच्यते सयावत्कालमेकाग्रमनस
मात्मानंमन्येततावत्कालमेवाधीयीतनदशैवेतिनियमः सर्वदासमाहितमनसैवाध्येतव्यमितिनियमइत्य
र्थः परिधानीयायाश्चत्रिःपाठइतिवृत्तिः अत्रविशेषंआचारसारेआहव्यासः वेदमादौसमारभ्ययथोप
र्युपरिक्रमात् यदधीतेन्वहंशक्त्यास्वाध्यायंतंप्रचक्षते उपर्युपरीतिप्रथमेन्हिवेदादीन्पठित्वातदुत्तरं
किंचिद्वेदभागंपठेत्तदन्यदिनेषुवेदादिंपठित्वातदुत्तरान्वेदभागान्पठेदितिचंद्रिकाविष्णुरपि ॐकारंव्याहृ

आचा०दु
१५५ र्ब्रह्मेत्यादि कारिकापि अपांसमीपमागत्य तर्पयेदथदेवताः एवमंतानितृप्यंत्वित्यंतैश्चप्रतिमंत्रकं सिं
चेत्प्रजापतिस्तृप्यत्वित्यपोदेवतीर्थतः धातुस्तृप्तिर्यथालिंगंमंत्रांतेष्वप्रयुज्यते अत्रद्यावापृथिवीतृप्यत
लोटः प्रथमपुरुषद्विवचनंप्रयोक्तव्यं तृप्येतामितिलोटात्मनेपदंप्रयुंजतेप्रांचः तदशुद्धं तृप प्रीणनइत्य
स्यधातोः परस्मैपदित्वात् नचपरस्मैपदंनभवेदितिवाच्यं येचान्येआचार्यास्तेसर्वेतृप्यंत्वितिवक्तुराश्वला
यनस्यलोटप्रयोगस्यैवविवक्षितत्वात् तथा मंत्रैः शतर्चिनस्तृप्यंत्वित्यादिभिरतःपरं प्रतिमंत्रंनिवीतीतु
तर्पयेदृषितीर्थतः प्राचीनावीत्यथेदादनींतर्पयेत्पितृश्च।तीर्थतः सुमंत्वित्यादिभिर्मंत्रैः प्रतिमंत्रंचपूर्वव
त् द्वितीयांत्येषुमंत्रेषुतर्पयामिपदंवदेदितिअन्वारब्धेनसव्येनपाणिनादक्षिणेनतुतृप्यतामितिसेक्तव्यंना
म्नातुप्रणवादिनेतियोगयाज्ञवल्क्योक्तः सर्वत्रतृप्यतामितिप्रयोगः अथाद्भिस्तर्पयेद्देवान्सतिलाभिः पि
तॄन पितामातेतर्पयामीति आदावोमितिचब्रुवन्निति कात्यायनोक्तस्तर्पयामीतिप्रयोगश्चस्वसूत्रवृत्तिकारि १५५
काविरुद्धत्वादाश्वलायनैर्नादर्तव्यः आश्वलायनानांतर्पणस्यब्रह्मयज्ञांगत्वात्तत्रप्रणवनिषेधातेयांतर्पणे च
प्रणवाद्यनापिनभवति शिष्टाचारोप्येवं दृष्ठ्ययाज्ञवल्क्यः अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु सव्यान्न

राभ्यां पाणिभ्यामथवा तर्पणं भवेति  अत्र पूर्वार्द्धं बह्वृचान्प्रत्युत्तरार्धमन्यान्प्रतिबोध्यं दक्षिणं प्रतीयादन्वादेश
इत्याश्वलायनसूत्रात्तेषां केवलदक्षिणांगप्रसक्तौ अन्वारंभरूपेतिकर्तव्यतायाः सूत्रानुक्तायाअप्यविरोधेन स्मृ
तौ ग्रहणे बाधकाभावात्  स्मृतिप्राप्ततीर्थग्रहणादेर्वृत्तिकृत्संमतत्वाच्चेत्याचारार्कादयः  मम तु  आसनं
वा सर्वत्रैवं भूतो वचनादन्यदिति सूत्रवृत्तौ उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं तावन्मात्रस्यैव न तत्संब
धिनोन्यस्यापीति तेन होमादौ क्रियमाणे दक्षिणपाणेरपायेपि सव्योहृदयान्नापैतीति सिद्धमित्युक्तेः  स
व्यपाण्यनन्वारब्धदक्षिणपाणिनैव तर्पणमाश्वलायनानामिति भाति  ननु श्रौतसूत्रे उक्तस्यास्य कथं गा
र्ह्ये प्राप्तिरिति चेत्संबधकरणेन दक्षिणांगादिपरिभाषायथाप्राप्त्यं तेन तद्वदस्यापि परिभाषात्वादेव प्राप्तिरिति
व क्तुं युक्तमेवेति  देवादितीर्थान्याचमनविधौ पूर्वमुक्तानि तर्पणे प्राङ्मुखत्वं तेव अस्य ब्रह्मयज्ञांगत्वान्न
व प्राङ्मुखतायानियमात्  यत्तु  प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् उदङ्मनुष्यांस्तर्पयेत पितॄन्द
क्षिणतस्तथेति दक्षोक्तो विशेषः स स्नानांगतर्पणपरः स्थलस्थो भूमावेव तर्पणं कुर्यान्न जलादौ  तथा च विष्णुः

आचा०दु

१५५ स्थलेस्थितोजलेयस्तुप्रयच्छेदुदकंनरः नोपतिष्ठतितद्वारिपितॄणांतन्निरर्थकमिति आर्द्रवासाजलेकुर्यात्तर्प
णाचमनंजपं शुष्कवासास्थलेकुर्यात्तर्पणाचमनंजपमितिहारीतोक्तेः भूमावपिविशेषस्तत्रैव वसित्वाव
सनंशुष्कंस्थलेविस्तीर्णबर्हिषिविधिज्ञस्तर्पणंकुर्यान्नपात्रेषुकदाचन पात्राद्वाजलमादायशुभेपात्रांतरे
क्षिपेत् जलेपूर्णेथवागर्तेनस्थलेतुविबर्हिषीतिकुशास्तरणेविशेषउक्तः आग्नेयपुराणे प्रागग्रेषुसुरांस्त
र्प्येन्मनुष्यांश्चैवमध्यतः पितॄंस्तुदक्षिणाग्रेषुचैकद्वित्रिजलांजलीनिति यत्तुपुनरशुचिस्थलंतत्रजलेद
द्यादित्याहविष्णुः यत्राशुचिस्थलंवास्यादुदकेदेवताःपितॄन् तर्पयेत्तुयथाकाममप्सुसर्वंप्रतिष्ठितमिति
मदनस्तु वस्त्रंपरिधायाद्भिरेवाप्सुयथोत्तरंदेवान्पितॄंस्तर्पयेदितिबौधायनेनजलएवतर्पणविधानात्स्थ
लस्थस्यानुद्धृतजलेनतर्पणेजलस्थलयोरधिकरणयोर्विकल्प[illegible]इत्याह आचारप्रकाशेतु जलमध्येज
लक्षेपोगंगादिषुविधीयते ह्रदादिषुतटक्षेपोनजातुजलमध्यतइतिस्कांदवचनाद्व्यवस्थोक्ता करणपा १५५
त्रमाहछागलेयः लघुपात्रंकरेकृत्वासौवर्णंखड्गमेववा राजतंताम्रजंवापितेनसंतर्पयेपितॄन् अत्रशक्तौ

अथब्रह्मयज्ञप्रशंसामहोपेगीनसिः स्वशाखायनंयतब्रह्मयज्ञंप्रचक्षते ब्रह्मयज्ञपरोमर्त्योब्रह्मलोकेमहीय
ये वेदाभ्यासोयथाशक्त्याब्रह्मयज्ञक्रियाक्षमः नाशयत्याशुपापानिमहापातकजान्यपि ब्रह्मयज्ञपरोमर्त्योब्र
ह्मयज्ञपरायणः ब्रह्मलोकमवाप्नोतिनचेहाजायतेपुनः ब्रह्मयज्ञेनतुष्यंतिसर्वेदेवाःसवासवाः याज्ञवल्क्यो
पि यंयंक्रतुमधीयीततस्यतस्याप्नुयात्फलं त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुतइति ब्रह्मयज्ञजपानं
तरंकरस्थपवित्रेस्योत्तरतस्यजपेत् तदुक्तंपारिजातेस्मृत्यंतरे कुशावुत्तरतःक्षिप्त्वातथाचमनमाचरेदि
ति कातीयसूत्रप्रयोगेपि यथाशक्तिपठित्वांतेॐस्वस्तीत्युक्त्वोदीच्यांदर्भान्निरस्येदिति नचाश्वलायना
नांतर्पणस्यब्रह्मयज्ञांगत्वोक्तेस्तत्तर्पणसमाप्त्यंतंब्रह्मयज्ञजपकालगृहीतेपवित्रेएवग्राह्येइतिवाच्यं ब्रह्मय
ज्ञेचयेदर्भायेदर्भाःपितृतर्पणे हतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयतइतिब्रह्मयज्ञतर्पणयोर्दर्भाणांभिन्नत्वो
क्तेः कुशाग्रैस्तर्पयेद्देवानितितर्पणदर्भाणांबहुत्वोक्तेः तर्पणादीनिकार्याणिपिपितॄणांयानिकानिचित् तानि
स्युर्द्विगुणैर्दर्भैःसमपत्रैर्विशेषतइतिहेमाद्रौनारदीयाच्चेति अथतर्पणं तत्रगृह्यंदेवतास्तर्पयतिप्रजापति

तइति पाद्मे देवान्ब्रह्मऋषीन्सर्वांस्तर्पयीताक्षतोदकैः अक्षतायवइतिकेचन व्रीहितंडुलाइत्यन्येस्मृ
त्यंतरे अद्भिस्तंडुलमिश्राभिर्देवानांतर्पणंभवेत् सयवाभिऋषीणांस्यात्पितृणांसतिलोदकैरिति गो
भिलस्तु देवादितर्पणेवर्णभेदेनतिलानेवाह शुक्लैस्तुतर्पयेद्देवान्मनुष्यान्छबलैस्तिलैः पितॄंस्तुतर्प
येत्कृष्णैस्तर्पयेत्सर्वदाद्विजः स्मृतिसारे जलांतेतिलदर्भादीन्नानुष्ठानाय थाचयेत् जलांतेतीरे अ
र्थादन्यत्र याचनेनदोषः अस्यापवादः कमलाकराह्निके देवातिथ्यर्चनकृतेगुरुभृत्यादिहेतवे सर्व
तःप्रतिगृह्णीयात्तत्रदोषोनविद्यतइति तिलग्रहणेविशेषमाहयोगयाज्ञवल्क्यः पद्युत्धृतंनिषिं
तुतिलांस्तंमिश्रयेज्जले अतोन्यथातुसव्येनतिलाग्राह्याविचक्षणैरिति अन्यथाअनुत्धृतेनतर्पणे
सव्येनेतिअधिकरणेएनप्रत्ययःनतृतीयासव्यपाणौतिलांस्थापयेदित्यर्थः दक्षहस्तांगुष्ठतर्जन्यो
रन्यतरेणवामहस्तस्थतिलग्रहणं अथवायेषांशाखिनांएकहस्तेनतर्पणंतेषांसव्येनैवतिलग्रहण १५७
मितिज्ञेयं अस्मिन्पक्षेसव्येनेतिकरणेतृतीया सव्यहस्तेतिलस्थापनेविशेषोगोभिले रोमसंस्थांस्ति

ञान्कृत्वा यस्तु तर्पयते पितॄन् पितरस्तर्पितस्तेन रुधिरेण मलेन चेति स्मृत्यर्थसारे वामहस्ते तिला
न्क्षिप्त्वा जलमध्ये तु तर्पयेत् स्खलेशात्स्यां तरे पात्रे रोममूलेन कुत्रचित् अथ तिलतर्पणनिषेधकाल
माह बोपदेवः भामेर्केभृगुजे मघा गृहनिशासप्तम्य नंगाह्वया नंदाजन्मदिनेषु संधियुगुले नो तर्पय
स्यात्तिलैः नोद्वाहव्रतचौलवृद्धिषु समाधौ पक्षिमास्त्रिणे नतुत्र्पणामितिसेकव्यं नान्वातुअणधी
दिने धैक मासंक्रमान्नोदुष्ये तु मृतौ महालयगयापुण्याहतीर्थादिषु संग्रहे नंदायां भार्गवदिने
कृत्तिकासु मघासु च भरण्यां भानुवारे च गजच्छायाह्वये तथा अयनद्वितये चैव मन्वादिषु पिंड
दानं मृदा स्नानं न कुर्यात्तिलतर्पणमिति इदं संग्रहवचनद्वयं चिंत्यमिति कमलाकरः मन्वादयउ
क्ता मत्स्यपुराणे आश्वयुक् शुक्लनवमी कार्तिकी द्वादशी सीता तृतीया चैत्रमासस्य तथा भाद्रपद
स्य च फालगुनस्य त्वमावास्या पौषस्यैकादशी सिता आषाढस्यापि दशमी माघमासस्य सप्तमी
श्रावणस्याष्टमी कृष्णा आषाढस्यापि पौर्णिमा कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी सिता म

न्वंतरादयश्चैतेदत्तस्याक्षयकारकाइति युगादयउक्ताविष्णुपुराणे वैशाखमासस्यचयात्तृतीयानवम्य
सौकार्तिकशुक्लपक्षे नभस्यमासस्यचकृष्णपक्षेत्रयोदशीपंचदशीचमाघइति हलायुधीये द्वादश्यां
निशिसप्तम्यांरविशुक्रदिनेनथ्या श्राद्धेजन्मदिनेचैवनकुर्यात्तिलतर्पणमिति एतेसर्वेपिनिषेधास्तिल
मात्रपराः नतुनित्यतर्पणपराःअन्यथातिलतर्पणपदवैयर्थ्यापत्तेः अत्रमहेशादयः सर्वेतिलतर्प
णनिषेधाःगृहविषयाःसप्तम्यांरविवारेचजन्मर्क्षदिवसोत्सवे गृहेनिषिद्धंसतिलंतर्पणंतद्बहिर्भवेत्
इतिसत्यव्रतेनिषिद्धदिनेषुबहिस्तर्पणविधानादित्याहुः अन्येतुगृहस्यपृथगेवतिलतर्पणनिषिद्धनिमि
त्ततेतिसर्वदैवसतिलंतर्पणंगृहेनिषिद्धमितिव्याचक्षते अपरेतु गृहेपितिलोदकेनशिष्टानांतर्पणा
चारदर्शनात्सत्यव्रतोक्तेःसप्तम्यादिकालत्रयएवगृहेसतिलतर्पणनिषेधःस्वारसिकःनतुसर्वदाना
पिनिषिद्धकालांतरेउपलक्षणत्वेप्रमाणाभावात् अन्यथाप्रतिप्रसववाक्यानांगृहएवतर्पणविधानेता
त्पर्यंवक्तव्यमितिमहदनिष्टं तथाहि अयनेविषुवेचैवसंक्रांतौग्रहणेषुच उपाकर्मवृषोत्सर्गेयुगादौ १५८

पात्रं देवादितीर्थयोः समुच्चयः अशक्तौ केवलदेवादितीर्थेन अधिकरणपात्रमाह पितामहः हेमरूप्यमयं पात्रं
ताम्रं कांस्यसमुद्भवं पितॄणां तर्पणे पात्रं मृन्मयं तु परित्यजेदिति स्मृत्यंतरे खड्गमौक्तिकहस्तेन कर्तव्यं पितृत
र्पणं मणिकांचनदर्भैर्वा नशुद्धेन कदाचन शुद्धेन रिक्तेन योगयाज्ञवल्क्यस्तु अनामिकाधृतं हेम तर्ज
न्यां रूप्यमेव च कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः मरीचिरपि विना रौप्यसुवर्णेन विना ताम्रतिलै
स्तथा विना मंत्रैश्च दर्भैश्च पितॄणां नोपतिष्ठतइति नचात्र समुच्चयो नापि समविकल्प इत्यभिप्रेत्यस
एवाह तिलानामप्यभावे तु सुवर्णरजतान्वितं तदभावे निषिंचेत् दर्भैर्मंत्रैश्च वा पुनरिति स्मृतिदीपिकायां
राजते मनसा यातिसुवर्णे हस्तनिःसृतं द्विमुहूर्तेन ताम्रे तु आश्वेव तु तिलोदके आशु शीघ्रेण दर्भैः समसुद्
र्तेन मंत्रमुक्तं तथाक्षयमिति द[illegible]र्भेषु विशेषः स्मृतिभास्करे कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः द्वि
गुणीकृतमूलाग्रैः पितॄन्संतर्पयेद्द्विजइति भृगुस्तु ऋषितर्पणे उदगग्रतामाह प्रागग्रैस्तर्पयेद्देवानुदगग्रै
स्तु मानुषान् तानेव द्विगुणीकृत्य तर्पयेच्च यतः पितॄनिति तानेवेति देवर्षितर्पणयोग्यतेत्युक्तमिति हेमाद्रिः
दर्भसंख्यामाह नारदः तर्पणादीनि कार्याणि पितॄणां यानि कानि चित् तानि स्युर्द्विगुणैर्दर्भैः सप्तपत्रैर्विशेष

उदाहृतः ऋभिस्तर्पणेनित्येनैमित्तंनतुबाधतइति अत्रतिथ्यादिनिषेधास्तात्कालिकाः निषेधस्तुनिवृत्यु
त्माकालमात्रमपेक्षतइतिवचनात् आन्हिकचंद्रिकायांतुगृहेतिलतर्पणनिषेधः पृथक्तिलाभिप्रायो
ज्ञेयइत्युक्तं यज्ञोपवीतादेर्लक्षणमाहभरद्वाजः दक्षिणंबाहुमुत्धृत्यवामस्कंधेनिवेशितंयज्ञोपवीत
मित्युक्तंदेवकार्येषुशस्यते कंठावलंबितंचैवब्रह्मसूत्रंयदाभवेत् तन्निवीतमितिख्यातंशस्तंकर्म
णिमानुषे उत्क्षिप्तेवामबाहौचदक्षिणस्कंधमाश्रितं प्राचीनावीतमित्युक्तंपित्र्येष्वेवकर्मसु
जीवत्पितृकंप्रत्याहवृद्धगार्ग्यः नकुर्वीतापसव्यंचनकुर्वीतापिमुंडनं अपसव्यनिषेधःप्रकोष्ठादुप
रि अपसव्यंद्विजाग्र्याणांपित्र्येसर्वत्रकीर्तितं आप्रकोष्ठात्प्रकर्त्तव्यंमातापित्रोस्तुजीवतोरितिवच
नादित्युक्तंजीवत्पितृकनिर्णयेभट्टैः प्रकोष्ठस्तस्यचाप्यधइत्यमरः तस्यकूर्परस्याधःमणिबंधपर्यं
तंप्रकोष्ठइत्यर्थः अस्यकृष्णतिलतर्पणनिषेधमाहव्यासः नजीवत्पितृकःकुर्यात्तिलैःकृष्णैश्चतर्प
णमिति कात्यायनः दक्षिणंपातयेज्जानुदेवान्परिचरन्सदा पातयेदितरज्जानुपितॄन्परिचरन्नपि 

नैततर्पणैकविषयंसदेतिवचनात् आचारसारेपुलस्त्यः मनुष्यतर्पणंकुर्वन्नकिंचिज्जानुपातयेत् जा
नुनिपातनंउपस्थस्योत्तानत्वाविरोधेनकर्त्तव्यमितिपूर्वमुक्तमेव अंजलिसंख्यामाहव्यासः एकैकमं
जलिंदेवान्द्वौद्वौतुसनकादकः अर्हंतिपितरस्त्रींस्त्रीन्स्त्रीः यस्त्वेकैकमंजलिमिति अत्रपितृशब्देनम
नुष्यपितरोदिव्यपितरश्चसंगृहीताइतिचंद्रिका अत्रस्त्रीपदंमात्राद्यतिरिक्तपरं मातृमुख्यास्तुयास्ति
स्रस्तासांत्रींस्त्रीन्जलांजलीन् सपत्न्याचार्यपत्नी[redacted]नांद्वौद्वौदद्याज्जलांजलीइतियमोक्तेः मातुः
स्त्रीनंजलीन्दद्यादन्यासामेकमंजलिमित्याचारत्नोक्तेश्च सपत्नीसपत्नमाता आचार्यपत्नीउपनीय
ददद्वेदमाचार्यःसउदाहृतइतिलक्षणोक्तस्तस्यपत्नीमातामह्यादीनामप्यंजलित्रयंदेयं मातृमुख्या
श्चयास्तिस्रोमातामह्यादयश्चयाः अंजलित्रयमेतासां अन्यत्रैकैकमंजलिमितिस्मृत्यंतरोक्तेः पितृ
णांमातामहानांचांजलित्रयं पितॄणांप्रीणनार्थायत्रिरपःपृथिवीपते पितामहेभ्यश्चतथाप्रीयेत
प्रपितामहान् मातामहायतत्पित्रेतत्पित्रेचसमाहितइतिविष्णुपुराणादितिपृथ्वीचंद्रोदये अयंच

१६० संख्याविशेषःआश्वलायनानांवैकल्पिकः तत्सूत्रे संख्यानुक्तेः येषांसूत्रे संख्योक्तिस्तेषांनित्यइतिमाधवःहे
माद्रिश्च अथतर्पणीयपितरःआहबोपदेवः तातांबात्रितयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्री
त्तनयादितातजननीस्वभ्रातरःसस्त्रियः ततांबात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुः शिष्
प्ताःपितरोमहालयगयातीर्थेतथातर्पणे अत्रसस्त्रीतिमातामहादित्रयस्यविशेषणं मतामाहाः
सपत्नीकाइतिस्मृतेः तत्स्त्रीत्यपिक्वचित्पठ्यतेतत्रमूलं अथमातामहीनांचेतिगारुडवचनंज्ञेयं
बोपदेवोक्तक्रमेतु पूर्वंपित्रादयस्तत्पत्न्यास्ततोमात्रादयोपिच ततोमातामहाश्चैवमातामह्यस्ततःपर
मित्यादिव्यासादिवचांसिमूलभूतानिसंतीतिनिर्मूलताशंकानकार्या यत्तुस्मृत्यंतरेक्रमांतरमुपलभ्य
ते तन्नैच्छिकोविकल्पोभविष्यतिसस्त्रियइतिस्त्रीपदंस्त्र्यपत्ययोरुपलक्षणंतेनपितृव्यंसपत्नीकंसाप
त्यमित्यादिप्रयोगःपितृभगिनींमातृभगिनीमितिषष्ठ्याःलुक्प्रयोगंकुर्वंतिबहवः तन्न ऋतोविद्यायो १६०
निसंबधेभ्यइत्यनेनयोगिसंबधेषष्ठ्याअलुक्विधानात् पितुर्भगिनींमातुर्भगिनीमित्येववाच्यं अत्रपितृ

मृतवासरे निषिधेपिहि सर्वत्रतिलैस्तर्पणमाचरेद् दित्यादिवचनैर्भवन्मते गृहे निषिद्धतर्पणस्य पुनः आप
गेन संनिहितेपि महातीर्थे गृह एव तर्पणं स्यात् किंच जान्हव्यादेर्निषेधस्याप्रामत्वाद्विशेषतस्तु जान्ह
व्यां सर्वदा तर्पयेत्पितृन् न कालनियमस्तत्र क्रियते सर्वकर्मसु तिथितीर्थविशेषे च गंगायां प्रेतपक्ष
के निषिद्धेपि दिने कुर्यात्तर्पणे तिलमिश्रितमिति स्कांदाद्युक्तप्रतिप्रसवोप्यनुपपन्नः स्यादित्याहुः ति
लतर्पणनिषेधप्रतिप्रसवमाह गोभिलः संक्रांत्यादिनिमित्तेषु स्नानांगे तर्पणे तथा तिथिवारनिषेपि ति
लैस्तर्पणमाचरेदिति अत्र संक्रांतिरयनभिन्ना पूर्ववचने पितृग्रहणं पितृव्यादिश्राद्धसंग्रहार्थं
अमावास्याग्रहणं सकलश्राद्धतिथेरुपलक्षणं इति पारिजाते पूर्वोक्तवचने तिथिविशेषः अष्टकाकपि
लाषष्ठ्यादिः तीर्थविशेषशब्देन यस्य तीर्थस्य समीपे निवसति तद्व्यतिरिक्तं तीर्थं ग्राह्यं अन्यथा तीर्थ
इत्येतावतैव सिद्धो विशेषपदवैयर्थ्यापत्तेः एतच्च गंगातिरिक्तपरं नस्य पुनर्ग्रहणात् गंगा च पंचधेति पू
र्वमुक्तं उपरागे पितुः श्राद्ध इति पूर्वोक्तकातीयवचनं परे द्युः स्मृत्यर्थसारे तिथिवारसमायोगान्निषेधोय

कर्मतन्त्रेण साध्यातथाच द्वित्वादिसंख्यांजलिकरणकतर्पणस्यैकत्वात्सकृदेव मंत्रः व्रीह्यवयातमंत्रवत्
आचारार्के तु संध्यार्घ्यदानवन्मंत्रावृत्तिरित्युक्तं तन्न अर्घ्यदाने मंत्रस्य द्रव्यसंस्कारकतायाः करा
भ्यां तोयमादाय गायत्र्या चाभिमंत्रितमिति व्याससमृतावभिधानाद्द्रव्यभेदान्मंत्रावृत्तिरिति वैषम्यं अ
स्तु वा येषां सूत्रे द्विस्तर्पयेत्त्रिस्तर्पयेदित्युक्तं तत्रोत्पत्तिवाक्यगतायाः संख्यायास्ति स्र आहुती र्जुहोतीति
वत्कर्मभेदकत्वात्तर्पणभेदे तदावृत्तौ तदंगमंत्रस्याप्यावृत्तिः आश्वलायनानां तु सूत्रे संख्यानुक्तत्वा
न्न मंत्रावृत्तिः एकमंत्राणि कर्माणीति नारायणवृत्तौ कपर्दिसूत्रन्यायोक्तेरिति आचाररत्न आचारसा
रे चैवमित्यलंम् आवृत्तिपक्षे अस्मदित्यादितर्पयामीत्यंतस्यावृत्तिः केचित्तु स्वधानमस्तर्पयामीति म
त्रैकदेशस्यैवावृत्तिं कुर्वंति तत्प्रमाणाभावादुपेक्ष्यं अत्रावसानांजलिमाह कात्यायनः पितृवंश्या मा
तृवंश्या ये चान्ये मत्त उदकमर्हंति तांस्तर्पयामीत्यवसानांजलिरिति विस्तरेण कर्तुमसमर्थस्य संक्षेपे
ण तर्पणमुक्तं स्मृत्यंतरे आब्रह्मस्तंबपर्यं० दिदस्तुतिलोदकं एकंजलांजलिं दद्यात्कुर्यात्संक्षिप्ततर्प

णमिति आचारार्के तु अस्यैवावसानांजलित्वमुक्तं तत्किंमूलकमिति न विद्मः प्रकारांतरंउक्तं विष्णुपुरा
णे आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन् क्षिपेत्त्रयोंजलींस्त्रींस्तु कुर्यात्संक्षिप्ततर्पणमिति स्व
पितृतर्पणस्यापिसंक्षेपउक्तो वृत्तिकारेण प्रतिपुरुषंपितॄंस्तर्पयित्वागृहाणेत्ययद्दाति सादक्षिणा
पितरंपितामहंप्रपितामहंचतर्पयित्वागृहाणेत्ययद्ददाति अतिथिभोजनभिक्षादानादि साब्रह्मयज्ञ
स्यदक्षिणाभवति सदक्षिणत्वंब्रुवता सोमया गसाम्यमस्यदर्शितमिति दक्षिणाविषये श्रुतिरपि गृ
हाणेतिततोयत्किंचिद्ददाति सादक्षिणेति सेयंदक्षिणागृहएव नत्वरण्यइत्यर्थ इतिपारिजाते तर्पणा
करणेप्रत्यवायःपुराणेदर्शितः देवताश्चपितॄंश्चैव मुनीन्चायोनतर्पयेत् देवादीनामृणीभूत्वा नरकंप्रति
पद्यतेइति द्विगुणीकृतदर्भत्यागेमंत्राविशेषउक्तः स्मृतिरत्नावल्यां येषांपितानन० स्तथेति अथति
थिविशेषकर्तव्ययमतर्पणविद्धिः वृद्धमनुः दीपोत्सवचतुर्दश्यांकार्यंचयमतर्पणं कृष्णांगार
चतुर्दश्यामपिकार्यं सदैवहीति अथभीष्मतर्पणंव्यासः शुक्लाष्टम्यांतुमाघस्यदद्याद्भीष्माययो

१५२ जलं संवत्सरकृतं पापं तत्क्षणादेव नश्यतीति एतच्च ब्राह्मणस्य न भवतीति मदनपारिजाते योगयाज्ञव
ल्क्योपि सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव चेति ततआचम्य पवित्रदर्भविसर्जनं कुर्यात् तथा चोक्तं
स्मृतिरत्नावल्यां विकिरे पिंडदाने च तर्पणे स्नानकर्मणि आचांतः सन्प्रकुर्वीत दर्भसंत्यजनं बुध इति व
स्त्रनिष्पीडनमाह पराशरः निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितं न पूर्वं तर्पणाद्वस्त्रं नैवाभसिन पाद
योः निष्पीडनं स्थले कार्यं तदुक्तं स्मृत्यंतरे वस्त्रनिष्पीडितं तोयं श्राद्धे चोच्छिष्टभोजिनां भागधेयं श्रुतिः
प्राह तस्मान्निष्पीडयेत्स्थल इति तथा धौतवस्त्रमपीड्येत ऊर्ध्वपल्लवसंयुतं पल्लवाधो न पीड्येत पी
डिते त्वशुचिर्भवेदिति वस्त्रनिष्पीडनं ये के चास्मदिति मंत्रेण प्राचीनावीतिना कार्यमिति प्रातःस्नानवि
धौ परिशिष्टे पूर्वमुक्तं यत्तु मनुष्यतर्पणे चैव स्नानवस्त्रनिपीडने निवीती तु भवेद्विप्रस्तथा मूत्रपुरीषयो
रिति तच्छाखांतरविषयं गृहस्नानादौ वस्त्रनिष्पीडनं न कुर्यात् आह मदनरत्ने पराशरः द्वादश्यां पंचद १५२
श्यां च संक्रांतौ श्राद्धवासरे वस्त्रं निष्पीडयेन्नैव न च क्षारेण योजयेदिति गृहे वस्त्रनिष्पीडननिषेधः

पत्न्यः सर्वा मातरः तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि
इति सुमंतुवचनात् सापत्नमातुलादीनामपि स्वमातुलाद्यनंतरं तर्पणं केचिदाहुः प्रयोगे विशेषमाह व
सिष्ठः संबंधमनुकीर्त्यैव नाम गोत्रमनंतरं वस्वादिरूपं संकीर्त्य स्वधाकारेण तर्पयेदिति योगयाग
वल्क्यः गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः इति यद्यपि स्मृतिषु क्वचिन्नाम्नः प्राथम्यं क्वचिद्गोत्र
स्येति द्वैविध्याद्विकल्प एव न्याय्यस्तथापि बह्वृचानां गोत्रोच्चारः पूर्वं ततो नामोच्चारः तस्य गोत्रं नाम च
गृहीत्वेति तद्गृह्य उक्तत्वात् आचाररत्ने कमलाकरे चैवं नामग्रहणे विशेषमाहाश्वलायनः शर्मां
तं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य त्विति निर्णयसिंधौ सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता यथा का
श्यपसगोत्रमिति गोत्रसगोत्रयोः पर्यायत्वाच्छाखाभेदेन व्यवस्थेति तत्रैव अस्मत्पितरं काश्यपगो
त्रं विष्णुशर्माणं स्वधा नमस्तर्पयामीत्यादि प्रयोगो द्रष्टव्यः अत्रांजलिनानात्वेपि मंत्रो नावर्तते त्रस्य
तर्पणकरणत्वेनांजल्यनंगत्वात् अंजलीनिति द्वितीयांतु सक्तून्जुहोतीत्यत्र सक्तूनिति वत्धात्वर्थ

रिष्ये इति संकल्प्य विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीत्यप उपस्पृश्य वामजानूपरि दक्षिणपादं निधाय
सव्यं पाणिं प्रागंगुलिमुत्तानं दक्षिणं जानुशिरसि निधाय तस्मिन्प्रादेशमात्रौ कुशौ निधाय तत्र दक्षिणपाणिं
न्यंचं प्रागगुलिं संधाय समाहितमनाः मनसा गृहे अन्यत्र मध्यमेन स्वरेण पठेत् ॐ भूर्भुवः स्वः तत्सवि
तुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् तत्सवितु० यो यो० तत्सवितुर्वरेण्यं० धीमहि
धियो यो नः प्रचोदयात् अग्निमीळेपुरोहितं० स्वस्तये इषेत्वोर्जेत्वा वायवस्थोपायवस्थ देवो वः सवि
ता प्रार्पयतु श्रेष्ठतमाय कर्मणे अग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि बर्हिषि शं
नो देवीरभिष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः अग्निर्वै देवानामवमो विष्णुः परमः अथैतस्य
समाम्नायस्य यदिंद्रादो दाशराज्ञे मानुषं व्यगाहथाः इदं जना उपश्रुत नारायणं नमस्कृत्य नरं चैव नरो
त्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् जन्माद्यस्य यतोन्वयादितरतः श्चार्थेष्वभिज्ञः स्वराट् तेने 
हृ ब्रह्महृदाय आदिकवये मुह्यंति यत्सूरयः तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वे
न सदा निरस्तकुहकं सत्यं परं धीमहि नमो ब्रह्मणे० करोमि इति त्रिरुच्चार्य ॐ इत्युक्त्वा वृष्टिरसि वृश्च

मे पाप्मान मृतात्सत्य मुपागां इत्यप उप स्पृश्य करस्थ पवित्रे स्वोत्तर तस्त्यजेत् ततो दक्षिणजानु संपा
त्य स तंडुलानि रद्भिः त्रिभिः कुशाग्रैः नद्यादौ जले अन्यत्र ताम्रादि पात्रे सव्यान्वारब्ध दक्षिणपाणिना न तर्प
येत् प्रजापतिस्तृप्यतु ब्रह्मास्तृप्यतु वेदास्तृप्यंतु देवास्तृप्यंतु ऋषयस्तृप्यंतु सर्वाणि छंदांसि तृप्यं
तु ओंकारस्तृप्यंतु वषट्कारस्तृप्यंतु व्याहृतयस्तृप्यंतु सावित्री तृप्यतु यज्ञास्तृप्यंतु द्यावापृथिवी तृ
प्यतां अंतरिक्षं तृप्यतु अहोरात्राणि तृप्यंतु सांख्यास्तृप्यंतु सिद्धास्तृप्यंतु समुद्रास्तृप्यंतु नद्यस्तृ
प्यंतु गिरयस्तृप्यंतु क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु नागास्तृप्यंतु वयांसि तृप्यंतु गाव
स्तृप्यंतु साध्यास्तृप्यंतु विप्रास्तृप्यंतु यक्षास्तृप्यंतु रक्षांसि तृप्यंतु भूतानि तृप्यंतु एवमंतानि तृप्यं
तु इत्येकोनत्रिंशन्मंत्रैर्देवतीर्थेनैकैकवारं तर्पणं कुर्यात् ततो निवीती ऋषितीर्थेन कुश मध्य मः सय
वाभिरद्भिः शतर्चिनस्तृप्यंतु माध्यमास्तृप्यंतु गृत्समदस्तृप्यतु विश्वामित्रस्तृप्यतु वामदेवस्तृप्यतु
अत्रिस्तृप्यतु भरद्वाजस्तृप्यतु वसिष्ठस्तृप्यतु प्रगाथास्तृप्यंतु पावमानस्तृप्यंतु क्षुद्रसूक्तास्तृप्यं

तु महासूक्तात्तृप्यतु इतिद्वादशमंत्रैः सकृन्मंत्रेण सकृत्तूष्णीमेवं द्विद्विस्तर्पणं कुर्यात् ततः प्राचीनावीती
१६५ सव्यंजान्वाच्यद्विगुणीकृतकुशमूलाग्रैः पितृतीर्थेन सतिलाभिरद्भिः सुमंतुजैमिनिवैशंपायनपैलसूत्रभा
ष्यभारतधर्माचार्यास्तृप्यंतु जानंतिबाहविगार्ग्यगोतमशाकल्यबाभ्रव्यमांडव्यैमांडूकेयास्तृप्यंतु
गर्गीवाचक्नवीतृप्यतु वडवाप्रातीथेयीतृप्यतु सुलभामैत्रेयीतृप्यतु सुलभामैत्रेयीतृप्यतु कहोळं
तर्पयामि कौषीतकंतर्पयामि महाकौषीतकंत० पैंग्यंत० महापैंग्यंत० सुयज्ञं० सांख्यायनं० ऐतरे
यं० महैतरेयं० शाकलं० बाष्कलं० सुजातवक्त्रं औदवाहिं० महौदवाहिं० सौजामिं० शौनकं० आश्व
लायनं० येचान्येआचार्यास्तेसर्वेतृप्यंतु इतित्रयोविंशतिमंत्रैः सकृन्मंत्रेणद्विस्तूष्णीमेवंत्रिस्त्रिस्त
र्पयेत् ततः अस्मत्पितरं अमुकगोत्रंअमुकशर्माणंस्वधानमस्तर्पयामीत्यश्वसकृन्मंत्रेणसकृत्तूष्णीं
मातृमातामहीपार्वणभिन्नस्त्रीणांसकृन्मंत्रेण आचार्यस्यसकृन्मंत्रेणसकृत्तूष्णीं ततः पितृवंश्या १६५
मातृवंश्यायेचान्येमतउदकमर्हंतितांस्तर्पयामिइत्यसानांजलिंदद्यात् शाकलः तर्पणंनैत्यकंकुर्या

पूर्वंप्रातस्स्नानविधावुक्तः अतोगृह्याद्दोयेकेस्मदितिमंत्रबोध्योइत्याह्निकचंद्रिकायां ततःसूर्यायार्घ्यंत
दुक्तंविष्णुपुराणे दत्वाकामोदकंसम्यकुभ्येतेभ्यःश्रद्धयान्वितः आचम्यचततोदद्यात्सूर्यायसलिलां
जलिं नमोविवस्वतेब्रह्मभास्वतेविष्णुतेजसे जगत्सवित्रेशुचयेसवित्रेकर्मदाइनइति ततःस्रुक
द्राचमनं कर्मांतेआचमनमितिपरिशिष्टोक्तेः ततःकर्मसमर्पणमिति अथब्रह्मयज्ञप्रयोगः ग्रा
मात्प्राच्यांमुदीच्यांअन्यस्यांवाप्रशस्तायांदिशिनद्यांदौस्वगृहेवावारुणस्नानंविधायअशक्तोमंत्रस्नानं
कृत्वाधौतेवाससीपरिधायमृद्भस्मयोरन्यतरत्पुंड्रंविधायपवित्रेधृत्वाआत्मानंप्रदक्षिणीकृत्य ॐवे
दपुरुषायनमइतिनमस्कृत्यप्राङ्मुखःश्रुत्युक्ताचमनंकुर्यात् तद्यथाहस्तौप्रक्षाल्यत्रिराचम्यसोद
केनांगुष्ठमूलेनद्विरोष्ठौसंमृज्यसाङ्गमध्यमांगुलीभिरोष्ठौसकृदुपस्पृश्यसव्यंपाणिंपादौप्रोक्ष्यशिरश्च
क्षुषीनासिकेश्रोत्रेहृदयमालभ्येति यद्वा ॐभूः ॐभुवः ॐस्वः इतित्रिराचम्यप्राणानायम्यत्र्यादिब
द्धदर्भान्त्रागग्रांछुचौदेशेआस्तीर्यतत्रप्राङ्मुखउपविश्यदेशकालौस्मृत्वाममोपात्तदुरित० ब्रह्मयज्ञंक

ताअपुत्रागोत्रिणोमृताः तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोदकं मितिमंत्रेणपूर्वस्थापित परिधानीय वस्त्रं
चतुर्गुणंउपरिदशांतिलदर्भसहितंवामभागेस्थलएवनिष्पीड्यवामप्रकोष्ठेनिक्षिप्यद्विराचामेदिति
एतच्च संक्रांतिपौर्णमासीद्वादश्येकादश्यमावास्याश्राद्धदिनेषुगृहेचवर्ज्यं ततोयज्ञोपवीती ॐन
मोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे जगत्सवित्रेशुचयेसवित्रेकर्मदायिनेइत्येकांजलिंसूर्यायद
द्यादिति अस्यकृतस्यब्रह्मयज्ञस्यपरिपूर्णतासिध्यर्थंभैक्ष्यंदास्यमानंदक्षिणात्वेनदातुमहमु
त्सृज्यइतिसंक॰ल्प्यसकृदाचम्यअनेनब्रह्मयज्ञाख्येनकर्मणाश्रीपरमेश्वरःप्रीयतां इतीश्वरा
यकर्मसमर्प्यपवित्रग्रंथिंविस्रस्यशुचिदेशेक्षिपेत् इतिब्रह्मयज्ञप्रयोगः श्रीवेदपुरुषार्पणमस्तु
अथमध्यान्हसंध्या अत्रयद्यपिआचार्येगृह्येमध्यान्हसंध्यानोक्तातथापिगृह्यपरिष्टेउक्तत्वा
त्संध्यात्रयंतुकर्त्तव्यंद्विजेनात्मविदासदेतियोगयाज्ञवल्क्योक्तेः एतत्संध्यात्रयंप्रोक्तंब्राह्मण्यंयद १६७
धिष्ठितं यस्यनास्त्यादरस्तत्र नसब्राह्मणउच्यतइतिछंदोगपरिशिष्टाच्चावश्यंकार्या तत्कालःदि

नार्धभागोऽमुख्यः यश्च पूर्वापराण्हयोः संधिस्तत्कालभवादेवतासंध्यानामुपासीतेति परिशिष्टोक्तेः
कमलाकरस्तु पूर्वाण्हो वै देवानां मध्यंदिनो मनुष्याणामपराण्हः पितॄणामिति श्रुतौ त्रेधा विभक्ते मध्या
न्हे मनुष्याणां भोजनोक्तेस्त्रेधा विभक्तदिनद्वितीयभागे मध्यान्हसंध्याकार्येत्याह तन्न असायं गौण
कालइत्यपि स एव स्मृतिसंग्रहे मध्यान्हस्नानस्नादूर्ध्वं यः काल स्त्वव्यवधानतः तत्र मध्यान्हसं
ध्या स्यादूर्ध्वं गौणः स्मृतो बुधैरिति अव्यवधानतः शोखांतपरपरः आश्वलायनानां ब्रह्मयज्ञोत्तरमे
व मध्यान्हसंध्येति पूर्वं प्रपंचितत्वात् शाकलकारिकायामपि कुर्यान्मध्यान्हिकीसंध्यां ब्रह्मयज्ञाद
नंतरं संगवादूर्ध्वमित्याहुर्न चेदर्वाग्गथापिवेति संध्यात्रयेप्युपस्थानमेतदाहुर्मनीषिणः मध्यान्हे
उदयं वापि विभ्राडादीछयाजपेत् इति छंदोगपरिशिष्टे उदये वापीत्यभिधानादुदयानंतरमपि
मध्यान्हसंध्येति पारिजाते स्थितं दक्षः अध्यर्धयामादासायं संध्या माध्यान्हिकीष्यते इति परिशिष्टे
अथ मध्यंदिन आपः पुनंत्विति मंत्राचमनमापः पुनंतु पृथिवी० मतिग्रहं स्वाहेत्यथा क्र

रि

१५६ घ्णीय याहंसवत्यावात्रिः सकृदार्घ्यमुत्क्षिप्योर्ध्वबाहुरुन्मुखउदुत्यंजातवेदसंचित्रंदेवानामिति सूक्ताभ्या
माभ्यांवामंत्राभ्यांतच्चक्षुरित्येकयावादित्यमुपस्थायजपमासीनोयथेष्टंकालंकुर्यादित्येषसंध्याविधिर्व्या
ख्यातइति भगवान्सवितुर्मंडलंपश्यन्नुपतिष्ठेद्दिवाकरं उर्ध्वबाहुः पठेत्सूक्तं उदुत्यंजातवेदसं तच्चक्षु
रिति सूक्तंचहंसः शुचिषदित्यपि चंद्रिकायांपुराणे ततोमध्यान्हसंध्यायामासीनः प्राङ्मुखोजपेदि
ति तिष्ठंश्चेद्वीक्ष्यमाणोर्कमासीनः प्राङ्मुखोजपेदितियोगयाज्ञवल्क्योयत्वेकस्मिकंतिष्ठंज्जपविधा
नं शाखांतरपरं आश्वलायनानामासीनइत्याचार्येणोक्तेप्राबल्यात् अत्रकेचिज्जपोत्तरं दिगभिवाद
नादि उपसंग्रहणांतंप्रातकुर्यादित्याहुः तन्न एवंसायमितिसायंसंध्यायामेवाचार्येणदिगभिवादना
दिकृत्स्नातिदेशस्यकृतत्वान्मंध्याह्नेजपमासीनोयथेष्टंकालंकुर्यादित्येषसंध्याविधिर्व्याख्यातइत्युप
संहारात्स्मृत्यंतरेपिप्रातः सायंसंध्ययोरेवदिगभिवादनादेरुक्तत्वाच्च अर्घ्यदानविषयेआश्वलायनः १५७
मध्यान्होतुविशेषोयंप्रदद्यात्र्यंसइत्यृचा आकृष्णेनद्विती यार्घ्यंगायत्र्याचतृतीयकं उपविष्टः समाच

ब्रह्मयज्ञंपुरःसरं ग्रहणादिनिमित्तेषुब्रह्मयज्ञंविनाभावेत् इत्याचारेंदौतर्पणविधिः एवंविस्तृततर्पण
करणाशक्तौ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः तृप्यंतुपितरःसर्वेमातृमातामहादयः अतीतकु
लकोटीनांसप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकं इत्येकांजलिंदद्यात् त्रिरित्या
चारार्के गृहादौतिलतर्पणनिषेधेतिलालाभेवातिलपदस्थानेइदमस्तुकुशोदकमित्यूहःकार्यइति
केचिन्न्यायविदस्तत्रअतीतकुलकोटीनामितिमंत्रलोपस्तिलपदलोपोवेत्याहुः नप्रकृतावूहइतिन्या
यात् ममतुअसंपन्नंमनसासंपादयेदितिपूजाविधौपरिशिष्टोक्तेः द्रव्याणामप्यलाभेतुतद्द्रव्यंस्म
रेद्बुधइतितृचभास्करधृतवचनाच्चतिलध्यानमात्रंमंत्रस्त्वविकृतएवतिलालाभेतिलनिषेधेतुयदंत
रिक्षंइतिमंत्रस्थगार्हपत्यपदलोपएवेतिभाति अस्याप्यशक्तौआब्रह्मस्तंबपर्यंतंजगत्तृप्यतुइतिशि
राद्युक्तेनमंत्रेणत्रीनंजलीन्दद्यात् ततआचम्य येषांपितानभ्रातानपुत्रोनान्यगोत्रिणः तेसर्वे
तृप्तिमायांतुमयोत्सृष्टैःकुशोदकैरितिद्विगुणीकृतदर्भांस्त्यक्त्वाप्राचीनावीत्येवयेकेचास्मत्कुलेजा

र्योपस्थाने॰ ॐ उदुत्यंजातवेदसं॰ षतेरधः चित्रंदेवानामितिषड्च॰ चस्यसूक्तस्यांगिरसः कुत्सऋषिः सूर्योदे
वतात्रिष्टुप्छंदः सूर्योपस्थाने॰ ॐ चित्रंदेवानामु॰ उतद्यौः अथवाउदुत्यंकाण्वः सूर्योगायत्री चित्रंदेवा
नामांगिरसः कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थावि॰ ॐ उदुत्यंजातवेदसं॰ सूर्यं ॐ चित्रंदेवाना॰ षश्च अथवा
तच्चक्षुर्वसिष्ठः पुरउष्णिक् सूर्योपस्थाने॰ ॐ तच्चक्षुर्देव॰ शतं इत्युपस्थायोपविश्यशुचौदेशेदर्भासोक्षि
तेदर्भानास्तीर्येत्यादिन्यासांतेयुवतींयुवादित्यमंडलमध्यस्थांश्वेतवर्णांश्वेतांबनुलेपनस्रगाभरणां
पंचवक्त्रांप्रतिवक्त्रंत्रिनेत्रांचंद्रशेखरांत्रिशूलखड्गखट्वांगडमरुकचतुर्भुजांवृषभासनारूढांरुद्रदेव
त्यांयजुर्वेदमुदाहरंतींभुवर्लोकाधिष्ठात्रींसावित्रींनामदेवतांध्यायामिजपित्वाउत्तरषडंगंविधायपद
क्षरपदभ्रष्टंमात्राहीनंचयद्भवेत् तत्सर्वंक्षम्यतांदेविकश्यपप्रियवादिनीति संप्रार्थ्यसकृदाच
म्यानेनमध्यान्हसंध्योपासनेनश्रीपरमेश्वरः प्रीयतामिति कर्मेश्वरायार्पयेत् इत्याचारेंदौ १६७
मध्यान्हसंध्याविधिः प्रमादादस्याअकरणेआश्वलायनानांनप्रत्यवायइतिसंध्याभाष्ये

ततोगंगातिरिक्तवस्त्रपूतजलपूर्णपात्रंदक्षिणहस्ते गृहीत्वागृहमागच्छेत् तदुक्तंमनोहरकृताह्नि
के यदिस्नातोद्विजस्तीर्थाद्गृहीतकमंडलुः आज्ञानाऽऽगृहमागच्छेत्स्नानंतस्यवृथाभवेत् गर्गः त्रिसं
ध्यंवाग्यतोवारिगुप्तमाहृत्यशोधयेत् होमोपहारभोगार्हद्रव्यात्मपरिचारकान् ततःसूर्यमुपस्था
यसम्यगाचम्यचस्वयं अभ्युक्षणंसमादायसंयतात्मागृहंव्रजेत् सोपानत्कः सदर्भश्चपात्रस्थंसा
सदशोत्तरःसोपानत्कउपानदारूढः सदर्भोदर्भपवित्रपाणिः सदशोत्तरः दशायुक्तोत्तरीयवस्त्रा
वृतः पात्रस्थमभ्युक्षणार्थंजलमाहरेदित्यर्थः स्वस्यासामर्थ्येपारिजातेआत्मीयंप्रथमंप्रोक्ताविप्रह
स्ताद्द्वितीयकंतृतीयमुदकस्थानात्चतुर्थंमणिकास्मृत्यंनद्यादेः स्वयमाहृतंप्रथमंअन्येनशुचिना
ब्राह्मणेनतस्मादानीतंद्वितीयं गृहास्थितादेवकूपादेर्जलस्थानात्गृहीतंतृतीयं मणिकादुपात्तं
चतुर्थंवकुलजलभांडंमणिकइतिनारसिंहेजलदेवान्नमस्कृत्यततोगृहगतःशुचिःविधिनापुरु
षसूक्तस्यतत्रविष्णुंसमर्चयेदिति नत्प्रकारंलप्रागेवमुख्यकालेसविस्तरमदर्शयं गृहागमानो

त्तरं यथाशक्त्युपचारैः दैवं संपूज्य ब्रह्मयज्ञदक्षिणार्थं पूर्वसंकल्पितमन्नं अतिथिपूजनकाले तस्मै अन्यस्मै भि
क्षवे वा दद्यादिति अथ दिवा विहितानि प्रातःसंध्यादिकर्माणि प्रमादादकृतानि चेद्रात्रौ प्रथमयाम पर्यंतं क्र
मेण कर्तव्यानि अथ दिवा विहितानि प्रातःसंध्यादिकर्माणि प्रमादादकृतानि तदुक्तं परिशिष्टे यदि दिवोदि
तानि कर्माण्यकृतानि यावत्प्रहरं यामिन्यास्तावत्क्रमेणैव सर्वाणि सौरं वर्जयित्वा कुर्याद्दाकृष्णीयये वार्घ्य
दानं कुर्यादिति एतन्मते प्रातःस्नानादि यथाक्रमं सर्वमाह्निकं कृत्वा सायंसंध्यामुपास्य ततः [redacted] साय
होमादि कुर्यात् केचित्तु प्राप्तकालत्वादादौ सायंसंध्यामुपास्य ततः क्रमेणातिक्रांतमाह्निकं कृत्वा ततः साय
होमादि कुर्यादित्याहुः मध्याह्नसंध्यायां गायत्र्यैवार्घ्यदानमिति पारिजाते तदाश्वलायनातिरिक्तपरं आकृ
ष्णीययैवेत्याचार्योक्तेः प्राबल्यात् उपस्थाने विशेषः स्मृतिसंग्रहे मध्याह्नसंध्या रात्रौ चेत्प्रमादात्क्रियते य
दि सौरस्थाने जपेत्सूक्तं सौर्यं वैश्वानरीयकं हविष्यांतमजरं स्वर्विदित्येकोनविंशत्यृचात्मकं सौर्यं वैश्वान १५८
रीयं सूक्तं उपस्थाने जपेत् अंगिराः रात्रौ प्रहरपर्यंतं दिवाकर्माणि कारयेत् अवगाहं च सौरं च सौरं च ब्र
यज्ञं च वर्जयेत् अवगाहस्नानस्य प्रतिप्रसवमाह व्यासः प्रदोषे पश्चिमे यामे दिनवत्स्नानमाचरेदिति ब्र

स्यतिष्ठेदभिमुखोरवेः व्यासस्तु सकृदेवतु मध्यान्हेक्षेपणीयंद्विजातिभिरित्याह कात्यायनः पुष्पाण्यंबुमिश्रा
ण्यूर्ध्वं प्रक्षिप्योर्ध्वबाहुः सूर्यमुदीक्ष्येति अर्घ्यदाने ऋजुत्वं प्रागुक्तं अथ प्रयोगः द्विराचम्य प्राणानायम्य दे
शकालौ संकीर्त्य ममोपात्तदुरितक्षयद्वारा श्रीपरमे० मध्यान्हसंध्यामुपासि[ष्ये] इति संकल्प्य पूर्ववत् प्रथम
मार्जनं कृत्वा आपः पुनंत्वित्यस्य विष्णुऋषिः आपोदेवता अष्टीछंदः मंत्राचमने विनियोगः ॐ आपःपुनं
तु पृथिवीं पृथिवीपुता पुनातु मां पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं म
म सर्वं पुनंतु मामापोसतां च प्रतिग्रहस्वाहेति मंत्राचमनं कृत्वाचम्य पूर्ववद्द्वितीयमार्जनात्म परिषेकाघ
मर्षणाचमनानि कृत्वा सूर्याभिमुखस्तिष्ठन्नेव हस्तसमांजलिमुद्धृत्य जल एव आकृष्णेनेत्यस्य हिरण्यस्तू
प ऋषिः सविता त्रिष्टुप्छंदः अर्घ्यदाने विनियोगः ॐ आकृष्णेन० श्रीसूर्यायेदमर्घ्यं समर्पयामीति त्रिः सकृ
दार्घ्यं दद्यात् ततः पूर्ववदात्मानं परिषिच्योपस्थाय उपस्पृश्योत्थायोर्ध्वबाहुरून्मुखः सूर्यमुपतिष्ठेत् उदुत्य
मिति त्रयोदशर्चस्य सूक्तस्य काण्वः प्रस्कण्वऋषिः सूर्योदेवता नवाद्यागायत्र्यः अंत्याश्चतस्रोनुष्टुभः सू

कृत्वा दशसंख्यागायत्र्यपिजप्याउक्तंचभट्टोजीयेआश्वलायनस्मृतौ आपन्नश्चाशुचिःकालेतिष्ठन्न
पिजपेद्दशेतिआपन्नोनामापद्ग्रस्तः तंप्रतिअग्निस्मृतौअंगांतरहानावपि अर्घ्यस्यावश्यकत्वमुक्तं
जलाभावेमहामार्गेबंधनेत्वशुचावपि उभयोःसंध्ययोःकालेरजसाचार्घ्यमुत्सृजेदिति आशुचौ
आशौचेइत्यर्थइतिभट्टोजीये विधानपारिजाते उच्चार्यवाचागायत्रींमनसाजपेदितिपैठीनसिः
सूतकेमृतकेचैवरोगोत्पन्नौतथाध्वनि मानसींचजपेत्संध्यांकुशवारिविवर्जितां पराशरः देशभंगे
प्रवासेचव्याधिषुव्यसनेषुच रक्षेदेवस्वदेहंचपश्चाद्धर्मंसमाचरेदिति सूतकिनांसंध्यावंदनप्रयो
गः आचम्यअमंत्रकंप्राणायामंविधायदेशकालौसंकीर्त्यममोपात्तदु० प्रातःसंध्यामुपासिष्ये इ
तिसंकल्प्यप्रणवरहितमार्जनमंत्रान्मनसोच्चार्यमध्यमातर्जनीभ्यांकुशरहितजलेनप्रथममार्जनंकृ
त्वाप्रणवरहितमानसोच्चारणेनैवमंत्राचमनंविधायद्वितीयमार्जनंपूर्ववत्कृत्वाप्रणवरहितमानसो
च्चारणेनाघमर्षणंविधायाचम्योत्थायगायत्रीमंत्रेणसम्यगुच्चरितेनत्रीण्यर्घ्याणिदत्वामनसोच्चारि

तेनासावादित्येति मंत्रेणांभसात्मानं परिषिच्योपविश्यापउपस्पृश्योत्थायाष्टाविंशतिदशान्यतर संख्यं
मानसंगायत्रीजपंविधायोपविश्याचम्यकर्मेश्वरार्पणंकुर्यादिति सूतकिनांसंध्यावंदनप्रयोगः आप
त्कालकर्तव्यसंध्यावंदनविधिः राष्ट्रक्षोभेनृपक्षोभेरोगार्तेशावसूतके संध्यावंदनविछितिर्नदोषाय
कदाचनेति एतत्सांगानुष्ठानविषयं जलाभावेमहामार्गेबंधनेत्वशुचावपि उभयोःसंध्ययोःकाले
रजसाचार्घ्यमुत्क्षिपेदितिअग्निस्मृतौ अनुकल्पविधिस्मरणात् तदभावेसूर्यध्यानमेवाहभारतेव्यासः
तंतथैवमहाराजदंशितारणमूर्धनि संध्यागतंसहस्रांशुंआदित्यमुपतस्थिरेइति दंशिताःसन्नद्धाः
संधिमागतंसंध्यागतं इत्यापत्कालसंध्यावंदनविधिः जातूकर्ण्यः सूतकेतुसमुत्पन्नेस्मार्तंकर्मकथं
भवेत् पिंड[illegible]यज्ञंचरुंहोममसगोत्रेणकारयेत् चरुःस्थालीपाकः श्रवणाकर्मादिश्चेतिज्ञानेश्व
रः सर्वथालोपप्रसक्तौस्थालीपाकोब्राह्मणद्वाराकार्यः अन्यथाशौचांतेसपूर्वश्रवणाकर्मादिकंचविप्र
द्वाराआशौचेपिपत्न्यार्तवेपिकार्यमितिधर्माब्धिसारः तत्रत्यागमात्रेस्नानोत्तरंसस्यकर्तृत्वंश्रौतेकर्म

णि तत्कालस्नातः शुद्धिमवाप्नुयादिति स्मृतेः त्यागातिरिक्ते तु श्रौते स्मार्ते चान्यस्यैव कर्त्तृत्वमिति निर्णयसिंधुः
१७० अपरार्कादिनिबंधास्तु श्रौतं सर्वं स्वयं कार्यं स्मार्ते तु त्यागातिरिक्ते न्यस्यैव कर्तृत्वं त्यागमात्रे तु स्वस्यैवेत्याहुः स
मारूढे ग्नौ द्विविधाशौचपाते प्रत्यवरोहपूर्वको होमो न कार्य इति केषांचिन्मतं किंतु पुनराधानमेव समारोपमत्य
वरोहयोराशौचेपवादाभावात् अनन्यकर्तृकत्वाच्च भवत्येव होम आशौचेपीत्यन्येषां मतं होमविधिब
लेनैव प्रत्यवरोहसिद्धेः तेन समारोपोपि कर्तव्य इति चरजो दोषाः सूतके मृतके च अगतिकप्रवासगमना
गमनेपि न दोषः इति प्रायश्चित्तरत्नमालायां अग्न्यनुगमने प्रायश्चित्तपूर्वकः पुनरुत्पत्तिरन्यद्वारा भवती
ति धर्माब्धिसारः शिवपूजायां नाशौचं वरं प्राणपरित्यागः शिरसो वापि कर्तनं न त्वसंपूज्य भुंजीत भगवंतं
त्रिलोचनं सूतके मरणे चैव न दोषः परिकीर्तित इति लैंगात् विष्णुपूजा न कार्येति आचारार्के पुरश्चर
णादिजपः स्तोत्रपाठः अविच्छेदेन संकल्पित हरिवंशादिश्रवणादिश्च कर्तव्यः कालनियमाभावे तु स्तोत्रह १७०
रिवंशादि हेयमेवेति सिंधुः रत्नमालायां सूतकात्प्राक्समारब्धं अनेकाहं तु यद्व्रतं कायिकं तत्तु कुर्वीत न तु
दानार्चनार्चनं जपं संवर्तः पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति हरदत्तस्तु आश्वलायनानां सूत

स्नयज्ञस्तु स्यप्रतिप्रसवस्तुब्रह्मयज्ञप्रकरणेउक्तः सौरजपस्तुप्रतिषिद्धएवप्रतिप्रसवविध्यभावात् इ
त्याचारेंदौरात्रौपूर्वयामेदिनकर्मणांकर्तव्याकर्तव्यनिर्णयः अथाशौचेनित्यस्नानादिकर्तव्याकर्तव्यनि
र्णयः स्मृत्यर्थसारे सूतकादौनित्यस्नानंबलिदानापोशनप्राणाहुत्यादयोभुजिनियमाअस्पृश्यस्पर्श
नस्नानादिकंचेचिसर्वंकर्तव्यंमेवेति अत्रनित्यस्नानंनिषेधकवचनाभात्वान्तत्संकल्पमार्जनाघम
र्षणांगतर्पणसहितंकार्यमित्याचारार्के स्नानंप्रतिग्रहोहोमःस्वाध्यायश्चनिवर्तते सूतकेमृतके
चैवस्पर्शनंमृतकेधिकमितिभृगूक्तेःसमंत्रकस्नानस्यनिषेधएवेतिकेचिदाहुः ग्रहणनिमित्तकस्ना
नश्राद्धादावपिनाशौचमितिशेखरे प्रयोगपारिजातेसंक्रांतिनिमित्तकस्नानादावपिनाशौचमित्युक्तं
संध्यामाहभरद्वाजः सूतकेमृतकेकुर्यात्प्राणायाममंत्रकं तथामार्जनमंत्रांश्चमनसोच्चार्यमार्जयेत्
गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् मार्जनंतुनवाकार्यमुपस्थानंनचैवहीति विष्णुस्मृतौ
अर्घ्यांतामानसीसंध्याज्ञेयाप्रणववर्जितेति आश्वलायनानांतुगायत्रीजपप्राधान्यात्तैरर्घ्यांतमनसा

मितियुक्तंउक्तहेतोः अशौचापगमेपंचगव्यप्राशनमुक्तंविधानमालायां ब्रह्मशुद्धौगृहारंभेसूतकेमृतके
तथा यज्ञारंभेधनप्राप्तौप्रायश्चित्तेविशेषतः रोगमुक्तौचसंपर्केक्षुद्रपापापनुत्तिषु विदध्याद्ब्रह्मकूर्चंच
मासिमास्यथवाद्विजइति इदंचसंध्यांविनान्यकर्मस्वनधिकारात्प्रातःसंध्योत्तरंकर्तव्यमिति रत्नमाला
यां अन्येत्वस्यशुद्धिसंपादकत्वात्संध्योपासनात्पूर्वमेवपंचगव्याशनमित्याहुः शिष्टाचारानुरोधादिद
मेवयुक्तं अथब्रह्मकूर्चविधिःबोधायनसूत्रे ब्रह्मकूर्चंप्रवक्ष्यामिकायशोधनमुत्तमं शूद्राणांभाजने
भुत्वा वेदानांविक्रयेतथा होमातिक्रमकालेचपर्वहीनमसंस्कृतं एतेषांचैवशुध्यर्थंपंचगव्यंप्रशस्यते परा
शरः गोमूत्रंताम्रवर्णायाःश्वेतायाश्चैवगोमयं पयःकांचनवर्णायाःनीलायाश्चतथादधि घृतंचकृष्ण
वर्णायाःसर्वंकापिलमेववा अलाभेसर्ववर्णानांपंचगव्येष्वयंविधिः गोमूत्रेमाषकान्यष्टौगोमे[illegible] यस्य
षोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्तिताः गोमूत्रवद्घृतस्येष्टाःतदर्धंतुकुशोदकं गायत्र्याद
यगोमूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिपयोदधिक्राव्णोतिवैदधि तेजोसिशुक्रमित्याज्यंदेवस्यत १७१

कुशोदकं पंचगव्यंकृत्वापूतंहोमयेदग्निसंनिधाविति कपिलास्वरूपंहेमाद्रौ सुवर्णकपिलापूर्वाद्वितीयागौरपि
गला तृतीयाचैवरक्ताक्षीचतुर्थीगुडपिंगला पंचमीबभ्रुवर्णास्यात्षष्ठीचश्वेतपिंगला सप्तमीश्वेतपिंगा
क्षीअष्टमीकृष्णपिंगला नवमीपाटलाज्ञेयादशमीपुछपाटला स्मृत्यंतरे एकवर्णातुकपिलेत्यपि
कपिलाक्षणमुक्तं कांस्यपात्रस्थितविलीनघृतसमानवर्णाकपिलेत्यपिकुत्रचित् अथप्रयोगरत्ना
नुसारीप्रयोगः आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममशौचजन्याशुचित्वसकलदोषनिवृत्ति
पूर्वकशरीरशुद्धिद्वारासंध्यातिनित्यकर्माद्यधिकारार्थंब्रह्मकूर्चहोमपूर्वकंपंचगव्यप्राशनंक
रिष्येइतिसंकल्पस्थंडिलकरणादिविटनामाग्निप्रतिष्ठापनध्यानांतेक्रियमाणेब्रह्मकूर्चहोमपूर्व
कपंचगव्यप्राशनंकरिष्येइतिसंकल्पस्थंडिलकरणादिकर्मणिदेवतापरिग्रहार्थमित्यादिचक्षुषीआ
ज्येनेत्यंतेत्रप्रधानंपृथिवींविष्णुंरुद्रंब्रह्माणंअग्निंसोमंसवितारंपरमात्मानंप्रजापतिंअग्निंस्विष्ट
कृतएतादेवताःपंचगव्याकृत्वाआज्येनस्विष्टकृतमित्यादिध्मस्थापनांतेतृणेनसहताम्रपात्रंपला

शपर्णपुटंवापंचगव्यार्थमासाद्याज्येदर्भाग्रद्वयप्रक्षेपांतेअपरेणाग्निंदर्भेषुपंचगव्यार्थमासादितंपात्रंनि
धायतस्मिन्पवित्रेनिधायतत्सवितुरित्यस्यविश्वामित्रःसवितागायत्रीगोमूत्रग्रहणेविनि॰ॐतत्सवि॰
त् इतिताम्राया गोमूत्रंमाषाष्टकपरिमितमादायगंधद्वारामित्यस्यानंदःश्रीरनुष्टुप्गोमयग्र॰ॐ
गंधद्वारां॰इतिश्वेतायोःषोडशमाषामितंपयआदायदधिक्राव्णोवामदेवोदधिक्रावानुष्टुप्दधिग्रह॰
ॐदधिक्राव्णो॰इतिनीलायादशमाषमितंदध्यादायशुक्रमसीत्यस्यप्रजापतिराज्यंयजुःघृतग्रह॰
ॐशुक्रमसिज्योतिरसितेजोसीतिमंत्रेणकृष्णायाःमाषाष्टकमितंघृतमादायदेवस्यत्वेत्यस्यप्रजा
पतिरुदकंयजुःकुशोदकग्र॰ॐदेवस्यत्वा॰पूष्णोहस्ताभ्यांप्रतिगृह्णामीतिमाषचतुष्टयमितंस
प्तभिःकुशैस्त्रावितमुदकंगृह्णीयात् देवस्यत्वेतिमंत्रेअभिषिंचामीतिवाक्यशेषंकेचिदाहुः ततः
प्रणवेनहस्तेनालोड्यप्रणवेनैवयाज्ञियकाष्ठेननिर्मंथ्यतत्पवित्रंआज्यपात्रेस्थापयित्वापंचगव्यपात्रं १७२
गोमयमादाय आप्यायस्वेत्यस्य राहूगणोगोतमःसोमोगायत्रीपयोग्रह॰ॐआप्या[illegible]इतिकांचनवर्णायाःद्वादशमाषमितं ७

केपिवैश्वदेवंभवतितानेतान्यज्ञानहरहः कुर्वन्नेतिसर्वेषांनित्यत्वोक्तावपितस्यद्यावनध्यायोयदात्माशुचिर्यद्दे
शइत्यनेनाशौचादौब्रह्मयज्ञस्यैवविशेषतोनिषेधादित्याहएतदयुक्तमितिवृत्तिःविष्णुः नाशौचेकस्यचिद
न्नमश्नीयादिति केषुचिदाशौचिस्वामिकेषुद्रव्येषुदोषाभावमाहमरीचिः लवणेमधुमांसेचपुष्पमूलफले
षुचशाककाष्ठतृणेष्वप्सुदधिसर्पिःपयःसुच तिलौषधाजिनेचैवपक्कापक्केस्वयंग्रहः पण्येषुचैवसर्वे
षुनाशौचंमृतसूतकइति पक्कंभक्ष्यंजातं अपक्कंतंडुलादिस्वयमेवस्वाम्यननुज्ञातोगृह्णीयादित्यर्थः प
क्कापक्कमनुज्ञातमन्नसत्रप्रवृत्त[illegible]मितिविज्ञानेश्वरः षडशीतौसंसर्गाद्यस्यचाशौचंयस्यातिक्रांन
कालता तदीयस्यपदार्थस्यनाशौचंविद्यतेक्वचित् शेखरेपि अनुगमननिर्हारााद्याशौचेतद्द्र्व्याणांना
शौचंविद्यतेक्वचित्नित्यकर्मलोपश्चनास्ति सूतकेअस्पृश्यत्वंनास्ति तदाहकूर्मः सूतकेतुसपिंडानां
संस्पर्शोनैवदुष्यतीति अयंस्पर्शनिषेधाभावःकर्मकालातिरिक्तकालेइतिधर्माब्धिसारः अशौचमुक्ति
स्नानंसंगवेकार्यमितिषडशीतिविवृत्तौ प्रातरेवेतिधर्माब्धिसारः एकादशाहप्रातःसंध्यात्वाशौचवदेवतत्का
लस्यदशरात्रांतःपातात्नतदूर्ध्वंतुशुद्धिदशावदशुचित्वाभावात् नचमुख्यकालवदेवगौणकालेपितत्करण

ॐ अग्नयेस्विष्टकृतेस्वाहा अग्नयेस्वि० १० इतिदशाहुतीर्हुत्वा ततोवसिष्ठंपंचगव्यंसर्वंप्रणवेनाभिमंत्र्यासनाद्ब
हिरुपविश्य ॐ यत्वगस्थिगतंपापंदेहेतिमामके प्राशनंपंचगव्यस्यदहत्यग्निरिवेंधनं ॐ इतिहस्तेनस
र्वंपीत्वाहस्तमुखंप्रक्षाल्याचम्यस्वासने उपविश्य आज्येनस्विष्टकृदादिहोमशेषंसमाप्याचम्यानेनब्र
ह्मकूर्चंहोमपूर्वकपंचगव्यप्राशनाख्येनकर्मणातेनश्रीपरमेश्वरःप्रीयतां अस्मिन्होमेइध्माधाना
दिस्थालीपाको[illegible]तिकर्तव्यतांकेचिन्नेच्छंति इतिब्रह्मकूर्चविधिः अयंहोमादिविशिष्टोब्रह्मकूर्चविधिः
स्वस्यैवपंचगव्यप्राशनेभवतिनान्यस्य अथापरोहोमरहितोब्रह्मकूर्चविधिरुक्तआग्नेयपुराणे गा
यत्र्यागृह्यगोमूत्रंगंधद्वारेतिगोमयं आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि तेजोसीतितथाचाज्यं
देवस्यत्वाकुशोदकं ब्रह्मकूर्चोभवत्येवमापोहिष्ठेतृचंजपेत् अघमर्षणसूक्तेनसंयोज्यप्रणवेनवा
पीत्वासर्वाघनिर्मुक्तोविष्णुलोकमुपैतिसइति आशौचापगमेयज्ञोपवीतधारणमुक्तंछंदोगपरिशिष्टे
सूतकांतेउपाकर्मगतेमासचतुष्टये नवयज्ञोपवीतंतुधृत्वाजीर्णंविसर्जयेदि तत्रयज्ञोपवीतनिष्पत्तिप्र १७३
कारंतद्धारणप्रकारंचवदामः बौधायनः अथातोयज्ञोपवीतक्रियांव्याख्यास्यामोब्राह्मणेनतत्कन्य

याकृतं स्तूत्रमानीय भूरिति प्रथमां षण्णवतिं मिनोति भव इति द्वितीयां सुवरिति तृतीयां मीत्वा पलाश
पत्रे संस्थाप्यापोहिष्ठेनि तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति च तसृभिः पवमानः सुवर्जन इत्यनु
वाकेन सावित्र्याभिषिच्य वामहस्ते कृत्वा त्रिः संताड्य भूरग्निं चेत्येतैस्त्रिभिर्वलितं कृत्वा भूर्भुवः स्व
श्चंद्रमसेत्येतेन ग्रंथिं कृत्वोंकारमग्निं नागान्यमं पितॄन्प्रजापतिं वायुं सूर्यं विश्वान्देवानवतंतुषु क्रमे
णाविन्यस्य संपूजये द्देवस्य त्वेत्युपवीतमादायोद्वयं तमसस्परीत्यादित्यायदर्शयित्वा यज्ञोपवीतं पर
मं पवित्रं॰ तेज इति धारयेदित्याह भगवान्बौधायन इति बौधायनीये स्मार्तसूत्रं च अथातो य
ज्ञोपवीतविधिं व्याख्यामश्छिन्नेविनाशे वा हस्तपादं प्रक्षाल्याचम्य ब्राह्मणकन्यया वा ब्राह्मणवि
धवया वा स्नातया शुद्धया कृता च मनया निर्मितं सूत्रं गृहीत्वा प्राचीं वा दिशमुपनिष्क्रम्य चतुरंगुलमा
त्रं षण्णवति सूत्रं परिमंडलं चैवं द्वितीयमेव तृतीयमद्भिः प्रक्षाल्यापोहिष्ठा मयोभुव इति तिसृभिर्हिर
ण्यवर्णाः शुचयः पावका इति च तसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन मार्जयित्वा देवागारे गवां गो

ष्ठे नदीतीरे शुचौ देशे यत्र बैल्वीं खादिरीं मौदुंबरीं पैप्पलीमाश्वत्थीं वैणवीं वा यज्ञियवृक्षशाखामवलंब्य स
जीवा यां बध्नाति पितृभ्यो नम इति प्रथमं सव्ये संपन्ने हस्ते गृहीत्वा प्रतिष्ठापयति भूः प्रतिष्ठापया
मि भुवः प्रतिष्ठापयामि सुवः प्र० मि भूर्भुवः सुवः मीति प्रतिष्ठाप्य भूरग्निं च पृथिवीं चेति दक्षिणावर्तिम
भिमंत्रयते भुवो वायुमिति मध्यमावर्तिं सुवरादित्यं च दिवं चेत्युत्तरावर्तिं त्रयाणां ब्रह्मेश्वरविष्णूनां प्र
णामं कृत्वा तंतु त्रिगुणितं सूत्रं विष्णुना त्रिगुणीतं चतुर्वेदस्य चत्वारि त्रिवेदस्य त्रिकं भवेत् द्वे स्यातां वै
द्विवेदस्य एकमेवैकवेदिन इति यज्ञोपवीतविधिर्व्याख्यात इति षष्ठोध्यायः प्रकारांतरं स्मृत्यर्थसारे
शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके आवेत्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः अब्लिंगकैस्त्रिभिः
सम्यक्प्रक्षाल्योर्ध्ववृतं कृतं पुनस्तत्त्रिगुणीकृत्य नवसूत्रमधोवृतं अप्रदक्षिणमावृतं सावित्र्या त्रिगु -१७४
णीकृतं अधःप्रदक्षिणावृतं समं स्यान्नवसूत्रकं त्रिरावेष्ट्य दृढं कृत्वा हरिब्रह्मेश्वरान्न्यसेत् नमेदि
ति क्वचित्पाठः सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं एवं कृत्वोपवीतं स्यात्तस्यैकाग्रंथिरिष्यते

आज्योत्तरतो निधाय पंचगव्यसहिताज्यपर्यग्निकरणादि बर्हिष्याज्यासादनानंतरं तदुत्तरतो बर्हिषि पंच
गव्यपात्रासादनं आपोत्पवनानंतरं पंचगव्यस्याप्युत्पवनमिति केचित् स्रुवसंमार्गादि च स्रुष्यंते सप्त
सुदर्भेषु सहायार्थं स्रुवं निधाय तेन त्रिभिर्मध्यमपलाशपर्णैर्वा पंचगव्यं होमं कुर्यात् तत्र मंत्राः इरावती
त्यस्य वसिष्ठो रुद्रस्त्रिष्टुप् पंचगव्यहोमे ॐ इरावतीमयूखेः स्वाहा पृथिव्या इ० १ इदं विष्णुरित्यस्य का
ण्वो मेधातिथिर्विष्णुर्गायत्री पंचगव्य० ॐ इदं विष्णु० सुरे स्वाहा विष्णव इदं ०२ मानस्तोक इत्यस्य कुत्सो
रुद्रो जगती पंचगव्य० ॐ मानस्तोके० महे स्वाहा रुद्रायेदं ब्रह्मजज्ञानमित्यस्य नकुलो ब्रह्मा त्रिष्टुप्
पंचगव्य० ॐ ब्रह्मजज्ञान० विवः स्वाहा ब्रह्मण० ४ अग्नये स्वाहा अग्नय इ० ५ ॐ सोमाय स्वाहा सोमा
ये० ६ तत्सवितुरित्यस्य विश्वामित्रः सविता गायत्री पंचगव्य० ॐ तत्सवि० यात् स्वाहा सवित्र इदं प्रणव
स्य परब्रह्म परमात्मा त्रिष्टुप् पंचग० ॐ ॐ स्वाहा परमात्मान० ८ ॐ व्याहृतीनां परमेष्ठी प्र० पंचग० ॐ तत्स
वितु० यात् स्वाहा सवित्र इ० प्रणवस्य परब्रह्म परमात्मा त्रिष्टुप् पंचगव्य० ॐ भूर्भुवः स्वः स्वाहा प्रजापतय

त्रकं न्यूने रोगमवाप्नोति स्यादधिके धर्मनाशनमिति वसिष्ठः नाभेरूर्ध्वमनायुष्यं अधोनाभेस्तपःक्षयः तस्मा
१७५ न्नाभिसमं कुर्यादुपवीतं विचक्षण इति देवलः स्तनादूर्ध्वमधोनाभेर्न कर्तव्यं कथंचनेति तच्चोपवीतं वर्णभदे
नाह मनुः कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् शणसूत्रमयं राज्ञो वैश्यस्याविकमुच्यते क्षौमेयं
राजन्यस्येति पैठीनसिः उक्तालाभे देवलः कार्पासक्षौमगोवालशणवल्कतृणादिकं यथासंभवतो धा
र्यमुपवीतं द्विजातिभिरिति धारणसंख्यामाह भृगुः उपवीतं बटोरेकं द्वे तथेनरयोः स्मृते एकमेव यती
नां स्यादिति शास्त्रस्य निश्चयः इतरयोः गृहस्थवानप्रस्थयोः गृहस्थस्य नित्योपवीतविषयमेतत् ब
हूनि वायुष्कामस्येति गृहस्थं प्रति देवलोक्तेः बहुत्वावधिमाह कश्यपः त्रीणि चत्वारि पंचाष्ट गृहिणः स्यु
र्दशापि वा अत्र त्रिप्रभृति दशपर्यंतमधिकधारणे फलकल्पः सर्वतायज्ञोपवीतालाभे माधवीये ऋष्य
शृंगः अपि वा वाससी यज्ञोपवीतार्थे कुर्यात्तदभावे त्रिवृता सूत्रेणेति वस्त्रप्रतिनिधित्वेन यज्ञोपवीतधा १७५
रणं सव्यादिलक्षणं च पूर्वमुक्तं पराशरः पतितं त्रुटितं वापि ब्रह्मसूत्रं यदा भवेत् नूतनं धारयेद्विप्रः

स्नात्वासंकल्पपूर्वकं यज्ञोपवीतमेकैकंप्रतिमंत्रेणधारयेत् आचम्य प्रतिसंकल्प्यधारयेन्मनुरब्र
त्रु वीत् एकमंत्रैकेसंकल्पंधृत्वायज्ञोपवीतकं एकस्मिन्[illegible]टितेसर्वंत्रुटितंनात्रसंशयइति जीर्णप्र
तिपत्तिमाहमनुः मेखलामजिनंदंडमुपवीतंकमंडलुं अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमंत्रैतः
न कालनिर्णयचंद्रिकायांव्यासः उपवीतंयैवस्त्रंकटिसूत्रंचमेखलां धारयेदनिनंदंडंपुराणान्यप्सु
निक्षिपेत् पुराणान्यप्सुवाक्षिपेदितिपाराशरस्मृतौउक्तेः वाशब्दाब्राह्मणायदद्यादितिभावः व
स्त्रादिविषयेगौतमस्तु जीर्णान्युपानछत्रवासःकूर्चानि कूर्चंदृस्यादिशेषंप्रसिद्धं जीर्णान्युपभुक्तान्यु
पानदादीनिपरिचरतेशूद्रायदेयानीतिहरदत्तोव्याचख्यौ पारिजाते एवंसंधृतंयज्ञोपवीतंजीर्णं
भवतिचेन्नवीनंधृत्वाजीर्णंसरिदाब्धितटाकान्यतमोदके ॐ समुद्रंगछस्वाहेतिमंत्रेणप्रणवेनव्याहृ
तित्रयेणवाविसृजेदिति छंदोगपरिशिष्टे सदोपवीतिभाव्यंसदाबद्धशिखेनच विशिखोव्युपवीतश्च
यत्करोतिनतत्कृतं अत्रपूर्वार्धेनसदाशब्दवशात्पुरुषार्थताउत्तरार्धेनविपर्ययनिंदाद्वारेणसशिख

सोपवीताभ्यां कर्तव्यं कर्मेति कीर्तनात् कर्मार्थता एवंच कर्मकाले शिखाबंधोपवीताभावे कर्मांगलोपनिमित्तं
पुरुषार्थलोपनिमित्तं चेति प्रायश्चित्तद्वयं भवति दर्शपूर्णमासयोरिवानृतवदने कर्मणो बहिस्तु पुरुषा
र्थलोपनिमित्तमेकमेवेति प्रयोगरत्ने प्रायश्चित्तं तु पारिजाते यज्ञोपवीतरहितः क्षणमात्रं तिष्ठति चे
त्स तु यज्ञोपवीतं धृत्वा शतवारं गायत्रीं जपेत् तत्रैव स्कंधावरोहिते यज्ञसूत्रे त्रिःप्राणसंयमः षड्भूपरि
गते तस्मिन्द्विषट्कं मणिबंधके वामहस्तव्यतीते तु तत्यक्त्वा धारयेन्नवं तस्माद्यज्ञोपवीतस्य चलनं
न कदाचन अप्रमत्तैर्द्विजैः स्कंधे सदा धार्यं प्रयत्नतः भृगुः देहस्थमेरुस्थमेव तत्क्षाल्यमुत्तार्यं न कदाच
नेति शाखाविशेषेणोत्तारणनिषेधापवादमाह देवलः तैत्तिरीयाः कठाः कण्वाश्वरका वाजसेयिनः कं
ठादुत्तार्यसूत्रं तु कुर्युर्वै क्षालनं द्विजाः बह्वृचाः सामगाश्चैव ये चान्ये याजुषाः स्मृताः कंठादुत्तार्यसूत्रं तु पुन
रहंति संस्क्रियां अभ्यंगे चोदक[illegible]धिस्नाने मात्रापित्रोः क्षयेहनि कंठादुत्तार्यसूत्रं तु कुर्युर्वै क्षालनं द्विजा इति
अथर्वणानां तूत्तारणं कृताकृतमर्थात् संस्क्रियां मंत्रेणोपवीतान्तरधारणं अभ्यंग इत्येतद्वाक्यचो

ग्रंथेश्च नवसूत्राणां वक्ष्यीयंते देवताक्रमात् ॐकारोग्निस्तथा नागाः सोमपितृप्रजापतीन् वायुः सूर्य
श्च शर्वश्च इत्येतान् वतंतुषु न्यसेदिति शेषः रुद्रेण दीयते ग्रंथिः सावित्र्याचाभिमंत्रितं सावित्र्या
दशकृत्वाद्भिर्मंत्रिनाभिस्तदुक्षयेत् यज्ञोपवीतं परममिति मंत्रेण धारयेत् बहूनां धारणे तत्र प्रत्येकं
मंत्र इष्यत इति ऊर्ध्ववृत्तप्रकारमाह संग्रहकारः करेण दक्षिणेनोर्ध्वं गतेन त्रिगुणीकृतं वलितं ब्राह्मणैः सू
त्रं शास्त्रे ऊर्ध्ववृतं स्मृतमिति ऊर्ध्वंगतेन ऊर्ध्वास्थितेन दक्षिणकरेण त्रिगुणीकृतं सद्यद्वलितं तदूर्ध्ववृतमित्य
र्थः देवलः विधवारचितं सूत्रं मनध्यायकृतं च यत् विछिन्नं चाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत् अधो
यातमित्यत्र कटेरिति शेषः कात्यायनः पृष्ठदेशे च नाभ्यां च धृतं यद्विंदते कटिं तद्धार्यमुपवीतं स्यान्नाति
लंबन चोच्छ्रितं नातिलंबमित्यनेन कटितोधिकं निषिध्यते नोच्छ्रितमित्यनेन कटितोन्यूनं स्मृतिसारे
पि आकटेस्तत्प्रमाणं स्याद्दीर्घं तु सुस्थितं तथा आयुर्हरत्यतिह्रस्वमतिदीर्घं तपोहरं सिद्धार्थफलमाने
न स्थूलं स्यादुपवीतकं यशोहरमतिस्थूलमतिसूक्ष्मं धनापहमिति पराशरः रंध्रादिनाभिपर्यंतं ब्रह्मसूत्रं प

तंतुषुन्यसामीत्यादि ततोयज्ञोपवीतानिभूमौनिधायगंधादिभिः संपूज्य ॐ देवस्यत्वासवि० माददेइत्या
दाय ॐ उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरंदेवंदेव० इत्यादित्यादर्शयित्वायज्ञोपवीतमितिमंत्रा
स्यपरब्रह्मपरमात्मात्रिष्टुप्यज्ञोपवीतधारणेवि० ॐ यज्ञोपवीतं० तेजः इतिमंत्रेणप्रथमंदक्षिणंबा
हुमुद्धृत्यपश्चात्कंठेधारयेत्प्रत्युपवीतंमंत्रावृत्तिराचमनंच अथसंस्कारकौस्तुभधृतछंदोगपरिशि
ष्टानुसारेणप्रयोगः संकल्पांतंपूर्ववत्कृत्वायज्ञोपवीतमापोहिष्ठेतितिसृभिःप्रक्षाल्य ॐकारादिदे
वता अष्टतंतुषुनवमेशार्वयंथौरुइंचविन्यस्यसावित्र्याभिमंत्र्यसावित्र्यादशवारंमंत्रिताभिरद्भिः
प्रोक्ष्यहरयेनमः ॐ ब्रह्मणे० ॐ ईश्वरायन० इतित्रीन्मंत्रान्विन्यस्ययज्ञोपवीतमितिमंत्रेणधार
येत् अथापरःप्रकारःस्मृत्यर्णवे तूष्णीमेवोर्ध्वकृतत्वादिलक्षणविशिष्टंयज्ञोपवीतंनिर्मायसावि
त्र्यापोहिष्ठादिभिर्मंत्रैर्वाभिमंत्रिताभिरद्भिर्दशवारंसावित्र्यैवाभ्युक्ष्ययज्ञोपवीतमितिमंत्रेणव्याहृति १७७
भिर्वाधारयेदिति कौषीतकीशाखायांतुयज्ञोपवीतेनोपव्ययामिदीर्घायुत्वायसुप्रजास्त्वायसुवीर्या

यसर्वेषांवेदानामाधिपत्याययशसेब्रह्मवर्चसायेतियज्ञोपवीतधारणमंत्रउक्तः प्रयोगचिंतामणौ
तु स्वगृह्येयज्ञोपवीतस्यतन्मंत्रस्यचानाम्नात्शांखायनसूत्रेचयज्ञोपवीतमसियज्ञस्यत्वोपवीतेनो
पनह्यामीति यज्ञोपवीतंकृत्वेति इतिकरणविनियुक्तमंत्राम्नानात्तेनैवमंत्रेणोपवीतंधारयेत् वेदेक्यादि
त्युक्तं अथयज्ञोपवीतत्यागेनिमित्तांतराणि रक्तश्लेष्मसुरामांसविण्मूत्राक्तंप्रमादतः उपवीतंतदुत्सृ
ज्यदध्यादन्यंद्विजःसदा मलमूत्रंत्यजेद्विप्रोविस्मृत्यैवोपवीतधृक् उपवीतंतदुत्सृज्यदध्यादन्यन्नवं
तदेति उपवीतधृगितियज्ञोपवीतीसन्नित्यर्थः पारिजाते आश्वलायनाचार्यः चितिकाष्ठंचितेर्धूमं
चंडालंचरजस्वलां शवंचसूतिकांस्पृष्ट्वासचैलोजलमाविशेत् त्यजेद्वस्त्रंचसूत्रंचपीत्वागव्यंघृतंचे
वा पुण्याहवाचनंकृत्वास्पृष्ट्वैताञ्शुद्धिमाप्नुयात् सूत्रंयज्ञसूत्रमितितत्रैव चंडाललक्षणमाहां
गिराः यस्तुप्रव्रजिताज्जातोब्राह्मण्यांयश्चशूद्रजः तावुभौविद्धिचांडालौसगोत्राद्यश्चजायते अ
स्यवृत्तिः कमलाकरे चंडालश्वपचानांतुनिर्ग्रामःस्यात्प्रतिश्रयः वासांसिमृतचैलानिभिन्नभांडेचभोज

नं अबांधवंशवंचैवनिर्हरेयुरितिस्थितिः वध्योश्वन्युःसततंयथाशास्त्रंनृपाज्ञया वध्यवासांसिगृ
ह्णीयुःशय्याश्चाभरणानिचेति चंडालोत्पन्नाःजातिविवेके चंडालःपुल्कसीसंगाच्छ्वपाकंजनयेत्सुतं
स्नानांतरंसनगरात्कर्तुमर्हत्यशेषतः गोगर्दभशुनांकुर्यात्ग्रामांनिर्हरणंबहिः साजीविकास्यविहिता
सर्वलोकेतिविश्रुता पुल्कसीकोकिणी चंडालःप्रसिद्धः तदुभयजःश्वपाकःसचमृतानांगवादीनांब
हिर्निर्हरणंकुर्यात्साजीविकाइतिश्वपाकःलोकेमाहार निषादवनितासूतेचांडालात्डोंबसंज्ञितं अ
साधंत्यावसायीतिश्मशाननिलयेवसेत् तत्ररक्षांप्रकुर्वन्तप्रेतानांवस्त्रजीवनः सतीनांसेवडंपृण्ह
न्काष्ठविक्रयकृच्चसः तस्येयंजीविकाप्रोक्तालोकेंत्यावासिनःसदा इत्यंतावसायीलोकेडोंब आं
ध्रस्यवनितासंगाच्चांडालोजनयेत्सुतं प्लवसंज्ञंसहाडीतिलोकेसर्वत्रविश्रुतः अश्वोष्ट्रगर्दभानांच
मृतानांकालयोगतः कुर्वन्निर्हरणंसोपिमांसभक्षणजीवनः आंध्रस्यवनितापापर्द्धिकस्त्री चां १७८
डालःप्रसिद्धः तदुभयजःप्लवःलोकेहाडी मेदजायुवतीसंगाच्चांडालोजनयेत्सुतं समागःस्वपचो

दितेष्वेवेषाव्यवस्थाज्ञेयेतिसंस्काररत्नमालायां अथतूष्णींनिर्मितस्ययज्ञोपवीतस्यपूर्वोक्तबोधाय
नप्रकारेणमंत्रवत्संस्कारउच्यते स्नात्वावाससीपरिधायभस्मादिपुंड्रंधृत्वाचम्यप्राणानायम्यदे
शकालौसंकीर्त्यपुरुषार्थश्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीतधारणंकरिष्ये तत्रादौतूष्णीं
निर्मितयज्ञोपवीतस्यमंत्रवत्संस्कारंकरिष्येइतिसंकल्प्यप्रक्षालितानियज्ञोपवीतानिवामहस्तेकृ
त्वादक्षिणेनाभिमंत्रयेत ॐ भूः ॐ भुवः ॐ सुवः ततः पलाशपत्रेसंस्थाप्ययाजुषैर्मंत्रैरभिषिंचेत्
आपोहिष्ठामयोभुवइतितिसृभिः हिरण्यवर्णाः शुचयःपावकाइतिचतसृभिःपवमानःसुवर्जनइत्येते
नानुवाकेनसावित्र्याचाभिषिच्यवामहस्तेकृत्वात्रिःसंताड्याभिमंत्रयेत् ॐ भूरग्निंचपृथिवींच० ॐ भु
वोवायुं० ॐ स्वरादित्यं ॐ भूर्भुवःसुवश्चंद्र० ॐकारंप्रथमतंतोन्यसामि १ अग्निंद्वि०२ नागांतृ०३ सो
मंचतुर्थ०४ पितॄन्पंच०५ प्रजापतिंषष्ठत०६ वायुंसप्तमतं०७ सूर्यंअष्टम०८ विश्वान्देवान्नव०९ द्व
योर्यज्ञोपवीतयोःसंस्कारे ॐकारंप्रथमतंत्वोन्यसामीत्याद्यूहः बहूनांसंस्कारे ॐकारंप्रथम

समैतेव्यावसायिनः चंडालश्वपचयोर्लक्षणंपूर्वमुक्तं क्षत्रादीनांलक्षणंवृत्तिंचजातिविवेकेक्षत्रिणी
शूद्रसंयोगात्क्षतारंजनयेत्सुतं निषादइतिविख्यातःसर्वधर्मबहिष्कृतः शूद्राचारविहीनस्तुपा
पर्धिनिरतःसदा वागुरापाशपाणिश्चमृगबंधनकोविदः आरण्यपशुजातीनामंतकश्चव
नेचरः क्रोधान्वितोमांसवृत्त्यातयाजीवेत्सदैवहि घटांपापर्धिकांकुर्याद्धात्रोविस्मयकारिणीं
त्रिधापापर्धिरस्योक्ताव्योमभूजलचारिणां विक्रयंमधुनःकृत्वाधनमिच्छेत्तद्वृत्तये इतिक्षतानि
षादःलोकेपारधिः ब्राह्मण्यांक्षत्रियात्सूतःप्रातिलोम्येनजायते क्षत्रियाणामसौधर्मान्कर्तुमर्ह
त्यशेषतः किंचिच्चक्षत्रजातिभ्योन्यूनतातस्यजायते गजबंधनमश्वानांरोहणंकर्मसारथेः वैश्य
धर्मेषुसूतस्यनाधिकारःकचिद्भवेत् इतिसूतःसारथीलोकेगाडिवान् ब्राह्मण्यांजायतेवैश्या
द्योसौवैदेहिकाभिधः शुद्धांतरक्षणंराज्ञांकुर्यादनुपमंहितः सामान्यवनितापोष्यातासांभाटीति
जीविकातस्योक्ताशूद्रधर्माणांनाधिकारोस्तिकर्हिचित् पण्यांगनानांराज्ञांतुकुर्यात्संगत 

दिच्छया रूपाजीवा सुतास्त्वेव निशियः संगतो विटः स एव तासां प्राणेशो नान्यः कांतोपि नत्पतिः चतुःषष्टिक
लाकामशास्त्रं तदुपजीवनं तेन वेश्यानां राज्ञा सह संगः कारयितव्यस्तासामिच्छया इति वैदेहकः
सा वासी क्षत्रिणी मागधं वैश्याज्जनयामास यं सुतं स बंदीजन इत्युक्तोत्र तबंधादिवर्जितः शूद्रे
भ्योभ्यधिकः किंचित्तस्य जीवनमुच्यते कथालंकारगद्यादिषड्भाषाकुशलक्षमः गद्यपद्यानि चि
त्राणि विरुदानि महीभुजां अस्य जीविका राज्ञां विरुदानि गद्यपद्यानि चरित्राणिप्यलंकारगद्यादिष
ड्भाषो ज्ञेयाः शूद्रात्किंचिदाधिक्यं इति मागधः लोके बंदीजनः वैश्यस्त्रीशूद्रसंयोगादायोगवकसं
ज्ञकः स शूद्राद्धीयते धर्मे पाषाणेष्टककर्मकृत् स कुर्यात्कुट्टिमां भूमिं चूर्णेनास्येह जीविका इत्यायो
गवः लोके पाथर्वट् इत्यंत्यावसायिनः सौनिकं कर्म चांडालात्क्षतेदाशवधूः सुतं स कुर्यादजमेषाणां व
धं तन्मांसविक्रयं तत्स्थनं जीवनं तस्य स हीनस्त्वंत्यजातितः दाशवधूर्धीवरस्त्री कर्मचांडालः वडार
इति सौनिकः लोके खाटिक धिग्वण्यायोगवाभ्यां यो जातो दुर्भरसंज्ञकः स कुर्याच्छागलाः स[illegible]कुसु स्य

मुद्दद्याः करपवित्रिकाः अन्यानिचर्मपात्राणिजीवनायप्र[illegible]रोहकान् अन्त्यजातिषुमुख्योसौकीर्तितो
जातिसंग्रहे धिग्वणीमोचिणीअयोगवःपाथर्वटः इतिदुर्भरः लोकेदोरः विस्तरस्तुगोपीनाथकृत
जातिविवेकेज्ञेयः इतिचंडाललक्षणं यज्ञोपवीतनाशेतुस्मृतिरत्नावल्यां उपवीतविनाशेतुगाय
त्र्याजुहुयात्तिलान् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवेति मनोव्रातपतीभिश्चतत्रआज्याहु
तीर्हुत्वापुनःप्रतीयादित्याह यद्वा उपवीतंयदानष्टंगायत्र्याष्टशतंहुनेत् प्राजापत्यंचरेद्व
पिमहागोदानमिष्यते अथक्रमेणप्रयोगाः कर्तात्रिवृत्सूत्रंयज्ञोपवीतार्थेधृत्वाहृतवस्त्रापरि
धानादिकृत्वाप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौसंकीर्त्ययज्ञोपवीतनाशजन्यदो
षपरिहाराश्रीपर० प्रायश्चित्तंकरिष्येइतिसंकल्प्यस्थंडिलाद्यग्निप्रतिष्ठापनांतंकृत्वान्वाधानेसवितार
मष्टोत्तरसहस्रसंख्याभिरष्टोत्तरशतसंख्याभिर्वाघृताक्ततिलाहुतिभिःशेषेणत्याद्यांज्यभागांतेग
यत्र्यान्वाधानोद्दिष्टसंख्ययाहुत्वासवित्रइदंनममेतित्यक्त्वास्विष्टकृदादिहोमशेषंसमाप्यनूतनं १८०

लोके स्पृश्यः साहकारकः यस्यान्नमेव तस्यैव स्वपचस्तेन चोच्यते जीविका तस्य निर्दिष्टा माई गोचर्मरज्जु
भिः साहसमाह मनुः मनुष्यमारणं चौर्यं परदाराभिमर्शनं अग्निदाहादिकरणं साहसं स्याच्चतुर्विधं
यात्राचार्यपरिभ्रंशाज्जायते वर्णसंकरः राष्ट्रीयैः सह तद्राष्ट्रं क्षिप्रमेव प्रणश्यति मेदयुवति कोळिणी
चांडाळः प्रसिद्धः तदुभयजः स्वपंचः मांग इति चांडालस्वपचस्त्रीणां काचलोहविभूषणं नागवंगक
लांस्यानां वहुलस्यापि धातुनः वसनं चोर्णपट्टानां तेषां राज्ञो प्रचारणं मांजिष्ठवस्त्रं सूक्ष्मं च क्षौमं यत्स्या
धुवस्त्रतः न तेषां वसनं योग्यं कंबलस्यैव तद्भवेत् दिवा यदा ते गच्छंति नगरे कार्यगौरवात् शिवाले तित
सेच्चार्यसंकुचरूगात्रशंकिताः कर्णकपर्दिकां बध्वा श्वगर्दभशवार्थिनः लोहदंडं स्वहस्ते तु स्वपचख्यातिहे
तवे प्रेतोपकरणे स्तेषां आजीवा संप्रकीर्त्तितः प्रायश्चित्तमयूखे चांडालान्नभक्षण प्रायश्चित्तमुपक्रम्यो
क्तं अंगिराः अंत्यावसायिनामन्नमश्नीयाद्यस्तु कामतः स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति
अंत्यावसायिनस्तु मिताक्षरायां चंडालश्वपचः क्षतास्तूतो वैदेहकस्तथा मागधायोगवौ चेति

तएवविष्णुः मध्याह्नेत्वथसंप्राप्तेबलिंकृत्वात्मनोगृहे देवपितृमनुष्याणांशिष्टंभुंजीतवाग्यतइति आ
श्वलायनः अथातःपंचयज्ञोदेवयज्ञोभूतयज्ञःपितृयज्ञो[redacted]ब्रह्मयज्ञोमनुष्ययज्ञइति तद्यदग्नौ
जुहोतिसदेव[redacted]यज्ञोयद्बलिंकरोतिसभूतयज्ञोयत्पितृ[redacted]भ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्र
ह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्यइतितामेतान्यज्ञानहरहः कुर्वीतेति अहरहरितिवचनंपरान्नभोज
नेउपवासदिनेपिपंचयज्ञार्थंपक्तव्यमेवेत्येवमर्थमितिवृत्तिः सर्वथापाकासंभवेपुष्पैःफलैरद्भिर्वावैश्वदे
वंकुर्यादित्येवमर्थमपिचेतितत्रैव आचारप्रकाशेयमः पंचसूनागृहस्थस्यवर्तंतेहरहः सदा कंडनीपे
षणीचुल्लीजलकुंभउपस्करः एतानिवाहयन्विप्रोबध्यतेवैमुहुर्मुहुः एतेषांपावनार्थायपंचयज्ञाःप्रकीर्ति
ताः सूनाहिंसास्थानानि कंडनीमुशलोलूखलादिः पेषणीदृषदुपलादिः चुल्लीपाकस्थानं उपस्क[redacted]
रःशूर्पादिः अवस्करइतिपाठेमार्जन्यादिर्द्रष्टव्यः एताःसूनाःस्वस्वकार्येप्रायन्यायेनप्रयुंज्यतइत्यर्थः १०१
तत्रतावद्देवयज्ञउक्तःकौर्मे लौकिकेवैदिकेवापिहुतोच्छिष्टेजलेक्षितौ वैश्वदेवस्तुकर्तव्योदेवयज्ञः सवैस्मृ

तइति देवयज्ञभूतयज्ञपितृयज्ञाख्यकर्मत्रयं वैश्वदेवपदवाच्यमित्याचारमयूखेक्तोप्रमाणंतु वैश्व
देवं हि नामोतत्सायंप्रातरुद्धाहृतमितिमार्कंडेयपुराणं एतद्धिबलिदानांतं कर्माभिधायोक्तं सच वैश्वदे
वं पुराकृत्वानित्येचाभ्युदयेनतथा स्वामीष्टदेवतादिभ्योनैवेद्यंविनिवेदयेत् अकृत्वावैश्वदेवंतु नैवेद्यंयो
निवेदयेत् तदन्नंचनगृह्णंतिदेवाविष्ण्वादयोध्रुवमित्याश्वलायनस्मृतेः सएषदेवयज्ञोहरहर्गोदान
संमितः सर्वाभीष्टप्रदः स्वर्ग्योपवर्ग्योपवर्ग्यश्चतस्मादेनमहरहः कुर्वीततमेतं वैश्वदेवहुतशेषेणपृथ
गन्नेनवाकुर्यान्नास्यशेषेणवैश्वदेवंकुर्यादितिगृह्यपरिशिष्टाच्चदेवनैवेद्यदर्शनात्पूर्वंकार्यं यत्तुविष्णो
र्निवेदितान्नेनयष्टव्यंदेवतांतरं पितृभ्यश्चापितद्देयंनदानंत्यायकल्पतइतिब्रह्मांडवचनं तद्वैष्णवपरं
एतच्चवैश्वदेवाख्यंकर्मपुरुषार्थमन्नसंस्कारार्थंच यथास्विष्टकृद्यागोदेवतोद्देशांशेनादृष्टार्थोद्रव्य
प्रक्षेपांशेनदृष्टार्थश्च इत्यभिप्रायोप्येवं संस्काररत्नमालायांतु वैश्वदेवस्यात्मसंस्कारार्थत्वमेव
अन्नसंस्कारपंचसूनादोषपरिहारावानुषंगिको यथाफलेच्छयारोपितादाम्रवृक्षाच्छायागंधावित्युक्तं वै
श्वदेवः सायंप्रातश्चकर्तव्यः अथसायंप्रातःसिद्धस्यहविष्यजुहुयादित्याश्वलायनस्मरणात् अस्यच

१८२ प्रातरारंभणमिति वृत्तिः सायंप्रातः करणाशक्तो प्रातरेव द्विरावृत्त्या सह वा कार्यः तदुक्तमाचार्येण वैश्वदेवो दिनन्नं
न भवेच्चेत्पृथक्पृथक् प्रातरेव द्विरावृत्त्या कुर्याद्वा सह तौ द्विजः जुहुयात्सर्पिषाभक्तं तैलक्षारविवर्जितं दध्यक्तं प
साक्तं वा तदभावेंबुनापि वा स्मृत्यंतरे कोद्रवं चणकं माषं मसूरं च कुलित्थकं क्षारं च लवणं सर्वं वैश्वदेवे विसर्ज
येत् शौनकः वर्जयित्वा विशेषान्नं शुद्धान्नेन च तद्भवेत् विशेषान्नं व्यंजनान्नं आश्वलायनानामिदमेव मुख्य
मिति पारिजाते अन्नाभावे चतुर्विंशतिमते अलाभे येन केनापि फलमूलोदकादिभिः पयो दधि घृतैर्वापि वैश्वदे
वं स्रुवेण तु हस्तेनान्नादिना कुर्याद्वद्भिरंजलिना जलं इति येन केनापि करणेनेत्यर्थः अत्रापि यदशनीयं तेनै
व होमः तथा च परिशिष्टे शाकं वा यदि वा पत्रं वा मूलं वा यदि वा फलं संकल्पयेद्यदाहारं तेनैव जुहुयाद्द्विः आ
श्वलायनपरिशिष्टे अंनाभावे तंडुलादिभिः कुर्यादिति मुख्यद्रव्यं तु श्रृतं हविष्यमेव सिद्धस्य हविष्यस्य जुहु
यादित्याश्वलायनोक्तेः तत्र हविष्याणि स्मृतौ गोधूमा व्रीहयश्चैव तिला मुद्गा यवास्तथा हविष्या इति विज्ञेया
वैश्वदेवादिकर्मसु तथा व्रतार्के स्मृत्यंतरे हैमंतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः कलायकंगुनीवारा वा १८२
स्तुकं हिलमोचिका षष्टिकाः कालशाकं च मूलकं केमुकेतरत् कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी पयोनु

यज्ञोपवीतंधृत्वाक्रमप्राप्तमाह्निकंकुर्यात् अथापरःप्रयोगःमनोज्योतिरिति अग्नेव्रतपतेव्रतंचरिष्या
मितच्छकेयंतन्मेराध्यतां वायोव्रतपतेइत्यादिमंत्रचतुष्टयेनचतस्रआज्याहुतीर्जुहुयादिति प्रधानहो
मेविशेषः अन्यत्पूर्ववदिति अन्यस्तृतीयःपक्षः अष्टोत्तरशतसंख्याकाभिस्तिलैराज्येनवाभगायत्र्या
जुहुयादिति प्रधानहोमेविशेषोन्यत्पूर्ववत् अपरश्चतुर्थःपक्षः तदानीमेवप्राजापत्यप्रत्याम्नायत्वे
नद्रव्यंदत्वागोदानंवाकृत्वायज्ञोपवीतंधारयेदिति यज्ञोपवीतेत्रुटितेकटेरधस्ताद्भूतेमूत्रपुरीषोत्स
र्गकालेकर्णेयज्ञोपवीताधारणेरक्तश्लेष्ममुरामांसविण्मूत्रादिभिरुपहतेतस्यत्यागंकृत्वाप्रायश्चित्तहो
मंकृत्वानूतनंयज्ञोपवीतंधारयेदिति संस्काररत्नमालायां अन्यमतेतुसर्वथाविनाशएवहोमादिप्राय
श्चित्तंनान्यत्र इतिभाटेइत्युपनामनारायणात्मजत्र्यंबकविरचितेआचारेंदौयज्ञोपवीतधारणनूतनिष्पत्या
दिप्रकरणंसमाप्तं इत्याचारेंदौदिनचतुर्थभागप्रकरणं अथपंचमभागकृत्यमाहदक्षः पंचमेचतथाभा
गेसंविभागोयथार्हतः देवपितृमनुष्याणांकीटानांचोपदिश्यते कीटानांभूतानां संविभागोन्नस्य अ

१८३ पिपचनएव यस्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयत इत्यंगिरस्मरणात् औपासनाग्निंपचनंवे
तिपरिशिष्टाच्च अग्न्यायतनंस्मृतिसंग्रहे वैश्वदेवप्रकुर्वीतकुंडेवास्थंडिलेपिवा अरत्निमात्रंत
त्कार्यंविंशत्यंगुलमेववा प्रादेशमात्रमथवाचतुरश्रंसमंततइति स्मृतिसारे वैश्वदेवंप्रकु
र्वीतकुंडमष्टादशांगुलं मेखलात्रयसंयुक्तंद्विमेखलमथापिवा स्यादेकमेखलंवापिचतुरस्रंस
मंततः अपितामहमयंप्रोक्तंकुंडमत्रमनीषिभिरिति मेखलामानंप्रयोगदीपिकायां चतुर्भिश्च
त्रिभिर्द्वाभ्यामूर्ध्वामध्यात्वधोगता तिस्रःप्रोक्ताःक्रमादेवविस्ताराडुच्छ्रयादपि द्विमेखलपक्षेतत्रांत
रे षष्ठांशेनाष्टमांशेन मेखलाद्वितयंमतमिति उपरिमेखलाचतुरंगुलाअधोमेखलाचत्र्यंगुलेत्य
र्थः उत्सेधविस्तारयोरिदमेवमानं एकमेखलापक्षेपिंगलः एकाषडंगुलोत्सेधविस्तारामेखला
मता यद्वाप्रयोगदीपिकायां चतुरंगुलविस्तारामेखलातद्वदुच्छ्रितेति अत्रांगुलंकरणीचतुर्विंशा १८३
शारूपमितिऔपासनप्रकरणेपूर्वमुक्तमेव अश्वलायनानांनस्थंडिलस्यकुंडस्यवावश्यकताआ

र्येणानुक्तत्वात् प्रायश्चित्तहेमाद्रौ नचुल्ल्यांनायसेपात्रेनभूमौनचखर्परे वैश्वदेवंप्रकुर्वीतेति अत्रचु
ल्ल्यायसपात्रखर्परनिषेधात्कुंडस्थंडिलासंभवेअपक्कमृन्मयेपात्रकुंडाकृतिरहितताम्रादिपात्रपक्कमृ
न्मयपात्राणामप्यनुज्ञागम्यतइतिसंस्काररत्नमालायां चुल्लानिषेधोभांडोपेनचुल्लीपरः तथाचो
क्तंपचनाग्नौस्थितेभांडेवैश्वदेवंकरोतियः ब्राह्मणीजायतेचांधाद्विजोगच्छेदिति संस्काररत्नमालायां
तु यत्तुवैश्वदेवंप्रकृत्यउपरिष्टात्स्थितेपात्रेक्रियाचुल्ल्यामपिस्मृतेतिकेचित्संग्रहनाम्नावचनंपठंति
तन्निर्मूलमापत्परंवाबोध्यमित्युक्तं अथदेशः स्मृतिमंजर्यां गृहस्यदिग्भागेवैश्वदेवंसमाचरेदिति
अथाधिकारिनिर्णयः तत्रव्यासः होमाग्रदानरहितंनभोक्तव्यंकदाचन अविभक्तेनसंसृष्टेष्वेकेना
पिकृतंकृतं एकेनमुख्येनज्येष्ठेनेतियावत् स्मृत्यंतरेपि सर्वैरनुमतिंकृत्वाज्येष्ठेनैवतुयत्कृतं
द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् आश्वलायनः वसतामेकपाकेनविभक्तानामपिप्रभुः एक
स्तुचतुरोयज्ञान्कुर्याद्वाग्यज्ञपूर्वकान् वाग्यतोब्रह्मयज्ञः एतत्सर्वमेकगृहावासविषयं गृ

हांतरेतु सएवविशेषमाह अविभक्ताविभक्तावापृथक्याकाद्विजातयः कुर्युःपृथक्पृग्यज्ञान्भोजनात्प्राग्दिनेदि
नइति नचैतदप्येकगृहविषयमस्त्विति वाच्यं यद्येकस्मिन्कालेपुनःपुनरन्नंपच्यतेसकृदेवबलिंकुर्वीतय
• द्येकस्मिन्कालेनडुधान्नंपच्यतेगृहपतिमहानसादेवैकंबलिंकुर्वीतेति गोभिलवचनेनविरोधापत्ते
अविभक्तानांपाकभेदेपृथग्वैश्वदेवस्यकृताकृतत्वंबोध्यमितिभट्टोजीये आश्वलायनः एकपाकाशि
नःपुत्राःसंसृष्टाभ्रातरोपिच वैश्वदेवंनतेकुर्युरेकःकुर्यात्पितैवहि स्मृतिसमुच्चये वैश्वदेवःस्वया
हश्चमहालयविधिस्तथा देशांतरेपृथक्कार्योदर्शश्राद्धंतथैवचेति एतच्चज्येष्ठकनिष्ठभ्रातृसाधार
णं पुत्रेणापिग्रामेग्रामांतरेवापृथक्पाकेसतिपृथक्कार्यएवयदिस्याद्भिन्नपाकाशीग्रामेग्रामांतरेपिच
वैश्वदेवंपृथक्कुर्यात्पितर्यपिचजीवतीति शाकलोक्तेः यस्यतुज्येष्ठेनाकृतेवैश्वदेवेन्नंसिध्येतेन तूष्णीम
ग्नौकिंचित्क्षिप्त्वाभोक्तव्यंतथाचपृथ्वीचंद्रोदये गोभिलः यस्यत्वेषामग्रतोन्नंसिध्येत्सनियुक्तमग्रेवन्हौकिं
चित्क्षिप्त्वाश्नीयादिति इदंचकदाचित्कनिष्ठभ्रातुःपाकभेदेज्ञेयमितिपृथ्वीचंद्रः नियुक्तंभोज्यमन्नंकिं

ध्धृतसारंचपनसाम्नोहरतकी पिप्पलीजीरकंचैवनागरंचैवतिंतिणी कदलीलवलीधात्रीफलान्यगुड
मैक्षवं अतैलपक्कंमुनयोहविष्याणिप्रचक्षतइति हैमंतिकंधान्यंकलमास्तदपिसितं अस्विन्नंच
हविष्यामितित्रतार्के हविष्यमपिसितास्विन्नंसद्धविष्यंभवतीतिभोजनकुतूहले धान्यंब्रीहयः
कलायाःमटरइतिप्रसिद्धाः कुलित्थाइतिकेचित् कंगुकांगइति प्रियंगुर्वा नीवारादेवधान्यं
वास्तुकंचाकवतइति हिंलमोचिका गोडेषुतिलासाइतिपत्रशाकः षष्ठिकाःषष्ठिदिनैर्यदुत्पद्य
तेधान्यंतत् कालशाकःपर्वतदेशेप्रसिध्धःशाकः केमुकंगोडेषुहिलासाइतिपत्रशाकःषष्ठिकाके
बुइतिप्रसिद्धंमूलकं कंदःसूरणः नागरंशुंठी तितिणीचिंचा लवलीहरपररेवडी अतैलपक्कमि
तिसर्वेषांविशेषणं हविष्याभावेनिषिद्धंवर्जयित्वायावनालादयोग्राह्याः यदन्नःपुरुषोलोकेत
दन्नास्तस्यदेवताइत्याचारप्रदीपोदाहृतवचनात् अत्राग्निमाहशौनकः औपासनेतुहोतव्यं
शालाग्नौवाविजानता विकल्पश्चिच्छयाकार्योनास्त्येवात्रव्यवस्थितिः अत्रशालाग्निर्लौकिकःसो

श्वशुरोमातुलोवापिवैश्वदेवाहुतिंसदेति सकृत्कृतेनवैश्वदेवेनपक्वःपच्यमाणश्चसर्वोपिपाकःसंस्कृ
तोभवतीत्याह गोभिलः यद्येकस्मिन्कालेबहुधाअन्नंपच्येतगृहपतिर्महानसादेवैतद्बलिंसकृदेवकु
र्वीतेति अथहोममंत्रानाहाचार्यः सिद्धस्यहविष्यस्यजुहुयादग्निहोत्रदेवताभ्यः सोमायवनस्प
तयेग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेति
अग्निहोत्रदेवताः सायमग्निःप्रजापतिश्चप्रातःसूर्यःप्रजापतिश्च सोमायवनस्पतयेइत्यादयोष्टोमं
त्राः इत्थंदशाहुतयः परिशिष्टं अथवैश्वदेवोदिवास्यप्रारंभोनात्रपाकयज्ञतंत्रंअग्निमोपासनं [illegible]प
पनंचापरिसमूह्यपर्युक्ष्यायतनमलंकृत्यसिद्धंहविष्यमधिश्रित्याद्भिःप्रोक्ष्योदगुद्वास्याग्नेःप्रत्यग्दर्भेषु
निधायसर्पिषाभ्यज्यसव्यंपाणितलंहृदयेन्यस्य सकृदवदानपाणिनाजुहुयात्सोमायवनस्पतय
इत्येकाहुतिर्विश्वेभ्योदेवेभ्यइतिचदिवाचारिभ्यइतिसर्वभूतानांविशेषणंप्रजापतेरुक्तिरिष्यतेप्र १०५
धानबलेरुदकपुरुषबलिस्तादृदमन्त्राभावेतंडुलादिभिः कुर्यादिंतेचपरिसमूह्यपर्युदकेनात्रतंत्रमि

तिपर्यूहनोक्षणेअपिनकुर्वंतिकेवलंकृत्वाप्रतिष्ठंतेविश्वेदेवास्तद्देवत्यमितीदं वैश्वदेवमिति शौनकः
आदौचकर्मणांतेचवह्नेः परिसमूहनं पर्युक्षणंचकर्तव्यंतत्राधिश्रित्यपावके हविरद्भिश्चसंप्रोक्ष्यसमु
द्वास्यचतत्पुनः त्रिधाविभज्यसिद्धान्नंत्रिःप्रोक्ष्यपुरतस्थितंपर्यग्निकरणंकुर्यात्सिद्धान्नस्याप्ययंविधिः
कृत्वाचादिमभागेनदेवयज्ञमतःपरं अभ्यर्च्यगंधपुष्पाद्यैरादायादायपाणिना अपसव्येनजुहुयात्स
व्यंहृदिनिधायच अपसव्येनदक्षिणहस्तेनेत्यर्थः कारिकायां औपासनाग्निमन्यंवासमिध्याथहवि
र्भुजं पर्युक्ष्यपरिषिच्याग्निमलंकृत्यचपूर्ववदिति अत्रपरिशिष्टेचपर्युक्षणानंतरमेवाग्न्यलंकरणमु
क्तं शौनकेनतुहविरासादनोत्तरमुक्तंतत्रकारिकाशौनकपरिशिष्टविरोधेपरिशिष्टोक्तंप्रबलमित्युक्तंप्रा
क् शौनकः मध्यभागस्थितान्नेनभूतयज्ञंसमाचरेत् पात्रस्योत्तरदेशस्थभागंचैवतृतीयकं अंगुष्ठप
र्वमात्रान्नंपरिगृह्यप्रयत्नतः आग्नेय्यभिमुखोभूत्वाप्राचीनावीत्यतःपरं चक्रस्याग्नेयभागेतुपितृभ्योथ
बलिंहरेत् प्रत्यग्दक्षिणदेशेतुश्यामायचबलिंहरेत् चक्रस्यवायुभागेतुशबलायबलिंहरेत् भ

१८५ हृोजीये आश्वलायनस्मृतिः सूर्यादिभ्योऽग्नेःपूर्वमग्न्यादिभ्यस्ततःपरं हुत्वाव्याहृतिभिःपश्चाद्भूतयज्ञोत
थैवचेति अत्रान्नेनव्याहृतिहोमोवैकल्पिकइत्याह्निकचंद्रिकायां तथाशब्दस्तुदेवयज्ञसहत्ववद्भु
तयज्ञपितृयज्ञक्रियासहत्वार्थः एवकारस्तुदेवयज्ञादीनांपरस्परंसहत्वनिश्चयार्थः चकारस्तुपितृ
यज्ञद्योतनार्थइति अत्रावदानबल्योःप्रमाणंस्मृत्यर्थसारे अंगुष्ठपर्वमात्रंस्यादवदानंततोपिच ज्या
यस्विष्टकृदाज्यंतुचतुरंगुलसंमितं कुक्कुटांडप्रमाणंतुबलिरित्यभिधीयते छंदोगपरिशिष्टटीकायां
ग्रासाहुतिंबलिंचैवआर्द्रामलकमानतः पारिजातेव्यासः कुशपुंजेसमासीनःकुशपाणिःसमाहितः वै
श्वदेवस्तुकर्तव्योदेवयज्ञःसवैस्मृतः अत्रप्राङ्मुखत्वमुपस्थासनंचसूत्रपरिभाषासिद्धमविस्मर्तव्यं आ
द्यंतयोराचमनंपरिशिष्टोक्तं सकृदेवआदौद्विर्वासंध्याप्रकरणलिखितदेविपुराणवचनात् अत्ररुक्मकना
माग्निः वैश्वदेवेतुरुक्मकइतिवचनात् अग्नेर्ध्यानमपिकर्तव्यं वचनंतुऔपासनप्रकरणेप्रागुक्तं॥ अथभूतयज्ञः १८५
तमाहाश्वलायनः स्वाहेत्यथबलिहरणमेताभ्यश्चैवदेवताभ्योऽद्भ्यओषधिवनस्पतिभ्योगृहायगृहदेवताभ्यो
वास्तुदेवताभ्यइंद्रायेंद्रपुरुषेभ्योयमाययमपुरुषेभ्योवरुणायवरुणपुरुषेभ्यःसोमायसोमपुरुषेभ्यइतिप्र

ग्रासमात्रं तथाच स्मृत्यंतरे वैश्वदेवाभावेतु कुक्कुडांडप्रमाणं ग्रासमग्नौ संप्रहृत्य किल्बिषात्तु विमुच्यत इति
एतदपि प्रथममन्नसिद्धौ ज्येष्ठेन कृते वैश्वदेवे पश्चात्कनिष्ठस्य पाकभेदे तेनाकृत्वैव भोक्तव्यं अयं चान्न
प्रक्षेपस्तूष्णीमेवेति निबंधकाराः स्त्रीणामप्येवं स्त्रियो ग्रासमात्रं अन्नं घृतप्लुतं अग्नौ प्रास्य भुंजीयुरिति
स्मृत्यंतरोक्तेः इदं च विधवापरमित्याचाररत्ने यस्या गृहे रकोप्यस्ति तादृश विधवापरमित्याचारदर्प
णे नास्ति स्त्रीणां पृथग्यज्ञः न स्त्री कुर्यादिति निषेधो समंत्रक वैश्वदेवपरो द्रष्टव्यो स्त्रीबालांश्चका
रयेदिति प्रयोज्य कर्तृत्वं यदुक्तं तदपि समंत्रवैश्वदेवपरं द्रष्टव्यं मुख्यस्य करणाशक्तावाहाग्निः पुत्रो
भ्राता अथवा ऋत्विक् शिष्यः श्वशुर मातुलो पत्नीश्रोत्रिय याज्याश्च दृष्टास्तु बलिकर्मणि दृष्टा इत्यत्र
प्रतिनिधित्वेनेति शेषः अत्र बलिपदं वैश्वदेवोपलक्षणमिति पृथ्वीचंद्रः एते प्रतिनिधयः प्रवासादि विषये
इति चंद्रिका वस्तुतस्तु गृहेपि स्वयं कर्तृत्व विकल्पः स्वयं त्वेवैतान्यावद्बलिं हरेदपि वान्यो ब्राह्मण इति गो
भिलोक्तेः पुत्रादयेपि मुख्यानुज्ञयैव कुर्युः तथा च कश्यपः पुत्रो भ्राता तथा ऋत्विक् कुर्याज्ज्येष्ठाभ्यनुज्ञया

ष्टजयंतो ब्रह्मादिभिश्चतुर्भिश्चअंतरालेबलीन्हरेदितिजयंतवचनात् अस्मिन्पक्षेदिवारिभ्य
इतिसर्वभूतविशेषणं स्मृतिरूपेनापिनराकारमाहाचार्यः एताभ्योदेवताभ्योरुदग्दद्याद्बलिंभु
वि प्राक्संस्थानंतरालंस्यादग्नयइत्यादितः क्रमात् एताएवतथैवस्युःस्तन्नोक्तादेवताइह प्रा
गादिप्राकृतीद्वेद्वे इंद्रायेत्यादितः क्रमात् प्राक्संस्थेवाप्युदक्संस्थेचतुर्दिक्षुयथाक्रमं अग्रे
भागेंतरालस्यदक्षिणेमूलउत्तरे दिग्देवताकृतीनांचसमयायतनंस्मृतं ब्रह्मादयोंतरालस्य
मध्येशिष्टाश्चदेवताः प्राक्संस्थाश्चापिवैताःस्युरक्षोभ्यइतिचोत्तरे अयंनराकारआश्वलाय
नानामुख्यःस्वाचार्योक्तेःप्राबल्यात् कृष्णभट्टीयेप्येवं शौनकस्तुप्रकारांतराण्याह प्राक्सं
स्थंपरिषि०च्यापःपरिशुद्धेमहीतले आयुष्कामोदिवारात्रिंस्रुचाकारंबलिंहरेत् आयुरारोग्य
कामस्तुध्वजाकारंबलिंहरेत् मृत्युरोगविनाशार्थंनराकारबलिंहरेत् जनवश्यंकर्तृकामोव
ल्मीकाख्यबलिंहरेत् आयुरारोग्यसौभाग्यपुत्र[illegible]त्रान्पौत्रान्पशून्बहून् कामश्रीधर्म १८७

मोक्षार्थंचक्राकारंबलिंहरेत् पंचस्वेतेषुविभाणांमुख्याचक्राकृतिर्भवेत् चक्राकारमथाष्टारंकु
र्यादग्निसमीपतः प्रागादीशानपर्यंतंअंगुल्यग्रैः र्महीतले बदरीफलमात्रान् नमंगुल्यग्रात्तुविक्षि
पेत् सूर्यादिवास्तुपर्यंतं नैरंतर्येणतोहरेत् इंद्रायेंद्रपुरुषेभ्यःप्राच्यांप्राक्संस्थितंबलिं उदक्सं
स्थंप्रकुर्वीत दक्षिणे नरयोर्दिशोः प्रतीच्यांवरुणायेतिबलिंप्राक्संस्थितंहरेत् नमोवरुणपुरु
षेभ्योतस्मात्प्राक्तुबलिंहरेत् सोमायसोमपुरुषेभ्योबलिमुत्तरतोहरेत् चक्रांतरेमध्यदे
शेततोब्रह्मणे बलिंहरेत् प्राच्यांब्रह्मबलेब्रह्मपुरुषेभ्योबलिंहरेत् विश्वेभ्योवैश्व
देवत्याब्रह्मदक्षिणदेशे ब्रह्मणःपश्चिमेदेशेसर्वभूतेभ्यएवच ब्रह्मणोत्तरदेशेतुदिवाचारिभ्यएवच
सूर्यायेतिपदस्थानेरात्रावग्निपदंवदेत् दिवाचारिपदस्थानेनक्तंचारिपदंवदेत् रक्षोभ्यःस्वाहेतिबहिश्च
क्रस्येशानतोहरेत् चक्रस्याग्नेयभागेतुपितृभ्योथबलिंहरेत् प्रत्यग्दक्षिणदेशेतुश्यामायचबलिंहरे
त् चक्रस्यवायुभागेतुशबलायबलिंहरेत् चक्राकारेणयोविप्रःसदाभूतबलिंहरेत् सर्वपापविनि

र्मुक्तोब्रह्मसायुज्यमाप्नुयादिति धर्मार्णवे सएव चक्राकारविधिंकुर्याद्गृहस्थानांविशेषतः नराकारं
बलिंकुर्यान्मोक्षकामीतिकेचन अत्राग्निहोमबलिहरणयोरुद्देशत्यागौकुर्यात् अग्न्यनग्निब्रह्मण
कृतानांपाकयज्ञसंज्ञाविधानादिति प्रयोगपारिजाते आचारसाराचाररत्नाचारप्रदीपेष्वप्येवं आचा
रोद्योतेतु पाणौभूम्यांकृतावर्घ्येपिंडेप्राणाहुतौतथा तर्पणेचैवकन्यायांनत्यागःसप्तसुस्मृतइत्युक्तं
रक्षोबलेःपरिषेकउक्तोजयंतेन परिषेकंततःकृत्वापितृयज्ञोभवेदथेति अथपितृयज्ञः तत्रगृह्यं
स्वधापितृभ्यइतिप्राचीनावीतीशेषंदक्षिणानिनयेत् अत्रवृत्तिकारेणपितृयज्ञार्थमन्वहंब्राह्मण
भोजनंनकर्तव्यमितिसिद्धमितियदुक्तंतत्पंचमहायज्ञांतःपातिपितृयज्ञविषयंनतुनित्यश्राद्धविष
यंतरस्यस्मृतितोविधानात् पितृबलिर्दिव्यपितृविषयः नित्यश्राद्धंमनुष्यपितृविषयं तस्माद्
जीवत्पितृकेणदेवमनुष्यपितृतृप्त्यर्थंकर्मद्वयंकर्तव्यंजीवत्पितृकेणकेवलःपितृबलिरेवकार्यइ
ति प्रयोगपारिजातेआचारार्केचैवं अपिवाशक्तोपित्र्यबलिनैवनित्यश्राद्धसिद्धिः श्राद्धंवापितृयज्ञः

तिदिशंब्रह्मणेब्रह्मपुरुषेभ्य इति मध्ये विश्वेभ्योदेवेभ्यः सर्वेभ्यो दिवाचारिभ्यो इति दिवानक्तंचारिभ्य इति
नक्तं रक्षोभ्य इत्युत्तर इति एताभ्यः पूर्वोक्ताभ्यो दशभ्य इत्यर्थः इदं बलिहरणं सूत्रकृतैव नकारेणोक्तं त
त्कारिका भूतयज्ञं ततः कुर्यादग्नेरुत्तरदेशतः एतैर्भुवि बलीन्दत्वा प्राक्संस्थांश्च निरंतरात् मु
क्त्वांतरालं प्राक्संस्थानः इत्यादिभिर्हरेत् इहापि भवति स्वाहाकारो न पितृयज्ञे के अद्भ्योहृत्वाद्ब
लेः प्रत्यगिंद्रायेति बलिं हरेत् उदगैंद्राद्बलेरिंद्रपुरुषेभ्यो बलिं हरेत् यमायेत्यंतरालस्य हरेद्दक्षि
णतो बलिं याम्याद्बलेरुदग्याम्यपुरुषेभ्यो बलिं हरेत् प्राग्ब्रह्मणो बलेर्दत्वा वरुणायेति मंत्रतः
तस्मादुदक्कुवरुणपुरुषेभ्यो बलिं हरेत् सोमायेत्यंतरालस्य हरेदुत्तरतो बलिं सौम्याद्बलेरुदक्सो
मपुरुषेभ्यो बलिं हरेत् जयंतस्त्वाह वास्त्वंते बलीन्हृत्वा निरंतरान् मुक्त्वांतरालमिंद्रादिदिग्देवा
नां बलिं हरेत् ऐंद्रादिबलितः प्राच्यां यद्वास्यात्पौरुषो बलिः अंतराले बलीन्हृत्वा शिष्टैर्मंत्रैरतः प
रं रक्षोभ्य इति सर्वासां बलिमुत्तरतो हरेत् अंतरालस्य मध्ये तिपंक्तिरूपाश्च तस्मा एवेति परिशि

न्नप्रातरेवद्विरावृत्तिपक्षे प्रातर्वैश्वदेवंसंकल्पप्रभृतिपितृयज्ञांतंकृत्वापश्चात्संकल्पप्रभृतिपितृयज्ञां
तंसायंवैश्वदेवंकुर्यात् ततोमनुष्ययज्ञादि सहत्वपक्षेपिप्रातःसायंवैश्वदेवौसमानतंत्रेणकरि
ष्यइतिसंकल्प्यसहपशूनालभतइतिवत्पूर्वंहोमौततोबलीततःपितृयज्ञाविति रामकृष्णभट्टा
स्तुप्रातरेवद्विरावृत्याकुर्याद्वासहतंद्विजः सायंवायदिभुंजीतकृत्वांजात्वपिस्वयमित्याश्वला
यनवाक्येयदिभुंजीयादित्युक्तेःसायंवैश्वदेवोद्वितीयभोजनेसत्येव प्रातर्द्विरावृत्तिरपिप्रातःपा
केनैवसायंपुनर्भोजनेयदिभुंजीयादित्यस्यतत्रापिसंधानादित्याहुः इदंवैश्वदेवस्यपुरुषार्थत्वे
नैकादश्याद्युपवासादावपिकर्तव्यतोक्तेर्नातीवरमणीयं प्रातर्वैश्वदेवकर्मणोदेवाद्विस्मृतोयश
पार्श्वे अकृतेवैश्वदेवेचेदस्तमेतिगभस्तिमान् वैश्वदेवंततःकृत्वासायंहोमंसमाचरेदिति होमोत्त
रंस्मरणेतुस्मृतिभास्करे अकृतोवैश्वदेवश्चेद्दिवारात्रौनमाचरेत् पृथगेवप्रकुर्वीतनतुतंत्राभि
हिष्यतइति दिवावैश्वदेवोनकृतश्चेत्तदातमंरितंरात्रौपृथगेवकुर्यादित्यर्थोद्रष्टव्यः सायंवैश्वदे १०९
वस्याप्यग्निमवैश्वदेवा त्वाक्स्मरणंचेतदापृथगेवकर्तव्यताअकृतोवैश्वदेवश्चेत्युदाहृतवाक्यात्

रात्रौ वैश्वदेवो न कृतश्चेत्तदा तमंतरितं पृथगेव कुर्यादित्येव योजनास्मिन्विषये द्रष्टव्या यदित्व
ग्निमवैश्वदेवोत्तरं स्मरणं तदा तदग्निमदिने प्रायश्चित्तमात्रं कार्यं अथ श्राद्धदिने वैश्वदेवस्य का
लः तत्र बह्वृचैः साहिताग्निभिरनाहिताग्निभिरनग्निकैश्च सर्वैः सर्वश्राद्धेषु श्राद्धांते श्राद्धशेषे
ण वैश्वदेवस्य कालः तत्र बह्वृचैरादि कार्यइति वृत्तिकारप्रभृतयो बहवः केचिद्बह्वृचैः साहिता
ग्निभिः सर्वेषु श्राद्धेषु श्राद्धादौ पृथक्पाकेन वैश्वदेवः कार्य इत्याहुः अस्मिन्पक्षे दर्शे क्रममाह लौ
गाक्षिः पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति प
क्षांतकर्मान्वाधानं अन्वाहार्यकं दर्शश्राद्धं अवैश्वदेवस्यान्वाधानपिंडपितृयज्ञयोर्मध्ये विधाना
देव साग्निककर्तृत्वे सिद्धे साग्निकपदोपादानं श्रौताग्निमत एव ग्रहणार्थमिति हेमाद्रिमदनपारिजाता
दयः नवीनास्तु उक्तरीत्यैवाविशेषेण श्रौतस्मार्ताग्निमतोरुभयोरपि वैश्वदेवकर्तृकत्वावगतेः सा
ग्निकपदस्यानुवादकत्वमेव न तु स्मार्ताग्निमन्निवर्तकत्वं श्रौताग्निमत एव निवर्तकत्वमिति वैपरीत्य

१९० स्यापिसुवचनात् अतोनुवादकत्वमेवयुक्तमित्याहुः अथवैश्वदेवशेषान्नेनवायसादिबलिः तत्रपरि
शिष्टं अथनिष्क्रम्यभूमावपआसिच्यश्वचांडालपतितभूतवायसेभ्योन्नंभूमौविकिरेद्येचेन्नकंब
लिमितिब्रूयात् अथप्रक्षालितपाणिपादआचम्यशांतापृथिवीशिवमंतरिक्षमितिजपित्वान्या
निचस्वस्त्ययनानिततोमनुष्ययज्ञपूर्वकंभुंजीतेति अत्रविशेषमाहभगवान्शौनकः देवयज्ञा
न्नशेषंतुगृहद्वारादिषुक्षिपेत् चंडालपतितादिभ्योभूतयज्ञान्नशेषतः पितृयज्ञान्नशेषेणवा
यसेभ्योबलिंहरेदिति गृह्यसूत्रपरिशिष्टखंडेषुऐंद्रावरुणेतिकाकबलिः वैवस्वतेतिमंत्रेणश्व
बलिः येभूताइतिमंत्रेणभूतबलिरितिबलत्रयंगृहांगणेदेयमित्युक्तं आचाररत्ने आचारसारेचै
वं तत्रयेभूतादिइतिमंत्रेप्रातर्नक्तशब्दस्यरात्रौदिवाशब्दस्योत्धारः सहत्वपक्षेयथाश्रुतमंत्रेणै
कएकबलिः अयंवायसबलिर्नित्यश्राद्धोत्तरंकार्यः अदत्वावायसबलिंनित्यश्राद्धंसमाचरेदिति १९०
काशीखंडात् वायसादिबलीदानोत्तरंकृत्यंगृह्यसूत्रपरिशिष्टे गोदोहोंनमात्रंतत्रस्थित्वातिथि

स्यात्त्वित्त्येवोबलिरथापिवेतिकात्यायनवचनात् अन्नसव्योत्तर्युपस्थासनंविधेयंपैतृकत्वात् स्मृत्यंत
रे देवयज्ञान्नंप्रकृत्यतैरेवान्नैर्बलिंदद्याच्छेषणमाप्लाव्यवारिणा कृपापसव्यःस्वधयाकव्यंदक्षिणतोहरे
दिति पित्र्यबलेःपरिषेकउक्तोजयंतेन परिषेकेततःकुर्याद्वैश्वदेवंसमापयेत् स्मृत्यंतरे द्विजोगृ
हबलीन्दत्वानैवपश्येत्कदाचन स्वयंनैवोत्थरेन्मोहादुत्धारंश्रीर्विनश्यति पृथ्वीचंद्रोदये अनुधृत
बालीनश्चन्त्राणायामान्षडाचरेत् स्वयंतदुत्धरणेचैवप्राजापत्यंसमाचरेत् वैश्वदेवबलिदर्शनेनुमा
यश्चित्तविशेषानुक्तेः गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा प्रायश्चित्तमिदंप्रोक्तंनियमातिक्रमे सती
तिसामान्यप्रायश्चित्तमेव विष्णुस्मरणमेवस्यासर्वदोषनिबर्हणमितिवचनात् विष्णुस्मरणमात्रंवेति
बलिप्रतिपत्तिमाहकात्यायनः पिंडवच्चबलिप्रतिपत्तिरिति यथापिंडप्रतिपत्तिर्गोजविप्राग्न्यंबुषु तथाश्वा
दि बलिभिन्नबलीनामित्यर्थः चंद्रिकायां वैश्वदेवंचपित्र्यंचबलिमग्नौविनिक्षिपेत् शेषंभूतबलेर्विप्र
स्त्यक्त्वाकाकबलेःसमं अग्निस्मृतौ वैश्वदेवबलेःशेषंनाश्नीयाद्ब्राह्मणोगृही काकादिभ्यस्तुतद्देयंविप्रे
भ्योवाविशेषतइति सायंप्रातःपृथग्वैश्वदेवानुष्टानासंभवेप्रातरेवद्विरावृत्यासहवाकार्यइतिपूर्वमुक्तं त

१९१ र्याय स्वाहा सूर्यायेदं० एवमग्रेपि प्रजापतयेस्वा० सोमाय वनस्पतये ३ अग्नीषोमाभ्यां ४ इंद्राग्निभ्यां ५ द्या
वापृथिवीभ्यां ६ धन्वंतरये ७ इंद्राय ८ विश्वेभ्योदेवेभ्यः ९ ब्रह्मणे १० इतिदशाहुतीर्हुत्वा सायंवैश्वदे
वाहुती ~~र्हुत्वा पुनः परिसमूह्य~~ जुहुयात् तत्र मंत्राः अग्नयेस्वाहा अग्नयइदं० ततः प्रजापतये स्वाहेत्या
दि ब्रह्मणे स्वाहेत्यंताः पूर्ववल्लवाहुतीर्हुत्वा पुनः परिसमूहन पर्युक्षणे कृत्वोंच मद्युपस्थायविभूतिंधा
रयेदितिदेवयज्ञः अथ भूतयज्ञः अग्नेरुत्तरतो भूमिं प्रोक्ष्य बदरीफलमितमन्नमादाय सूर्याय स्वाहा
सूर्यायेदं न मम इत्यादि ब्रह्मणे स्वाहेत्यंतदशभिर्मंत्रैर्नै[illegible]रंतर्येण प्राक्संस्थां पंक्तिं कृत्वा तदग्रे सप्ताहुति
प्रक्षेपयोग्यमंतरालं मुक्त्वा तदग्रेपि प्राक्संस्थामेव पंक्तिं कुर्यात् अद्भ्यः ओषधिवनस्पतिभ्यः गृह्याय० गृ
हदेवताभ्यः० वास्तुदेवताभ्यः अद्भ्यो हुता द्बले० प्रत्यक् इंद्राय ऐंद्राद् उत्तरे इंद्रपुरुषेभ्यः० अंतरालस्य द
क्षिणे यमाय० यमोत्तरे यमपुरुषेभ्यः० अंतरालस्य पश्चिमे वरुणाय० तदुत्तरे वरुणपुरुषेभ्यः० अंतराल १९१
स्योत्तरे सोमाय० तदुत्तरे सोमपुरुषेभ्यः० अंतरालस्य मध्ये वारुणं बलेः प्राक् प्राक्संस्थं ब्रह्मणे० ब्रह्मपुरु

षेभ्यः० विश्वेभ्योदेवेभ्यः० सर्वेभ्योभूतेभ्यः० दिवाचारिभ्यः० सोमपुरुषबलेरुत्तरेरक्षोभ्यः अपउपस्पृ
श्यरक्षोबलिंपरिषिच्यतदुत्तरतोभूमिंप्रोक्ष्यसायंकालीनंभूतयज्ञंकुर्यात् तत्रसूर्यपदस्थानेग्निपदं
दिवापदस्थानेनक्तमितिविशेषः अन्यत्सर्ववत्इतिभूतयज्ञः अथपितृयज्ञः प्राचीनावीत्याग्नेय्यभि
मुखः सव्योतर्युपस्थः अंगुष्टपर्वमात्रान्नंसजलमादायस्वधापितृभ्यइति मंत्रेणपितृतीर्थेनयमबलेः
किंचिदाग्नेय्यंनिनयेत् पितृभ्यइदंनममेतित्युक्त्वापरिषिच्ययज्ञोपवीत्यपउपस्पृश्यद्वितीयबलि
हरणयमबलेः किंचिदाग्नेयभागेतथैवदद्यात् अथशौनकोक्ताष्टारचक्राकारबलिहरणप्रयोगः
तत्रसिद्धमन्नमुदक्संस्थंत्रेधाविभज्यदक्षिणभागेनदेवयज्ञंकृत्वाग्नेरुत्तरतोभूमिंसंप्रोक्ष्यमध्यभागाद्ब
दरीफलमितान्नमादायप्राचीमारभ्यैशानीपर्यंतंचक्राकारंनैरंतर्येणसूर्यायस्वाहेत्यादिवास्त्वंतान्बली
न्दत्वाचक्राद्बहिः प्राच्यांप्राक्संस्थंइंद्राय० इंद्रपुरुषेभ्यः० दक्षिणतउदक्संस्थंयमाय० यमपुरुषेभ्यः०
पश्चिमतः प्राक्संस्थंवरुणाय० वरुणपुरुषेभ्यः० उत्तरस्यामुदक्संस्थंसोमाय० सोमपुरुषेभ्यः० चक्रम

ध्येब्रह्मणे० तस्माच्यांब्रह्मपुरुषेभ्यः० ब्रह्मदक्षिणेविश्वेभ्योदेवेभ्यः० ब्रह्मपश्चिमेसर्वेभ्योभूतेभ्य०
ब्रह्मोत्तरेदिवाचारिभ्यः० चक्रस्यैशान्यांबहिःरक्षोभ्यः० एवंअस्योत्तरतः सूर्यपदस्थानेग्निपदस्था
दिवापदस्थानेनक्तंशब्दमुच्चार्यपूर्ववत् द्वितीयंभूतयज्ञंविधायआग्नेय्यभिमुखः प्राचीनावीती
तृतीयभागादंगुष्ठपर्वमात्रान्नेनपराचीनपाणिना स्वधापितृभ्य इतिचक्राग्नेयभागेदत्वातथैवद्वि
तीयचक्राग्नेयेदत्वाउपवीतीपितृयज्ञान्नशेषेणैवचक्राद्बहिर्नैऋतकोणेश्यामाय० चक्राहरण
प्रयोगः अथवायसादिबलिः वैश्वदेवशेषमन्नंपिंडप्रमाणंजलपात्रंचादायगृहांगणेगत्वोप
विश्यभूमौजलमासिच्यश्वचांडालपतितभूतवायसेभ्योन्नंभूमौविकिरेत् तत्रमंत्रः येभूताःप्रच
रंतिदिवानक्तंबलिमिच्छंतोविदुरस्यप्रेष्याः प्रष्टास्तेभ्योबलिंपुष्टिकामोहरामिमयिपुष्टिंपुष्टिपतिर्द
दातुस्वाहेतिगोदोहनकालंतत्रैवस्थित्वातिथिमाकांक्षेत् हस्तौपादौप्रक्षाल्याचम्यगृहंप्रविश्य १९२
शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तुशिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपां

कांक्षेदिति मार्कंडेयपुराणेपिआचम्यच ततः कुर्यात्प्राज्ञो द्वारावलोकनं मुहूर्तस्याष्टमंभागंमुद्वी
क्ष्योत्यतिथिर्भवेदिति अतिथिलक्षणंत्वग्रेवक्ष्यते अथप्रातःसायंवैश्वदेवयोः सहत्वपक्षमाश्रि
त्यप्रयोगउच्यते गृहमध्येकुंडस्यस्थंडिलस्यवा पश्चात्कुशासनेनप्राङ्मुखउपविश्यपवित्रपा
णिराचम्यप्राणानायम्यदेशकालौसंकीर्त्यममोपात्तदुरितक्षयद्वाश्रीपर० प्रातःसायंवैश्वदे
वौसमानतंत्रेणकरिष्येइतिसंकल्प्यजुष्टोदमूनाएह्यग्नइतिमंत्राभ्यामक्षतैःपंचनाग्निमावाह्य
ॐ भूर्भुवः स्वः रुक्ममकनामानमग्निंप्रतिष्ठापयामीतिकुंडेस्थंडिलेवाग्निंप्रतिष्ठाप्यवेणुधमन्या
प्रबोध्यचत्वारिश्रृंगेतिमंत्रैर्ध्यात्वापरिसमूह्यपर्युक्ष्यप्रविश्वानिनइत्यलंकृत्यासिद्धंहविष्यान्नं
पृथक्पात्रेउद्धृत्यतत्पात्रमग्नावधिश्रित्योद्धिःप्रोक्ष्योदगुद्वास्याग्नेःपश्चिमतोदर्भेषुनिधा
यसर्पिषाभ्यज्यसव्यंपाणितलंहृदयेन्यस्यसकृदवदानेनाद्रीमलकमितमन्नमादायांगुष्ठाग्रे
णपीडितंसंहतांगुलिनोत्तानपाणिनाप्रणवादिवर्जितैर्वक्ष्यमाणमंत्रैर्जुहुयात् तत्रमंत्राः स्व

रेत् अथप्रयोगः पूर्ववदग्निस्थापनादि कृत्वान्नमादाय ॐ भूः स्वाहा अग्नयइदं न मम भुवः स्वाहा वायव० स्वः स्वाहा सूर्यायेदं० भूर्भुवः स्वः प्रजापतयइ० अथशाकलमंत्रास्तैत्तिरीयारण्यके देवकृतस्यैनसोवयजनमसि स्वाहा अग्नयइदं ॐ मनुष्यकृतस्यैनसोव० पितृकृतस्यैनसोव० आत्मकृतस्यैनसोव० अन्यकृतस्यैनसो० यत्स्वपतश्चजाग्रतश्चैनश्चकृमतस्याव यत्सुषुप्तश्चजाग्रश्चैनश्चकृमतस्याव यद्दिवा चनक्तंचैनश्चकृमतस्याव यद्विद्वांसश्चाविद्वांसश्चैनश्चकृतमस्या० एनसएनसोवयजनमसि स्वाहेत्येकादशाहुतीर्हुत्वा सर्वत्राप्यग्नयइदं न ममेत्युद्देशत्यागोपूर्ववत्कुर्यादिति बह्वृचानग्नेस्तु सूत्रोक्तएवेति वृत्तिः आचाररत्ने आचारसारेप्येवं पक्वान्नप्रतिग्रहेपितेनैव वैश्वदेवः तस्यपाकाप्रयोजकत्वात् वृत्तिकृत्वाक प्रयोजकतामाह अथकेवलसूत्रोक्तवैश्वदेवप्रयोगः पचनाग्नेः पश्चिमत उपविश्य प्रातः सायं वैश्वदेवौ समानतंत्रेण करिष्यत इति संकल्प्य सिद्धं हविष्यान्नमादाय सूर्याय स्वाहेत्यादि ब्राह्मण इत्यंताः प्रातराहुतयो हुत्वा अग्नये स्वाहेत्यादि सायमाहुतयो हुत्वाग्नेरुत्तरतः भू

१९३

र्वद्भूतयज्ञद्वयंपितृयज्ञद्वयंच कृत्वाआभ्यांवैश्वदेवाभ्यांपरमेश्वरः प्रीयतामितीश्वरायकर्मसमर्पयेदिति केवलस्मृत्युक्तवैश्वदेवः इतिमाटेइत्युपनामकनारायणात्मजत्र्यंबकविरचितेआचारेंदौवैश्वदेवप्रकरणंसमाप्तं अथमनुष्ययज्ञः मनुः अतिथिभ्योन्नदानंतुनृयज्ञःसतुपंचमः श्रुतिरपि मोघमन्नं विंदतेअप्रचेताः सत्यंब्रवीमिवधइत्सतस्य नार्यमणंपुष्यतिनोसखायं केवलाघोभवतिकेवलादी अत्रार्यमसखिशब्दाभ्यामुपलक्षितदेवमनुष्ययज्ञाभ्यांसंदंशेन पंचानामप्यकरणेनिंदयानित्यकर्तव्यताकल्प्यते अतिथिलक्षणमुक्तंमार्कंडेयपुराणे आज्ञातकुलनामानंतत्कालेसमुपस्थितं बुभुक्षुमागतंश्रांतंयाचमानमकिंचन ब्राह्मणंप्राहुरतिथिंपूज्यंस्वशक्तितोबुधैः अत्रब्राह्मणग्रहणात्क्षत्रियादेर्नातिथित्वं नैकग्रामीणमतिथिंकुर्यान्नाब्राह्मणंतथेतिविष्णुधर्मोत्तरोक्तेश्च किंत्वभ्यागतत्वमानं सचातिथिर्द्वेधा ब्रह्मचारियतिभेदात् यदुक्तंवायुपुराणे वालखिल्योयतिश्चैवविज्ञेयोह्यतिथिःसदा अभ्यागतःपचानःस्यादतिथिःस्यादयाचक इतिवालखिल्योब्रह्मचारीपचानःपचमानोगृहस्थोवानप्रस्थश्चेत्यर्थः आगमशास्त्रस्यानित्यत्वान्नमुमूर्ष यमोप्याह तिथिपर्वोत्सवाः सर्वेत्यक्तायेे

न महात्मनां सोतिथिः सर्वभूतानां शेषानभ्यागतान्विदुः प्रतीयतिश्चैकरात्रंनिवसन्नुच्यतेतिथिः यस्माद
नित्यं वसति तस्मातमतिथिंविदुरिति पुनरप्यतिथिर्द्विविधः मध्यान्हागतः सायंकालागतश्चेति यदाह
योगियाज्ञवल्क्यः दिनेतिथौतु विमुखेगते यत्पातकंभवेत् तदेवाष्टगुणंप्रोक्तंसूर्योढे विमुखेगते इति
सूर्येस्तंगते प्राप्नोतीति तिथिः सूर्योढः मनुः अप्रणोद्योतिथिः सायंसूर्योढो गृहमेधिना काले प्राप्तस्त्व
काले वा नास्यानश्नन्गृहेवसेत् नारसिंहे नपरीक्षेन्नरितंनविद्यानकुलंतथा नशीलंनच देशादीन
तिथेरागतस्यहि कुरूपं वा सुरूपं वा कुचैलं च सुवाससं विद्यावंतमविद्यं वा सगुणं वाथनिर्गुणं मन्ये
त विष्णुमेवैतं साक्षान्नारायणंहरिं अतिथिं समनुप्राप्तं विचिकित्सेन कर्हिचित् व्यासः पथिश्रांत
मविज्ञातमतिथिं क्षुत्पिपासितं योनपूजयेद्भक्त्यातमाहुर्ब्रह्मघातकं अयंच ब्रह्महत्यातुल्यः प्रत्य
वायः सत्यांशक्तावत्यंतपात्रीभूतस्यातिथेरतिक्रमणहेमाद्रिः आदित्यपुराणे येनयेनच तुष्येत १९४
नित्यमेव यथातिथिः अतिथिः संप्रसीदेत नतत्कुर्याद्विचक्षणः अथमनुष्ययज्ञार्थमभ्यागता

तु सर्वतः शांतिः शांतिः शांतिः इतिजपेदितिवायसादिबलिः यजमाने बहिर्द्वारिगते पत्न्यान्येन वाभृ
तयज्ञाद्युत्सृत्यास्तु गोविजाग्न्यतिथिभ्योवाप्रतिपादयेदिति कृष्णभट्टीकारः अथ सूर्यःप्रजापतिश्चै
वप्रजापतिः चतस्त्रआहुतीर्हुत्वाशेषंतत्रंसमापयेदितिस्मृतिरत्नाकरवचनाद्धोजनकुतूहलोक्तन्याय
विन्मताच्चप्रकारांतरेणसह२त्वपक्षमाश्रित्योच्यते पूर्ववत्संकल्पादि हविरासादनांतं कृत्वा सूर्यायस्वा
हाप्रजापतये स्वाहेतिप्रातस्तनाहुतीर्हुत्वाअग्नये स्वाहाप्रजापतयेस्वाहेतिरात्र्याहुती चहुत्वा सोमायवन
स्पतये स्वाहेत्यादिशेषाअष्टाहुतीःसकृज्जुहुयात् एवं बलिहरणेपितत्रदिवाचारिभ्योनक्तंचारिभ्यइत्ये
ते आहुतीक्रमेणपृथक् इतिप्रकारांतरसहत्वपक्षप्रयोगः अथवैश्वदेवानुकल्पो विश्वप्रकाशे अन्नेन
तंडुलैर्वापिफलेनाद्भिरथापिवा वैश्वदेवंप्रकुर्वीतजपेन्मंत्रांस्तथापिवा संग्रहे अन्नेन तंडुलैर्वाप्योजलेना
थवापिवाचरेत् वैश्वदेवंफलैर्वापि मंत्राजप्याअसंभवे इतिवैश्वदेवानुकल्पः अथविधुरस्य वैश्वदेवे विशे
षउक्तोरत्थवसिष्ठेनअनग्निकस्तु योविप्रः सोन्नं व्याहृतिभिः स्वयं हुत्वाशाकलमंत्रैश्चविशिष्टादन्नाद्बलिंह

येतु मनुः यदित्वतिथिधर्मेण क्षत्रियोगृहमाव्रजेत् भुक्तवत्सुतुविप्रेषु कामंतमपिभोजयेत् वैश्यशूद्रा
१९५ वपिप्राप्तौकुटुंबेतिथिधर्मिणौ भोजयेत्सहभृत्यैस्तावानृशंस्यंप्रकल्पयन् तथा इतरानपिसख्यादीन्
संप्रीत्यागृहमागतान् प्रकल्प्यान्नंयथाशक्तिभोजयेत्सहभार्ययेति किंबहुनांपतितादयोपिवै
श्वदेवकालआगताभोजनार्हाः यदाह पराशरः पापीवायदिचांडालोविप्रघ्नःपितृघातकः वैश्व
देवेतुसंप्राप्तःसोतिथिःस्वर्गसंक्रमः बह्वतिथिभ्योदातुमशक्तौशंखः यदिबहूनांनशक्नुयादेक
स्मैशीलवतेदद्यात्प्रथममुपागताःस्याद्धोत्रियेस्तस्माइति अत्रब्राह्मणभोजनशक्त्यभावेअनुकल्प
माहाश्वलायनः यस्तुभोजयितुंविप्रंनैकमप्यशकन्गृही सचान्नादंनमुत्धृत्यब्राह्मणायप्रकल्पये
त् भगवानपि पितृयज्ञइतिप्रोक्तोनरयज्ञस्तथोच्यते पुष्कलाख्यप्रमाणान्नमन्यपात्रेसमुध्धरे १९५
त् अस्ततोदकहस्तेनचोपवीतीनिवेदयेत् योगिभ्यःमनकादिभ्यःइदमन्नंनममेतिच दद्यात्तदन्नंवि
प्रायकुर्याद्गृहबलिंतथा अन्नशुद्धिर्भवेदाशुत्यन्नदोषैर्नलिप्यतइति अत्रमनुष्ययज्ञानंतरंगृहब

त्रिरुक्तः गृह्यपरिशिष्टेतु गृहबल्यनंतरं मनुष्ययज्ञ उक्तः उभयोर्विरोधे आचार्योक्तेः प्राबल्यादाश्व
लायनै गृहबल्यनंतरं मनुष्ययज्ञः कर्तव्यः प्रयोगपारिजातेप्येवं बौधायनः अहरहर्ब्राह्मणेभ्योन्नं
दद्यात्मूलफलशाकानि वेत्यूथैनं मनुष्ययज्ञं समाप्नोतीति कार्ष्णाजिनिरपि भिक्षांवापुष्कलंवापिहं
तकारमथापिवा असंभवेनरोदद्यादुदपात्रमथापिवेति एषांस्वरूपं पराशरेणोक्तं ग्रासमात्राभवेद्भि
क्षापुष्कलंतुचतुर्गुणं पुष्कलानितुचत्वारिहंतकारंविदुर्बुधाइति ग्रासपरिमाणंस्मृत्यर्थसारे अंगुष्ठ
पर्वमात्रातुआकृतिः परिकीर्तिता आकृतिद्वितयंग्रासोमयूरांडाकृतिस्तथेति पारिजातेआचार्यः
तस्माच्छक्त्यान्नपानाभ्यांआसनेनोदकेनवा वाचासूनृतयावापिपूजयेदतिथिंगृही तृणानिभूमिरु
दकंवाक्चतुर्थीचसूनृता अशक्तानांसतांगेहतोच्छिद्यंतेकदाचनेति स्मृतिदर्पणे अतिथिभ्योदेय
मन्नंगोभ्योवातदलाभतः मनुष्ययज्ञविधिमाहनारायणः नियुंज्येकमनेकंवाश्रोत्रियंप्राङ्मुखंस
दा निवीतीतद्गतमनाऋषीन्ध्यात्वासमाहितः ऋषीन्सनकादीन् तेषांमनुष्यत्वात् आश्वलायनः अतो

मनुष्ययज्ञार्थंदद्यादित्यभिप्रायवानप्रस्के सनकादिभ्यइत्युक्त्वाहंतकारेणवैहविः कात्यायनः स्वधाकारःपि
१९५ तृणांतुहंतकौं[redacted]करोनृणांतथेति शौनकेनयोगिभ्यःसनकादिभ्यइदमन्नंनममेतिमंत्रउक्तः आश्व
लायनेनतुसनकादिभ्योहंतइतिमंत्रउक्तः उभयोर्विरोधेस्वाचार्योक्तेः प्राबल्यावचनांतरैकवाक्य
त्वात् चाश्वलायनैःस्वस्मृत्युक्तएवमंत्रो-ग्राह्यः अतिथिपूजामंत्रमाहपराशरः अतिथेभरदेहंस्वमु
द्धरार्थमिहागतः संसारपंकमग्नमामुद्धरस्वाघनाशन अत्रोक्तनारायणादिस्मृतिषुमनुष्ययज्ञेनि
वीतत्वमुक्तं तदाश्वलायनैर्नादर्तव्यं यत्रनिवीतप्राचीनावीतेविधीयेतेतत्रैवतेभवतः नतुमानुष्यं
पैतृकंकर्मद्द[redacted]स्वेतिसूत्रवृत्तावुक्तेः शौनकेनउपवीतित्वविधानाच्च अतिथ्यभावेकर्तव्यमुक्तंआचा
र्येण अतिथिनामभावेतुवैश्वदेवांतिकेद्विजः गोदोहमात्रमाकांक्षंस्तिष्ठेद्देवगृहांगणे ततोऽग्रमन्ना १९५
दुद्धृत्यपात्रेनिक्षिप्यभागशः यत्यादीनांचवृत्त्यर्थंस्वयंभुंजीतवाग्यतः अतिथिपूजाफलंविष्णुधर्मोत्तरे
सततमिहनरोयः पूजनंचातिथीनांतृणजलमृदुवाक्यैःसर्वशक्त्याविदध्यात् सुरसदसिसपूज्योदेव

र्चनमनुजानातिआश्वलयनाचार्यः मध्यंदिनेसमायांतंदेशकालाद्यवेदितं अतिथिंतंविजानीयात्तंप्रय
त्नेनपूजयेत् ज्ञात्वासमागतोयस्तुसोभ्यागतइतिस्मृतः तंचापिपूजयेत्स्मृत्यागृहीनावत्समागतं अ
तिथ्यभ्यागतार्चातुनृयज्ञःस्याद्गृहेसतां तेनातीवभवेद्वृद्धिःकीर्तिधर्मश्चपुष्कलः सामान्यतोब्राह्म
णसंप्रदानकान्नदानस्यैवमनुष्ययज्ञत्वमाहश्रुतिः यद्ब्राह्मणेभ्योन्नंददातितन्मनुष्ययज्ञःसंतिष्ठत
इति हीनोत्तमातिथिसमवायेविशेषमाहमनुः आसनावसथौशय्यामनुव्रज्यामुपासनं उत्तमेषूत्त
मंकुर्याद्धीनेहीनंसमेसममिति भोजनेतुनवैषम्यं यदाहवसिष्ठः यद्येकपंक्तौविषमंददातिस्नेहा
द्भयाद्वायदिवापिहेतोः वेदेषुदृष्टंमुनिभिश्चगीतंतांब्रह्महत्यांमुनयोवदंतीति विषमंएकस्योत्तमं
अन्यस्यहीनमित्यर्थइतिपारिजाते नस्य क्वा[illegible]चिदपवादमाहवैधः निम्नोन्नतेंतरेद्वारमार्गेस्तंबेन
चांबुना अग्निनाभस्मनावापिपंक्तिदोषोनविद्यते अत्रापवादाभावेतुप्रायश्चित्तमुक्तंऋग्विधाने प्रधा
न्यस्यजपेत्सूक्तंत्रिज[illegible]शतंनैवकल्माषं भूस्करेभ्योभुक्तिकालेपंक्तिभेदंकरोतिचेदिति हीनवर्णविष

धात् दिनेतिथौतुविमुखगते यत्पातकंभवेत् तदेवाष्टगुणंप्रोक्तंसूर्योढेविमुखेगते इतियोगयाज्ञवल्क्य
स्मृतौ सायमतिथ्यपूजनेबहुदोषश्रवणाच्चेति अथमनुष्ययज्ञप्रयोगः गृहागतमतिथिमभ्यागतं
वाप्राङ्मुखंपीठादावुपवेश्यस्वयमुदङ्मुखः उपस्थासनेनोपविश्याचम्यप्राणानायम्यदेशकालौसं
कीर्त्यममोपात्तदुरि॰ र्थंमनुष्ययज्ञंकरिष्येइतिसंकल्प्य अतिथेभरदेहंस्वमितिपूर्वोक्तमंत्रेण ॐअ
तिथयेनमइतिनाममंत्रेणवागंधादिनासंपूज्यद्विजभोजनपा।र्थमन्नंपात्रस्थंद्विजाग्रेनिधाय ॐ
सनकादिभ्योहंतइतिमंत्रेणसाक्षतोदकमुत्सृज्यसनकादिभ्यइदंनममेतित्यक्त्वातेनान्नेनभोजये
त् अत्रातिथ्यभ्यागताभावेतद्भोजनाशक्तौवापात्रांतरेषोडशाचरेकान्यतमग्रासपरिमितमन्नंनिधा
यपूर्वोक्तमंत्रेणैवत्यक्त्वाद्विजादिभ्यःप्रतिपादयेत् द्विजाभावेगोभ्यः तासामप्यभावेऽग्नौहोतव्यं य
द्ब्राह्मणेभ्योन्नंददातितन्मनुष्ययज्ञःसंतिष्ठतइतिश्रुतौबहुवचनाद्ब्राह्मणत्रयभोजनंमुख्यंअशा
क्तौएकब्राह्मणभोजनंअस्मिन्पक्षेपिसनकादिभ्यइतिबहुवचनंबहूनांसनकादीनामुद्देश्यत्वाद्युक्तमे
वेति इतिमाटेइत्युपनामकनारायणात्मजत्र्यंबकविरचितेआचारेंदौमनुष्ययज्ञः अथब्रह्मयज्ञस्य १९७

दक्षिणारूपस्य भिक्षादानविधिः तत्र मनुः भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे भिक्षमाणं ब्राह्म
णं ब्रह्मचारिणं सोपि विधिर्गौतमेन दर्शितः स्वस्तिवाच्य भिक्षदानं अपूर्वमिति स्वस्तीति वाचयित्वा
हस्ते जलं प्रदाय भिक्षामादाय भिक्षादानं कार्यमित्यर्थः तत्र वार्घं तयोरुदकदानं कार्यं तथा च व्यासः
यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात्पुनर्जलं भैक्षं पर्वतमात्रं स्यात्तज्जलं सागरोपमं अकरणे प्रत्यवाय उक्तः
कूर्मपुराणे अपूजयंहि काकुत्स्थ तपस्विनमुपागतं दुःखार्तश्च परे लोके श्वमांसानि च खादति व्यासो
पि यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेदिति अत्र
पराशरः दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणां इच्छया च ततो दद्याद्विभवे सत्यवारितमिति एतद
पि व्रताध्ययनादियोगविषयं सकृत्य भिक्षवे भिक्षा दातव्या सव्रताय चेति याज्ञवल्क्यस्मरणात् अ
व्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः तं ग्रामं दंडयेद्राजा चोरभक्तप्रदो हि स इति वसिष्ठस्मरणाच्च यदा
तु वैश्वदेवात्प्राक्भिक्षुरागच्छति तदा व्यासेनोक्तं अकृते वैश्वदेवे तु भिक्षुके गृहमागते उद्धृत्य वैश्वदेवार्थं
भिक्षां दत्वा विसर्जयेदिति गौतमः वैश्वदेवाकृते दोषं शक्तो भिक्षुर्व्यपोहितुं नहि भिक्षुकृतान्दोषान्वैश्व

देवोव्यपोहति वैश्वदेवस्यपश्चात्करणेनप्रसक्तोयोदोषोसभिक्षादानेननविवर्त्यते भिक्षापरिहारेणतुयोदो
षःनासौपूर्वकृतवैश्वदेवेननिवर्त्यते तेच भिक्षवोव्यासेनदर्शिताः यतिश्चब्रह्मचारीचविद्यार्थीगुरुपो
षकः अध्वगःक्षीणवृत्तिश्चषडेतेभिक्षुकाःस्मृताः पुराणेपि व्याधितस्यार्थहीनस्यकुटुंबाच्चच्युतस्य
च अध्वानंवाप्रपन्नस्यभिक्षाचर्याविधीयतइति पाराशरः सांतानिकंयक्ष्यमाणंअध्वगंसर्ववेदसंगु
र्वर्थपितृमात्रर्थंस्वाध्यायार्थ्युपतापिनंसांतानिकःसंतानायविनियुक्तःइज्यार्थासर्ववेदसःसर्वस्वदक्षि
णंयागंकृत्वानिःस्वत्वमापन्नःसनूइज्यार्थी मातृपितृशुश्रूषार्थंइज्यार्थी स्वाध्यायप्रवचननिर्वाहाय
इज्यार्थीउपतापीरोगीस्वाध्यायार्थीसहतःउपतापीस्वाध्यायार्थ्युपतापीतिमध्यमपदलोपीसमासः
एतान्विचार्यभिक्षादद्यादितिशेषः भिक्षाप्रमाणंपूर्वपूर्वमुक्तं एवंकुर्वतःफलमाहयमः सत्कृत्यभिक्षु
वेभिक्षांयःप्रयच्छतिमानवःगोप्रदानंसमंपुण्यंतस्याहभगवान्यमः ब्रह्मपुराणेपि यःपात्रपूरणीभिक्षां
यतिभ्यःसंप्रयच्छति विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयादिति अत्रभिक्षान्नाशिनांफलमाहात्रिः ११८
शाकभक्षाःपयोभक्षाःयेचान्येपवनाशिनः सर्वेतेभैक्षभक्षस्यकलांनार्हंतिषोडशीं तत्रविशेषमाहस

तानांसदास्याद्भवतिचनरलोकेजायमानः समृद्धः राजन्याविप्रदैवत्याभार्याश्चपतिदेवताः गृहस्थोतिथिदैव
त्यस्तस्मात्तंपूजयेत्सदा नारदीयपुराणेपि पुनंतिगृहिणांगेहान्नदीयाः पादपांसवः क्षालयत्यखिलंपापंय
त्पादक्षालनोदकं सत्कृतिःप्रणतिःर्येषांयज्ञादपिविशिष्यते येषामन्नोदकंदत्तंतारयत्यखिलंकुलं
अतिथिभ्यः परंतेभ्यः किमस्तिभुवनत्रये अपूजनेप्रत्यवायमहापराशरः अतिथिर्यस्यभग्नाशोगृ
हात्प्रतिनिवर्तते पितरस्तस्यश्नाश्नंतिदशवर्षाणिपंचच काष्ठभारसहस्रेणघृतकुंभशतेनच अ
तिथिर्यस्यभग्नाशस्तस्यहोमोनिरर्थकः मार्कंडेये अतिथिर्यस्यभग्नाशोगृहात्परिनिवर्तते सदत्वा
दुष्कृतंतस्यपुण्यमादायगच्छति अयंचमनुष्ययज्ञोनित्यश्राद्धात्पूर्वमेवेतिदिवोदासः नित्यश्राद्धोत्तर
मित्याचारादर्शः सायंस्यात्पितृयज्ञांतंब्रह्मयज्ञविवर्जितमितिशाकलवचनेपितृयज्ञांतमित्युक्त्वारा
त्रौमनुष्ययज्ञस्यापिनिवृत्तिः प्रतियतइत्याचारार्केदिवाकरेणोक्तं तन्नसमंजसं कृत्वामनुष्ययज्ञां
तंउपस्थायंचमेश्वरः हविर्भुजंनमस्कृत्यगोत्रनामपुरःसरं जप्त्वाचैवतुगायत्रींधारयेद्धोमभस्मच
स्मृत्वायज्ञपतिंदेवंकृतंतस्मैनिवेदयेत् एवंचापिदिवाकृत्वासायंचापितथैवचेत्याश्वलायनस्मृतिविरो

त्येव एतदनापद्विषयं तदाहाग्निः महायज्ञस्याकरणे विप्रमापदि भोजयेत् अनापन्नस्तु एव से द्विप्रं
भक्त्यातु भोजयेत् अन्यच्च पंचयज्ञस्याकरणात्स्वस्थस्तु एव से द्विजः अस्वस्थो विप्रवाक्येन पूयते गो
श्वतर्पणादिति कूर्मपुराणेतु पंच यज्ञानकृत्वातु यो भुंक्ते प्रत्यहं गृही अनातुरः सति धने कृच्छ्रार्द्धे
न विशुध्यतीति इति पंचमहायज्ञाकरणे प्रायश्चित्तं अथ नित्यश्राद्धं तदाह हेमाद्रौ व्यासः अह
न्यहनि यत्क्रियते तन्नित्यमिति कीर्तितमिति मार्कंडेयपुराणे कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा
पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव वा इदं षड्दैवत्यं दैवादिहीनं च तदुक्तं पुराणे नित्यश्राद्धं तु
यन्नाम दैवहीनं तदुच्यते तत्तु षाड्दैरुषं ज्ञेयं दक्षिणापिंडवर्जितं प्रचेता अपि नामंत्रणं न होमश्च ना
ह्वानं न विसर्जनं न पिंडदानं नसुरा नित्ये कुर्याद्द्विजोत्तम उपवेश्यासनं दद्यात्संपूज्य कुसुमादिभिः नि
र्दिश्य भोजयित्वा तु किंचिद्दत्वा विसर्जयेत् अत्र दक्षिणाया विहितप्रतिषिद्धत्वाद्विकल्पः शक्ताशक्त १९९
त्वेन व्यवस्थितो बोध्यः अत्र दातृभोक्त्रोर्नियमा न संति भोक्तारं प्रति दातारं व्रतं तत्र न विधत्त इति दे
वलोकैः अत्रानुकल्पमाह कात्यायनः एकमप्याशयेद्विप्रं पितृयज्ञार्थसिद्धये अदैवं नास्ति चे

दन्नं भोक्ताभोज्यमथापिवा अभ्युध्दृत्ययथाशक्तिकिंचिदन्नंयथाविधि पितृभ्यइदमित्युक्तास्वधा
कारमुदाहरेदिति तत्प्रतिपत्तिमाहविष्णुः तदन्नंभिक्षवेदद्यातदलाभेगोभ्योदद्यादग्नौवाक्षिपेदि
ति अत्राप्यसामर्थ्येमनुनोक्तं दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा पयोमूलफलैर्वापिपि
तृ[redacted]ःभ्यःप्रीतिमाचरन् बौधायनेनतर्पणेनापिनित्यश्राद्धसिद्धिरुक्ता अपिवापःस्तत्पि
तृयज्ञःसंतिष्ठतइति वैश्वदेवांतःपातिस्वधापितृभ्यइतिपित्र्यबलिनैववानित्यश्राद्धसिद्धि
रितिपूर्वमुक्तं इदंदिवासंभवेरात्रावपिप्रहरपर्यंतंकार्यमितिचंद्रिकायां दिवासंभवेलोपएवेति
पृथ्वीचंद्रः अस्मिन्पक्षेपित्र्यबलेर्नित्यश्राद्धप्रतिनिधित्वेपिनरात्रौनिषेधः प्रतिनिधौनिषेधा
प्रवृत्तेः समुच्चयपक्षेस्त्रानापत्यभावाचतथास्वल्पद्वादश्यांअपरत्रात्रेपिनित्यश्राद्धं अपकर्षवि
धेर्बलीयस्त्वात् आचारसारेआचाररत्नेचैवं नित्यश्राद्धेनदेशकालनियमोनास्तीतिस्मृत्यर्थ
सारे उत्तमान्नसंभवेतुजघन्यंनदद्यादितिचंद्रिकायां एतद्वर्षपर्यंतमावश्यकमूर्ध्वंतुकृताकृतं

नित्यश्राद्धंप्रक्रम्यएवंसंवत्सरमित्युक्तं कृताकृत मनउर्ध्वमित्यापस्तंबोक्तेरितिशूद्राचारशिरोमणि
हेमाद्रौचंद्रिकायांचदेवलः अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंकृत् द्विश्चतुर्वासकृद्वाकार्यमिति
हेमाद्रिसं[illegible]श्चंद्रिकाच नित्यश्राद्धाकरणेप्रायश्चित्तमुक्तमृग्विधाने आर्चनत्रजपेन्मंत्रंदशाव
रंजपेद्बुधः नित्यश्राद्धंयदान्यूनंकुरुतेनात्रसंशयः इदंदर्शादिषड्दैवतादिश्राद्धेप्राप्ते प्रसंगसि
द्धेर्नपृथक्कार्यं तदुक्तंचमत्कारखंडे नित्यश्राद्धंनकुर्वीत प्रसंगाद्यत्रसिध्यति श्राद्धांतरेकृतेन्य
त्रनित्यत्वात्तन्नहापयेत् प्रसंगसिध्यभावेहेमाद्रौमार्कंडेयः ततोनित्यक्रियांकुर्याद्भोजयेच्चततोतिथीन्
ततस्तदन्नंभुंजीतसहभृत्यादिभिर्नरः ततः श्राद्धशेषान् नित्यक्रियांनित्यश्राद्धं तत्रपृथक्पा
केननैत्यकमितितेनैवोक्तेः पाकैक्यविकल्पः इदंचमनुष्ययज्ञोत्तरंकर्तव्यं तत्रवशिष्टः श्रोत्रियाया
ग्रंदद्याद्ब्रह्मचारिणेवानंतरंपितृभ्योदद्यादिति एतदत्युत्तरंश्रोत्रियादेरुपस्थितौज्ञेयं अनुपस्थि
तौतुमनुष्ययज्ञात्प्रागेवनित्यश्राद्धमित्याचारादर्शः बहृचानांस्वसूत्रक्रमानुरोधादिदमेवयुक्तं कम २००

एव माधूकरीं समादाय ब्राह्मणेभ्यः प्रयच्छति भिक्षुकाद्यभावे अन्नं गोभ्यो दद्यादग्नौ प्रक्षिपेदिति
इत्याचारेंदौ भिक्षादानविधिः अथ पंच महायज्ञप्रशंसा तत्र हारीतः देवान्पितॄन्मनुष्यांश्च भूतानि ब्राह्म
णांन्तथा तर्पयन्विधिनाविप्रो ब्रह्मभूयाय कल्पते शंभुरपि यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः
सम्यक्पंच महायज्ञैर्दरिद्रस्तुदवाप्नुयात् अकरणे प्रायश्चित्तं ऋग्विधाने द्वात्रिंशति जपेत्सूक्तं त्रिवा
रं तु यदा द्विजः वैश्वदेवं विना भुंक्ते तदा पापात्प्रमुच्यते बौधायनस्तु बौधायन इदं प्राह लोपे पंच महे
षु तु एतेभ्यः पंच यज्ञेभ्यो यद्येकोपि तु हीयते मनस्वत्याहुतिस्तत्र प्रायश्चित्तं विधीयते द्व्यहं वापि प्रमा
दादकृतेषु च तिस्रस्तंतुमतीर्हुत्वा च तस्रो वारुणीर्जपेत् दशाहं द्वादशाहं वा निवृत्तेषु च सर्वशः चत
स्रो वारुणीर्हुत्वा कार्यस्तंतुमतश्चरुरिति अव ते हेळ उदुत्तमभिमंत्रे वरुण तत्त्वा यामीति चतस्रो वारुण्यः
स्मृत्यंतरे तु अकृत्वान्यतमं यज्ञं पंचानामधिकारतः उपवासेन शुद्धिः स्यात्पाक संस्थासु चैव हीति अकृ
त्वान्यतमं यज्ञमित्येकत्वस्य गृहं संमार्ष्टीतिवदविवक्षितत्वात् द्विव्यादियज्ञलोपे प्येतत्प्रायश्चित्तं भव
सयाति नरकं घोरं भोक्ता भुंक्ते तु किल्बिषं पक्वान्नभिक्षाग्निनातेनैव वैश्वदेवः कर्तव्य इति सर्वमुक्तं भिक्षुकालाभे विष्णुः ४१०

न्नत्र मरुत इत्यृचो दशवारं जपः नित्यश्राद्धे तर्पणं ब्रह्मचर्यादिनियमश्च नास्ति इति शांडिल्यकुलसंभव
नारायणात्मज त्र्यंबकविरचिते आचारेंदौ नित्यश्राद्धं अथ प्रयोगः अयं च शिष्टाचारात् पंचयज्ञोत्तर
मिति मदनरत्ने प्रभासखंडे तृणान्नाद्यपरागावः कर्तव्या भक्तितोन्वहं अकृत्वा स्वयमाहारं कुर्वन्प्रा
प्नोति दुर्गतिं आत्माहारप्रमाणेन प्रत्यहं गोषु दीयते आत्माहारप्रमाणान्नाशक्तो ब्रह्मांडे सौरभेय्यः
सर्वहिताः पवित्राः पुण्यराशयः प्रतिगृण्हंतु मे ग्रासं गावस्त्रैलोक्यमातरः दद्यादनेन मंत्रेण गवां ग्रासं
सदैव हि सदैवेत्युक्त्या अकरणे प्रत्यवायश्रवणाच्चायं नित्य इत्याचारादर्शः प्रभासखंडे मंत्रांतरं
सौरभेयी जगत्पूज्या देवि विष्णुपदे स्थिता सर्वदेवमयी ग्रासं मया दत्तं प्रतीच्छतु काम्यश्च तृणोदके
न संयुक्तं यः प्रदद्याद्गवान्हिकं कपिलाशतदानस्य फलं न विद्यान्न संशय इति चंद्रोदये भविष्यात् इत्या २०१
चारेंदौ गोग्रासः अथ प्रसंगादन्नदानस्य फलमाह व्यासः ग्रासमप्येकमन्नस्य यो ददाति दिने दिने ०
स्वर्गलोकमवाप्नोति नरकं न च गच्छति द्वाविमौ पुरुषौ लोके सूर्यस्योपरि तिष्ठतः अन्नप्रदानाद्दुर्भिक्षे सुभि

क्षेहेमवस्त्रदः अश्वमेधविधानेनयत्पुण्यंपलमाप्यते तेनतुल्यंविशिष्टंवाब्राह्मणेतर्पितेफलं
विष्णुरपि कृत्वाहिपापकंकर्मयोदद्यादन्नमर्थिने ब्राह्मणायविशेषेणनसपापेनयुज्यते ब्रह्मवैव
र्तेपि अन्नंप्रजापतिसाक्षादन्नंविष्णुःशिवःस्वयं तस्मादंनसमंदानंनभूतंनभविष्यति बृहन्ना
रदीये भ्रूणहाप्यन्नदानेनशुद्धोभवतिभूपते नान्नतोयसमंदानंनभूतंनभविष्यति अन्नदःप्राण
दःप्रोक्तःप्राणदश्चापिसर्वदः सर्वदानफलंयस्मादन्नदस्यनृपोत्तम अन्नदोब्रह्मसदनंयातिवंश
शतान्वितः नतस्यपुनरावृत्तिरितिशास्त्रस्यनिश्चयः अन्नदानसमंदानंनभूतंनभविष्यति सद्यस्तु
ष्टिकरंज्ञेयंजलान्नदानंततोधिकं महापातकयुक्तोवायुक्तोवासर्वपातकैः शृणुष्वचित्रंभूपालशुध्यत्य
न्नजलप्रदः शरीरमन्नजंप्राहुःप्राणमन्नंप्रचक्षते तस्मादन्नप्रदोज्ञेयःप्राणदःपृथिवीपते सद्यस्तु
ष्टिकरंदानंसर्वकामफलप्रदं तस्मादन्नसमंदानंनभूतंनभविष्यति अन्नदस्यकुलेजाताआसहस्रकु
लान्नृप नरकंतेनपश्यंतितस्मादन्नप्रदोनरः पात्रापात्रंविचार्यअन्नंदद्यादितिव्यतिरेकेणोक्तं मनु

ना परान्नेनोदरस्थेनयः करोतिशुभाशुभं अन्नदस्यत्रयोभागाः कर्ताभागेनलिप्यते तस्मात्पापप्राप्ति
हेतुभूतंदुष्टंपरित्यज्यशिष्टायदद्यादित्यर्थः तदुक्तंकूर्मपुराणे सभुक्तमपिविद्वांसंधार्मिकंभोज
येद्द्विजं नतुमूर्खमवृत्तस्थंदशरात्रमुपोषितमिति विद्याधिकविषयेविशेषउक्तस्तेनैव विद्याव
तुसमिद्धेषुहुतंविप्रमुखाग्निषु संतारयतिदुर्गाच्चमहतश्चैवकिल्बिषादिति शातातपोपि वेद
विद्याव्रतस्नातेश्रोत्रियेगृहमागते क्रीडंत्योषधयः सर्वायास्यामः परमांगतिं नष्टचशौचेव्रतभ्र
ष्टेविप्रेवेदविसर्जिते दीयमानंरुदत्यन्नंकिंमयादुष्कृतंकृतमिति इदंवैधहव्यकव्यविषयंअतए
वशातातपेनउक्तवचनानंतरं यावद्ग्रसतेग्रासान्हव्यकव्येष्वमंत्रवित् तावतोग्रसतेप्रेत्यदीप्ता
न्शूलानयोमयानित्युक्तं दयामुद्दिश्यतुयस्यकस्यापिअन्नाच्छादनादिसर्वंदेयं तथाचमहाभार
ते अन्नदः प्राप्नुतेराजन्दिविचेहमहत्सुखं नावमन्येदभिगतंनप्रणुद्यात्कदाचन अपिश्वपाके २०२
शुनिदानवानंविप्रणश्यतितथाब्राह्मणेषुरूपंदानंअन्नंशूद्रेमहाफलं अंन्नदानेचशूद्रेचब्राह्मणे

लौकिकाग्निके तु मनुष्ययज्ञार्थं नित्यश्राद्धार्थं चेति ब्राह्मणद्वयमुपवेश्य उभयोस्तंत्रेण पाद्यादिपूजां विधा
य तंत्रेणान्नदानं तत्रादौ श्राद्धीयस्य पश्चान्मनुष्ययज्ञार्थस्येत्युक्तं अथ नित्यश्राद्धप्रयोगः उदङ्मुखं
ब्राह्मणमुपवेश्य स्वयमाग्नेय्यभिमुखः सव्योतर्युपस्थः आचम्य प्राणानायम्य तिथ्यादि संकीर्त्य प्राचीना
वीती अस्मत्पितृपितामहप्रपितामहानां अमुकगोत्राणां वसुरुद्रादित्यस्वरूपाणां सपत्निकानां अस्मन्मा
तामह मातुःपितामह मातुःप्रपितामहानां अमुकगोत्राणां अमुकशर्मणां वसु० नित्यश्राद्धं करिष्ये इ
ति संकल्प्य पितॄणामिदमासनं नित्यश्राद्धे क्षणः क्रियतां पूर्वोच्चारिताः पितरः अयं वो गंधः इत्येवं
पुष्पादिभिर्विप्रं अभ्यर्च्य वर्तुले चतुरश्रे वा मंडले पात्रे न्नं परिविष्य पृथ्वीते पात्रमित्यादि ब्रह्मार्पणांतं दर्श
वत् भोजनांते दक्षिणां दत्वा नवा दत्वा नमस्कारेण विसर्जयेत् एतदशक्तो स्वपंक्तौ पित्रुद्देशेन ब्राह्म
णमात्रं भोजयेदित्याह्निकरत्नमालायां विप्रस्यान्नदेर्वाभावे यथाशक्त्यन्नमुद्धृत्य एतदन्नं पितृभ्यः स्वधा
नमः इत्युक्त्वा ब्राह्मणाय दद्यात् तदलाभे गोभ्योग्नौ वा जलादौ वा त्यजेत् अन्नत्यागस्यापि लोपे आचा

मः ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयते इति मूर्खव्यति
न क्रमदोषाभाव[redacted]न प्रतिपादक बौधायनवचनानर्थक्यापत्तेः हेमाद्रावप्येवं श्रीमद्भागवते स
नकादीन्प्रति भगवता श्रीकृष्णेनोक्तं नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लु●तमदन्कुत
भुङ्मुखेन यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य मय्यवहितैर्निजपाकैरिति इत्याचारेंदौ अन्न
दानमहिमा अथ भोजनविधिरभिधीयते तस्य कालमाह मनुः सायंप्रातर्द्विजातीनामशनं श्रुति
चोदितं नांतराभोजनं कुर्यादग्निहोत्रसमो विधिः अत्र प्रातःशब्दः अष्टधा विभक्तदिनपंचमभागप
रः सायंशब्दो घटिकात्रयोर्ध्वरात्रिपरः दिवसपंचमे तु भागे भोजनमाचरेदिति कात्यायनोक्तेः च
त्वार्येतानि कर्माणि संध्यायां परिवर्जयेत् आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति शातातपो २०३
क्तेश्च सायंभोजनस्यांतरावधिमाह शौनकः निशायाः प्रथमे यामे जपयज्ञार्चनादिकं स्वाध्यायो
भोजनं प्रोक्तं वर्जयित्वा महानिशां महानिशाशब्देन मध्ययामद्वयमुच्यते सार्धप्रहरयामांत इति छं

दोगपरिशिष्टात्सार्धप्रहरानुज्ञापविषये इत्याचारसारः अत्र मनुवाक्ये सायंप्रातर्भुंजीतैवेति नियमविधिः ते
न सति भोज्ये सत्यां च भोजनशक्तौ द्वेषादिना भोजनमकुर्वन्प्रत्यवैतीति मिताक्षरसंहितायां विज्ञानेश्वरः अ
स्मिन्पक्षे शक्तस्य द्विर्भोजनमावश्यकं अशक्तौ तु यत्किंचिदल्पमश्नीयं औपवस्तमेव कालांतरे भोजनमि
त्यापस्तंबोक्तेः औपवस्त उपवासस्तु तुल्यमिति हरदत्तः तदशक्तौ अद्भिर्वायमिति बोधायनोक्तेरियं नात
रीति फलमूलान्यपरं दिवा च नांतरा भुंजीतान्यत्र मूलफलेभ्य इत्यापस्तंबोक्तेः इदमपि आर्द्रस्य भर्जितस्य च
धान्यस्योपलक्षणं आर्द्रधान्यं फलवद्ग्राह्यमिति भर्जितं फलवद्भवेदिति वचनादिति भोजनकुतूहले हरद
त्तस्तु सायंप्रातरेवेति परिसंख्या साच यद्यपि दोषत्रयवती तथाप्येकवाक्यतालाभात्सोढव्या एवं हि नांतरे
त्यादिरनुवाद एवेति लाघवं अन्यथा तु वाक्यभेदो भवेत् गृहस्थ एकवारं तु भुंजीतात्युत्तमं हितं अ
शक्तस्तु द्विरश्नीयादिति स्मृतसंहितास्थवचनविरोधश्च स्यादिति साग्निकब्रह्मचारिणोस्तु न नियमविधि
र्नापि परिसंख्या आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतामि
ति वचनादित्याचारसारे आश्वलायनः अष्टम्योश्च चतुर्दश्योरात्रावश्नाति नित्यशः एकादश्यामुपव

आचा०द
२०५

सेतु कृष्णपक्षविशेषतः वर्तयेदेकभक्तेन पंचदश्योर्विचक्षणः अनंतराशनान्नित्यं निषिद्धान्नस्य वर्जनात्
गृही सदोपवासी स्यात्स्वकर्मकरणादपीति अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा एकादश्यामहोरात्रं भु
क्त्वा चान्द्रायणं चरेत् अत्रार्कशब्देन तिथिसाहचर्याद्द्वादश्याग्रहणमिति केचित् तन्न श्राद्धाहे पर्व
काले चरविचारे च पर्वसु रात्रिभुक्तिर्न कर्तव्येति स्मृत्यंतरानुरोधेन रविवासरग्रहणस्यैवोचितत्वादिति
अत्र कृष्णाष्टमीकृष्णचतुर्दश्योः पर्वत्वादष्टमीचतुर्दशीपदं कृष्णाष्टमीकृष्णचतुर्दशीपरं तेन तयोर
वदिवाभोजनं नेत्युक्तं निर्णयामृते गृह्यपरिशिष्टे तु अष्टमीं चतुर्दशीं भानुवारं श्राद्धदिनं न पूर्वदिनं च व
र्जयित्वावशिष्टरात्रिषु नियमेनामात्यैः परिवृतो लघुभोजनं कृतेत्याद्युक्तं अत्राश्वलायनस्मृत्यौ चतुर्दश्य
ष्टम्योर्दिवाभोजननिषेध उक्तः परिशिष्टे तु रात्रिभोजननिषेध उक्तः एवं च विकल्प एव श्रेयान् अत एव स्मृ
त्यर्थसारे अष्टमीचतुर्दश्योर्नक्तं कार्यमेकभक्तं वेत्युमिति केचित् अन्ये तु आश्वलायनानां स्मृत्यपेक्षया प
रिशिष्टस्य प्रबलत्वात्तैः परिशिष्टमेवांगीकर्तव्यं तदितरैस्तु स्मृतिरंगीकर्तव्येति व्यवस्थामाहुः बहुशिष्टा २०५
चारानुरोधादिदमेव युक्तं अत्राष्टम्यादौ दिवा रात्रौ वा भोजननिषेधमात्रपरिपालनं न तु किंचिद्व्रतं तत्र

न्नविशिष्यते संवर्तः दानान्येतानिदेयानितथान्यानिचसर्वशः दीनांधकृपणार्थिभ्यःश्रेयस्कामेनधी
मता व्यासः दयामुद्दिश्ययद्दानंअपात्रेभ्योपिदीयते दीनांधकृपणेभ्यःश्वतदानंत्यापकल्पते नंदीपु
राणे अपिकीटपतंगानांशुनांचंडालयोनिनां दत्वान्नंलोकमाप्नोतिप्राजापत्यंशतंसमाः महाभार
ते पगवंधबधिरामूकाव्याधिनोपहताश्चये भर्तव्यास्तेमहाराजनतुदेयंप्रतिग्रहः भर्तव्यास्तेम
हाराजनतुदेयंप्रतिग्रहः भर्तव्याअन्नवस्त्रेणतदुपयोगिद्रव्येणवावैधप्रतिग्रहस्तुनकारणीयइति
फलितोर्थइति समीपस्थब्राह्मणातिक्रमोनकार्यस्तदुक्तंभविष्ये यस्त्वासन्नमतिक्रम्यब्राह्मणप
तितादृते दूरस्थंभोजयेन्मूढोगुणाढ्यंनरकंव्रजेत् तस्मान्नातिक्रमेत्प्राज्ञोब्राह्मणान्प्रातिवेशकान्
प्रातिवेश्यकान्सामीपस्थान् संबंधिनस्तथासर्वान्दौहित्रंविट्पतिंतथा भागिनेयंविशेषेणतथाबंधून्ग
हाधिपः नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपिगोपते अतिक्रम्यमहारौद्रंरौरवंनरकंव्रजेत्इति इद
भोजनविषयं यस्यचैवगृहेमूर्खोदूरस्थश्चबहुश्रुतः बहुश्रुतायदातव्यंनास्तिमूर्खेव्यतिक्र

मेवनिषिद्धमितिपुरुषार्थचिंतामणोविस्तरेणप्रपंचितं एकादश्याद्युपवासाशक्तौवायवीयेतु नक्तं हविष्यान्न
मन्नोदनंवाफलंतिलाः क्षीरमथांबुचाज्यं यत्पंचगव्यंयदिवापिवायुः प्रशस्तमत्रोत्तरंच हेमाद्रौभविष्यत्पुराणे
सतांबूलमतांबूलंसभोजनमभोजनं त्याहारंचनिराहारंचतुर्विधमुपोषणं यावत्कृतान्हिकोनस्याद्याव
न्नार्चयतेहरिं गृहीतांबूलहीनः स्यात्तत्सतांबूलमुच्यते पूजयित्वाच्युतंपूर्वंपूर्णाभुक्त्यांभुनक्तियः भद्रा
भुक्त्यांपुनर्भुंक्तेतत्सभोजनमुच्यते पूर्वदिनेदशमीमध्येएवभुक्त्वाद्वितीयदिनेएकादशीमतिक्रम्यद्वाद
श्यांप्राप्तायांपुनर्भुंक्तेइत्यर्थः तृणधान्याशनंमूलपयसाज्येनवाफलैः हरेरन्हयुपवासंचतत्साहारमुदा
हृतं यदेतैरहितंशुद्धमुपायैःसमुपोषणं अतांबूलमनाहारंमभोजनमतोहितमिति तृणधान्यं
तृणधान्यानिनीवाराइत्यमरः अत्रबहुवचनाच्छ्यामाकादीनांग्रहणमितितट्टीकायां वाराहपुराणे या २०५
वंतस्त्रिषुलोकेषुविद्यंतेपापराशयः अन्नमाश्रित्यतिष्ठंतिसंप्राप्तेहरिवासरे अतस्तस्मिन्दिनेगंधलेशम
प्यत्रवर्जयेत् तंडुलोग्न्यंबुसंयोगात्सिष्टकंलवणयोगतः फलंत्रितयसंयोगात्अन्नंभवतितत्क्षणात् इ

क्षोर्विकारास्तत्रस्युर्यावंतः केवलस्यच खर्जूरंनारिकेलंचप्रियालंपनसादिकं आम्रंचकदलीद्राक्षाक्षी
रंदधिघृतंतथा अनिषिध्धानिमूलानितथाकंदादिकंचयत् विनोदकेनयत्पक्कंधान्यंयच्चघृतादिना
एतानिफलसंज्ञानियोस्यशक्तोदिनेमम पादशोश्नातियस्त्वसेः संपूर्णफलमाप्नुयादिति हेमाद्रौमार्कं
डेयः एकभुक्तेननक्तेनतथैवायाचितेनच उपवासेनदानेननानिर्द्वादशिकोभवेदिति तिथितत्वेब्रह्म
वैवर्ते उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत् तावद्धनानिवादद्याद्यद्भक्ताद्द्विगुणंभवेत् सहस्र
संमितांदेवींजपेद्वाप्राणसंयमान् कुर्याद्द्वादशसंख्याकान्यथाशक्तिव्रतेनरः स्वाशक्तौप्रतिनिधि
नाव्रतंकारयेत्तदाहहेमाद्रौवाराहः असामर्थ्येशरीरस्यव्रतेतुसमुपस्थिते कारयेद्धर्मपत्नींवापुत्रंवा
विनयान्वितं भगिनींभ्रातरंवापिव्रतमस्यनलुप्यते माधवीयेपैठनसिः भार्यापत्युर्व्रतंकुर्याद्भार्याया
श्चपतिर्व्रतं असामर्थ्येपरस्ताभ्यांव्रतभंगोनजायते हेमाद्रौवायुपुराणे उपवासेत्वशक्तस्तुआहिता
ग्निरथापिवा पुत्राद्वाकारयेदासावाब्राह्मणाद्वापिकारयेत् अथवाविप्रमुखेभ्योदानंदद्यात्स्वशक्ति

तः उपवासपलंतस्यसमग्रंसमवाप्यते तत्रभोजनदोषोपितत्क्षणादेवनश्य हेमाद्रौकात्यायनः पितृभ्रात्
मातुरर्थेआचार्यार्थेविशेषः उपवासंप्रकुर्वाणःपुण्यंशतगुणंभवेत् यमुद्दिश्यकृतःसोपिसंपूर्णंलभतेफ
लं इत्यसंप्रतिपत्तौवाएकादश्यामुपोषितः इत्युदातोपवासस्यफलंप्राप्नोत्यसंशयं कर्तानक्तमवाप्नोति
नत्रकार्याविचारणेति एकादश्यादौश्राद्धपातेदेवलः उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् उप
वासंतदाकुर्यादाघ्रायपितृसेवितं धर्माब्धिसारे उपवासदिनेश्राद्धप्राप्तौश्राद्धशेषसर्वान्नेनैकंपात्रं
परिविष्यतत्सर्वान्नावघ्राणंकृत्वापात्रंगवादिभ्योदद्यात् कंदमूलफलाहाराद्यनुकल्पेनोपवासकर्त्रातुस्व
भक्ष्यस्यैवफलादेःपितृब्राह्मणपात्रेषुपरिवेषणपूर्वकंतच्छेषभक्षणंकार्यमिति चतुर्थ्यादिरात्रिव्रतेषुदि
वाशेषाघ्राणंकृत्वारात्रौपूजांविधायमूलफलादिकंभक्षयेत् रात्रौभोजनस्यतस्मिन्दिनेउपवासस्यचनिषेधा
त् उपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेदितिवचनेनफलमूलादिभक्षणस्यविहितत्वाच्चकेचिद्रात्रा १०६
वपिशेषाघ्राणमाहुरितिसंस्काररत्नमालायां दशमीनियमानाहकूर्मः कांस्यमसूराश्वपुनर्भोजनमैथुनं

निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षत इति देवलवचनाद्भोजनकालव्यापिनीमष्टम्यादितिंत्यक्ता भोक्तव्य
मिति धर्माब्धिसारेप्येवं एकादशीविषयेतु उपवासयोग्यदिने भोजन एव पूर्वोक्तं चांद्रायणं प्रायश्चित्तमि
ति पुरुषार्थचिंतामणौ सविस्तरं प्रपंचितं एवं जन्माष्टमी शिवरात्र्यादौ अष्टमी चतुर्दशी प्रयुक्त भोजननिषे
ध परिपालितं निर्णीतव्रतदिन एवेति तुल्यन्यायेनेति भाति एकादश्यां भोजननिषेधः अष्टवर्षादूर्ध्वं अशी
तेः प्राग्ज्ञेयः तदुक्तं नारदीयपुराणे अष्टवर्षाधिको मर्त्यो ह्यशीतेर्न्यूनवत्सरः यो भुंक्ते मामके राष्ट्रे विष्णो
रहनि पापभाक् स मे वध्यश्च दंड्यश्च निर्वास्यो देशतः स मे एकादश्यादिव्रतोपासे तु पूर्वोत्तरदिनयोरेक
भक्तं सायमाद्यंतयोरन्होः सायंप्रातश्च मध्यमे उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयं अत्र फलप्रेप्सु
रित्युक्तेः। इदं काम्यैकादश्यादिव्रतविषयमिति हेमाद्र्यादयः चंद्रिकायां तु नित्येपि फलसत्त्वादिति वि
ज्ञायकुर्वंश्ता वश्यमेकादशीव्रतं विशेषनियमाशक्तो होरात्रं भुजिवर्जित इति ब्रह्मवैवर्त्ताच्च नित्यपरत्वम
पीत्युक्तं एकादश्यां न भुंजीतेत्यादौ भोजननिषेधउक्तस्तत्र भोजनशब्देनौदनकर्मक लोकप्रसिद्धभोजन

नपारणंकार्यं तदुक्तंमाधवीयेदेवलेन संकटेविषयेप्राप्तेद्वादश्यांपारयेत्कथं अद्भिश्चपारणांकुर्या
त्तुनभुक्तंनदोषकृत् श्रुतिरपि आपोवाअशितमनशितंचेति यत्रचतुर्दश्यष्टम्यादौदिवाभोजननि
षेधः व्रतांतरपारणाच्चप्राप्तातत्रभोजनमेवकार्यं पारणायाविधिप्राप्तत्वात् निषेधस्तुरागप्राप्तभोज
नपरः रविवारादौसंकष्टचतुर्थ्यादिव्रतेरात्रिभोजनमेवकार्यं अत्राष्टम्यादौदिवाभोजननिषेधोरा
त्रौतुरविवारादिप्रयुक्तभोजननिषेधस्तत्रार्थप्राप्तउपवासः यत्रतुपुत्रवद्गृहस्थस्यसंक्रांत्यादावुपवा
सोपिनिषिद्धोभोजनस्याप्यष्टम्यादिप्रयुक्तनिषेधस्तत्रकिंचिद्भक्ष्यंप्रकल्प्योपवासएवकार्यइत्यलंप्रसक्ता
नुप्रसक्त्या प्रकृतमनुसरामः चंद्रिकायांव्यासः नाजीर्णेभोजनंकुर्यात्कुर्यान्नातिबुभुक्षितः वैद्येतु
अहारकालेसंप्राप्तेयोनभुंक्तेबुभुक्षिते तस्यसीदतिसद्योग्निर्निरिंधनइवानलः आदित्यपुराणे नसं
ध्ययोर्नमध्याह्नेनार्धरात्रौकदाचन विज्ञानेश्वरीये बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः
संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनं परिणीतापितृगृहेस्थितास्ववासिनीशेषाःप्रसिद्धाः स्मृ

सायणीये धर्मसारे एकः संपन्नमश्नाति वस्तु वासश्च शोभनं योसंविभज्य भृत्यानां कोनृशंसतरस्ततः
व्यासोपि विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः विघसं भुक्तशेषं तु यज्ञशेषं तथामृतं इति भोजनकालः ए
वं कालं विचार्य चित्तशुद्ध्यर्थं शुद्धद्रव्यकृतान्नं भुंजीत तथाच व्यासः अभक्ष्यस्य निवृत्तौ तु विशुद्धं हृदयं भवेत्
आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः अभक्ष्यभक्षणाच्चित्तमशुद्धं भवति स्वतः अशुद्धात्क्षांति विज्ञानं जा
यते सुदृढं नृणां तस्मादभक्ष्यं यत्नेन दूरतः परिवर्जयेदिति तात्षड्विधमुक्तमपरार्के जातिदुष्टं क्रियादुष्टं का
लाश्रयविदूषितं संसर्गाश्रयदुष्टं च संह्लेखं स्वभावतः कालाश्रयदूषितं चिरकालमाश्रित्य दुष्टं पर्युषितमि
त्यर्थः तेषां लक्षणं संग्रहेणोक्तं तत्रैव लंशुनं गृंजनं चैव पलांडुं कवकानि च वृंताकं नालिकालाबु ध्येवेयान्जा
तिदूषितं न भक्षयेत्क्रियादुष्टं यद्दृष्टं पतितैः पृथक् कालदुष्टं तु विज्ञेयं अदृशाचिरसंस्थितं दधिभक्ष्यविका
रांश्च मधुवर्ज्यं तदिष्यते सुरालशुनसंस्पृष्टं पीयूषादिसमन्वितं संसर्गाद्दुष्यते तद्धि शूद्रोच्छिष्टवदाचरेत् अ
भोज्यान्नं विजानीयाद्दंनमाश्रयगर्हितं अभोज्याः कदर्यबद्धचोरादयः विचिकित्सा तु हृदये अन्ने यस्मिन्प्र
जायते संह्लेखं तु विज्ञेयं पीयूषं तु स्वभावतः पीयूषोपि नवं पयः पीयूषोभिनवं पय इत्यमरसिंहेनाभिधा

नात् अभिनवंपयईतिप्रसवानंतरंदशदिवसपर्यंतंयत्पयः तस्यनाम रसदुष्टंविकाराध्धिरसस्येतिनि
दर्शितमिति उदाहृतमित्यर्थः अथजातिदुष्टविशेषाउच्यंते माधवीयेपराशरे अलाबुंगृंजनंचैवपलां
डुंकवकानिच वृंताकंनालिकाशाकंजानीयाज्जातिदूषितमिति अथाबुंवर्तुलं अलाबुंवर्तुलंत्यजेदितिवि
ष्णुस्त्क्तेः वराहपुराणेतु अभक्ष्यंप्रक्रम्यदीर्घालाबुंश्वेतमूलंभूमिजंलवणंतथेति गृंजनंलशुनाकारः
कंदविशेषइतिविज्ञानेश्वरः यदीयंचूर्णंगायकाःकंठशुध्यैविटाश्चमदार्थमश्नंतिसएवविशेषइतिमाध
वः माधवीयेश्राद्धप्रकरणेतु श्वेतकंदःपलांडुविशेषोगृंजनं गृंजनोयवनेष्टश्चपलांडोर्दशजातयइतिस्मृ
तुतेनोक्तत्वादित्युक्तं वाग्भट्टीकायामपि गंधवर्णरसैस्तुल्योगृंजनस्तुपलांडुना सूक्ष्ममालाप्रपत्रत्वाद्भिद्य
ते सोफलांतइति विषदिग्धेनशल्येनयोमृगःपरिहन्यते अभक्ष्यंतस्यतन्मांसंतध्धिगृंजनमिष्यतइत्यपरार्कः
मूलविशेषोगाजरापरपर्यायोगृंजनमितिकेचित् तन्नगृंजनंचक्रिकांचुक्रंगाजरंपोतिकांतथेतिब्राह्मणेपृथ
क्निर्देशानुपपत्तेः चुक्रिकाअंबटवेलचुक्रमत्यम्लंदधि पोतिपोयीति गृंजनंनगाजरापर्यायइतिआचार
रत्नेआचारसारेपिविस्तरेणप्रपंचितं पलांडुंप्रसिद्धंकेचित्तुपलांडुंश्वेतपलांडुं तथाचजयसिंहकल्पद्रु

द्यूतमत्यंबुपानंचदशम्यांसप्तसंत्यजेत् द्वादशीनियमानाहबृहस्पतिः दिवानिद्रांपरान्नंचपुनर्भोजन
मैथुने क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् एतेचनियमाःकाम्यव्रतएवावश्यकाइत्युक्तंसिंधौ
पारणंतुनिव्रतेप्यावकमितिपुरुषार्थचिंतामणौ तच्चद्वादश्यल्पात्वेव्रात्रिशेषएवआमध्याह्निकाःक्रियाः
सर्वाअपकृष्यानुष्ठायद्वादशीमध्यएवकार्यंतदाहहेमाद्रौपद्मपुराण यदाभवतिस्वल्पापिद्वादशीपार
णादिने उषःकालेद्वयंकुर्यात्प्रातर्माध्यान्हिकंतथा दा नारदीयेपि अल्पायामथविप्रेंद्रद्वादश्यामर
णोदये स्नानार्चनक्रियाकार्यादानहोमादिसंयुता इतिअग्निहोमस्यनापकर्षइतिकिंचित् एवंश्राद्ध
स्यनापकर्षोरात्रौश्राद्धनिषेधात् नित्यश्राद्धंतुभवत्येवेतिपूर्वमुक्तं द्वादश्यांपारणेविशेषोनारदीये पं
चामृतेनसंस्नाप्यएकादश्यांजनार्दनं द्वादश्यांपयसास्नाप्यहरिसारूप्यमश्नुते ब्राह्मणान्भोजयेद्भ
क्त्या द्वादशप्रयतेंद्रियः शक्त्याचदक्षिणांदद्याद्वस्त्राण्याभरणानिचेति माधवीयेस्कांदे एकादश्यामुपोष्या
थयोश्नातिद्वादशीदिने नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनं संकटेश्राद्धप्रदोषादिव्रतेचतीर्थजले

श्वेतपरं लशुनं वृंताकाभ्यामपि संबध्यते तेन रक्तलशुनकृष्णवृंताकभक्षणे न प्रायश्चित्तमिति माधवः श्रुनं
लोके टंटू याज्ञवल्क्यः देवतार्थं हविः शिग्रुं लोहितान्व्रश्चनांस्तथा अनुपाकृतमांसानि विड्जानि कवकानि
च देवतार्थं बल्युपहारनिमित्तं साधितं हविः हवनार्थं सिद्धं प्राग्घोमात् शिग्रुः रक्तशिग्रुः उपादेकी
लतां चैव वर्जयेत् रक्तशिग्रुकमिति पारिजातधृतसंग्रहवचनात् माधवोपि लोहितपदमुभयत्रान्वितं तेन
रक्तशिग्रुर्निषिद्ध इति स्मृत्यर्थसारेप्येवं लोहितान् वृक्षनिर्यासान् लाक्षादीन् व्रश्चनप्रभवान् वृक्षछेद
जातान् अलोहितानपि लोहितग्रहणाद्धिंगुकर्पूरादीनां न निषेध इति ज्ञानेश्वरः पातिजातश्च अनुपा
कृतमांसानि यज्ञे अकृतस्य पशोर्मांसानि विड्जानि मनुष्यादिजग्धबीजपुरीषोत्पन्नानि पुरीषस्था
ने उत्पन्नानि च तंडुलीयकप्रभृतीनि वर्जयेदिति प्रत्येकं संबध्यते विष्णुः वार्ताककृतकालिंगबिल्वो
दुंबरभिः सटाः एतांस्तु सेवते यस्तु तस्य दूरतराः श्रियः वार्ताकं वृंताकविशेषं कृतभोंकर कालिंगं क
लिंगडं बिल्वं बिल्वफलं उदुंबरं प्रसिद्धं भिः सटा दग्धान्नं विष्णुः लशुनं गृंजनं चैव उद्भिज्जं चासुरं तथा २०९

उद्भिज्जं छत्राकं आसुरं मोहरीफलं च आह्नोशनाः बीजान्युपयुंजीत रोगापति मृते द्विजः फलान्येषाम
नंतानि बीजानां हि विनाशयेदिति एषां बीजानामनंतानि फलानि यस्मादुपयुंजानो विनाशयेत् तस्मा
नापदि बीजानि नोपयुंजीतेत्यर्थः धर्मसारसुधानिधौ उत्पलं वटकं चैव शणशाकं तथैव च उदुंबरं न खा
देच्च भवार्थी पुरुषः क्वचित् वटकं वटांकुरास्तत्फलं वा शणशाकं शणस्तागः बौधायनः अमेध्यभू
स्थाये वृक्षा उप्ताः पुष्पफलैर्युताः तेषां नैव प्रदुष्यंति पुष्पाणि च फलानि च अनेन चार्था द्वृक्षव्यतिरिक्ता
नि अमेध्यप्ररूढानि वर्जयेदिति पारिजाते धर्मसारसुधानिधौ अलाबुं गृंजनं चैव पलांडुं पिंडमूलकं
गांधारकं करंभाणि लवणान्यूषराणि च आरक्तांश्चैव निर्यासान्प्रत्यक्षलवणानि च पिंडमूलकं गोड
मुळा गांधारकं तंडुलीयमिति चंद्रिका करंभाणि नेष्टफलानि ऊखराणि लवणानि ऊखरमृत्तिकाभवा
नि लवणानि प्रत्यक्षलवणानि सैंधवसामुद्रमानसभिन्नानि द्रव्यांतरेणामिश्रितानि सैंधवं लवणं चैव
यच्च मानससंभवं पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यश इति मयूखधृतआप्तवचनेन ग्राह्ये सैंधवसा

मुद्रे भत्यक्षे अपि॥१नित्यशब्द इतिवचनांतरेणचत्रयाणांप्रतिप्रसवात् चतुर्विंशतिमते मूलकंमात्रमूलंचश्वेत
रक्तौचसूरणौ चत्वार्यभोज्यमूलानिपंचमीचार्द्रमूलिका मूलकंप्रसिद्धं तच्चरक्तमेवनिषिद्धं तदुक्तंवारा
हे रक्तमूलमलाबुंचवर्तुलंगृंजनंतथा जंबीरंचकलिंगंचमसुराःशुक्तिचूर्णकं राजमा[illegible]संरक्तलशुनं शु
नकंचवल्लीमपि मतिपूर्वं द्विजोशित्वादिनमेकमुपोषणं चातुर्मास्येदशगुणंएतेषांभक्षणेस्मृतमितिमा
त्रमूलकं माधिणमूलकमितिप्रसिद्धं आर्द्रमूलिका आर्द्रकमूलकं हारितः नवटप्लक्षाश्वत्थदधित्थ
मातुलुंगानिभक्षयेदिति दधित्थंकपित्थं मिताक्षरायांवृहद्यमः खट्वावार्ताककुंभीकत्रश्चनप्रभवाणि
च भूस्तृणंशिग्रुकंचैवखुखंडेकवकानिच एतेषांभक्षणंकृत्वाप्राजापत्यंचरेद्विजः खट्वाखट्वाख्यःपक्षी
कुसुंभमित्यन्ये कुंभिकःकुंभा भूस्तृणंकाश्मीरदेशेप्रसिद्धं कवकंकृष्णसर्षपाख्यंशाकंखुखंडंतद्विशे
षः गोबलीवर्दन्यायेननिर्दिष्टइतिविज्ञानेश्वरः भक्ष्याभक्ष्यत्वेनसंदिग्धानिकंदमूला[illegible]दीनिनभ २१०
क्षयेदिति सएव तिथिविशेषेणवर्ज्यान्याहसुमंतुः कूष्मांडंबृहतींचैवतरुणींमूलकंतथा श्रीफलं

मिपराशरः पलांडुश्वेतवृंताकं सुभंजनकंटकं नालिकावालपुष्पंच भुक्त्वादिनमभोजनं अत्रपलांडुमिति
श्वेतपलांडावेवोपसं[illegible]ह्रियतइतिमाधवः देहलीदीपन्यायेनतथैवयुक्तमितितदाशयइत्याहुः तन्न
एवंव्याख्यानस्यमाधवीयेअदर्शनात् समस्तपदेदेहलीदीपन्यायादर्शनाच्च कवकंछत्राकं वृंताकंश्वे
तं वर्जयेच्छ्वेतवृंताकमितिविष्णूक्तेः कंडरंश्वेतवृंताकंकुंभांडंचविसर्जयेदितिदेवलोक्तेश्च कल्पतरौ
मदनरत्नेमाधवीयेशूलपाणौचैवं अपरःश्वेतवृंताकःकुक्कुटांडफलोपमइतिमदनविनोदोक्तेर्जात्यंत
रमेवश्वेतवृंताकमित्याचाररत्ने स्मृत्यर्थसारेपिस्फुटश्वेतकंटकिवृंताकानिवर्जयेदिति तत्रैवयतिव्रतिभ्या
सदालाबुशिग्रुवृंताकानिजातिमात्रेणवर्ज्यानीति नालिकाशाकंशाकविशेषं पैठीनसिःवृंताकनालिकापोत
कुसुंभाश्मंतकानिच वर्जयेदितिशेषः पोतउपोदकीवेलबोंडीतिलोके अश्मंतकः अपटेतिप्रसिद्धः कुसुंभः
करडीतिलोके प्रयोगपारिजातेशातातपः लशुनंगृंजनंजग्ध्वापलांडुंचतथाशुनं उपनायंपुनःकुर्यात्तप्त
कृच्छ्रंतथैवच लशुनःप्रसिद्धः सचश्वेतएवनिषिद्धः तथाचपराशरः पीयूषेश्वेतलशुनंवृंताकफलगृंजने

लप्रसविनी एवमजामहिष्योरनिर्दशयोः पयो वर्जयेत् गोमहिष्यजानामनिर्दशानां पयो न पेयमिति वसि
ष्ठस्मरणात् पयोग्रहणात्तद्विकाराणामपि दध्यादीनां निषेधः क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बु
धः सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहित इत्यपरार्के शंखस्मरणात् पयोनिषेधाच्छकृन्मूत्रादेरनिषेधः
उष्ट्राज्जातमौष्ट्रं पयोमूत्रादि एकशफा वडवादयः तेभ्यो भवमैकशफं स्त्रीभवं स्त्रैणं स्त्रीग्रहणमजा
व्यतिरिक्तसकलद्विस्तनीनामुपलक्षणार्थं सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्ज्यमिति शंखस्मर
णात् आरण्ये भवा आरण्यकास्तदीयमारण्यकं क्षीरं महिषव्यतिरिक्तं आरण्यानां च सर्वेषां मृगाणां म
हिषं विनेति वचनात् अवेर्जातमाविकं वर्जयेदिति प्रत्येकं संबध्यते आचारचंद्रोदये बृहत्पराश
रः स्तुगर्भिण्यवत्सासूतिक्या गवादेर्वर्जयेत्पयः इदमेव वचनं मनसि निधाय स्यंदिनीयमसूसंधिनीनां
विवत्सायाश्चेति गौतमस्मृतिं व्याचक्षाणो न विवत्सा गवादिरित्यादिपदं हरदत्तेन दत्तं एवं च विवत्सा
या गोरेव न तु महिष्यादेरित्याचारमयूखोक्तं चिंत्यं अत्रिः न्यूनाधिकस्तनीया तु या चान्याभक्ष्यह

२११

रिणी तयोर्दुग्धं न पातव्यं न होतव्यं कदाचन पराशरः दुर्बलाव्याधिसंयुक्ताप्रुष्पिताया द्विवत्सम्:
सा साधुभिर्नदोग्धव्या वणिग्भिः सुखमीप्सुभिः नंदीपुराणे कपिलायस्य गोश्च स्यादनन्ने ब्राह्मणस्य तु स
याति नरकं घोरं दुस्तरं तु तमोमयं आपस्तंबः क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोथवा पुनः यः पिबेत्का
पिलाक्षीरं नवनीतं तथा दधि उपजीवंति ये शूद्रास्ते याति नरके शुचौ चंद्रिकायां कापिलं यः पिबेच्छूद्रो
नरके स विपच्यते कृतशेषं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः अन्यथा कृतशेषापाने इति मयूखः के
पिलालक्षणमुक्तं प्राक् इति जातिदुष्टानि अथ क्रियादुष्टान्याह व्यासः ओदनं तु पुनः पक्वं नारिकेल
रसं तथा पक्वे तोयसमं भूयिष्ठं ब्राह्मणो नैव भक्षयेत् याज्ञवल्क्यः घृतात्फेनं घृतान्मंडं पीयूषं दधि चाई
गोः समुद्र मरिचाक्तं तु तथा पर्युषितं दधि घृताद्घृतं फेनमात्रं मंडमात्रं वा न भक्ष्यं आईगोः प्रसवानंतर
रमनिर्दशगोः दीर्णतक्रमपेयं च नष्टस्वादु च फेनवत् वृथा कृसरसंयावपायसापूपशष्कुलीः दीर्णं स्फु
टितं वृथा देवब्राह्मणाद्युद्देशमंतरेण साधिताः कृसरं मा तिलसु ऊपक्क ओदनः संयावः क्षीरघृत

घृतगुडादिसाधितस्कारिकाख्यः गोधूमचूर्णविकारः संज्ञा इति प्रसिद्धो वा पायसं पयसा शृत ओदनः अ
पूपं सस्नेहपक्वो गोधूमविकारः मंडका इति केचित् न पचेदन्नमात्मन इति कृसरादीनां निषेधे सिद्धेपि पु
नरभिधानं प्रायश्चित्तगौरवार्थं गौतमः उद्धृतस्नेहविलयनपिण्याकमथितप्रभृतीनि नाश्नीयादिति वि
लयनं घृतकिट्टं मथितं जलं विनालोडितं दधीति मदनरत्ने इति क्रियादुष्टानि अथ कालदुष्टानि अ
थ कालदुष्टानि आह बृहस्पतिः अत्यम्लं शुक्तमाख्यातं निंदितं ब्रह्मवादिभिः अनम्लं ईषदम्लं वा यद्व
स्तु तत्कालांतरेण द्रव्यांतरसंसर्गेण वात्यम्लं भवति तच्छुक्तं न तु स्वभावतोत्यम्लं शुक्तप्रतिषेधो दध्या
दिव्यतिरिक्तविषयः तथा च शंखः दधिमस्त्वविकारेषु सर्वं च दधिसंभवं ऋबीषपक्वं भक्ष्यं स्यात्सर्पि
र्युक्तमिति स्मृतिः अनग्निकउष्माऋबीसं तेन पक्वं कदलीफलादि शुक्तं पर्युषितमपि भक्ष्यं स्यात् कांजि
कांजिकाविषये विशेषमाह स्मृतिसंग्रहकारः त्रिफलीमिश्रितान्दर्भान्कांजिकायां विनिक्षिपेत् तस्माद्दे
कांजिका ग्राह्या नेतरा स्यात्कदाचनेति देवलः अभोज्यं प्राहुराहारं शुक्तं पर्युषितं च यत् यदग्निपक्वं स २१२

चक्र लिंगं च धात्रीं प्रतिपदादिषु शिरः कपाल मंत्राणि न खचर्मकतं फलं उदुंबर फलं चैव तिलान पितथै
वच यदीछेत्स्वर्ग गमन मष्टम्यादिषु वर्जयेदिति कूश्मांडं कोवाल्का बृहती डोलरे तरुणीं मूलकं प्रसि
द्धं श्रीफलं बिल्वफलं कलिंग कलिंडु धात्रीं आमलकीं शिरः नारिकेल फलं कपालं भोपळा अंत्राणि
पटोलानि नखंवाल चर्म मसूरिका कतंभोकर उदुंबरं प्रसिद्धं तिलाः प्रसिद्धाः वार्ताकाणिवाएतानि
पंचदशशानि प्रतिपदातिथिष्ठक्रमेण वर्जयेत् अपरार्के दिवा कपित्थछायायां रात्रौ दधिशमीषु च धा
त्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा धर्मसारे धात्रीफलं भानुवारे श्रीफलं शुक्रवासरे शमीफलं मंद
वारे श्रीकामी परिवर्जयेत् याज्ञवल्क्यः संधिन्यनिर्दशावत्सागोपयः परिवर्जयेत् औष्ट्रमेकशफलं श
स्त्रैणमारण्यकमथाविकमिति यावृषेण संधीयते सा संधिनी या च एकां वेलामतिक्रम्य दुह्यते या च व
त्सांतरेण संधीयते सा च संधिनी प्रसवानंतर मनिष्क्रांत दशाहा अनिर्दशा मृतवत्सा अवत्सा एतासां
पयः परिवर्जयेत् संधिनी ग्रहणं स्यंदिनी यमसुवो रुपलक्षणार्थं स्रवत्पयः स्तनी स्यंदिनी यमस्रूः यम

भक्ष्याः पृथुकापूपादय इति हरदत्तः विज्ञानेश्वरीये अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं अस्नेहा अ
पि गोधूमयवगोरसविक्रियाः अन्नमदनीयं पर्युषितमपि घृतादिस्नेहसंयुक्तं चिरकालसंस्थितमपि
भोज्यं गोधूमयवगोरसविक्रियाः मंडसक्तुकीलाटकूर्चिकाद्याः अस्नेहा अपि चिरकालसंस्थिता अ
पि भोज्याः यदि विकारांतरमनापन्नाः कीलाटलक्षणमाह वैद्यः बकुतक्रोस्मदुग्धो यः पाकेन घनतां ग
तः कीलाटः स तु विज्ञेयः पुंस्त्वनिद्राबलप्रदः कूर्चिकालक्षणमाह स एव दध्ना तक्रेण वा पाकात्क्षीरं भि
न्नघनद्रवं कूर्चिका सा द्विधा प्रोक्ता दधितक्रोपसर्जनात् आह शंखः न पापीयसोन्नमश्नीयान्न द्विः
पक्वं न शुक्तं न पर्युषितमन्यत्र रागषाडवतक्रगुडगोधूमयवविकारेभ्य इति द्विः स्विन्नं यत्सकृत्पाकेन भ
क्ष्यमपि हिंगुजीरकादिसंस्कारार्थं पुनः पच्यते तद्वर्ज्यं यत्तु तिक्तशाकान्नविकारादि द्विः पाकेनैव भक्षणार्हं
तन्न निषिद्धमिति सिंधौ कमलाकरः रागषाडलक्षणं विज्ञानेश्वरीये पिप्पलीशुंठीयुक्तः स्तुमुद्गयूषस्तु
षाडवः रागषाडवतां यातिशर्करासहितं च यत् अकालप्ररूढानि वर्ज्यानीत्याह याज्ञवल्क्यः तथा क 

लमन्नूढानिपुष्पाणिचफलानिच विकारवच्चयत्किंचित्प्रयत्नेनविसर्जयेदिति इतिकालदुष्टानि अथसंसर्गदु
ष्टद्रव्याण्याह देवलः विशुद्धमपिचाहारं मक्षिकाकृमिजंतुभिः केशरोमनखैर्वापि दूषितंपरिवर्जयेत् अ
त्र मक्षिकाकृमिजंतवोमृताविवक्षिताइतिमाधवः एतैःकेशादिभिश्चदूषितंसतिसंभवेवर्जयेत् असंभ
वेतु केशादिकमुद्धृत्य संप्रोक्ष्यहिरण्यस्पर्शंकृत्वाभुंजीत तथाचसुमंतुः केशकीटक्षुतवचोवहतंश्वभिरा
घ्रातंपदोद्धतंचादधिपर्युषितंपुनःसिद्धंचंडालाद्यवेक्षितमभोज्यं अन्यत्रहिरण्योदकैःस्पृष्टेतिक्षुतवाचा
जनितोध्वनिः प्रचेतास्तु अन्नभोजनकालेतुमक्षिकाकेशदूषिते अनंतरंस्पृशेदापस्तच्चान्नंभस्मनास्पृ
शेत् याज्ञवल्क्यः गोघ्रातान्नेतथाकेशमक्षिकाकूटदूषिते सलिलंभस्ममृद्वापिप्रक्षेप्तव्यंविशुद्धये इदंपा
कोत्तरंकेशादिपाते केशादिनासहैवपाकेत्याज्यमेवतदुक्तंगोतमेन नित्यमभोज्यंकेशकीटावपन्नमिति
आपद्यपिश्वादिभिरवलीढंनभुंजीत तथाचदेवलः अवलीढंश्वमार्जारध्वांक्षकुक्कुटमूषकैः भोजनेनोप
भुंजीत तदमेध्यंहिसर्वतः भविष्यत्पुराणेपि मुगालशुनसंस्पृष्टंपीयूषादिसमन्वितं संसर्गाद्दुष्यतेतद्धि
शूद्रोच्छिष्टवदाचरेत् अन्नादिशब्देनछत्राकादिदुष्टद्रव्यंपरिगृह्यते शंखः अमेध्यपतितंचंडालयुक्क

सरजस्वलाकुनखी कुष्ठिसंस्पृष्टान्नंचवर्जयेदिति विज्ञानेश्वरीये अनर्चितंवृथामांसंकेशकीटसमन्वि
तं शुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितं उदक्यास्पृष्टसंघुष्टंपर्यायान्नंविसर्जयेत् गोघ्रातंशकुनोच्छि
ष्टंपदास्पृष्टंचकामतः अनर्चितंअर्चाहायपदयथादीयते वृथामांसंआत्मार्थमेवयत्साधितं शुक्तोज्झि
तंउच्छिष्टं कोभुंक्तेइतियदाघुष्यदीयतेतत्संघुष्टंअन्यसंबध्यन्यस्यापदेशेनयद्दीयतेतत्पर्यायान्नं यथा
ब्राह्मणान्नंददेच्छूद्रः शूद्रान्नंब्राह्मणोददत् उभावेतावभोज्यान्नौभुक्त्वाचांद्रायणंचरेत् बुद्धिपूर्वंपा
देनस्पृष्टंवर्जयेदिति उच्छिष्टापवादआदित्यपुराणे मातापित्रोरथोच्छिष्टंकलौभुंजन्भवेत्सुधी आपस्तंबो
पि पितुर्मातुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमितिवसिष्ठः उच्छिष्टमगुरोरभोज्यमिति श्वादिस्पृष्टापवाद
माहयमः देवद्रोण्यांविवाहेषुयज्ञेषुप्राकृतेषुच काकैःश्वभिश्चसंस्पृष्टंअन्नंतन्नविवर्जयेत् अन्नंन
न्मात्रमुद्धृत्यशेषंसंस्कारमर्हति घृतानांप्रोक्षणाच्छुद्धिर्द्रवाणामतितापनात् संस्पर्शाच्चभवेच्छुद्धिरपाम
ग्नेर्घृतस्यच छागेनमुखसंस्पृष्टंशुचिन्नैवहितद्भवेदिति पारिजातस्मृतिः क्षीरेतुलवणंदत्वाउच्छिष्टेपि
चयद्धृतं स्नानंरजकतीर्थेषुताम्रेगव्यंसुरासमं लवणविषयेव्यवस्थाप्रोच्यतेतत्रैव अजामाहिष

द्राच्यंतरितंतत्पर्युषितमितिमाधवः विज्ञानेश्वरश्च शुक्तंपर्युषितंवायदिप्रक्षालितंभोज्यंतदाहयमः शु
क्तान्निहिद्विजोन्नानिनभुंजीतकदाचन प्रक्षालितानिनिर्दोषा५ण्यापद्धर्मोयथाभवेत् मसूरमाष
संयुक्तंतथापर्युषितंचयत् ततुप्रक्षालितंकृत्वाभुंजीतत्वभिघारितं पर्युषितनिषेधोवटकादिव्यतिरि
क्तविषयः तथाचयमः अपूपाश्चकरंभश्चधानावटकसक्तवः शाकंमांसापूपकंचसूपंकृसरमेवच
यवागूःपायसंचैवयच्चान्यत्स्नेहसंयुतं सर्वंपर्युषितंभोज्यंशुक्तंचेत्परिवर्जयेत् करंभःदधिमिश्रधाना
पिष्टं करंभोदधिसक्तवइतिकोशात् धानालक्षणंवैद्यके यवाश्चयस्तुभ्रष्टास्तेधानाश्चपरिकीर्तिताइति
वटकाःमाषादिपिष्टमयाःप्रसिद्धाः सक्तवोधानापिष्टं धानापिष्टंसक्तवःस्युरितिकोशात् पुनरपूप
ग्रहणंव्रीह्यादिपिष्टविकारोपादानार्थं अन्यदोदनाधिकं स्नेहसंयुतंघृतेनदध्नावाविघारितं एतत्स
र्वंपर्युषितंमशुक्तंभोज्यं मनुः यत्किंचित्स्नेहसंयुक्तंभक्ष्यंभोज्यमगर्हितं तत्पर्युषितमप्याद्यंहविःशे
षंचवर्जयेत् गौतमः पर्युषितमशाकभक्ष्यस्नेहमांसमधूनि दिवापक्वंरात्रौरात्रिपक्वंदिवापर्युषितं

मानंतथाचोक्तंसायणीये उक्तमेतत्तुसर्वेषांभक्ष्याभक्ष्यंविशेषतः वर्णानांसानुलोमानांतत्स्त्रीणांचाविशेष
तइति इतिनिषिद्धद्रव्यनिर्णयः एवमुक्तनिषिद्धद्रव्यंवर्जयित्वा वशिष्टेषुवैद्योक्तगुणतारतम्यंविचार्य
शारीरस्यहितकरद्रव्यकृतान्नंभुंजीयात् अन्यथाशरीरोपघातप्रसंगात् भोक्तव्यंसघृतंसोष्णंहि
तंपथ्यंमितंतथेति व्यासस्मरणाच्च कालेसात्म्यंलघुस्निग्धमुष्णंक्षिप्रंसोत्तरं बुभुक्षितोन्नम
श्नीयान्मात्रावद्धितागमइतिवचनांतराच्च तस्माद्धान्यादिजलांतानांभोज्यद्रव्याणांगुणाः क्रमेणो
च्यंते तत्रव्रीहीणांगुणमाहवैद्यः व्रीहिर्गौरोमधुररसकः पित्तहारीकषायःस्निग्धोवृष्यः कृमिकफंहरस्ता
परक्तापहश्च पुष्टिंधत्तेश्रमशमनकृद्वीर्यवृद्धिंविधत्तेरुच्योत्यंतंनयतिजठरेवातकृद्दाचकोन्यः अ
थयावनालगुणाः धवलोयवनालस्तुस्निग्धोवल्पस्त्रिदोषजित् वृष्योबलप्रदोर्शोघ्नः पथ्योगुल्मव्र
णापहः शारदोयावनालश्च[illegible] श्लेष्मलःपिछलोगुरुः शैशिरोमधुरोवृष्योदोषघ्नोबलपुष्टिदः जोंध
ळा अथश्यामाकगुणाः शामाकोमधुरःस्निग्धःकषायोलघुशीतलः वातकृत्कफपित्तघ्नः सांग्राहीच 

र्षदोषनुत् सावें अथप्रियंगुगुणाः भग्नसंधानकृत्तत्रप्रियंगुर्बृंहणोगुरुः कषायोमधुरोरूक्षोवातपित्तप्र
कोपनः राके अथगोधूमगुणाः गोधूमस्निग्धमधुरोवातघ्नः पितरोगहृत् गुरुश्लेष्महरोबल्योरुचि
रुच्छीर्यवर्धनः गहूं अथयवगुणाः यवः कषायोमधुरः सुशीतलः प्रमेहजित्पित्तकफापहारकः अ
शूकमुंडस्तुयवोबलप्रदोवृष्यश्चनृणांबहुवीर्यपुष्टिदः अथमुद्गागुणाः मुद्गास्तत्रवराः स्वादुकषायाः
कटुयाकिनः ग्राहिणोल्पबलारूक्षारोचनालघवोहिमाः मेहास्त्रपितश्लेष्मघ्नाबल्यादृष्टिप्रसादनाः
मूग मकुष्टकगुणाः मकुष्टकः कषायः स्यान्मधुरोरक्तपितजित् ज्वरदाहहरः पथ्योरुचिकृत्सर्वदोष
हृत् मठ्ठ अथमाषगुणाः माषः स्निग्धोबहुमलकरः शोषणः श्लेष्मकारीवीर्येणोष्णोझटितिकुरुतेर
क्तपित्तप्रकोपं स्वतोवातोगुरुबलकरोरोचकोभक्ष्यमाणः स्वादुर्नित्यंश्रमसुखवतांसेवनीयोनराणां उर्दाड
अथचणकगुणाः चणकोमधुरोरूक्षोवातकृत्श्लेष्मपित्तजित् दीप्तिवर्णकरोबल्योरुच्यश्चाध्मानका
रकः हरभरे अथाढकीगुणाः आढकीकफपित्तघ्नीग्राहिणीरूक्षशीतला कषायामधुरागुर्वीज्वराती
सारनाशिनी प्रमेहघ्नीघृतेसिद्धात्रिदोषशमनीलघु तुरी अथकुलित्थगुणाः कषायाः स्वादुरूक्षोष्णाः

कुलित्थास्तु पित्तजित् ग्राहिणो लघवस्तीक्ष्णा विपाके म्लाविदाहिनः कुलथो अथनिष्पावगुणाः रुच्यो
नेष्पावकस्तिकः कटुकास्त्रमदो गुरुः पावटे अथराजमाषगुणाः राजमाषो गुरु भूरिशकृद्रूक्षो तिष
तलः कषायानुरसः स्वादुरवृष्यः श्लेष्मपित्तजित् चवळ्या कचिदकसंद अथकृष्णातिलगुणाः कृ
ष्णास्तिलः प्रमेहार्शः शोफघ्नोदंनदाढ्यकृत् काळेतीळ अथशुक्लतिलगु शुक्लतिलः श्लेष्मपित्तबलव
र्णकरो गुरुः पांढरेतीळ अथजवसगुणाः स्निग्धो मास्वादुरिक्तोष्णा कफपित्तकरी गुरुः जवस अथ
कुसुंभबीजगुणाः दृक्शुक्रहृत्कटुः पाकेतद्बीजं कुसुंभजं करडी अथव्रीहि लाजगुणाः येकेचि
द्व्रीहयो भ्रष्टास्ते लाजा इति संज्ञिताः लाह्या अथधानागुणाः यवादयस्तु भ्रष्टास्ते धानास्ते परिकीर्तिताः
धानाः लाजाश्चयवधानाश्च तर्पणाः पित्तनाशनाः अथयावनालगोधूमलाजगुणाः गोधूमयावनालो ऽथ
किंचिदुष्णाश्च दीपनाः रसैरपक्वगोधूमा अकुलाः परिकीर्तिताः जोंधळ्याचा लाह्या गव्हाचा लाह्या
अथपृथुकगुणाः व्रीहयस्त्वर्धपकाश्च नसास्ते पृथकास्मृताः अकुला गुरवो वृष्या मधुरा बलकारिणः
पोहे इतिधान्यगुणाः अथभक्ष्यगुणाः दूरिका बृंहणाः स्निग्धा वृष्याः पितानिलापहाः मधुरास्ते

गोक्षीरं माविकंचक्रमात्यजेत् सामुद्रं सैंधवाख्यंच रुचकं लवणं द्विज इति स्मृतिसागरे नालिकेरोद
कं कांस्ये ताम्रपात्रस्थितं मधु गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना कृष्णभट्टीये स्कांदे आज्य
पात्रे स्थितं तक्रं मधुमिश्रं तु यद्धृतं ताम्रपात्रस्थितं क्षीरं त्रपुसर्पिः सुरासमं आर्द्रकं सगुणं मद्यं ऐक्षवं
दरं तथा नारिकेलरसं कांस्ये दध्ना संमिश्रितो गुडः मद्यवदित्यर्थः त्रपुकथितं षड्त्रिंशन्मते स्नानतर्प
णदानेषु ताम्रे गव्यं न दुष्यति होमकार्ये तथा दाहे पाके च परिवेषणे शिष्टविगीतमात्रेण मासुभंगा
दि द्रव्यविशेषे त्वपराकें भरद्वाजः शिष्टानाश्नंति यत्किंचिदन्नमूलफलादिकं न तद्भोज्यं द्विजातीनां
भुक्त्वा चोपवसेदहरिति इति संसर्गदुष्टद्रव्याणि अत्र वक्ष्याश्रयदुष्टान्युत्तरत्र परान्नभोजनवि
धौ वक्ष्यंते सहृल्लेखं तु विचिकित्सा तु हृदये अन्ने यस्मिन्प्रजायते सहृल्लेखं तु विज्ञेयमिति पूर्वमेवोक्तं
क्वचित्समं वा गर्दुष्टमुक्तं पुराणे भक्ष्यं त्वभक्ष्यवाक्येन यद्द्याङ्गोषधर्मतः गुरोरपि न भोक्तव्यं वाग्दुष्टंत
न्महापदि तथा क्षुधार्तश्च न को भुंक्ते मामकं त्वन्नमेव हीति इति भोज्याभोज्यद्रव्यनिर्णयः एतत्सर्वेषां स

रोचनो बृंहणः स्वादुर्वर्ण्यो दृष्टिप्रसादनः कनकाभाश्च जायंते तए ते करटकार्णकाः बृंहणाः मधुराः स्नि
ग्धाः सोष्णा कटुविपाकिनः तप्ते तैलघृते पात्रे गोलकान्विस्तृतान्क्षिपेत् उत्तानपाक संसिद्धाः मृघ्यः सं
हारिकाः स्मृताः एता बल्या विदाहिन्यः श्लेष्मघ्नः पित्तलापरं हृद्याः पथ्यतमास्तेषां लवः फेनकाद
यः फेण्या चंद्रमंडलसंकाशा वर्तुला भ्राष्ट्रपाचिताः पैष्टका गुरवो बल्या रोचनाः कफकारिणः स्वर्प
र घृष्ठेपाचिताः पोलिकाः स्तूपान्नविकृता भेक्ष्या वातला रुक्षशीतलाः सकटुस्नेहलवणान्भक्षये दस्तु
ल्पशस्तुतान् वरणातीलमुद्गा श्लेष्मलं गुर्वभिष्यदि प्रायशस्तिलसंस्कृतं तिलमिश्रापूपाः हृद्याः सुगं
धिनो भक्ष्याल्लघवो घृतपाचिताः वातपित्तहरा बल्या वृष्या दृष्टिप्रसादनाः घृतपाचितभक्ष्याः विदा
हिनस्तैलकृता गुरवः कटुपाकिनः उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः तैलपाचिताभक्ष्याः
भक्ष्याः क्षीरकृता बल्या वृष्या हृद्याः सुगंधिनः विदाहिनः पुष्टिकरा दीपनाः पित्तनाशनाः क्षीरपाचि
तभक्ष्याः रोचनो दीपनः स्वर्यः पित्तघ्नः पवनापहः गुरुमष्टतमश्चैव कटुकः प्राणवर्धनः लाडू श

कुलीमधुरास्निग्धारुच्याश्लेष्मामवर्धिनी वातघ्नी बृंहणीगुर्वी वीर्येणोष्णाविदाहिनी गोधूमशष्कु
लीहृद्यासमस्तेंद्रियपोषिणी मधुराबृंहणीवृष्यादीपनीकांतिवर्धनी बृंहणावातपित्तघ्नीभक्ष्या
बल्यास्तुसामिधा करंजी गुरवःपेष्टिकाभक्ष्यावीर्योष्णाःकफपित्तलाः सर्वपिष्टमयमोदकइतिभ
क्ष्यगुणाः अथसूपादिगुणाउच्यंते विशेषान्मुद्गगुल्मासोगुरुरुच्योविबंधकृत् वातःश्लेष्मपित्त
घ्नःप्रमेहगलरोगिणः मुगाचेवरण विशेषादाढकीसूपःस्वादुविष्टंभकृद्गुरुः तुरीचेवरण अथगु
डगुणाः स्निग्धोगुरुरभिष्यंदीवृष्यःश्लेष्माभाग्निमांद्यकृत् वातपित्तहरःस्निग्धःपिच्छलश्चनवो
गुडः अथशर्करागुणाः शुत्यस्फटिकसंकाशानिर्मलासितशर्करा शर्कराज्वरपित्तास्रकृमूर्छाछ
र्दिविषापहा अथघृतगुणाः वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहं स्नेहानामुत्तमंशीतंवेयसां
स्थापनंघृतं अथतैलगुणाः तैलंस्वयोनिवत्तत्रमुख्यंतीक्ष्णव्यवायिच त्वग्दोषकृद्दचक्षुष्यंसूक्ष्मो
ष्णंकफकृन्नच अथफलशाकादिगुणाः बालडंगरिकंस्वादुशीतंतृड्दाहपित्तजित् रुच्यंसंतर्पणं

२१८ वल्यंवृष्योजस्यंश्रमापहं कोवळीकाकडी तद्वीतपुष्पंस्वादूष्णंपित्तदाहास्रकृत्कटु जुनकाकडी शीर्णवृंतं
तुसक्षारंपित्तलंकफवातजित् पिकलीकाकडी कंगकोर्वारुकफलंहृद्यंश्लेष्मास्रकृत्क्षितं कांटेका
कडी स्वादुत्तद्यंस्तरंस्निग्धंलघुकोशातकीफलं दोडका स्त्रोत्मदृष्यंकृमिहरंमहन्महतिकाफलं रिं
गणी कोमलंनीलवृंताकंमधुरंबृंहणंगुरु काळीवांगी बालंपथ्यंत्रिदोषघ्नंमध्यमंपित्तवर्धनं फ
कंश्लेष्मकरंविद्यात्समस्तंबृहतीफलं डोलि शूलघ्नंकदलीशाकंतत्पुष्पंकटुपाकतः कषायतिक्तं
ग्राह्यग्निकृत्कृमिश्लेष्मपित्तजित् केळीवकेळफूल तद्वद्भागर्भकांडंश्ले ष्मलंवह्निसादनं के
ळीचेकाल कारवेल्लंसकटुकंदीपनंकफपित्तजित् कार्ले वातपित्तहरंगुल्मशूलघ्नंदंतदार्ढ्यकृत्त
विंदूपकफलंरुच्यंलघुदीपनंपावनं स्वादुबिंबीदलंशीतंवातपित्ताश्रपित्तजित् तत्पत्रवल्फलंमेध्यंरु
च्यंभक्ष्यंहिमंगुरु तोंडली पद्मस्तूरणजंतीक्ष्णंरुक्षमुष्णंविकर्षिच तत्कंदंविशदंरुच्यंदृश्यंबल्यंसरं २१८
लघु सूरण मध्वालुवंस्वादुशीतंरुच्यंश्लेष्मकृमिप्रदं तांमडीरताळी पनसस्यफलंबालंकषायं
मधुरंगुरु बीजंपनसजंस्निग्धंवातश्लेष्मकरंगुरुफणसवअटोळ्या कूष्मांविषहरंपुष्पंडुडुकस्य

स्तैलपालिन्यो गुर्व्यः श्लेष्मानिलापहाः पुर्या मंडकास्तु परं तृष्या मधुरा गुरवः सराः पित्तमारुतकोपघ्नाः प्री
णना बलवर्धनाः मांडे गुरवो बृंहणा वर्या मोदकाश्च सुदुर्जराः मधुराः श्लेष्मलाः किंचित्समीरणकराः
स्मृताः मोदक अंगारपोलिकाः शस्ता निर्धूमांगारपाचिताः लघ्व्यो बलकरा वृष्या दोषघ्ना वह्निदीपनाः
अंगारपोलिका रोट्या अत्यच्छिता स्तु गोधूमगोलकाः परिपाचिताः वातघ्ना मधुराः स्निग्धा वृष्या बलव
र्धना हिताः गोधूमचूर्णरोट मुद्गादिवेसवारैस्तु चूर्णा विष्टंभिनो मताः मृदुपाकाश्च ये भक्ष्याः स्थूलाश्च
कठिनाश्च ये पुरणाश्चेकानवले रुच्या वातहरा बल्या माषापूपास्तु बृंहणाः शुक्रवृद्धिकराः स्निग्धाः शस्ता
व्यायामशीलिनां वडे माषमुद्गादिचूर्णैश्च शापिष्टैश्च संभृताः जलेऽभ्योपरि संपक्वा अपूपाः स्युर वंतिफ
फके अथ वापातकानवल्हे दोषकाः श्लेष्मला बल्या गुरु रुच्याश्च बृंहणाः स्थूलाः सवर्तुलाः कुब्जाः मष्टि
ष्ठाः स्नेहपाचिताः पिष्टापूपा रुचिकरा गुरवः कफपुष्टिदाः घार्गे गोधूमचूर्णं सुश्लक्ष्णं क्षीरे पक्वा पचे
स्टते एष भक्ष्यः परं वृष्यो मेरुरो बृंहणो गुरुः क्षीरापूपाः भक्ष्यः सुधापरो नाम्ना वृष्यः पित्तानिलापहः

शीतवातकफापहं राजगिरा चिल्लीवास्तुकज्ज्ञेयालघुपत्त्राविशेषतः माठपोकळामूळ गोलीसराम्ल
मधुरापिछलाश्लेष्मलागुरुः पाथरी पानीयालुस्त्रिदोषघ्नः कृष्णालुः पित्तदाहजित् कासाकुउयकं
इतिवातश्लेष्मारुचिप्रणुत् अळू गांगेरुकदलंशीतंकषायंमधुरंगुरुं मेथी उपोदकीसरास्निग्धा
वल्याश्लेष्मकरीहिमा वेलबोंडी विदाहिसर्वनिष्पावफलंस्वादुकषायकं कटुपाकंसरंरुक्षंगुरुश्लेष्म
समीरकृत् घेवड्याचाशेंगा जीवंतीब्रूंहिणीकंम्या गुर्वश्चृष्यारसायनी चक्षुष्यासर्वदोषघ्नीस्तन्य
कृत् स्टष्ट[redacted] मूत्रविट् शाकाग्याप्याभाकुरन्येतुवातलाग्रहिणीलघु हरणदोडी अदृश्यंरोचनंरु
क्षंबृंहणंकफवातजित् पित्ताग्निकृत्शानपुष्पंस्वादुष्णंगुल्मशूलजित् बाळंतशोप वृक्षमूत्तीस
राफंजीगुर्वीविष्टंभ्यजीर्यति फांज क्लांताकफघ्नीचक्षुष्यापथ्यास्वादुकषायका डोलरे मत्स्याक्षीस्वा
दुपाकेतुतिक्तारुक्षाहिमालघु होनगुंदा पत्तूरोदीपनस्तिक्तः प्लीहार्शःकफवातजित् पतंग कषाय
कटुतीक्ष्णोष्णक्षारोरुक्षोग्निकृत्सरः रुच्यःपुनर्नवोनेत्र्योवातश्लेष्मशिरोर्त्तिजित् वसुघेडुळी स्वाद्वी 

कषायास्त्वच्याल्हारुच्या मेध्या हिमागुरुः कडु कुणंजोमधुरोरुच्योदीपनःपाचनोलघुः कुंजरः वै
कुंठंतिक्तमधुरंकटुति क्तोष्णमग्निजित् अथसंभारगुणाः रसेपाकेकटुस्तिक्तः क्षारोष्णःसर्षपःपर
मोहरिया स्वादुपाकार्द्रमरिचंगं ध्यग्निकफकृद्गुरुः नातिपित्तोष्णकटुच्यंतत्शुष्कंकटुतिक्तकं ओ
लीमिर्ये अथवावोल्यामिर्च्या तदुक्तंवाग्भटीकायां मरीचंद्विविधंप्रोक्तंवल्लिजंवृक्षजंतथेति
एलातिक्तोष्णकटुकालघ्वीवातकफापहा वेलदोडे यवानीकटुति[redacted] क्तोष्णावातश्लेष्मद्विजाम
यात् हंतिगुल्मारुचिंदीपयत्याशुचानलं ओवा जीरकंकटुकंरुच्यंदीपनंपाचनंलघु जिरे हिंगु
वातकफानाह शूलघ्नंपित्तकोपहं हिंग सामुद्रंमधुरंपाकेभूतघ्नंश्लेष्मकंगुरु मीठ कफवातारुचि
हरंजाड्यघ्नंचिर्भिटंसरं चिभुड त्रपुसंतिक्तकटुकंछर्दनंवस्तिशोधनं वाकुक भहिंस्राफलमत्यु
ष्णंकफमारुतनाशनं वाघंटी अर्कपुष्पंतथामेदोदुर्मीसासुविषापहं रुवीचेफूल इतिसंभारगुणाः
रुच्यंचूतफलोद्भूत हरितंवातजिद्गुरु आम्रफलकल्क हरितंमूलकोद्भूतंलघूष्णंस्वादुपाकतः मू
लकल्केनारिकेलफलंहृद्यंपित्तश्लेष्मानिलापहं नारळ रुच्यंसुगंधकेडयैपत्रंगर कफानिलात् क

ढीनिंब रमणो रामणः कालशाकः केंडर्य एव चेत्यभिधानात् आर्द्रकुस्तुंबरीपत्रं रुच्यं बल्यं त्रिदोष[illegible]जि
त् ओलीकोथिंबीर कटूष्णं आर्द्रकं रुच्यं वृष्यं पाके हिमं लघु अले शृंगिवेरं सलवणं स्तब्धशोपानिलाप
हं जिह्वाजाड्यहरं वृष्यं रोचनं दीपनं लघु सलवण आले सगुडार्द्रं बल्यमक्ष्यं वातश्लेष्मघ्नमग्निजित्
गुडार्द्रकं गजकर्णभवं कंदं तीक्ष्णोष्णं शीतिकापहं कासाकू वृक्षाम्लपल्लवं रुक्षं कषायाम्लं कफानिलो
रक्तदोषव्यथां हंति वृष्यं मेध्यं प्रदीपनं चिंचेचा कोवका पाला श्रीवल्ली कटुका सोष्णा वातशोफकफापहा
तत्फलं तैललेपघ्नं रुच्यमत्यम्लमग्निकृत् शिकेकायी पललं मधुरं रुच्यं पितास्रबलं पुष्टिदं तिलकूट
इति हरितगुणाः अथ क्षीरादिगुणाः प्रायः पयोत्र गव्यं तु जीवनीयं रसायनं क्षतक्षीणहितं मेध्यं बल्यं तन्य
करं सरं गार्यांचे दूध महाभिष्यंदि मधुरं माहिषं वन्हिनाशनं निद्राकरं शीतलं च गव्यात्स्निग्धतरं गुरु म
हिषीदुग्ध प्रसूतिदोषाद्यत्क्षीरं पाके तु ग्रथितं भवेत् तत्पीयूषमिति ख्यातं [illegible] सर्वदोषकरं गुरु वि
ड्दि मूत्रलं वृष्यं मधुरं वन्हिमांद्यकृत् खर्वस अव्यक्ताम्लं घनीभूतं दधित्वं प्राप्यते तच्चयः यज्जातं मधुरं
बल्यं वातघ्नं गुरु शुक्रलं दही तक्रं घ्रुदश्विन्मथितं पादांबर्धांबु निर्जलं तत्र मथितगुणाः हिमकुंदश

२२०

हिमंलघु डुंडुकस्यफलंबालंकषायंमधुरंलघु बद्धरक्षुडङ्फणस बल्यंहिमंस्वाद्वगरल्यंभूतकासत्रिदोषजित्
हृद्या तत्पुष्पंतरुणंरुच्यंलालापित्तकफंकृमीन् हंतिचक्षुर्व्रणेशस्तंमध्यमंकुसुमंलघु अगस्तिपुष्प
शिग्रुशाकंकटुस्वादुरिक्तस्निग्धंहिमंगुरु शिग्रपुष्पंगुरुहिमंपित्तश्लेष्मकृमिप्रणुत् शीतंशिग्रुफलंवृ
ष्यंपिच्छलंश्लेष्मलंगुरु शिग्रुफलवपुष्पफलानि अलाबुशाकंमधुरंपित्तघ्नंमूत्रशोधनं भोपळा कू
ष्मांडशाकंवातघ्नमामघ्नंदीपनंपरं कोवाळ्ळा वातपित्तहरंस्वादुपटोलंपिच्छलंगुरु पडुळ काको
डुलफलंस्वादुरुच्यंभिष्टंभिमाषवत् क्षुद्रदंतीफलंस्वादुकषायंरसपाकयोः भूयदाती कुरुटः कटु
तिक्तोष्णःक्षारस्तृघ्नग्निकृल्लघु कुई तुंबुत्तिक्तकटुर्भेदीस्निग्धोंस्वेदनोगुरुः एरंडफलं कटूष्णःकिं
शुकोरुच्योदीपनःपाचनोलघुः कासारोचकमेहघ्नं महत्पुष्पंचपल्लवं पालोशपुष्पं रुच्यंतर्जितकूष्मां
डंदीपनंवातपित्तजित् त्रिदोषघ्नोग्निकृत्ग्राहीचक्षुष्योमधुरोलघुः हृद्योराजक्षवःपथ्योग्रहण्यर्शो
विदारणः मोहरीपाला सक्षारः सर्वदोषघ्नोवास्तुकोरोचनःसरः चाकवत् बाष्पंहृद्बलपित्तघ्नं

प्रशस्तभूमिभागस्थंप्रतिवर्षंनवांबुभिः पूरितंतटसंरुध्धंताटाकंपित्तजिद्गुरु तथाचेउदक शैलतनू
द्भवंशीतंस्पृष्टंवर्षंहिमातपैः ७ जलंप्रास्त्रवणंस्वादुलघुपथ्यंत्रिदोषजित् इर्षीचेउदक नारीकेलं
बुभुक्षात्याक्ष्रुगुल्मानिसदनादिकृत् अनोपराण्हपेयस्यात्संदुतछीतलंहितं क्षयोपवासाध्वगमा
तिभाष्यव्यवायवातातपपीडितानां व्यायामिनांचाल्पकफोतराणांयन्नारिकेलादुदकंप्रशस्तं नारि
केलोदक अथदुष्टजलशुद्धिः अथदुष्टसलिलाभावेव्यापन्नस्यास्ययुक्तितः शुद्धंजंत्वभिदुष्टस्यघ
नवस्त्रेणशोधनं लवंगोशीरकर्पूरकोष्ठैः कर्चूरचंदनैः चूर्णितैर्वासितंवारिसुगंधंसर्वदोषजित्
पुष्पैरनिष्टगंधंवापाटलाद्यैश्चवासितं अथजलपानेकालः भुक्तस्यादौजलंपीतंअग्निमांद्यंकृशां
गतां अंतेकरोतिस्थूलत्वमूर्ध्वमामाशयात्कफं मध्येमध्यगतांसात्म्यंधातूनांचरणंसुखं पिबे
दुदसहस्राणियावदस्तमयेरवेः अस्तंगतेपुनःसूर्योबिंदुरेकोघटायते निश्यभोजनवेलायांस
त्यमप्युदकंविषं गंडूषमाचरेद्रात्रौतृष्णावान्शीतलैर्जलैः क्षुधार्तोनपिबेत्तोयंतदागुल्मंभवेध्रुवं २२१

अन्यच्च अत्यंबुपानान्नविपच्यतेन्न मंबुपानाच्च स एव दोषः तस्मान्नरो वन्हिविवर्धनाय मुहुर्मुहु
र्वारिनपिबेदभूरि इतिजलविधिः इतिवैद्योक्त भोजनद्रव्यगुणणविधिः एवंद्रव्यगुणा गणोविचा
र्यगुणोत्तरं द्रव्यं संपाद्यपाकं कारयित्वा शुद्धस्थाने विहितासनउपविश्यविहित[redacted] भोजनपा
त्रे विधिवद्भुंजीत अन्यथावैधहानिप्रसंगात् भोजनेनिषिद्धस्थानान्याहव्यासः नांधकारेनचा
काशेनच देवालयादिषु शून्यालयेदेवगृहेविहावच[redacted] जलाशये देवलः उपलिप्तेशुचौदेशेपा
दौप्रक्षाल्यवाग्यतः प्राङ्मुखोन्नानिभुंजीतशुचिः पीठमवस्थितः पीठमासनं तत्प्रागुक्तं मंडल
माह बौधायनः उपलिप्ते समेस्थाने शुचौश्लक्ष्णसमन्विते चतुर[redacted] श्रं त्रिकोणं वा वर्तुलं चार्धचंद्रकं
कर्तव्यमानुपूर्व्येण ब्राह्मणादिषुमंडलमिति स एव भस्मनाचारिणावापि मंडलंकारयेत्ततः मंड
लेपरिमाणविशेषानुक्तत्वात्पात्रसमंकार्यं अर्थात्परिमाणमितिकात्यायनोक्तेः अथभोजनपात्राण्यु
क्तानि माधवीयेपराशरे सौवर्णेराजतेताम्रेपद्मपत्रपलाशयोः भोजनेभोजनेचैवत्रिरात्रफलमश्नु

ते सौवर्णादिपात्रमानंकमलाकरान्हिके पंचाशत्फलमात्रंतुमहाभाजनमिष्यते नातिदीर्घंनातिह्रस्वंरात्नि
मात्रप्रमाणकं अशक्तंप्रत्याह पलविंशतिमारभ्यअनर्ऊर्ध्वंस्वशक्तितः पलषोडशकान्न्यूनंनतद्भाजन
मिष्यते घृतार्थंलघुपात्रंचदधिदुग्धार्थमेवच लघुपात्रंवाटिकापत्रपुत्रादिच पैठीनसिः ब्रह्मपत्रेषु
योभुंक्तेमासमेकंनिरंतरं त्रिभिश्चांद्रायणैस्तुल्यंमहापातकनाशनं यद्दत्यूर्ध्वगामित्यंपरंस्थानंच
शाश्वतं पद्मपत्रेषुभोक्तव्यंमासमेकंनिरंतरं चंडिकायांपुराणं पालाशेषुचपत्रेषुमध्यमेषुविशेष
तः यःकरोत्यशनंतस्यप्राजापत्यंदिनेदिने यत्तुपलाशपद्मपत्रेषुगृहीभुक्तैवंचरेत् ब्रह्मचारीय
तीनांचचांद्रायणफलंभवेदितितद्दलीपलाशस्थलपौष्करविषयं तथाचोक्तंतत्रैव वल्लीपलाशपत्रेच
स्थलेजेपौष्करेतथा गृहस्थश्चेतुनाश्नीयाद्भु[illegible]त्काद्रायणंचरेत् पारिजाते कदलीगर्भपत्रे
चपद्मपत्रेजलास्पृशि वल्लीपलाशपत्रेचभुक्त्वोचांद्रायणंचरेत् पलाशमध्यपत्रविधिःशूद्रेतरप
रः शूद्रंप्रक्रम्यमध्यपत्रेनभुंजीतब्रह्मवृक्षस्यभामिनीतिस्कांदोक्तेः सौवर्णादिपात्रेषुविशेषमाहव्या

शिमभशंखनिर्भपरिपक्वकपित्थसुगंधिरसं नदिदंभुविसर्वरुजापहरंयुवतीकरनिर्मथितंमथिनं अथक
रमथितगुणाः करमथितंगुरुहृद्यंबल्यंवृष्यं श्रमानिलघ्नंच पथ्यंदीपनमग्नेःपाडुश्वासप्रमेहकृछ्र
हरं अथलवणशाकगुणाः लवणाम्रफलंरुच्यंदीपनंवात[illegible]नोशनं श्रमक्लमहरंहृद्यंमदमूर्छाप्रलापजि
त् अंब्याचेलोणचे अम्लंकटुष्णंनिबूकंगुल्मश्लेष्मामवातजित् लिंबाचेलोणचे त्व[illegible] क्पित्तकटु
कास्निग्धामातुलुगस्यवातजित् माहाळुंगाचेलोणचे अथजलगुणाः नादेयंवातलंरुक्षंदीपनंलघु
लेपनं स्वादोषदुष्णंतृष्णाघ्नंस्वछंपथ्यंचपाचनं नदीजल स्नानात्पानाद्दर्शनाच्चमेध्यंवृष्यंरसायनं
श्रमक्लमभ्रमहरंस्वर्ग्यंभागीरथीजलं भागीरथीजलं नर्मदावारिमधुरंरुच्यंपथ्यंहिमंलघु समस्तरोग
जित्श्लेष्मपित्तकोपविलोपकृत् नर्मदोदकं भागीरथीजलसमंगुणैः गोदावरीजलं गोदावरीजलं कार्ष्णं
स्वाद्वग्निपितास्रजाड्यहृत् वाक्यपावनं कृष्णावेणीजलं कौपंस्वादुत्रिदोषघ्नंलघुपथ्यंचसर्वदा कूपज
लं तृष्णाक्लमहरंबल्यंकषायमधुरंलघु सारसंजलमाख्यातमिति सरोवराचेजल अथताटाकमुच्यते

कोविदारः कांचनारः अपटेतिप्रसिद्धः करंजेतिप्रसिद्धःप्रचेताः मृन्मयेपर्णपृष्ठेवाकार्पासेतांत
वेतथा नाश्नीयान्नपिबेच्चैवनरकेनतथामणौ वाराहे वटार्काश्वत्थपत्रेषुनाश्नीयात्सर्वथा
द्विजः अनापद्येषुभुंजीतगायत्रीशतकंजपेत् जपेदापदिगायत्रीदशकंभोजनात्सकृत् व्यासो
क्तंचाद्रायणंतुअभ्यासविषयं आग्नेये वटार्काश्वत्थधवजसर्जभल्लातकः विधीसाग्रकदलीप
त्रंनिषिद्धमितिरत्नमालायां भोज्यपत्राणिवाराहे पलाशस्तिंदुकः कुब्जःप्रियालः पनस
स्तथा पद्मिनीप्लक्षजंताम्रकदलीचंपकादयः भोज्यपत्राःस्मृतावृक्षानदोषोभोज
नाद्भवे तिंदुकस्यविहितप्रतिषिद्धत्वाद्विकल्पः कुब्जःअघाडाप्रियालःचारइति प्लक्षःपिंप
णइपायीरोवा कुटजमधूकोदुंबरपत्राणिप्रशस्तानीतिधर्माब्धिसारः पत्रावलीविधिःसंग्र
हे अछिन्नवृंतंछिन्नाग्रंकृमिविष्टादिदूषितं अस्फोटकमिदंपत्रंपत्रावल्यांविवर्जयेत् २२३
अधःपत्रविहीनेतुभोजनेपत्रभाजने गोमांससदृशंचान्नंसइस्तुरयासमं एकपर्णेतुद्विपर्णे

वामध्यपर्णेतथैवच कदलपद्मपत्रेचअधःपत्रविसर्जयेत् नमूलंमूलतोयोज्यंनाग्रमग्रेणयोजये
त् नांतरादर्शयेदग्रंनपृष्ठंमेलयेत्क्वचित् पर्णस्यमूलंपर्णाग्रेयोज्यंनतुविपर्ययः विपरीतेनप
त्रेणभुक्त्वाचांद्रायणंचरेत् निमंत्रितब्राह्मणैःपत्रावलीर्नकारयेत् तदुक्तंनारदीये निमंत्रितै
र्द्विजवरैःपत्रालीःकारयेत्तुयः अन्नदानंकृतंतस्यतत्सर्वंनिष्फलंभवेत् अथपरिवेषणं तत्र
पात्रोपस्तरणंदानधर्मे आज्याहुतिंविनाचैवयत्किंचित्परिविष्यते उपचारैस्तुयद्भुक्तंतेभागंरक्ष
सांविदुः इदंशिष्टाचारानुरोधाच्छ्राद्धैकविषयमितिकेचित् अविशेषाद्भोजनमात्रविषयमित्यन्ये
परिवेषणक्रमःपारिजाते भक्ष्यादिशिस्तुमारभ्यभोज्यंदेयंप्रयत्नतः परिवेषणसाधनमुक्तंस्मृति
रत्नावल्यां अपक्वंस्नेहपक्वंचहस्तेनैवप्रदापयेत् यत्किंचिदितरद्भक्ष्यंदर्व्यामुक्त्वान्यपात्रतः मात्स्ये
उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेषयेत् आपस्तंबः घृतंतैलंचलवणंपानीयंपायसंतथा भि
क्ष्यचहस्तदत्तानि नग्राह्यायत्रकुत्रचित् तस्मादंतर्हितंचान्नंपर्णेनचतृणेनवा प्रदद्याज्जातुहस्ते

२२८ ननायसेनकदाचन दर्व्यादियंघृतान्नंचसमस्तव्यंजनानिच उदकंचयच्चपक्वान्नंयोदर्व्यादातुमिच्छति
सुम्भ्रूणहासुरापश्चसस्तेनोगुरुतल्पगः शातातपः हस्तदत्तानिचान्नानि हस्तदत्तानिचान्नानिम
त्स्यक्षलवणंतथा मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतं मत्स्यक्षमपिलवणंहस्तदत्तमेवनिषिद्धं
तथाच पैठीनसिः लवणंव्यंजनंचैवघृतंतैलंतथैवच लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत् सैंधवं
सामुद्रमानसानितु मत्स्यक्षाण्यपि ग्राह्याणीति पूर्वमुक्तं वृद्धवशिष्टः घृतंवायदिवातैलंविप्रोनाद्यान्न
खच्युतं यमस्तदशुचिप्राह तुल्यंगोमांसभक्षणैः पराशरः माक्षिकंफाणितंशाकंगोरसंलवणंघृतं
हस्तदत्तानिभुक्त्वातुदिनमेकमभोजनं माक्षिकंमधु पाणितंकाक्षी फाणितादेर्हस्तेनदातुःप्रा
यश्चित्तंकाशीखंडे फाणितंगोरसंचैवंलवणंमधुकानिच हस्तेनब्राह्मणोदद्यात्कृच्छ्रंचांद्रायणंच २२८
रेत् एकपंक्तौविषमान्नदानेदोषस्तदपवादश्चातिथिभोजनप्रकरणेपूर्वमुक्तः परिवेषणस्थानविशे
षः स्मृत्यंतरे शाकादीन्पुरतःस्थाप्यंभक्ष्यंभोज्यंचवामतः अन्नंमध्येप्रतिष्ठाप्य दक्षिणेघृतपायसे

सः सौवर्णराजतंताम्रं पात्रं शुक्तिजशंखजे अश्मजं स्फाटिकं चैव न भेदो दोषमर्हतीति कांस्यपात्रे भो
जनविधिरुक्तः पराशरे एक एव तु यो भुंक्ते विमले कांस्यभाजने चत्वारि तस्य वर्धंते त्वायुः प्रज्ञा यशो
बलं चंद्रोदये पंचाशत्पलकं कांस्यं त्वधिकं भोजनाय वै गृहस्थेश्च सदा कार्यम भावे हेमरूप्ययोः
तत्रैव प्रचेताः पलाद्विंशतिकान्नार्वाकू अत ऊर्ध्वं यदृच्छया एतच्च गृहस्थैकविषयं तथा च प्रचेताः
तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं यतिश्च ब्रह्मचारी च विधवा च विसर्जयेत् ताम्रविधिर्गृहस्थेत
रपरः ताम्रपात्रे न भुंजीत भिन्नकांस्ये महाविले पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेदिति स्वधर्मन्नूते
रिति पृथ्वीचंद्रः ताम्रविधिः श्राद्धपर इत्यन्ये यत्त्वपरार्के समन्यांनेव कुर्वीत ताम्रपात्रे च भोजनमि
ति तत्सूर्वोक्तनिषेधोपसंहारार्थं वा ताम्रवत्पैतलेपि निर्णय इत्याचारसारे येत्तु नाय सान्यपि कार्या
णि पैतलानि न तु क्वचिदिति श्राद्धहेमाद्रौ वाराहं तत्प्रकरणाच्छ्राद्धपरं निषिद्धपात्रण्याह व्यासः वटार्का
श्वत्थपर्णेषु कुंभीतिंदुकपत्रयोः कोविदारकरंजे च भुक्त्वा चांद्रायणं चरेत् कुंभी कुंभा तिंदुकः टेंरू

णेरजोदुष्टेनतत्संस्पृष्टान्नस्यत्यागः अन्नाधारेचंडालसूतिकोदक्यापतितोच्छिष्टस्पृष्टेत्यागएवेति इतिपरिवे
षणविधिः अथभोजनविधिरुच्यते तत्रगृह्यपरिशिष्टं अथभोजनविधिरार्द्रपादपाणिराचांतः पवित्र
पाणिः शुचौदेशेप्रत्यङ्मुखोवोपविश्यचतुरस्रमंडलेपात्रस्थमन्नंप्रणवव्याहृतिपूर्वयासावित्र्या
भ्युक्ष्यस्वादोपितोमधोपितोइत्यभिमंत्र्यसत्यंत्वर्तेनपरिषिंचामीतिरात्रावथदक्षिणतोभुविभूपतये
भुवनपतयेभूतानांपतयेनमइतिनमोंतेनमंत्रेणप्राक्संस्थंप्रत्यक्संस्थंवाबलीन्विकीर्यसमाहि
तोमृतोपस्तरणमसीत्यापोशानंप्राश्यसव्येनपाणिनापात्रमालभ्यतर्जनीमध्यमांगुष्ठैः प्राणायम
ध्यमामिकांगुष्ठैरपानायामिकाकनिष्ठिकांगुष्ठैर्व्यानायकनिष्ठिकातर्जन्यंगुष्ठैरुदानायसर्वाभिरं
गुलीभिः समानायचमुखेजुहुयात्सर्वाभिरेववासर्वेभ्योजुहुयाद्देवंवाग्यतोभुक्त्वामृतापिधानम
सीत्यपिधानंप्राश्यशोधितमुखपादपाणिर्हिराचामेदेवंभुंजानोग्निहोत्रफलमश्नुतेबलवृद्धिमान्भ
वतिसर्वमायुरेतीति पारिजातेव्यासः पंचार्द्रोभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः हस्तौपादौतथै

२२५

वाम्यमेषु पंचाईमनामता शातातपः आचम्यैवतुभुंजीतभुक्त्वाचोपस्पृशेद्द्विजः आनाचांतःपिबेद्य
स्तुप्रायश्चित्तीभवेत्ततः अत्रपानंभक्षणस्याप्युपलक्षणार्थं तथाचसएव अनाचांतःपिबेद्यस्तुभ
क्षयेच्चापिकिंचन गायत्र्यास्त्रिशतंप्रोक्तंप्रायश्चित्तंविधीयते इदंचादौद्विः भोक्ष्यमाणःप्रयतोद्वि
राचामेदित्यापस्तंबस्मरणात् अंतेपिद्विः स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे अचांतःपुनरा
चामेदिति याज्ञवल्क्योक्तेः पाने आदौ सकृदाचमनमिति विज्ञानेश्वरः यद्वापरिशिष्टमनाज्ञो जनस्य
ग्रंतयोः सकृदेवाचमनं अत्रमंत्रविशेषउक्तः पारिजाते तदोंकारेचामनंयद्वाव्याहृतिभिर्भवेत्
सावित्र्यावापिकर्तव्यंयद्वाकार्यममंत्रकं सर्वत्राचमनंपादशौचादिनियमपूर्वंकर्तव्यं तथाचशा
तातपः अकृत्वापादयोःशौचंतिष्ठन्मुक्तशिखोपिवा विनायज्ञोपवीतेनआचांतोप्यशुचिर्भवेत्
भोजनांगमनाचमनंभोजनशालायाबहिःकर्तव्यंउक्तंचंद्रिकायां यस्तुभोजनशालायांभोक्तुका
मउपस्पृशेत् आसनस्थोपिवान्यत्रसविप्रःपंक्तिदूषकइति पवित्रधारणमाहापस्तंबः पवित्रेणधार
णे

ऽद्विभः पवित्रदक्षिणेकरे भुंजानस्तु विशेषेणान्नदोषैर्नलिप्यते अग्निर्वर्तुलग्रंथिः पूर्वमुक्तः अत्र
दिङ् नियमो ब्राह्मे प्राङ्मुखोदङ्मुखो वापीति यत्तु न कदाचिदुदङ्मुख इत्यत्रिवचनं पुत्रवतामेव उक्तं
वस्मृतिसंग्रहे पुत्रवान्स्वगृहे नित्यं नाश्नीयादुत्तरामुखः मनुः आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं
दक्षिणामुखः श्रियं प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः आयुषे हितं आयुष्यं श्रियं ऋतं चेच्छन्ति
तिशेषः सकृदनुष्ठानेनापि फलमिति केचित् यावज्जीवनियमः फलाय विधीयत इत्यन्ये जीव
त्पितृकस्य दक्षिणामुखनिषेधः स्मृतिमंजर्यां पितरौ जीवमानौ चेन्नाश्नीयाद्दक्षिणामुखः तयो
स्तु जीववानेकस्तथैव नियमः स्मृतः विज्ञानेश्वर[illegible]श्च अनिशं मातृहीनानां यशस्यं दक्षिणामुखं
भोजने उदङ्मुखत्वादिनिषेधो निष्कामपर इत्याचारादर्शः उपवेशने विशेषः पारिजाते दक्षिणेन पा
दाभूमिं स्पृशेद्वाभ्यामथापि वेति अस्य विशेषस्य परिशिष्टेऽनुक्तत्वाद्बह्वृचेष्वेवेति न्यायेनाश्वलाय 
नानां यथाकथंचिदुपवेशनमात्रं वेति ब्रह्मपुराणे अन्नं दृ[illegible]ष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत्

जातूकर्ण्यः ओदनस्यापरार्धे तु दद्याद्‌ उपरि सूपकं सूपकं सूपस्वार्थेकः पारिजाते वैद्यः भक्ष्यं च दक्षिणे
पार्श्वे पेयं लेह्यं च वामतः संग्रहेतु पायसं दक्षिणे त्वाज्यं वामे भक्ष्यादि चावपेत् मुख्यभोजनपात्र
स्य समंतात्‌ लघुपात्राणि संस्थाप्य तेषु आज्यपय आदि परिवेषयेत् तदुक्तं मदनपारिजाते लघी
यांस्यपि पात्राणि भूमौ स्थाप्यानि भारत पयःशाकादि भुक्त्यर्थं न महाभाजनोपरि आचारार्के
स्मृत्यंतरे ओदने परमान्ने च आज्यपात्रं यदि स्थितं तदाज्यं च भक्तं तदन्नं मांससमुच्यते अन्ना
द्यन्नपरिवेषणकाले उच्छिष्टस्पर्शने कर्तव्यमाह हारीतः द्रव्यहस्तस्तु संस्पृष्ट उच्छिष्टेन कदाच
न भूमौ निक्षिप्य तद्द्रव्यं अपः स्पृष्ट्वा ततः शुचिः अद्भिरभ्युक्ष्य तद्द्रव्यं पुनरादाय दापयेत् भोक्तव्य
मिति मन्यते मनुः स्वायंभुवोऽब्रवीत् स्मृत्यर्थसारे तु अन्नपानादि हस्त उच्छिष्टश्चेत् तन्निधायाचम्य
प्रोक्षयेत् परिवेषणं कुर्वन् उच्छिष्टस्पृष्टोऽन्नं निधायाचम्य परिविष्यात् परिवेषणं कुर्वन्मूत्राद्युच्छि
ष्टश्चेदन्नादिकं निधाय शौचाचमनं कृत्वान्नादिकं प्रोक्ष्याग्निमर्कं वा संस्पृश्य परिविष्यात् परिवेष

२२७ तानांतृप्तयेसत्यमिदमस्तु यथासुखं स्कांदे भद्रद्याज्रुवः पतयेभुवनपतयेतथा भूतानांपतयेस्वाहेत्यु
क्ता भूमौबलित्रयं ब्राह्मे ब्रह्मणेनमइत्येकं ब्रह्माद्दिति स्मृत्यर्थसारे यमायेनमश्चित्रगुप्ताय
नमः सर्वेभ्योनमइतिबलित्रयंदद्यादिति धर्माब्धिसारे चित्रायचित्रगुप्तायप्रमाययमृधर्माय
सर्वेभ्योभूतेभ्यश्चेतिपंच व्यस्तसमस्तव्याहृतिभिर्वाचत्वारइति स्वाहाकारांतैर्मंत्रैरितिश्रौतपरि
भाषयास्वाहांतमेवबलिदानमाश्वलायनानामित्याचारसारः तन्न बलिदानस्यसूत्रोक्तत्वा
भावात्परिशिष्टेबौधायनसूत्रेचनमोंतत्वोक्त्याआकांक्षाभावाच्चेति एतानिबलिदानानियथाशा
खंव्यवस्थितानीत्याचारसारेआचाररत्नेच बलिमानंवैश्वदेवप्रकरणेप्रागुक्तं कृष्णभट्टीये भो
जनादौबलिर्मुक्तस्तमुत्थृत्यतुभोजनं अनुध्दृत्यतुयोभुंक्तेप्राणायामाष्टकंचरेत् अत्रोध्दृत्यभोज
मितिसमानकर्तृकत्व[redacted]निर्देशात्स्वकर्तृकमेवोध्धरणमितिबहवः रत्नमालायांतु भोजनादौब २२७
लिंमुक्तंसमुत्थाप्यैवभोजनं अनुत्थाप्यतुयोभुंक्तेप्राणायामाष्टकंचरेदितिपाठांतरंस्वीकृत्यसमुत्था

र्येति णिच्प्रयोगादन्यकर्तृकमुद्धरणं न स्वकर्तृकमिति उद्धरणं च बलिनिवपनस्थानात्स्थानां
तरे निष्कासनेन न भोजनशालाया बहिरेवेति नियमः नदाह चंद्रिकायां शातातपः भोजनादौ ब
लेरन्नं यावद्भूमौ च तिष्ठति अभोज्यं तद्भवेदन्नं तत्स्थानात्तं त्यजेद्बुधः बलिदानाकरणप्रायश्चि
त्तमाह जातूकर्ण्यः अकृत्वा यश्चित्र बलिं भुंक्ते विप्रस्त्वनापदि प्राणायामत्रयं कृत्वा गायत्र्य
ष्टशतं जपेत् स्मृत्यर्थसारे पायसेन तथाज्येन माषान्नेन तथैव च न कुर्याद्बलिदानं तु ओद
नेन प्रकल्पयेत् ओदनविधाने नैव पायसादिनिवृत्तिसिद्धौ पायसादिनिषेधनं क्वचिदोदनाला
भे भक्ष्यादीनां प्रापणार्थमिति अत्राज्यनिषेधः केवलाज्यस्य तथा च भविष्ये अन्नेनैव घृताक्ते
नेन नमस्कारेण वै भुवि तिस्र एवाहुतीर्दद्याद्भोजनादौ तु दक्षिणत इति ततो हस्तप्रक्षालनं आ
ह व्यासः दत्वाथ चित्रगुप्ताय हस्तं प्रक्षालयेद्द्विजः अक्षालितकरो भुंक्ते द्विजश्चांद्रायणं चरेत्
अथापोशानं याज्ञवल्क्यः अपोशानेनोपरिष्टादधस्तादश्नता तथा अनग्नममृतं चैव कार्यम

न्नंद्विजन्मना वृध्धशातातपोपि परिधानमपोनानंपूर्वमाछादनंपरं भवत्यन्नमनग्नंहिसोत्तरीयं
तथावृतं अत्रयद्यपि अद्यतेत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतोसर्वमविशेषेणान्नत्वेन
प्रतीयते तथापिजलादावपितदापत्तेः भिस्साास्त्रीभक्तमंधोन्नमितिकोशादन्नमोदनः अतए
वान्नाश्रितानिपापानिप्रत्राप्योदनवर्जनं तेनभक्तेएवापोशानंनान्यत्रेतिकेचित् अन्येतु
सस्यंक्षेत्रगतंप्राहुः सतुषधान्यमुच्यते आमंवितुषमित्युक्तंस्विन्नमन्नमुदाहृतमितितिथित
त्ववसिष्ठोक्तेः स्विन्नमात्रे आपोशानंनचैवंगुडादावपितदापत्तिः अन्नेनव्यं[illegible]जनमित्यादिषुदु
धादिविकारएवान्नपदप्रयोगोगुडादेश्वरसत्वादतोगुडादौनापोशानं एवमेवचित्राकृतिप्राणा
कृत्योरपिनिर्णयः तत्राप्यन्नपदप्रयोगात् गृहीतमौनत्यागेअपोशानाकरणेचप्रायश्चित्तमाहसं
वर्तः अपोनानमकृत्वातुभुंक्तेयोनापदिद्विजः भुंजानस्तुयदाब्रूयाद्गायत्र्यष्टशतंजपेत् अत्रपा 
त्रधारणंपारिजातेमनुराह धारयेत्सव्यहस्तेनपात्रंतद्वाग्यतोद्विजः अमृतोपस्तरणमसीत्यपोशा

तः अस्माकं नित्यमस्त्वेतदिति भक्त्याथ वंदयेत् पात्राग्रासंसमुद्धृत्य शुभे पात्रांतरे क्षिपेत् जलमा
दाय मंत्रेण ग्रोग्रासं विनिवेदयेत् अयं च गोग्रासः पूर्वं पृथगकरणे ज्ञेयः पारिजाते वैद्यः निधाय
मध्ये भोज्यं च प्रोक्षितं प्रोक्षणोदकेः निवेद्याभीष्टदेवेभ्यो निःशब्दोपोशयेत्ततः इष्टमिष्टैः सहाश्नी
याच्छुचि भक्तं जनाहृतं गीतायामपि यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि
कौंतेय तत्कुरुष्व मदर्पणं ततः सजलदक्षिणहस्तेन प्रदक्षिणं पात्रपरिषेक ईशान्यारभ्य कार्यः
सर्वदिक्संबद्धं कर्मेशानीमारभ्य कार्यमिति गृह्यवृत्ताद्युक्तेः अथ बलयः ते च भोजनपात्रस्य दक्षि
णतः दशांगुलपरिमितं पंचांगुलपरिमितं वा स्थले [redacted] त्यक्त्वा कार्या इति रत्नमालायां बौधायनः द
क्षिणे उदकधारायां बलिं दद्याद्भूपतये नमो भुवनपतये नमो भूतानां पतये नम इति पुनरुपर्युदकधा
रां दत्वा भोक्तारमीश्वरं ध्यात्मानं चिंतयेदिति भविष्यपुराणे भोजनात्किंचिदन्नाग्रं धर्मराजाय वै
बलिं दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरन् यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनां प्रेता

बौधायनाद्यैरुक्तं तत्तदीयानामेव नाश्वलायनानां पूर्वोक्तपरिशिष्टे तथानुक्तत्वात् अथ प्राणाहुति
कल्पः शौनकः स्वाहांताः प्रणवाद्याश्च नाम्नामंत्राश्च वायवः जिह्वयैव ग्रसेदन्नं न संस्पृशेत् अ
श्वमेधिके यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप तथा समाहितः कुर्यात्प्राणाहुतिमतंद्रितः
आहुतिग्रहणे विशेषमाह बृहत्पराशरः तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत् मध्यमाना
मिकांगुष्ठैरपानायाहुतिस्मृतिः कनिष्ठानामिकांगुष्ठैर्व्यानाया परिकीर्तिता तर्जनीं तु बहिः कृत्वा
उदाने जुहुयात् बुधः समाने सर्वहस्तेन समुदायाहुतिर्भवेत् मध्यमानामिकांगुष्ठे पारिजाते
स्मृत्यंतरे कनिष्ठातर्जनीभ्यां वै उदाने जुहुयाद्बुध इति उदानसमुद्राप्रकारद्वयमाश्वलायनैर्नाद
र्तव्यं परिशिष्टविरोधात् नागदेवीये तु बृहत्पराशरवचनं शौनकवचनत्वेन लिखित्वा तथैव षष्ठीं
दध्यात्तु सच्चैतन्ये सुखात्मनीत्युक्तं षष्ठ्याहुतौ ब्रह्मणे स्वाहेति मंत्रः कमलाकरेणोक्तः अत्र जुहो
तिचोदनायाः सत्वादुद्देशत्यागो भवतः चंद्रिकाचारार्कयोरप्येवं त्यागे विकल्प इति गोपीनाथदी २२९
क्षिताः धर्मप्रदीपे घृतहीनं तु यो भुंक्ते नरस्त्वाहुतिपंचकं पश्चाद्भुतेन यो भुंक्ते द्विजश्चांद्रायणं च

रेत् पारिजातेआश्वलायनः नाज्याभिधारणादन्नंप्राक्स्पृशेन्मतिमान्नरः कमलाकराह्निके घृ
ताभावेतु संस्कार्थंदध्नाथपयापिवा प्राणाहुतिमकृत्वानुपश्चान्नंपरिमर्दयेत् तदन्नभोजनेतस्य
प्राजापत्यंविशुद्धये आहुतिमानंप्रागुक्तं संस्काररत्नमालायांतु प्राणाहुत्यनंतरं बल्मुद्धर
णमुक्तंतत्तुचित्राहुतीरनुधृत्य योभुंक्तेग्रासपंचकं अघंसकेवलंभुंक्तेज्ञानतोज्ञानतोपिवेति
चंद्रिकाधृतस्मृत्यंतरविरोधाद्विचारणीयं अत्रमौननियममाहव्यासः स्नास्यतोवरुणःशक्तिंजु
ह्वतोग्निःश्रियंहरेत् भुंजतोमृत्युरायुष्यंतस्मान्मौनंत्रिषुस्मृतं अत्रिः मौनव्रतंमहाकष्टंहुं
हुंकारेणविनश्यति एतत्पंचग्रासपरं पंचग्रासान्महामौनंप्राणाद्याप्यायनंहितदितिविष्णुपुराणा
दितिमाधवः महामौनंकाष्ठमौनं तथाचस्मृतिमंजर्यां काष्ठमौनेनभुंजीतप्राणादिग्रासपंचकं
प्राणाहुत्यरंनमौननियमः मौनीवाप्यथवामौनीप्रहृष्टःसंयतेंद्रियः भुंजीतविधिवद्विप्रोनचोच्छि
ष्टानिचावपेदितिव्यासोक्तेः वाग्यमनेक्वचिदपवादःस्मृतिरत्नावल्यां यवीयान्त्समितायश्चमु

२३० भुक्त्वाश्राद्धिकभोजनं प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेत् यवीयान्कनिष्ठः अतो भ्रातृमतो
मौननिषेधः पूर्वोक्तः जीवज्ज्येष्ठभ्रातृकपरः ततः सव्यपाणिं प्रक्षालयेदिति चंद्रिका स्वदक्षिणतो
जलपात्रं स्थापयेदिति रामार्चनचंद्रिकायामुक्तं एतदकरणे प्राणायामत्रयमष्टशतं गायत्रीज
पश्चात्ततो विमुक्तशिखो भुंजीयावचनं तु प्रागुक्तं अत्र भूमौ पात्रस्थापनं प्राणाहुतिपर्यंतं त
दुक्तं पारिजाते न्यस्तपात्रस्तु भुंजीत पंचग्रासान्महामुने शेषमुद्धृत्य भोक्तव्यं श्रूयतामत्र
कारणं विप्रुषां दोषसंस्पर्शाः पादचेलरजस्तथा मुखेन भुंक्ते विप्रोपि पित्रर्थं तु न लुप्यत इति
पितृकभोजने भूमौ पात्रस्थापनं न लोपनीयामित्यर्थः स्मृत्यर्थसारेपि प्राणाहुत्यूर्ध्वमुत्क्षिप्य
पात्रं यंत्रे विनिक्षिपेत् इदं क्षत्रियादिपरं नासंदीभोजने शस्ता विप्राणां तु कदाचनेत्यग्निस्मृत
वुक्तेः अथभोजनक्रम[redacted]ः वुक्तेः अथभोजनक्रम उक्तः स्मृतिरत्नावल्यां अश्नीयात्तन्मना २३०
भूत्वा पूर्वं तु मधुरं रसं लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च

नक्रियांचरेत् पात्रधारणेविशेषः स्मृतिचिंतामणौ अंगुष्ठनामिकांचैवमध्यमाचतृतीयका तिस्रोहद्वां
गुल्यश्चैवप्रशस्ताःपात्रधारणे बृहन्नारदीये यावद्द्विजोन्नमश्नीयात्पात्रंनैवपरित्यजेत् अंगुष्ठाना
मिकाचैव आपस्तंबः नायजिहीतापजिहीतचेति अपजिहीतत्यजेत् अतःपात्रधारणेविकल्पः
सोपिप्राणाहुत्युत्तरामितिमदनरत्ने प्राणाहुत्युत्तरंपात्रंधृत्वाभोजनमध्येनमुंचेदन्यथामुंचेदिति
कल्पतरुः षट्त्रिंशन्मते समुत्थितस्तुयोभुंक्तेमुक्तभाजनएवंचैवस्वतःप्राहभुक्त्वासांतपनं
चरेदितितद्भोजनोपक्रमेपात्रंधृत्वातन्मध्यत्यागेजीवत्पितृकस्यप्राणाहुतिपर्यंतमेवपात्रधारणंन
तूर्ध्वं आचारसारेअत्रिः अपोशानंवामभागेसुरापानसमंभवेत् दक्षभागेतुयःकुर्यात्सोमपानफ
लंभवेत् पुनरापूर्यापोशानंसुरापानसमंभवेत् इदंश्राद्धैकविषयमितिकेचित् पारिजातेमार्कंडेयः
अपोशानेसर्वतीर्थंयावदन्नंनलंघयेत् बाहुनाऽलंघितंत्वन्नमभोज्यंमनुरब्रवीत् अथाचारप्रका
शेब्राह्मे अन्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्वरः एवंध्यात्वातुयोभुंक्तेअन्नदोषैर्नलिप्यते अ
पोशानेगोकर्णाकृतिनाहस्तेनमाषपरिमितंजलमादद्यादितिरत्नमालायां अपोशानमंत्रेस्वाहांतत्व

वसिष्ठः नमुखशब्दंकुर्यात्सर्वाभिरंगुलीभिरश्नीयात्पाणिंचनावधुनुयादिति अन्यथादोषउक्तोमा
र्कंडेये यस्तुपाणितलेभुंक्तेयःसवायुसमश्नुते अंगुलीचोध्धेरघस्तुगोमांसाशनवत्स्मृतं सवायुसम
श्नुतेसशब्दमश्नातीत्यर्थः अत्रिरपि आसनेपादमारोप्ययोभुंक्तेब्राह्मणक्वचित् मुखेनचान्न
मश्नातितुल्यंगोमांसभक्षणैरिति मुखेनपशुवत्केवलमुखसाधनेन स्मृतिसंग्रहे नादत्वामृत
मश्नीयाद्बहिर्जानुकरस्तथा नाश्नीयुर्बहवश्चैवनतच्चैकस्यपश्यतः अश्नातियोभूरिजनस्य
मध्येमृष्टान्नमेकोरसलुब्धवृत्तिः दीनैकटाक्षैरपिवीक्ष्यमाणोव्यक्तंविषंहालहलंभुनक्ति यमः
भुंजीतोध्धृतसाराणिनकदाचिदपिद्विजः नशेषंपुरुषोश्नीयादन्यत्रजगतीपतेः नकुर्यात्स्कंदनं
शब्दंक्रोधमन्यच्चचिंतनं शिश्नानांदर्शनेचापिश्वचांडालादिदर्शने अशुचीनांतथामध्येप्रोक्षतामप्य
नश्नतां अकालेविषयुक्तंतुनाश्नीयादद्भुतंतथेति जगतीपतिःपरमेश्वरः ब्रह्मपुराणेपि यासशेषं 
नचाश्नीयात्पीतशेषंपिबेन्नतु शाकमूलफलेक्षूणिदंतच्छेदैर्नभक्षयेत् अत्रभोजनमध्येजलपान

विशेषमाह मनुः नपिबेन्नच भुंजीतद्विजः सव्येनपाणिना नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत्
नैकहस्तेनेति आवर्जितमित्यनुषज्जते आक्षारितमितिच तदर्थः तथाच हस्तद्वयेनाददद्यादितिफलि
तमिति हरदत्तः शूद्रेणेत्यत्रनेत्यनुषज्जसेइतिभट्टोजीये आह शातातपः उद्धृत्यवामहस्तेन
यतोयंपिबतिद्विजः सुरापानेनतत्तुल्यं मुनिराह प्रजापतिरिति केवलपाण्यादिनाजलपाननि
षेधमाहात्रिः तोयंपाणिनखाग्रैरत्तु ब्राह्मणोनपिबेत्कचित् सुरापानेनतत्तुल्यंमित्येवंमनुरब्र
वीत् पाणिनाचनखाग्रैश्चपाणिनखाग्रैः तत्रविशेषमाहमनुः पिबतोयस्यतेतोयंभाजनेमुख
निसृतं अभोज्यंतद्भवेदन्नंभोक्ताभुंजीतकिल्बिषं पीतावशेषितंतोयंब्राह्मणोनपुनःपिबेत्
पिबेद्यदिहिनंतोयंद्विजश्चांद्रायणंचरेत् आश्वमेधिके पानीयानिपिबेद्येनतत्पात्रंद्विजश्चांद्रा
यणंचरेत् आश्वमेधिके पानीयानिपिबेद्येनतत्पात्रंद्विजसत्तमं अनुच्छिष्टंभवेत्तावद्यावद्भूमौन
निक्षिपेत् यत्तुपराशरप्रायश्चित्तकांडेयमवचनं अदुष्टाःसंतधारावातोद्धूताश्चरेणवः स्त्रियो
ना

वृद्धाश्च बालाश्च न दुष्यंति कदाचन कमंडल्वादिभ्यो निर्गत्य मुखपर्यंतमविच्छिन्ना अप्युदकधारा नोच्छि
ष्टाः नानाविधादशुचिप्रदेशादुद्भूता अपि रेणवः स्पर्शाहाः पुरुषवत्यः स्त्रियो वृद्धा बालास्ते स्नाना
द्यभावेऽप्युत्थाः एतद्भोजनव्यतिरिक्तकाले दक्षिणहस्तेन कमंडल्वादिना उदकपानविषयं भोजन
काले तु दक्षिणपाणेरनुच्छिष्टस्याप्रसक्ते तत्रापि वामपाणिना जलपानं करोति चेन्न पिबेन्न भुंजीत द्वि
जः सव्येन पाणिनेति मनुवचनविरोधात्तन्नादरणीयं एतदुक्तं भवति एतद्वचननिकरपर्यालो
चनया भोजनमध्यजलपाने यावदपेक्षितं तन्मात्रजलं मुपपात्रे अन्येन ब्राह्मणेनोभाभ्यां हस्ता
भ्यामासेचयित्वा दक्षिणेन हस्तेनैव निःशेषं जलपानं कुर्यात् भोजनव्यतिरिक्तकाले कमंडल्वा
द्यभृंगारनालेन दक्षिणहस्तेन जलपानं कुर्यादिति तत्राप्यैहिकदोषमाह वैद्यः नालेन न पिबे
दूर्ध्वं श्रोत्रनेत्रार्तिकृत्ययः प्रयोगपारिजातेऽप्येवं भोजनकाले जलपाने प्रकारांतरं विधानपारि
जाते स्मृतिसंग्रहे जलपात्रं तु निक्षिप्य मणिबंधे च दक्षिणे विप्रो भोजनकाले तु पिबेद्वामेन पा २३२

कठिनंतथा अंतेपुनर्द्रवाशीचबलारोग्येनमुंचति वैद्यकेत्वादौभक्ष्यंपश्चात्पायसमंतेओदनइतिवि
ष्णुपुराणे जठरंपूरयेदर्धंअन्नैर्भागंजलस्यच वायोःसंचारणार्थायचतुर्थमवशेषयेदिति पारि
जातेधर्मोद्योते सा कालेसात्म्यंलघुस्निग्धमुष्णंक्षिप्रंरसोत्तरं बुभुक्षितोन्नमश्नीयान्मात्रानावधिना
गमं तस्यकारणमुक्तंतत्रैव कालेप्रीणयतेभुक्तंसात्म्यंमन्नंनबाधते लघुमजीर्यतेक्षिप्रंस्निग्धो
ष्णंबलवृद्धिदं क्षिप्रंभुक्तंतथाचान्नंधातुसात्म्यकरोतितत् मात्राशीसर्वकालंस्यान्मात्राह्यग्नेःप्र
दीपिकेति अत्यशनभक्षणेदोषमाहमनुः अनारोग्यमनायुष्यमस्वर्ग्यंचातिभोजनं अपुण्यंलो
कविद्विष्टंतस्मात्तत्परिवर्जयेत् व्यासस्तुसदाचात्यशनंनाद्यान्नातिहीनंचकर्हिचित् यथान्ने
नव्यथानस्यात्तथाभुंजीतनित्यशः अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः द्वात्रिंशत्तुगृहस्थ
स्यह्यमात्रंब्रह्मचारिणः वक्ष्यमाणपिंडाश्चग्रसेदेकैकशःपुनः वक्त्राधिकस्तुयःपिंडआत्मो
च्छिष्टःसउच्यते पिंडावशिष्टमन्नंचवक्त्रनिःसृतमेवच अभोज्यंतद्विजानीयाद्भुक्त्वाचाद्रायणं

पापैर्विलिप्यते शेषं गृहीतशेषं पुनरन्नं पुनर्गृहीतं दिवापिदीपसान्निध्येफलविशेषः स्मृत्यंतरे वा
मेतुदीपकंस्थाप्यदक्षिणेजलभाजनं दीपस्यसन्निधौभुंक्तेतस्यश्रीःसर्वतोमुखी पराशरः केशकीटा
वपन्नंचमुखमारुतवीजितं अन्नंतद्राक्षसंविद्यातस्मातत्परिवर्जयेत् पारिजातेसंग्रहे योभुं
क्तेतु पनीषिनयोभुंक्तेचस्त्रियासह योभुंक्तेकन्ययासार्द्धं द्विजःसांतपनंचरेत् अत्रभार्ययास
हभोजनेक्वचित्प्रतिप्रसवमाहव्यासः ब्राह्मण्याभार्ययासार्धंक्वचिद्भुंजीतचाध्वनि क्वचिदि
तिदेशकालाद्यसंभवविषयंविवाहविषयंचेतिविज्ञानेश्वरः प्रायश्चित्तहेमाद्रौगालवोपि ए
कयानसमारोहएकपात्रंचभोजनं विवाहेपथिपात्रायांकृत्वाविप्रोनदोषभाक् याज्ञवल्क्यः
नभार्यादर्शनेऽश्नीयान्नैकवासानसंस्थितः अत्रश्रुतौकारणमुक्तंतथासत्यवीर्यवदपत्यंभवतीति २३३
तस्मात्परिवेषणोत्तरकालंतयापुरतोनस्थातव्यं असावपिभुंजानोनेक्षेतेत्यर्थइतिपारिजाते इ
दमसवर्णभार्याविषयमित्याचाररत्ने मदनरत्नेबृहस्पतिः अप्येकपंक्तौनाश्नीयाद्ब्राह्मणःस्व

जनैरपि कोहिजानातिकिंकस्यप्रच्छन्नंपातकंभवेत् एकपंक्त्युपविष्टानांपातकंयद्दुरात्मनां
सर्वेषांतत्समंतावद्यावत्पंक्तिर्नविद्यते अग्निनाभस्मनावापिस्तंभेनसलिलेनवा द्वारेणचोपमा
र्गेणपंक्तिभेदोबुधैःस्मृतः आहशातातपः अग्र्यासनोपविष्टश्चयोभुंक्तेप्रथमंद्विजः बहूनांप
श्यतांसोज्ञःपंक्त्याहरतिकिल्बिषं एतच्चातिग्रुक्तविषयं तथाचशंखः नानियुक्तोग्र्यासनस्थः
प्रथममश्नीयान्नाधिकंदद्यान्नप्रतिगृह्णीयादितिगोभिलः एकपंक्त्युपविष्टानांविप्राणांसहभो
जने यद्येकोपित्यजेत्पात्रंनाश्नीयुरितरेप्येवंतु मोहात्तुभुंक्तेयस्तत्रतत्सांतपनंचरेत् एतच्चप
रोद्देशात्संसर्गत्यागउच्छिष्टस्यापिवर्जनमितिकलिनिषिद्धेषुगणितत्वाद्युगांतरविषयंबोध्यमितिभ
ट्टोजीये एकपंक्त्युपविष्टानांमेकस्मिन्नपिआचांते उत्थितेवाअभोज्यंतदाहगौतमः आचमनोत्था
नव्यपेतानीति अपेतभिन्नानिव्यपेतानिसहितानीत्यर्थइतिहरदत्तः एतदपिगुरुभिन्नेआचां
तेउत्थितेवाभोज्यंतदाहोशनाः अगुरुभिराचमनोत्थानंचेति आहव्यासः उदक्यामपिचंडालं

श्वानंकुक्कुटमेवच भुंजानोयदिपश्येत तदन्नंतुपरित्यजेत् कात्यायनः चंडालपतितोदक्यावाक्यंश्रु
त्वाद्विजोत्तमः भुंजीतग्राससमात्रंतुदिनमेकमभोजनं गौतमः कहालानांमहाग्राव्णांचक्रस्योलूखल
स्यच एतेषांनिनदोयावतावत्कालमभोजनं अत्रभोजननिषेधःकर्मांतरस्याप्युपलक्षणार्थः त
थाचकात्यायनः तैलंयंते[illegible]नेक्षुयंत्रादेःशब्दोयावत्प्रवर्तते तावत्कर्मनकर्तव्यंसूतांत्यपतितस्य
च वृत्थमनुः पीत्वापोशानमश्नीयात्पात्रदत्तमगर्हितं भार्याभृतकदासेभ्यउच्छिष्टंशेषयेतत
उच्छिष्टशेषंचघृतादिव्यतिरिक्तविषयं तदाहपुलस्त्यः भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन
अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वप इति पललंतिलमिश्रोदनः तथाभुक्त्वापीत्वाचयत्किंचि
न्यपात्रेसमुत्सृजेत् सनरःक्षुत्पिपासार्तोभवेत्जन्मनिजन्मनि कमलाकराह्निके अनिधायपृथ्वी
स्थान्नंपूर्वंयच्चाभिमंत्रितं अन्यदन्नंनगृह्णीयाद्यदिगृह्णन्सदोषभाक् तस्मात्पूर्वंगायत्र्याभि
मंत्रितसंस्कृतान्नस्यकिंचिद्भागंस्वपुरतःस्थापितेसतिपुनर्ग्रहणेनदोषइतिभावः इदंचभोजनं २३४

णिना धारयानोदकंपेयंपीत्वादोषमवाप्नुयादिति यावद्भोजनंवामेननभोजनपात्रान्वारंभपक्षे पूर्व
प्रकारएवादरणीयः इतिजलपाननिर्णयः इतिभोजनविधिः एतद्भोजनस्यनियमपूर्वकंकर्त
व्यत्वातन्नियमाव्यतिरेकेणोच्यते तत्रसायणीयेपराशरः योवेष्टितशिराभुंक्तेयोभुंक्तेदक्षिणा
मुखः वामपादकरःस्थित्वातद्वैरक्षांसिभुंजते दक्षिणामुखनिषेधोनित्यभोजनविषयः काम्ये
तद्विधानात् वामपादेकरोयस्येतिबहुव्रीहिः बहूनांभुंजतांमध्येनचाश्नीयात्त्वरान्वितः वृथा
नविकिरेदन्नंनोच्छिष्टःकुत्रचिद्व्रजेत् बृहस्पतिः नस्पृशेद्वामहस्तेनभुंजानोन्नंकदाचन नपा
देनशिरोवस्तिनपदाभाजनंस्पृशेत् नोच्छिष्टोग्राहयेदाज्यंजग्धशिष्टंनसंत्यजेत् शूद्रभुक्ताव
शिष्टंतुनाद्याद्भांडस्थितंत्वपि नभिन्नकांस्यसंध्यायांपतितानांचसंनिधौ पर्णपृष्ठेनभुंजीया
द्रात्रौदीपंविनातथेति कात्यायनः नृणांभोजनकालेतुयदिदीपोविनश्यति पाणिभ्यांपात्र
मादायभास्करंमनसास्मरेत् पुनश्चदीपिकांकृत्वातच्छेषंभोजयेन्नरः पुनरन्नंनभोक्तव्यंभुक्त्वा

णाग्निहोत्रे पवित्रंग्रंथिमुत्सृज्य मंडलेभुविनिक्षिपेत् पात्रेविनिक्षिपेद्यस्तु सविप्रः पंक्तिदूषकः उत्त
रापोशनाकरणेप्रायश्चित्तमुक्तंमहाभारते यस्तुतिष्ठत्यनाचांतोभुक्त्वासनातनः सद्यःस्नानंप्र
कुर्वीतसोन्यथाप्रयतोभवेत् शातातपः आचम्यपात्रमुत्सार्यकिंचिदार्द्रेणपाणिना भोजनपा
त्रेयदिलवणंशिष्टंभवेतदा तत्पात्रमस्पृशन्वामहस्तेनजलेनप्लावयेद्यदिनप्लावयेत्प्राणाया
मत्रयंअष्टोत्तरशतगायत्रीजपश्चउत्तरापोशनानंतरंभोजनपात्रस्पर्शेस्नानंप्राणायामश्चेति
संस्काररत्नमालायां पारिजातेआचार्यः नभुक्तभाजनेकुर्यात्करप्रक्षालनंनरः नोत्थायप्रक्षाल
येद्धस्तंपीत्वाभुक्त्वाकदाचनेति गद्यव्यासः ततस्तृप्तः सन्नमृतापिधानमसीत्यपःप्राश्यत
स्माद्देशान्मनागपसृत्यविधिवदाचामेदिति सचाचमनप्रकारोदेवलेनदर्शितः भुक्त्वाचामेद्य
थोक्तेनविधानेनसमाहितः शोधयेन्मुखहस्तौचमृदद्भिर्घर्षणैरपि तच्चघर्षणंतर्जन्यानकार्यं
तदाहगौतमः गंडूषस्था[illegible]थसमंयतर्जन्यावक्रचालनं कुर्वीतयदिमूढात्मारौरवेनरकेपतेत्

त् देवलः आचम्यततः कार्यं दंतकाष्ठस्यभक्षणं भोजनेदंतलग्नांश्चनिर्हृत्याचमनंचरेत् दं
तलग्नमसंहार्यंलेपंमन्येतुदंतवत् नतत्रबहुशः कुर्याद्यत्नमुत्धरणंप्रतिभवेदाशौचमत्यर्थं
तृणवेध्याद्व्रणेकृते दंतलग्नेकालांतरमच्युतेतु बौधायनः तत्यक्तेवशुचिर्नपुनस्त्यागानंत
रंमाचामेदिति याज्ञवल्क्यः नतुनिगिरन्नेवतच्छुचिरितिचोक्तं अतःपरित्यागनिगिरयोर्विक
ल्पः हस्तप्रक्षालनोत्तरंहस्तादौस्नेहशेषेपिनदोषः तथाचवृध्धपराशरः द्वावेवोष्ठौशमश्रुक
शेस्नेहोभोजनदनु अङ्गुष्ठान्दक्तिजःप्राहःबालवृत्धस्त्रियोमुखं गंडूषप्रक्षेपश्चकांस्यभा
जनेनकार्यः तथाचांगिराः गंडूषंपादशौचंच कृत्वावैकांस्यभाजने भूमौनिक्षिप्यषण्मासा
न्पुनराहारमादिशेत् पुनराहारं पुनःकरणंगंडूषसंख्यागंडूषदेशश्चप्रागुक्तः एतद्भोजन
स्थानेहस्तप्रक्षालनंब्रह्मचारिव्यतिरिक्तविषयं तथाचोक्तंसायणीये अनूढस्तुनकुर्वीतभुक्त्वा
तत्रविशोधनं पादुकारोहणंचैवतिलैश्चपितृतर्पणं अनूढः अविवाहितः ब्रह्मचारीत्यर्थइति

पारिजाते वस्तुतस्तु सर्वेषामविशेषेण भोजनशालाया बहिः प्रांगणादौ हस्तादिक्षालनं तथैव शिष्टसमाचा
रात् अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति वचनाच्चेति हेमाद्रौ न बहिर्जानुराचामेत्नासनस्थो
न चोत्थितः भुक्त्वासनस्थोप्याचामेन्नान्यकाले कदाचन इदं च द्विराचमनमिति प्रागुक्तं ततः किं
कर्तव्यमित्यत आहान्हिः आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं उद्धृतेप्यशुचिस्तावद्यावन्नो
मृज्यते मही भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् आसनादुत्थितस्तस्माद्यावन्न स्पृश्य
ते महीति स्मृतिरत्नावल्यां हस्तौ निघृष्यांगुष्ठाभ्यामक्ष्णोरंबु विनिक्षिपेत् तत्र मंत्रः शर्यातिं च
सुकन्यां च च्यवनं शक्रमश्विनौ भोजनांते स्मरन्नक्ष्णोरंगुष्ठाग्रांबु निक्षिपेत् आचारसारे आश्वलाय
नः ततः शतपदं गत्वा हृष्टाद्विलंबशनैः शनैः पाणिनोदरमालभ्य मंत्रमेतं समुच्चरेत् शातातपः स्व
स्थः प्रशांतचित्तस्तु कृतासनपरिग्रहः अभीष्टदेवतानां च कुर्वीत स्मरणं ततः स्मृतिरत्नावल्यां आ
गस्तिरग्निर्वडवानलश्च भुक्तं मयैतज्जरयत्वशेषं सुखं ममैतत्परिणामसंभवं फलत्वरोगं मम चास्तु

२३६

रहसिकार्यं आहारंतुरहःकुर्याद्विगाहंचैवसर्वदेति आदित्यपुराणेपि एकवस्त्रोनभुंजीतकपाट
मपिधायवेति इतिभोजननियमाः अथभोजनांतेकर्तव्यमाहदेवलः भुक्तोच्छिष्टंसमादायस
र्वभूतास्मात्किंचिदावपन् उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवीति तत्रमंत्रोमाधवीये रौरवेपु
ण्यनिलयेपद्मार्बुदनिवासिनां प्राणिनांसर्वभूतानामक्षय्यमुपतिष्ठतां आचारार्केतुमंत्रांतरमुक्तं
तत्प्रयोगेवक्ष्यते ततःकिंकर्तव्यमित्यतआहयमः अमृतापिधानमसीत्यपश्चांतेपिबेद्द्विजः
तत्रविशेषमाहदेवलः अर्धंपीत्वातुगंडूषमर्धंत्याज्यंमहीतले रसानलगतानागास्तेनप्रीणंति
नित्यशः गंडूषमुत्तरापोशानं इदंचाप्रक्षालितहस्तेनकार्यंतदुक्तंतेनैव हस्तंप्रक्षाल्यगंडूषं
यःपिबेत्पापमोहितः सदैवंचैवपित्र्यंच आत्मानंचैवघातयेत् काशीखंडेपि अमृतापिधान
मसीत्येवंप्राश्योदकंसकृत् पीतशेषंक्षिपेद्भूमौतोयंमंत्रमिमंपठन् अप्रक्षालितहस्तस्यदक्षि
णाङ्गुष्ठमूलतः रौरवेपुण्यनिलयेपद्मार्बुदनिवासिनां अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतां म

भवेरत्नहिरण्यपाणिर्गंधाक्षतमाल्यवान्पात्रपरिमितचतुरस्त्रमंडलंजलेनविधायतत्रसौवर्णरौप्यपला
शपत्राद्यन्यतमंप्रक्षालितंपात्रंसंस्थाप्यपरितोघृताद्यर्थंलघुपात्राणिचस्थाप्यघृताभिघारितपा
त्रेपरिवेषणंकारयित्वातस्मादन्नाद्गोग्रासार्थमन्नंपात्रांतरेकृत्वासौरभेय्यः सर्वहिताः पवित्राः
पुण्यराशयः प्रतिगृह्णंतुमेग्रासंग्रावस्त्रैलोक्यमातर इतिमंत्रेणगवेग्रासंदत्वाजलंस्पृ[illegible]ष्ट्वा
इष्टदेवताभ्योन्नंनिवेद्यप्रांजलिरन्नंप्रणम्य अस्माकंनित्यमस्त्वेतदितिप्रार्थ्य ॐ भूर्भुवः स्वः तत्स
वितु॰ प्रचोदयादित्यन्नमभ्युक्ष्य ॐ स्वादोपितोमधोपितोवयंत्वावृमहे अस्माकमविताभवइ
त्यभिमंत्र्य ॐ सत्यंत्वर्तेनपरिषिंचामीतिरात्रौ ईशानीमारभ्यप्रदक्षिणमन्नंपरिषिच्य भोजनपा
त्रस्यदक्षिणतः पंचांगुलंस्थलंत्यक्त्वातत्रोदकधारांप्राक्संस्थांवाकृत्वातत्राऽऽर्द्रामलकमितघृत
प्लुतान्नेन ॐ भूपतयेनमः ॐ भुवनपतयेनमः ॐ भूतानांपतयेनमः ॐ धर्मायनमः ॐ 

×दिवा ॐ ऋतंत्वासत्येनपरिषिंचामीति×३

त्रिचगुप्तायनमः ॐ यत्र क्कचन संस्थानां क्षुत्तृष्णोपहतात्मनां प्रेतानां तृप्तये क्षय्यमिदमस्तु यथासुखं
इति प्रेतबलिं च एवं बलिषट्कं परिशिष्टमतादाद्यान्त्रीनेव वा कूर्माकूसंस्थमत्यक्षांस्थं वा दत्वा तथैवाप
उदकधारां दत्वा तत्स्थानाद्बलीननुत्थृत्य हस्तं प्रक्षाल्य स्वदक्षिणे गोकर्णाकृतिहस्ते वामेन माषपरिमितं
जलमादाय वामहस्तमध्यमानामिकांगुष्ठैर्भोजनपात्रमालभ्य ॐ अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो
महेश्वरः एवं ध्यात्वा तु यो भुंक्ते अन्नदोषैर्न लिप्यते इति ध्यात्वा समाहितमनाः मौनी ॐ अमृतोप
स्तरणमसीति निःशब्दं पीत्वा घृताक्तमन्नं बदरीफलमितं पूर्वोक्ततत्तदंगुलीभिः सर्वाभिर्वादाय षट्
प्राणाहुतीर्जुहुयात् तत्रमंत्राः ॐ प्राणाय स्वाहा प्राणायेदं न मम ॐ अपानाय स्वाहा अपाना
येदं० ॐ व्यानाय स्वाहा व्यानायेदं० ॐ उदानाय स्वाहा उदानायेदं० ॐ समानाय स्वाहा समानाये०
ॐ ब्रह्मणे स्वाहा ब्रह्मण इदं० न वा त्यागाः ततः सव्यहस्तं प्रक्षाल्य शिखां विमुच्य हस्तं प्रक्षाल्य यथे
ष्टं लौकिकवाक्यान्यनुच्चारयन् कवले कवले इष्टदेवतां स्मरन् भोजनं कुर्यात् प्राणाहुत्यूर्ध्वं मौनं पात्रधा

रणेयोरनित्यता जीवत्पितृकस्यजीवज्ज्येष्ठभ्रातृकस्यचप्राणाहुतिपर्यंतमेवमौनपात्रधारणेनोर्ध्वं भो
२३८ जनांतेशिखांबध्वा भुक्तशेषान्नं सर्वस्मादन्नात्किंचिदादाय अस्मत्कुलेमृतायेचपितृलोकविवर्जिता
भुंजतुममचोच्छिष्टंपात्राच्चैवंभुविक्षिपेत् इतिपात्रदक्षिणेभूमौविसृज्य अप्रक्षालितएवपाणौ
उत्तरापोशनार्थंजलंपूर्ववदादाय ॐ अमृतापिधानमसीत्यर्धंपीत्वा अर्धं रौरवेपुण्यनिलयेपद्मा
र्बुदनिवासिनां अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठत्विति मंत्रेणपितृतीर्थेनभूमौनिषिच्यपवित्र
ग्रंथिंविस्रस्यभूमौत्यक्त्वांगणादावागत्यमृदद्भिः पाणिमुखंसंशोध्यवामभागेषोडशगंडूषान्कृत्वा
हस्तौपादौचप्रक्षाल्यभोजनपात्रनिष्काशनंतद्देशमार्जनंचकारयित्वा पूर्ववदाचम्यमार्जितभूमिं
संस्पृश्यजलेनहस्तौविघृष्यतज्जलमंगुष्ठाभ्यांअक्ष्णोर्निषिंचेत् तत्रमंत्रः शर्यातिंचसुकन्यांचच्यवनं
शक्रमश्विनौ भोजनांतेस्मरन्नक्ष्णोरंगुष्ठाग्रांबुनिक्षिपेत् ~~कूर्मेअपनिनशाल्यसंभिकोच्छिष्टभोजिनां~~ २३८
~~अविमाश्वीस्वर्णकारस्त्रीजितयामयाजिनां शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनांनृशंसराजरज~~

देहे विष्णुः समस्तेंद्रियदेवदेहिप्रधानभूतोभगवान्यथैकः सत्येनतेनान्नमशेषमन्नमारोग्यमेतत्परिणा
ममेतु इत्युच्चार्य स्वहस्तेनपरिमृज्यात्तथोदरं अनायासप्रदायीनिकुर्यात्कर्माण्यतंद्रितः आश्वला
यनाचार्यैः भुक्त्वानधावेन्नहसेन्नोच्चैसंभाषणंचरेदिति वेद्येतु भुक्त्वाचम्यविधानेनकृतासनपरि
ग्रहः अलोलः सुखमासीतयावदन्नंप्रतिष्ठितमिति पुराणांतरे अगस्तिंकुंभकर्णंचशनिंचवडवा
नलं आहारपरिपाकार्थंस्मरामिचवृकोदरं आतापीभक्षितोयेनवातापीचमहाबलः अगस्त्यस्यप्र
सादेनभोजनंममजीर्यतां ऋग्विधाने यस्यभुंक्तेनजीर्येतननतिष्ठेद्याकदाचन ध्यात्वासोनारमन्नस्य
अग्निरस्मीत्यृचंजपेत् अन्नस्यसोन्नारंअग्निं एवंकुर्वतः फलमाहाचार्यैः सर्वेषामेवयागानामात्मा
त्मयागः परस्मृतः योनेनविधिनाकुर्यात्सयातिब्रह्मणःपरं इतिभोजनोत्तरकृत्यं अथप्रयोगः
पाणिपादौप्रक्षाल्यभोजनशालायाबहिरेवपरिशिष्टोक्तप्रकारेणव्याहृतिभिर्बाह्यिराचम्यशुचौदे
शेश्रीपर्ण्यादिश्लक्ष्णाचतुष्पात्पीठेप्राङ्मुखः प्रत्यङ्मुखोवोपविश्यवर्तुलग्रंथियुतपवित्रंधृत्वासतिसं

यश्चित्तांतरप्रसक्तावप्यनुसरणीयः यथा भोजनसमये उच्छिष्टपात्रममेध्योपहतं चेत्तत्पात्रमुत्धृत्य
भूमिं गोमयेनोपलिप्यान्यपात्रं पूर्ववदासाद्य तस्मिन्सर्वान्नं पूर्ववत्स्थित्वा विप्रं भोजयेदिति पारिजाते
पराशरः उच्छिष्टोच्छिष्टसंस्पृष्टः शूनाशूद्रेणवाद्विजः उपोष्य रजनीमेकां पंचगव्येन शुध्यति रज
नीमुपोष्येति रात्रिभोजनं परित्यजेदित्यर्थः बृहस्पतिः स्त्रियो वृद्धाश्च बालाश्च मक्षिका मशकादयः
मार्जारश्चैव दर्वीश्च मारुतश्च सदाशुचि उच्छिष्टसमये अनुष्ठानसमये च मार्जारस्पर्शे स्नानमिति
मिताक्षरायां इदं वनमार्जारविषयमिति केचित् भोजनसमये मार्जारपुच्छस्पर्शे आचमनमिति
प्रायश्चित्तमंजर्यां भुंजानस्य क्षुज्जृंभणयोस्त्वाह विष्णुः विप्रभोजनकाले तु क्षुते वा जृंभते त
था अन्यो जलं गृहीत्वा तु तस्य मूर्धनि विन्यसेत् एकैकं जन्मसदनं दिवावाय दिवादिवा सं
यहेपि क्षुतं भोजनमध्ये च जायते यस्य कस्यचित् आदित्यं जन्मभूमिं च स्मरेत्स्वोऽस्थितमस्तकः २३१
शिंकापतनजृंभासु जीवोत्तिष्ठांगुलिध्वनि शाचोरपि कर्तव्यमन्यथा ब्रह्महा भवेत् ज्योतिर्निबंधे

स्रुतस्खलनजृंभातुन्नृणामायुःप्रहीयते तद्देतरेणकर्तव्योजीवधूरंगुलिध्वनिः मदनरत्नेविष्णुपुरा
णेच जीवेतिक्षुवतोब्रूयाज्जीवेत्युक्तःसहेतिच आश्वलायनगृह्येतु क्षुत्वाजृंभित्वामनोज्ञंह
ष्ट्वापापकंगंधमाघ्रायक्षिस्पंदनेकर्णध्वननेचसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णा
भ्यांमयिदक्षक्रतुइतिजपेदिति अत्रमन्ननिर्णयःपारिजाते अश्नन्भुक्त्वाईपाणिर्वावांतोनस्नान
माचरेत् अन्यदावमनेस्नायातथाश्लोकाश्रुपातने अन्यदापरेषु अपरान्नभोजननिषेधउच्य
ते तत्रसायणीयेमनुः उपासतेयेगृहस्थाःपरपाकमबुद्धयः तेनतेप्रेत्यपशुतांव्रजंत्यन्नाद्यदा
यिनां पाद्मे परान्नंपरपाकंचनित्यंधर्मरतस्त्यजेत् सर्वतःपरिगृह्णीयाद्भोजनंनसमाचरेत् नर
कंदारुणंश्रुत्वापरान्नेचमतिंत्यजेत् योयस्यान्नंसमश्नातिसतस्याश्नातिकिल्बिषं इदंचनिंदित
निमंत्रणादिविषयंअनिंदितेनामंत्रितोनापक्रामेदिति आचारप्रकाशलिखितस्मृतेः प्रशस्तानां
स्वकर्मसुद्विजातीनांब्राह्मणोभुंजीतेति गौतमोक्तेः परपाकरुचिर्नस्याद्दनिंद्यामंत्रणाद्दृत इतिया

ज्ञवल्कीयवचनाच्च अत्रनिंद्याउक्ताविज्ञानेश्वरीये कदर्यबद्धचौराणांक्लीबरंगावतारिणां वैणाभिश
स्तवार्धुष्यगणिकागणदीक्षिणां चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां क्रूरोग्रपतितव्रात्यदांभिको
च्छिष्टभोजिनां अवीरास्त्रीवर्णाकारस्त्रीजितग्रामयाजिनां शस्त्रविक्रयिकर्मांतरं तुवायश्ववृत्तिनां
नृशंसराजककृतघ्नवधजीवितां चेलधावसुराजीवसहोपपतिवेश्मनां एषामन्नंनभोक्तव्यंसोमवि
क्रयिणस्तथेति अन्येपिनिंद्यास्तत्रैवज्ञेयाःविस्तरभियानेहोच्यंते अनग्निगृहेभोजननिषेधःकु
तूहले गृहीत्वाग्निंसमारोप्ययःपरान्नंनिषेवते अभोज्यान्नोगृहस्थोसौवेदवादिषुगर्हितः वरंकंद
फलाहारोवरंवायोश्चभक्षणं उग्रमांसंवरंतातनानग्निगृहभोजनमिति आहलिखितः भुक्त्वावा
र्धुषिकस्यान्नमव्रतस्यासुतस्यच शूद्रस्यचतथाभुक्त्वात्रिरात्रंस्यादभोजनमिति शूद्रान्नविषयेवि
शेषमाहपराशरः शूद्रान्नंशूद्रसंकल्पःशूद्रेणचसहासनं शूद्राज्ज्ञानागमश्चापिज्वलंतमपिपातयेत्
अंगिराः आमंवायदिवापक्वंशूद्रान्नमुपसादयेत् किल्बिषंभजतेभोक्तायश्चविप्रःपुरोहितः आचा

ततः शतपदानि गत्वा स्वासने उपविश्य अगस्त्यिं कुंभ· १ आतापी· २ इति श्लोकद्वयं पठन्नुदरं परिमृज्य अग्नि
रस्मीति मंत्रस्य गाथिनो विश्वामित्रो मरुतस्त्रिष्टुप् भुक्तान्नप्राशनार्थे जपे वि० ॐ अग्निरस्मि जन्मना जा
तवेदा घृतं मे चक्षुरमृतं म आसन् अर्कस्त्रिधातू रजसो विमानोऽजस्त्रो घर्मो हविरस्मि नाम । इति उदर
मालभ्य जपेत् इति माठे इत्युपनामक श्रीनारायणभट्टात्मज त्र्यंबक विरचिते आचारेंदौ भोजनविधिः

अथ भोजनविषये किंचिदुच्यते तत्र भोजने परस्परं स्पर्शे स्मृतिसारे यदि भोजनकाले तु ब्राह्मणो
ब्राह्मणं स्पृशेत् त्यक्त्वा तदन्नमुत्थाय प्राणायामत्रयं चरेत् प्रयोगदर्पणे तु यदि भोजनकाले तु ब्रा
ह्मणो ब्राह्मणं स्पृशेत् तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेदित्युक्तं उच्छिष्टान्नेन स्पर्शे तु पाराश
रीये शंखः उच्छिष्टलेपसंस्पर्शे प्रक्षाल्यान्येन वारिणा भोजनांते नरः स्नात्वा गायत्रीत्रिशतं जपेत् अ
त्रापि भोजनांतावतोऽन्नस्यैवेति चंद्रिकाकारः भोजनपात्रस्योच्छिष्टसंस्पर्शे त्वाह व्यासः उच्छिष्टोच्छि
ष्टसंस्पर्शे स्पृष्टपात्रं विलक्ष्य च सर्वान्नं पूर्ववत् क्षिप्त्वा भोजयेच्च द्विजोत्तममिति अयमेव न्यायः श्रा

कंडुभ्राष्टं श्लपाणावंगिराः स्वपात्रेयत्तुविन्यस्तंदुग्धंयच्छंतिनित्यशः पात्रांतरगतंग्राह्यंशूद्रात्स्वगृहमा
गतं शातातपः घृतंतैलंदधिक्षीरंतथैवेक्षुरसोगुडः शूद्रभांडस्थितंतक्रंतथामधुनदुष्यति आपस्तं
बः आममन्नंमधुघृतंधानाक्षीरंतथैवच गुडमांसरसाग्राह्याद्निवृत्तेनापिशूद्रतः एतच्चसंप्रोक्ष्य
संगृह्णीयात् संप्रोक्षयित्वागृह्णीयाच्छूद्रान्नंगृहमागतमितिविष्णुपुराणात् यत्रपार्श्वेयदन्नंवारि
हीनंचपक्वंकेवलपावके तदन्नंफलवद्ग्राह्यंशूद्रादपिनदुष्यति लवणांबुविनायच्चपाचितंजातवेद
सि तदन्नंफलवद्ग्राह्यंशूद्रादपिनदुष्यति तंडुलोम्न्यंबुसंयोगात्पिष्टंलवणयोगतः शाकंत्रितयसंयोग
दन्नमित्यभिधीयते अपरार्केशातातपः गोकारुकंदुशालायांतैलयंत्रेक्षुयंत्रयोः अमीमांस्यानिशौ
चानिस्त्रीषुबालातुरेषुच कंदुपक्वादिचकलौनिषिद्धं शूद्रेषुदासगोपालकुलमित्रार्धसीरिणांभोज्या
न्नतागृहस्थस्येत्याद्युक्त्वा एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः निवर्तितानिकर्माणिव्यवस्थापूर्व
कंबुधैरितिशातातपोक्तेः शंखः नापणीयान्नमद्यादिति अस्यापवादः आचारसारे अपूपाःसक्त

२४१

बोधायनः शुक्तं दधि घृतं मधु एतत्पण्यगतं भोज्यं भांडलेपो न चेद्भवेत् इति निंद्यानिंद्यविवेकः एवं वि
चार्यानिंद्यगृहेषु भोक्तव्यं तत्रोपवेशनविषये विशेषमाह पैठीनसिः नानियुक्तोऽन्यासनं गच्छेदिति भो
क्तुमिति शेषः शंखः नान्यासनस्थः पूर्वमश्नीयादिति गोभिलः एकपंक्त्युपविष्टानां विप्राणां सह भो
जने यद्येकोऽपि त्यजेत्पात्रं नाश्नीयुरितरेऽप्यनु मोहात्तु भुक्तवांस्तत्र कृच्छ्रं सांतपनं चरेत् एतज्जलादि
नापंक्तिभेदाकरणविषयं तदाहाग्निः स्मृतिरूपेण यदि कश्चित्तु विसृजेत्तस्य पंक्तिगणाद्द्विजः प्राक्प्र
वेश्य जलं स्मृत्वा गंगां वायमुनां च वा आसनादुत्थाने विशेषमाह स एव एकपंक्त्युपविष्टानां भुंजतामास
नाद्द्विजः यद्येकः कश्चिदुत्तिष्ठेदुच्छिष्टा नाश्नीयुरेव ते यद्यप्यज्ञस्तदोत्तिष्ठत्यापन्नस्तु यदा भवेत् तस्य
चोभयतः स्मृत्वा नदीं संस्रावयेज्जलं अनिंद्यभोजनेऽपि निषिद्धकालमाह शातातपः वनस्पतिगते सो
मे परान्नं ये तु भुंजते तेषां मासगतं पापं दातारमनुगच्छति इति परान्नभोजनविधिः अथ परान्नापवा
दः पारिजातसंग्रहे मात्रापित्रोर्गुरोरन्नं यदन्नं मातुलस्य च श्वश्रूश्वशुरयोरन्नं न परान्नं प्रकीर्ति

तं धर्मप्रदीपे पितुःपुत्रस्ययच्चान्नंभ्रातृगुर्वोस्तथैवच श्वश्रुरान्नंमातुलान्नंनपरान्नंप्रकीर्तितं गुरव
श्चोक्ताःशूलपाणिना आचार्यस्तुपिताज्येष्ठोभ्राताचैवमहीपतिः मातुलःश्वश्रुरश्चैवमातामहपितामह
हौ वर्णश्रेष्ठःपितृव्यश्चपुंस्येतेगुरवोमताः उपनीतान्नदातायभयत्रातधनप्रदः धर्मशास्त्रोपदे
ष्टाचगीताशास्त्रोपदेशकः बुद्धिप्रदउपाध्यायश्चैतेपिगुरवोमताइति वाराहेचातुर्मास्यमाहात्म्ये
अनापदितुयोश्नातिपरान्नंद्रव्यलोभतः अवश्यंतुभवेत्तस्यधर्महानिर्नसंशयः बांधवानांतुसौहार्द्दा
द्योनिसंबंधतोपिवा भुंजीतास्यपरान्नानिनैवधर्मोविहीयते पितुर्भ्रातुःपितृव्यादेःसपिंडस्यगुरो
रपि दौहित्रश्वश्रुरादीनांस्वस्त्रीसंबंधिनांतथा मातामहस्यतत्सूनोमातृष्वस्त्रादिकस्यच यद्यश्नी
यात्नमश्नातिपरान्नंदोषकृन्नहीति अथनिंद्यान्नभोजनप्रायश्चित्तमाह ऋग्विधानेशौनकः प
र्जन्यवातावर्गंचशतवारंजपेज्जले सूतकस्यगृहेभुंक्तेतदापापात्प्रमुच्यते इदंनमोजपेन्मंत्रं
सहस्रंचेन्नकल्मषं ज्ञानतोज्ञानतोदृष्ट्वाभुक्तिकालेरजस्त्रियां अग्निंनमोजपेन्मंत्रंदशवारंविश्वा २४२

रप्रकाशे उपेक्षणधर्मेणशूद्रान्नंयःपचेद्द्विजः अभोज्यंतद्भवेदन्नंसचविप्रःपुरोहितः उपेक्षणंशूद्रीया
मान्नस्यविप्रगृहेपाकार्थंसमर्पणमित्यर्थः यत्तुपराशरः शुष्कान्नंगोरसंस्नेहंशूद्रवेश्मनआगतं पक्वंवि
प्रगृहेचेत्याद्भोज्यंमनुरब्रवीदितितदापद्विषयं यदाहमनुः नाद्याच्छूद्रस्यपक्वान्नंविद्वानश्राद्धिनोद्विजः
आददीताममेवास्मादवृत्तावेकरात्रकं अवृत्तौआपत्तौ अंगिराः गोरसंचैवसक्तूंश्चतैलंपिण्याकमेवच
अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसाकृतं तथा मांसंदधिघृतंधान्यंक्षीरमाज्यंमहौषधं गुडोरसस्तथोद
श्विद्भोज्यान्येतानिनित्यशः यत्तुउदाहृतमनुवचस्याश्राद्धिनइतिशूद्रविशेषणमहिम्नातच्छूद्रस्यपक्वा
न्नमपिग्राह्यमितिप्रतीयते तस्यस्नेहपक्वादिविषयताद्रष्टव्या यदाहहारितः कंदुपक्वंस्नेहपक्वंपा
यसंदधिसक्तवः एतानिशूद्रस्यान्नानिभोज्यानिमनुरब्रवीत्द्विजैरेतानिभोज्यानिशूद्रैरेवकृतान्यपि
त्युत्तरार्धपाठआचारसारे एतेनस्वदासोनापितोभृत्यः कुंभकारः कृषीवलः ब्राह्मणैरपिभोज्यान्नाः
पंचैतेशूद्रयोनयइतिदेवलवचनमपिव्याख्यातं सक्तुपदमनार्द्रपक्वस्यापलक्षणमितिमदनरत्ने

विधुरोवापुत्रवान्सपुत्रविधुरोगृहिवदितिमिंधावुक्तेः ईळेअग्निंजपेन्मंत्रंदशवारंयदातदा पंचयज्ञविहीनस्यगृहेभुंक्तेनपातकं चंद्रिकायांबृहस्पतिः नवश्राद्धस्ययछिष्टंग्रहपर्युषितंचयत् दंपत्योर्भुक्तशेषंतुभुक्त्वाचांद्रायणंचरेत् पारिजाते परपाकनिवृत्तस्यपरपाकरतस्यच अपचस्यचभुक्त्वान्नंद्विजश्चांद्रायणंचरेत् एतेषांलक्षणंउक्तंतत्रैव गृहीत्वाग्नीन्समारोप्यपंचयज्ञान्ननिर्वपेत् परपाकनिवृत्तोसौमुनिभिःपरिकीर्तितः पंचयज्ञान्स्वयंकृत्वापरान्नमुपजीवति सततंप्रातरुत्थायपरंपाकरतस्तुसः गृहस्थधर्मवृत्तोयोददातिपरिवर्जितः ऋषिभिर्धर्मतत्वज्ञैरपचःपरिकीर्तितः ददातिपरिवर्जितःदानवर्जितः पराशरः दुराचारस्यविप्रस्यनिषिद्धाचरणस्यच अन्नंभुक्त्वाद्विजःकुर्यादिनमेकमभोजनं एतदशक्तौसएवसदाचारस्यविप्रस्यतथावेदांतवेदिनः भुक्त्वान्नंमुच्यतेपापादहोरात्रांतरान्नरः एकस्मिन्दिनेसकृत्सकृद्वाद्ब्राह्मणगृहेभोजनेनयत्कृतंपापंतस्यवेदांतीगृहेभोजनेनशुद्धिःयद्वाएकस्मिन्दिनेसंप्राप्तंयत्पिपीलिकावधादिरूपपापजातंतत्सर्वं २४३

शिष्टान्नभोजनेनशुध्यतीतिमाधवः बौधायनस्तुसाधारणंप्रायश्चित्तमाह अभोज्यानांचसर्वेषां
अभोज्यान्नस्यभोजने ऋग्भिस्तरत्समंदीभिर्मार्जनंपापशोधनं आश्वलायनगृह्योक्तंसाधारणं
प्रायश्चित्तंतुअग्रेशयनप्रकरणेवक्ष्यते ऋग्विधाने सप्तजन्मार्जितंपापंकृत्वाचाभक्ष्यभक्षणं
तद्विष्णोरित्यपांमध्येसकृज्जप्त्वाविशुध्यति इत्याचारेंदौनिषिद्धान्नभोजनप्रायश्चित्तं इतिमाटे
इत्युपनामकनारायणात्मजत्र्यंबकविरचितेआचारेंदौअष्टधाविभक्तदिनस्यपंचमभागकृत्यंस
माप्तं अथषष्ठसप्तमभागकृत्यमाहदक्षः भुक्त्वातुसुखमास्थायतदन्नंपरिणामयेत् इति
हासपुराणाद्यैषष्ठसप्तमकौनयेत् अ●त्रयद्यपिषष्ठसप्तमभागयोः अन्नपरिणामोपयोगीति
हासादिश्रवणकर्मणिआदिशेषेणोक्तंतथापिक्रमस्थदेशसामान्यादितिन्यायबलेनषष्ठेन्नपरि
णामोपयोगिकर्मकर्तव्यंसप्तमेत्वितिहासश्रवण महेशादयोप्येवं तयोमार्कंडेयपुराणे भूयो
याचम्यकर्तव्यंतांबूलस्यचभक्षणं श्रवणंचेतिहासस्यततःकुर्यात्समाहितः तत्रतावत्तांबूलदान

विधिर्मुहूर्तचिंतामणिटीकायांस्मृतौ तांबूलंसुहृद्भ्योदद्याद्ब्राह्मणेभ्योतिभक्तितः मेधावीसुभगःप्रा
ज्ञोदर्शनीयश्चजायते पर्णेन तृप्यतेब्रह्मापत्रेणभगवान्हरिः चूर्णमीश्वरस्तस्मैस्यात्तांबूलाशनस्त
नतः वसिष्ठः सुपूगंचसुपत्रंचचूर्णेनचसमन्वितं अदत्त्वाद्विजदेवेभ्यस्तांबूलंवर्जयेद्बुधः तत्र
दातव्यपूगफलसंख्यामाहसएव एकपूगंसुखारोग्यंद्विपूगंनिष्फलंभवेत् अतिश्रेष्ठंत्रिपूगंतुअ
धिकंनैवदुष्यति अन्यच्च एकद्वित्रिचतुःपंचषड्भिःपूगफलैःक्रमात् लाभोलाभःसुखंदुःखं
आयुर्मरणमेवच तांबूलभक्षणेफलपत्रप्रमाणमुक्तंस्मृतिमञ्जर्यां पूगद्वयेनतांबूलंनदद्यान्न
चखादयेत् दानंतुनिष्फलंप्रोक्तंखादनंपुण्यनाशनं तस्मात्सर्वप्रयत्नेनद्विपूगंवर्जयेत्सुधीः एक
पूगंत्रिपूगंवादानंखादनमुत्तमं वत्सरार्धात्परंपूगंकठिनंचसुपाचितं लाक्षावदंतरेयस्मिंस्तत्पू
गंखादयेत्सुधीः वल्लीमध्येचसंभूतंपश्चात्साकल्लूनपत्रकं चूर्णंपाषाणसंभूतंतांबूलंखादयेत्सुधीः २४४
वल्लीमध्येचसंभूतंपश्चात्साकु प्रातः पूगस्यपर्णानित्रीणित्रीणिचखादयेत् मध्यंदिनेतुचत्वा

षतः अंत्यजानां ध्वनिंश्रुत्वापश्चाद्भुंक्तेनकल्मषं अज्येष्ठासोजपेन्मंत्रंदशवारंनकल्मषं श्वानादि
दर्शनंकृत्वापश्चाद्भुंक्तेयदातदा आयेतस्तुर्जपेन्मंत्रंदशवैविष्णुमंदिरे हस्तदत्तंयदाभुंक्तेतदापा
पात्प्रमुच्यते तेअज्येष्ठाजपेन्मंत्रंशतंविष्णवालयेतदा दिवाह्निभोजनंकृत्वातस्मान्मुच्येतकल्मषात्
हयोनप्रजपेन्मंत्रंशतवारंजलेतथा रात्रौह्निभोजनंकृत्वाकल्मषाच्चप्रमुच्यते त्र्यंसुमेष
जपेन्मंत्रंदशवारंशिवालये अष्टम्यांवाचतुर्दश्यांदिवाभुंक्तेनकल्मषं सपर्वतोजपेन्मंत्रंसंक्रांतौ
दशचेज्जले पर्वद्वयेभानुवारेरात्रौभुंक्तेनदुष्कृतं महिद्वरोजपेन्मंत्रंशतंवैविष्णुसंनिधौ एकाद
श्यामहोरात्रंभुंक्तेयदिनपातकं अपःप्रणीतमंत्रंचशतवारंनकिल्बिषं रात्रौभुंक्तेवत्सरेतुमन्वादि
षुयुगादिषु वत्सरेप्रतिसंवत्सरे अस्तेवसुजपेन्मंत्रंसहस्रंवैनकिल्बिषं प्रमादाज्ञानतोभुंक्तेग
णान्नंतुयदायदा यज्ञायज्ञाजपेत्सूक्तंएकरात्रंजलेपिवा गाणकान्नंयदाभुंक्तेतदापापात्प्रमुच्यते
गणकोनक्षत्रसूची अच्छानइंद्रसूक्तंतुएकवारंजलेजपेत् विधुरान्नंयदाभुंक्तेतदापापात्प्रमुच्यते

कनिष्ठानामिकामध्यातर्जन्यंगुष्ठयांगतः शोकोहानिस्तथामृत्युरनैश्वर्यायुषीतथा स्मृत्यंतरे अंगुष्ठचू
र्णसंयुक्तंपर्णपृष्ठेतुलेपनं तत्पत्रंखादयेत्तेनसोमपानंदिनेदिने ग्रंथांतरेतु मध्यमांगुलिनादायच्चू
र्णंपर्णस्यलेपयेत् अत्रकनिष्ठानामिकातर्जन्योनिषिध्याः मध्यमाया विधिनिषेधोभयरूपत्वा
न्मध्यमत्वं अंगुष्ठःप्रशस्तः आचारप्रकाशेव्यासः पर्णाग्रंपर्णपृष्ठंवाचूर्णपर्णंद्विपर्णकं रात्रौखदिर
तांबूलंशक्रस्यापिश्रियंहरेत् पारिजातेवसिष्ठः अकृत्वातुमुखेपर्णंपूगंखादतियोनरः सप्तजन्म
दरिद्रीस्यादंतेविष्णुंनसंस्मरेत् अत्रयदातांबूलभक्षणंक्रियतेतदापूर्वमेवमुखेपूगंक्षिप्त्वापश्चा
त्पर्णादिपदार्थक्षेपणंनकार्यं किंतुपर्णस्यमुखेनिधानोत्तरंपूगादिभक्षयेत् सहवासर्वपदार्थक्षेपणं
कार्यमित्यर्थमिति तांबूलाभावेपिकेवलपूगंनभक्षणीयं किंतुलवंगादिनापूगखंडंसंमिश्र्यभक्षये
त् क्षीरमध्येयल्लवणंउच्छिष्टोघृतभोजनं केवलंलवणंपूगंतुल्यंगोमांसभक्षणमित्याचारप्रकाशधृ
तवचनकेवलपूगभक्षणेदोषदर्शनात् शिष्टाचारेप्येवं अत्रक्रमुकचूर्णयोःपाकदोषोनास्तीत्युक्तंकम
लाकराह्निके हरिद्रागोरसंचूर्णंपूगंकौशेयमेक्षवं नैतेषांपाकदोषोस्तिक्षीरंलवणमौषधं चूर्णस्तुपर्णग 

तंचजलंनदुष्टं तदुक्तंसंग्रहे यच्चपर्णगतंतोयंयत्तैलेयच्चवागुडे चूर्णेपयसियच्चैवतज्जलंनैवदोष
कृत् तांबूलसेवनगुणमाहवैद्यः तांबूलंकटुतिक्तमुष्णविशदंक्षारंकषायान्वितंवातघ्नंकृमिनाश
नंकफहरंकामाग्निसंदीपनं स्त्रीणांभाषणभूषणंरतिकरंशोकस्यविच्छेदनंतांबूलेविहितास्त्रयो
दशागुणाःस्वर्गेपितेदुर्लभाः पारिजाते आश्वलायनः विद्याकामोनिशांराात्रौतांबूलंनत्तिंभक्षये
त् तत्रैववसिष्ठः यतिश्चब्रह्मचारीचविधवाचरजस्वला प्रत्येकंमांसतुल्यंस्यान्मेलनंसुरयास
मं क्रमुकादेःप्रत्येकंभक्षणंमांससमं समुदितंतुसुरयासममित्यर्थः जाबालिःदंतधावनं
तांबूलंक्षौराभ्यंगमभोजनं रत्यौषधिपरान्नंचश्राद्धकृत्सप्तवर्जयेत् अत्रापवादःकृष्णभट्टीये नि
त्यश्राद्धेत्वमाश्राद्धेश्राद्धेचापरपक्षिके तांबूलचर्वणेदोषोनेतिशातातपोब्रवीत् इदंवचनंनिर्मूल
जाबालिविरोधादितिकेचित् तन्न जाबालिनाश्राद्धसामान्यतोनि[redacted]षिद्धस्यतांबूलस्यवचनांतरे
णकेषुचिच्छ्राद्धेषुप्रतिप्रसवेनविरोधाभावात् अन्यत्रापि मृताशौचेतथाश्राद्धेमातापित्रोर्मृते

हनि उपवासेचतांबूलंदिवारात्रौचवर्जयेत् पक्षश्राद्धेतथादर्शेयुगमन्वंतरादिषु श्राद्धंनिर्वर्त्यभुक्त्वा
तुतांबूलंखादयेद्बुधइति इत्याचारेंदौतांबूलभक्षणविधिः तांबूलभक्षणोत्तरंकर्तव्यमाहवैद्यः
समास्वादिततांबूलोभुक्तमात्रेरितंकफं धूमेनापास्यखाद्यैर्वाकषायकटुतिक्तकैः ततःशत
पदंगत्वावामपार्श्वेनसंविशेत् वामेतुमात्राद्वात्रिंशद्दक्षिणेपंचविंशतिः मध्येद्वादशचेत्येषका
लः संवेशनेस्मृतइति मात्रालक्षणंप्राणायामप्रकरणेउक्तं आयुर्वेदे भुक्त्वोपविशतस्तुंदंब
लमुत्तानशायिनः आरोग्यंवामकुक्षौस्यान्मृत्युर्धावतिधावतः वैद्यः आसनंशयनंवापिनेच्छेद्भु
क्त्वाद्रवोत्तरं पीत्वाभुक्त्वातपंवह्निंयानप्लवनवाहनं अतिहास्यासनस्वप्नधावनंचविसर्जयेत्
शब्दंरूपंचगंधंचस्पर्शंयन्मनसःप्रियं भुक्तवानुपसेवेततेनान्नंसाधुतिष्ठति नभुक्तमात्रआय
स्येन्ननिषिद्धंलभेत्सुखं धर्मोत्तराभीरथ्याभिःकथाभिस्त्रिगुणात्मभिः मध्यंदिनस्यगमयेदिष्ट
शिष्टसहायवान् सुजनैःसंगतंकुर्याद्धर्मायचसुखायचेति अत्रेसुजनानाहसएव बुद्धिवि

२४६

रिपर्णानिक्रमुकस्यच राज्ञोपूगस्यपर्णानिपंचपंचयथाक्रमात् ज्योतिर्निबंधे द्वात्रिंशत्पर्णकंचैवदद्या
त्सर्वमहीभुजे चतुर्विंशतिपर्णंचसामंतानामतुस्मृतं दशाष्टपर्णकंदेयंजामातॄणांविशेषतः द्वाद
शपर्णंविदुषेबंधूनांदशपर्णकं अष्टपर्णंचसर्वेषांसामान्येनप्रकीर्तितं त्रिपर्णंतुनदातव्यंएकप
र्णंतथैवच षट्पर्णंचैवदातव्यंरिपूणांचविशेषतः ग्रंथांतरे पंचसप्ताष्टपर्णानिदशद्वादशएव
वा दद्यात्स्वयंचगृह्णीयादितिकेचिदुदीरितं ज्योतिर्निबंधे प्रातःकालेफलाधिक्यंचूर्णाधिक्यं
तुमध्यतः निशिपर्णाधिकंभक्षेत्तस्यलक्ष्मीर्विवर्धते स्मृतिमंजर्यां पूगंचशकलीकृत्यद्वंसंमृ
ज्यपर्णकं पिष्टलंचूर्णसंयुक्तंतांबूलंखादयेत्सुधीः अन्यच्चपारिजाते क्रमुकंपंचनिष्कंस्यातांबू
ल्याश्चपलद्वयं गुंजाद्वयंचूर्णमानेतांबूलक्रममुत्तमं जा[illegible]तीलवंगकंकोलकर्पूरकटुकैःसह रु
चिवैशद्यसौगंध्यमिच्छन्वक्त्रेणधारयेत् वसिष्ठः पर्णमूलेभवेद्व्याधिःपर्णाग्रेपापसंभवः चूर्णपर्णं
हरेदायुःशिराबुद्धिविनाशिनी तस्मादग्रंचमूलंचशिरांचैवविशेषतः चूर्णपत्रंवर्जयित्वातांबूलंभ
क्षयेत्सुधीः व्यासः तर्जन्याचूर्णमादायतांबूलेनतुखादयेत् यदिवाखादयेन्मूढोरौरवंनरकंव्रजेत्

दौषष्ठसप्तमभागकृत्यं अथाष्टमभागकृत्यमाह दक्षः अष्टमे लोकयात्रा तु बहिः संध्या ततः पुनः व्यासः
सच्छास्त्रादिविनोदेन सन्मार्गस्याविरोधिना दिनं नयेत्ततः संध्यामुपतिष्ठेत्समाहितः तत्र सायंसंध्याका
लमाह पारिजाते स्मृतिसंग्रहकारः दृश्यमाने रवौ चैकं अदृश्ये द्विमुहूर्त्तकं संध्याकालः स विज्ञेयः स्त
त्र सर्वं समाचरेत् दक्षस्तु रवेरस्तमयात्पूर्वं घटिकैका यदा भवेत् सायंसंध्यामुपासीत कुर्याद्धोमं
च पूर्ववत् सायंस्नानं गृहस्थभिन्नस्यैव तदुक्तं संध्यारत्ने प्रातर्नित्यं शुचिभिरुदकैः स्नानमुक्तं द्विजा
नां मध्याह्नेपि स्मृतमिह बटोर्दृश्यते शक्तता चेत् सायंकाले मुखकरपदक्षालनं स्यात्तदर्थं स्नानं कै
श्चिन्मुनिभिरुदितं गेहिवर्जं द्विजातेरिति अग्निहोत्रिणस्तु त्रिकालं स्नानमावश्यकं तदुक्तमाश्वलाय
नेन स्नानं त्रिषवणं कुर्युर्यत्नादेवाग्निहोत्रिण इति सायंसंध्यायां विशेषो लिख्यते तत्राश्वलायनः
घटिकैकावशिष्टा स्याद्रवेरस्तमितस्य च प्रक्षाल्य पाणिपादं च द्विराचांतः शुचिर्भवेत् प्राङासीनः स
माचम्य प्राणायामपुरःसरं पूर्वोक्तविधिनाचैव सायंसंध्यां समाचरेत् प्राक्प्राङ्मुखः सूर्यास्तोत्तर
गौणकाले सायंसंध्याकरणे उदङ्मुख नैव रात्रावुदङ्मुखः कुर्याद्दैवकार्यं सदैव हीति गौनमोक्तेरि २४७

तिकेचित् तदसमंजसं आश्वलायनसूत्रगृह्यपरिशिष्टाश्वलायनस्मृत्यादिविरोधात् आच
मनाद्युपसंग्रहणांतं प्रातःसंध्याविधिमुक्त्वातमेवविधिंसायंसंध्यामतिदिशत्याचार्योगृह्यपरि
शिष्टे एवंसायंविशेषस्तु सूर्यश्चेति मंत्रे सूर्यस्थानेग्निपदमावपेदहश्चरात्रिपदेसत्येज्योतिषीत्यंते
ब्रूयाज्जपश्चार्धास्तमितेमंडलंआनक्षत्रदर्शनादासीनेनेति आश्वलायनानांतिष्ठतामेवार्घ्यंदा
नेमिति पूर्वंप्रातःसंध्याप्रकरणेप्रपंचितं अत्रजलसामीप्येपिभूमावेर्घ्यदानेसायंतूपविशभुवी
तियमवचनात् अर्घ्यदानेप्रत्यङ्मुखता आदित्याभिमुखःस्थित्वेतिपरिशिष्टोक्तेः अंजल्या
अपआदायगायत्र्यात्वभिमंत्रितं रवेरभिमुखस्तिष्ठन्क्षिपेदूर्ध्वंसंध्ययोःक्षिपेदितिशौनकोक्ते
श्चवायव्यपश्चिमसंध्यभिमुखोर्घ्यंदद्यादितिचंद्रिकायां जपेविशेषःकारिकायां अर्धास्तमि
तआदित्येपश्चिमस्ययउत्तरतः भागस्तन्मुखःआसीनःसावित्रींवाग्यतोजपेदिति उत्तरतःप्रती
च्या अष्टमोभागइत्यर्थः अत्रभगवान् धृत्वापवित्रंसंप्रोक्ष्यजपस्थानंकुशोदकैः आधारादी

नमस्कृत्य कुशाग्रेणासनं ततः बध्वा पद्मासनं वापि स्वस्तिकं वा यथाविधि दिशोऽष्टधा विभक्ता याः प्र
तीच्या भाग सप्तकं हित्वा दक्षिणतोऽन्यस्तु योऽष्टमो भाग उत्तरतः अस्याभिमुखतो विप्रो भूत्वा प्रयत
मानसः जपन्नासीत सावित्रीं संध्याकृत्यमतंद्रित इति यत्तु प्रातर्मध्यान्हयोस्तिष्ठन्गायत्रीं जप
माचरेत् ऊर्ध्वजानुस्तु सायान्हे ध्यानालोकनतत्पर इति व्याघ्रनाम्ना प्रपठ्यमानवचनमादृ
त्य धर्माब्धिसारकारेण सायमूर्ध्वजानुरुपविश्य जपं कुर्यादित्युक्तं तत् शौनकस्मृतिस्वसूत्र
परिभाषाविरोधाद्व्याघ्रवचनस्य प्राचीनाधुनिकैः क्वाप्यलेखनाच्च विचारणीयं जपांगप्रा
णायामन्यासध्यानादि सर्वं जपदिङ्मुखमेव कर्त्तव्यं उक्तशौनकवचोनुरोधात् पारिजातप्रयो
गे तथैव लेखनाच्च यद्वा यावद्वचनं वाचनिकमिति न्यायेन जपमात्रे प्रत्यङ्मुखता प्राणायामा
दिजपाद्यंगे तु पारिभाषिकी प्राङ्मुखतेति आचारार्के तु न्यासांते प्रत्यङ्मुखो भूत्वा ध्याना
दि कुर्यादित्युक्तं तदर्धजरतीयत्वापत्या विचारणीयं स्मृत्यंतरे हस्तौ नाभिसमौ धृत्वा प्र

२४८

द्या यशः शीलधैर्यस्मृतिसमन्वितान् त्यागविज्ञानसत्वाढ्यान् महापक्षान्प्रियंवदान् वृद्धोपसेवि
नः स्निग्धान्स्वभावज्ञान् गतव्यथान् सुमुखान्सर्वभूतेषु प्रशांतान्छंसितव्रतान् धीरान्सन्मार्ग
निरतान् पुण्यश्रवणदर्शनात् महद्वंशजानानद्वेष्यान्सहायान्परिकल्पयेदिति अत्र दुष्टानाह स
एव पापवृत्त[illegible]ः वयःसत्वान्सूचकान्कलहप्रियान् धर्मोपहासिनो लुब्धान् चपलान्रिपु
सेविनः परापवादनिरतान्परवृद्धौ द्विषः खलात् पाखंडिनो विकर्मस्थात् वैडालव्रतिनः षठान्
लोकभूपतिविद्विष्टान्निर्घृणान्धर्मदूषकान् हैतुकान्बकवृत्तीश्च उर्जनान्दूरतस्त्यजेदिति अ
त्रिः इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् वृथाविवादवाक्यानि परिवादांश्च वर्जयेत् दिवा
स्वापन्न कुर्वीत स्त्रियं चैव विसर्जयेत् आयुःक्षीणं दिवानिद्रा दिवास्त्री पुण्यनाशिनीति व्यासोपि
इतिहासपुराणाभ्यां छंदोर्थमुपबृंहयेत् ततः संध्यामुपासीत पूर्वोक्तविधिना द्विजः विज्ञानेश्वरीये
अहःशेषं समासीत शिष्टैरिष्टैश्च बंधुभिः इति माटे इत्युपनामक नारायणात्मजत्र्यंबकविरचिते आचारे

णेनगृहेष्वपीतिविधानमाहिताग्नि ग्नि परंतस्याप्युद्धरणोत्तरं आहोमसमाप्तेर्बहिर्निर्गमन निषेधात्
अतएवकेशवोध्वर्योरपिविहरणोत्तरं विहारमध्यएव संध्यानुष्ठानमाहेत्युक्तं अथसायंसंध्या
प्रयोगः अस्तमयात्पूर्वं घटिकाद्वयावशिष्टेकाले हस्तपादमुखानि प्रक्षाल्य वारुणस्नानमंत्रस्ना
नं वा विधाय द्विराचम्य भस्मत्रिपुंड्रं विधायाग्निं प्रादुष्कृत्य बहिर्जलाशये स्वगृहे विहारादिशुचिदे
शे प्रागग्रदर्भेषु अंकधारण प्राङ्मुख उपविश्य द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य ममोपात्तदु॰
सायंसंध्यामुपासिष्ये इति संकल्प्य प्रातर्वत्प्रथममार्जनं कृत्वा जलमादाय अग्निश्चेत्यस्य रुद्रऋ
षिः अग्निमन्युमन्युपतयो देवताः प्रकृतिश्छंदः मंत्राचमने विनियोगः ॐ अग्निश्च मा मन्युश्च मन्युपत
यश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यदन्हा पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अह
स्तदवलुंपतु यत्किंचदुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा इति प्राश्याचम्य द्वि
तीय मार्जनात्मपरिषेकाघमर्षणाचमनानि कृत्वा दक्षिणावृत्य अग्निमाभिमुखस्तिष्ठन् प्रोक्षितभूमावेव प्रा २५९

तर्वर्दर्घ्यत्रयंदद्यात् ततॐ असावादित्योब्रह्मेतिसजलहस्तः आत्मानंप्रदक्षिणंपरियन्परिषिच्यो
पविश्याप उपस्पृश्याचम्यदर्भोदकेन जपस्थानमभ्युक्षतत्रदर्भासनंप्रसार्यतदुपरिव्याहृत्यावायव्यसं
लग्नपश्चिमभागाभिमुखमंकधारणयोपविश्यप्राणायामत्रयकरणादिदिग्बंधनांतेमंत्रदेवतांध्यायेत्
यथावृत्धांवृत्धादित्यमंडलमध्यस्थांश्यामवर्णांश्यामांबरानुलेपनस्रगाभरणांएकव[illegible]त्क्रांशंखच
क्रगदापद्मांकचतुर्भुजांगरुडासनारूढांविष्णुदेवत्यांसामवेदमुदाहरंतींस्वर्लोकाधिष्ठात्रींसरस्वती
नामदेवतांध्यायामीध्यात्वा ॐ आगच्छवरदेत्यावाह्यवस्त्राच्छादितमुखसमौअधोमुखौकरौधारय
न्मंत्रार्थानुसंधानपूर्वकं अर्धास्तमितमंडलकालादारभ्यनक्षत्रदर्शनपर्यंतंअक्षमालयावाजपंगणय
न् गायत्रींजस्वापुनःषडंगंविधायोत्थायपश्चिमाभिमुखएवकृतांजलिः जातवेदसेतच्छंयोर्नमोब्रह्मण
इतित्रिभिःप्रातर्वदादित्यमुपस्थाय इमंमेवरुणतत्वायामीत्यृचोराजीगर्तिःशुनःशेपऋषिःवरुणोदे
वता आद्यागायत्रीद्वितीयात्रिष्टुप् आदित्योपस्थाने ॐ इमंमेवरुण०ॐ तत्वायामि० इतिचादित्यमुपस्था
य ॐ संध्यायैप्राच्यैदिशेनम इत्यादिसाधिपरिद्रू मस्कारादिविष्णुस्मरणांतेमत्कृदाचम्यानेनकृतेनसा

यं संध्योपासनेन श्रीपरमेश्वरः प्रीयतां ॐ तत्सद्ब्रह्मार्पणमस्तु इति कर्मेश्वराय समर्पयेत् इत्याचारेंदौ
सायंसंध्याविधिः इति माटेइत्युपनामकनारायणात्मजत्र्यंबकविरचिते आचारेंदौ अष्टधाविभक्तदि
नस्याष्टमभागकृत्यं समाप्तः अथ सायमोपासनं तत्पूर्वमुक्तं ब्रह्मचारी तु अग्निकार्यं कुर्यात् सायं
प्रातः समिधमादध्यादित्याचार्योक्तेः अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपीति योगिवचनाच्च
सायमेव वाग्निकार्यं तदुक्तं लौगाक्षिणा सायमेव वाग्निमिंधीतेत्येक इति इदं च मेधाजननपर्यंत
मुपनयनाग्नौ तदुत्तरं लौकिकाग्नौ तदुक्तं मनुना आमेधाजननाद्ब्रह्मत्तमौपनयनात्तलं तत्रैव स
यं प्रातश्च समिधं जुहुयादसौ सर्वदा लौकिकाग्नावेवाग्निकार्यमिति सूत्रवृत्त्यभिप्रायः कारिकायां
अग्निकार्यं च भिक्षायाः प्रागूर्ध्वं वा तदिष्यते पर्यूहनोक्षणे स्यातामादायं ते च कर्मणः तथा तूष्णीं समि
धमादध्यादग्नौ प्रादेशसंमितां एतयर्चाथवादध्यादग्नये समिधं त्विति स्पृष्ट्वाग्निं तेजसा मेति त्रिः सं
मार्ष्टि ततो मुखं प्रक्षाल्य हस्तमनलमुपस्पृश्याव मार्ष्टि च ओष्ठानलोमकौ कृत्वा संहतौ तन्निमार्ज
नं एवं त्रिरवमृज्याग्निमुपस्थाय मयीत्यथेति तूष्णीं समिधौ मपक्षेपि प्रजापतिं मनसा ध्यायात्तूष्णीं 

तः संध्याजपंचरेत् हस्तमौतुकरौमध्येसायंमुखसमौकरौ उपस्थानेविशेषमाहशौनकः इमंमेव
रुणतत्वेतिसायंकालेविशेषतः अत्रयद्यपिवारुणीभ्यांवरुणोपस्थानलिंगबलात्प्राप्तंतथापिवा
रुणीभिरथ्यादित्यमुपस्थायप्रदक्षिणमितिश्रुतेःप्राबल्यादादित्योपस्थानेवारुण्योर्विनियोगः
एतयोरृचोर्जातवेदसइत्यादिपरिशिष्टोक्तोपस्थानानंतरंनिवेशइतिन्यायात् पारिजातप्रयो
गेप्येवं आचारार्केतुवारुण्यनंतरंजातवेदसइत्याद्युक्तंतद्विचारणीयं अत्रदिगनभिवादने
प्रतीच्यादिक्रमइतिचंद्रिका प्राच्यादिक्रमइतिरत्नमाला इदमेवयुक्तंतद्विचारणीयंविशेषा
नुपलंभात् सायंसंध्याबहिर्देशेकार्या सायंसंध्याबहिर्जलेइतिवचनात् नचसाग्निकेनबहिः
कथंगंतव्यमितिशंक्यं उद्धरणोत्तरंबहिर्गमननिषेधाभावात् अतएवश्रुचिराचांतोग्निंप्रज्वा
ल्यजलाशयेगत्वागृहेवादेवद्विजगोष्ठतुलस्यादिशुचिस्थलेसंध्योपासनंकुर्यादित्याह्निकचंद्रि
कायामुक्तं यदिविहरणमन्यकर्तृकंतदाबहिरेवेतिकमलाकरेणाप्युक्तं उभेसंध्येतुकर्तव्येब्रा
ह्मणेनगृहेवापिकार्या कुतूहले संध्यानुष्ठानस्यबहिर्देशप्राशस्त्येपिउभेसंध्येतुकर्तव्येब्राह्म

मंत्रेणसमिधमग्नावाधायाग्नयइदंनममेतित्यक्त्वाततआर्द्रपाणितलमग्नौप्रताप्यतेजसामासमनज्मीतिमं
त्रेणसंहृत्तोष्ठद्वयमुखमवाङ्मृज्यपाणिंप्रक्षाल्यपुनरेवंद्विःकृत्वोत्थायोपतिष्ठेत् ॐ मयिमेधांमयिप्रजां
मय्यग्निस्तेजोदधातु ॥ मयि० मयीदंइंद्रियंदधातु मयि० मयिसूर्योभ्राजोदधातु यत्तेअग्नेतेजस्तेना
हंतेजस्वीभूयासं यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं यत्तेअग्नेहरस्तेनाहंहरस्वीभूयासंमित्युपस्थायोप
विश्यपरिसमूहनपर्युक्षणेकृत्वामानस्तोकइतिभस्मविभृत्यशांडिलासितदेवलेतित्रिप्रवरान्वितशांडि
ल्यगोत्रोत्पन्नोहंगणेशशर्माभोअग्नेत्वामभिवादयेएवंस्वप्रवराद्युच्चार्याभिवादयेत् वृत्थानामप्यभिवा
दनंकार्यंततोग्निप्रार्थनादिकृत्वाचम्यानेनाग्निकार्येणपरमेश्वरःप्रीयतांमितीश्वरायकर्मसमर्पयेत्
इत्याचारेंदौअग्निकार्यं अथदीपकालमाहमरीचिः रवेरस्तंसमारभ्ययावत्सूर्योदयोभवेत् यस्यतिष्ठे
द्गृहेदीपस्तस्यनास्तिदरिद्रता आयुर्दःप्राङ्मुखोदीपोधनदस्यादुदङ्मुखः प्रत्यङ्मुखोदुःखदोसौहानिदो
दक्षिणामुखः ततोदेवंसंपूजयेत् तत्रब्रह्मपुराणं देवार्चनंप्रकर्तव्यंत्रिकालेपियथाक्रमं अशक्तौविस्त
रात्प्रातर्मध्याह्नेगंधमादितः सायंनीराजनंकुर्यात्त्रिकालंतुलसीदलं यथासंध्यातथापूजात्रिकालेमोक्षदा २५१

स्मृतेरिति ततोवैश्वदेवंकुर्यात् तत्रविशेषउक्तोविष्णुपुराणे पुनःपाकमुपादायसायमप्यवनीपते वैश्व
देवनिमित्तंतुपत्न्यासार्धंबलिंहरेत् अतिथिंचागतंतत्र स्वशक्त्यापूजयेद्बुधः वैश्वदेवविधिस्तु प्रागु
क्तः ततोद्वितीयभोजनमाहयाज्ञवल्क्यः उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्तमुपास्यच भृत्यैःपरिवृतो
भुक्त्वानातितृप्तोथसंविशेत् पूर्वोक्तेनविधिनापश्चिमासंध्यामुपास्याग्निषुहुत्वातानुपास्याथस्वलुभृ
त्यैःस्ववासिन्यादिभिःपूर्वोक्तैःपरिवृतेनातितृप्तोभुक्त्वाचकारादायव्ययादिग्रहचिंतांनिर्वर्त्यानंतरंसंवि
शेदितिविज्ञानेश्वरोव्याचख्यौ भोजनंचसंध्याकालेनकार्यं चत्वारीमानिकार्याणिसंध्यायांपरिवर्ज
येत् आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकमितियमोक्तेः संध्यातु सायंसंध्यात्रिघटिकास्यस्तादु
परिभास्वतः एवंचास्तात्घटीत्रयोर्ध्वंभुंजीतेतिसिद्धं उत्तरावधिमाहशौनकः निशायाःप्रथमेयामेजपयज्ञा
र्चनादिकं स्वाध्यायोभोजनंप्रोक्तंवर्जयित्वामहानिशां महानिशांतुव्यासआह महानिशातुविज्ञे
यामध्ययामद्वयंनिशि सार्धप्रहरयामांतद्वितिछंदोगपरिशिष्टात्सार्धप्रहरानुज्ञाआपद्विषयेत्याल्पचार
सारः वेधस्तु घटिकादशकादर्वाङ्निशिभुंजीतनित्यशः सएव अस्तंगतेर्के तेजस्तमसा वाधतेभृशं

कोष्ठाग्निर्वर्धते तस्माद्रात्रौ भुंक्तं प्रजीर्यति विदाहिन्यन्नपानानि दिवा भुंक्ते हि मानवः तद्विदाहप्रशांत्यर्थं रा
त्रौ क्षीरं प्रशस्यते अन्यत्तु रात्रौ क्षीरं न भुंजीत यदि भुंजीत न स्वपेत् सुप्तस्य च्यवते वीर्यं दिवा क्षीरं हितं म
तः इति केचन शंसंति देहप्रकृतिमात्मनां प्रादोषिकं दिवा क्षीरं रात्रौ क्षीरं तद्दोषसं इति व्याख्यां वदंत्येके
रात्रौ क्षीरोपदेशतः रात्रिभोजने निषिद्धद्रव्याण्याह स एव शुंठीं दधि क्षौद्र तिलं च तैलं सर्वाणि शाका
नि च तिक्तवंति रात्रौ न भुंजीत विदाहि चान्नं आयुःक्षयं क्षीणबलं करोति रात्रिभोजननिषेधकालमाह शौ
नकः आदित्ये पर्वसंक्रांतौ व्यतीपाते पितुर्दिने अभ्यंगं चोपवासं च न कुर्यान्निशि भोजनं गृह्यपरिशिष्टे
अष्टमीं चतुर्दशीं भानुवारं श्राद्धदिनं तत्पूर्वदिनं च वर्जयित्वा च शिष्टरात्रिषु नियमेनाश्नीयात् परिहृतो लघु भोज
जनं कृत्वेति कमलाकराह्निके जीवत्पितृकस्यामायां एकभक्तशीतोदकस्नानविशेषस्तथापि पुण्यतीर्थ
स्नानं नैमित्तिकमेकभक्तं च कर्तव्यमेव च तथा चोक्तं प्रयोगपारिजाते पुण्यतीर्थे पुण्यकाले निमित्ते च त
था सति एकभक्तं प्रकुर्वीत स्नानं शीतेन वारिणेति सर्वोपि भोजनविधिः प्रागुक्त एवानुसंधेयः रात्रिभो २५२
जने पात्राधो मंडलं न कार्यमिति विशेष आह्निकचंद्रिकायां इत्याचारेंदौ द्वितीयभोजनविधिः ततः कर्त

ह्वोमेषु सर्वत्रेति सूत्र परिभाषया प्रजापतिध्यानं प्रतियत इति कारिकाभाष्ये उक्तं तद्यत्र तूष्णींशब्दविशिष्टो
होमश्चोद्यते तत्र प्रजापतिपदं च तुर्थ्यंतं ध्यात्वा स्वाहेत्युक्त्वा जुहुयादिति वृत्तावुक्तेः समिदभ्याधाने स्याः
परिभाषाया अप्राप्तत्वाद्विचारणीयं यमः ततोभिवादयेद्वृद्धानग्निकार्यानंतरं बृहन्नारदीये श्राद्ध
व्रतं तथा दानं देवताभ्यर्चनं तथा यज्ञं च तर्पणं चैव कुर्वंतं नाभिवादयेत् तत्राभिवादनं प्रत्यभिवादन
ज्ञानामेव कार्यं तदनभिज्ञानां तु नमस्क्रियामात्रं यज्ञशालादौ सर्वान्युगपदेव नमस्कुर्यात् तदुक्तं बृह
न्नारदीये सभायां यज्ञशालायां देवतायतनेष्वपि प्रत्येकं तु नमस्कारो हंति पुण्यं पुराकृतं संध्योत्तरं
अकृतस्याग्निकार्यस्य यावद्भोजनं गौणकालमाह याज्ञवल्क्यः कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनु
ज्ञयेति ऋग्विधाने मानस्तोके जपेन्मंत्रं शतसंख्यं शिवालये अग्निकार्यं विना भुंक्ते न पापं ब्रह्मचारि
ण इति अथ प्रयोगः आचम्य प्राणानायम्य देशकालौ संकीर्त्य ममोपात्तदुरितक्षयद्वारा श्री० सायं स
मिधानं करिष्ये प्रातस्तु प्रातः समिधानं करिष्ये इति संकल्प्य परिसमूहन पर्युक्षणे कृत्वा विश्वानि न इत्य
र्चयित्वा ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहेति

नरोधान्योशयनेपंचदारुजे नचदंतमयीमित्यत्रनतुजंतुमयीतित्यपिक्वचित्पाठः पंचदारूणीतुपा
रिजाते उदुंबरवटाश्वत्थचूतजंबूद्रुमांतथा अश्मपीठोत्थितांचैवघठसिक्ततरुंस्त्यजेत् करिभग्न
कृतेचैवघनशयीतक्वचिन्नरः शय्याप्रमाणमुक्तंशिल्पशास्त्रे चतुराशीतिपर्वाणिदैर्घ्येणपरिक
ल्पयेत् षष्ठ्यंगुलानिविस्तारंमंचकंहस्तसंमितं उच्चमितिशेषः एवंशय्याविधातव्यासर्वेषां
शयनोचिता मानाधिक्येदरिद्रः स्यान्मानहीनेसुखक्षयः पर्यंकोप्युक्तत्रैव आयामःसप्ततालः
स्याच्चतुस्तालंचविस्तृतं द्वितालंउन्नतंज्ञेयंएतत्पर्यंकलक्षणं तालादिप्रमाणंचोक्तंस्मृत्यंतरे अं
गुष्ठादिकनिष्ठांतंभवेन्मानचतुष्टयं प्रादेशतालगोकर्णवितस्तिस्तुयथाक्रममिति परशय्यानिषेध
माहबौधायनः आत्मशय्यासनंवस्त्रंजायापत्यंकमंडलुः शुचीन्यात्मनएतानिपरेषामशुचीनिवेति
एतदननुज्ञातविषयंतथाचयाज्ञवल्क्यः परशय्यासनोद्यानगृहयानानिवर्जयेत् अदत्तान्यग्निहीन
स्यनान्नमद्यादनापदि शय्याकशिपुः आसनंपीठादि उद्यानमाम्रवनादिगृहंप्रसिद्धंयानंरथादि २५३
परसंबंधीन्येतान्यदत्तान्यननुज्ञातानिवर्जयेन्नोपभुंजीतेतिविज्ञानेश्वरोव्याचख्यौ निर्णयामृत

स्तु स्वीयशय्यालाभेतुपरकीयांशुद्धेनकंबलादिनांतर्धायोपभोक्तव्येति अत्रविशेषमाहपारिजा
तेव्यासः शुचिंदेशंविविक्तंतुगोमयेनोपलेपयेत् प्रागुदक्प्रवणंचैवसंविशेतुतदाबुधः कल्प
तरौकात्यायनः पौर्णमास्याममावास्यामधःशय्याविधीयते अनाहिताग्नेरप्येषपश्चादग्ने
र्यथाविधि स्कांदे उपानद्वेणवंदंडंअंबुपात्रंतथैवच तांबूलादीनिसर्वाणिसमीपेस्थाप
येद्गृही यानिकानिचपुण्यानियत्किंचिदनुलेपनं अलक्ष्मीपरिहारार्थंनित्यंकुर्याद्विचक्षणः
आचारप्रकाशेगार्ग्यः मंगल्यंपूर्णकुंभंचशिरःस्थानेनिधापयेत् अभीष्टदेवतांस्मृत्वासंविशे
न्मंगलध्वनौ स्कांदे रात्रिसूक्तंजपेत्स्मृत्वासर्वांश्चसुखशायिनः नमस्कृत्वाव्ययंविष्णुंसमाधि
स्थःस्वपेन्निशि सुखशायिनोदेवागोभिलेनदर्शिताः अगस्तिर्माधवश्चैवमुचकुंदोमहामुनिः
कपिलोमुनिरास्तिकःपंचैतेसुखशायिनः पारिजातेवैद्यः युक्तोपधानंस्वास्तीर्णंविस्तीर्णंअवि
षमंसुखं जानुतुल्यंमृदुशुभंसेवेतशयनासनं श्रमानिलहरंवृष्यंतुष्टिनिद्राधृतिप्रदं सुखश

व्यासनंतच्चततद्रव्यगुणानुगं संहितंव्यजनाद्यैश्चशयनंचासनंतथा वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्व
पेन्निशि तेचमंत्राःसर्पापसर्पभद्रंतइत्यादयः हारीतस्तु सुत्रामाणमितिपठन्कुयामधिष्ठायेति
अथशयनविधौगृह्यपरिशिष्टं अमात्यैःपरितोलघुभोजनंकृत्वापत्न्यासहतांबूलादिसेवनंकृत्वासं
ध्यायांशून्यालयेश्मशानेचैकवृक्षेचतुष्पथेशिवमातृकायक्षनागस्कंदभैरवाद्यग्निगृहेषुधान्यगोदेव
[illegible]विप्राग्निगुरूणांमुपरिचाशुचौदेशेऽशुचिरार्द्रवस्त्रपादोनग्नःशयनंनकुर्याद्रात्रीव्यख्यदायतीतिसूक्तं
जपित्वाप्राक्शिरादक्षिणःशिरावेष्टदेवतानांनत्वास्मरणंचकृत्वावैणवंदंडपात्रंचशयनंचशयनसमीपे
निधायप्रक्षालितपादःशयनंकुर्यादिति पारिजातेआचार्यः स्वपेत्तुदक्षिणशिराःप्राक्शिरावास्ववेश्म
नि विष्णुपुराणे स्वगृहेप्राक्शिराःकुर्याच्छ्वाशुर्येदक्षिणेतथा प्रत्यक्शिराःप्रवासेस्यान्नकुर्यादुदक्शि
राइति इदंप्रवासादौपश्चिमशिरआदिविधानंआश्वलायनेतरविषयं आश्वलायनैस्तुप्राक्शिरादक्षिण २५४
शिरावेतिपरिशिष्टस्यैवसर्वत्राविशेषेणगृहीतुमुचितं हारितः नतिर्यगुदक्प्रत्यक्शिराइति कोणशि

व्यमाहदक्षः प्रदोषपश्चिमौयामौवेदाभ्यासेनवैनयेत् यामद्वयंशयानस्तुब्रह्मभूयायकल्पते अत्रवेद
ग्रहणमंगोपांगयोरुपलक्षणं तदुक्तंचतुर्विंशतिमते वेदवेदां[illegible]तवेदांगमीमांसान्यायदर्शनं इतिहा
सपुराणंचधर्मशास्त्राणिचाभ्यसेत् अत्रदर्शनांतःपुराणांतश्चसमाहारद्वंद्वः वेदांनामंताउपनिष
द्भागाः पृथक्तदुपानंप्राधान्यद्योतनार्थं ब्राह्मणाआयाताःवसिष्ठोप्यायातइतिवत् अथशयन
विधिरभिधीयते चंद्रिकायांकृतपादादिशौचश्चभुक्त्वासायंततोगृही गच्छेदस्फुटितांशय्यांततोदा
रुमयींनृपेति गच्छेच्छय्यांशयनार्थमितिशेषः विष्णुपुराणे गच्छेच्छय्यामस्फुटितामेकदारुमयींनृप
नाविशालांनवैभग्नांनासमांमलिनांतथा नचदंतमयींशय्यामधितिष्ठेदनास्तृतां एकदारुमयीं एक
वृक्षस्यदारुणाकृतांइत्याचारसारे तत्रविशेषमाह वराहमिहिरः एकद्रुमेणधन्यंवृक्षद्वयविनिर्मि
तंधन्यतरं त्रिभिरात्मजवृद्धिकरंचतुर्भिरर्थोयशश्चाग्र्यं पंचवनस्पतिरचितंपंचत्वंयातितत्रयःशेते
षट्सप्ताष्टतरूणांकाष्ठैर्घटितंकुलंहंतीति शंखः नशीर्णायांखट्वायांनान्यवर्णोपसेवितायामनभ्युक्ष्य
ति दंतमयींमृतहस्तिदंतमयीमित्यर्थः तथाचतत्रैव मृतदंतमयेविद्युद्दग्धेदर्भेपलाशजे नशयीत

तिविज्ञानेश्वरः यत्तुहेमाद्रौशिवरहस्ये दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रतीश्राद्धंदत्वाचभुक्त्वाचश्रेयो
र्थीनचपर्वसुइतिश्राद्धदानभोजनदिवसेस्त्रीगमननिषेधः सोनृतुविषयः दर्शादौतु नभवत्येवपर्वणाप
र्युदस्तत्वात् इदंचश्राद्धेकादश्यादावप्यृतुगमनविधानं अन्यकालेप्रतिबंधादिनागमनासंभवेज्ञेयमि
तिहेमाद्रिनिर्णयसिंधुकौस्तुभादयः अत्रप्रमाणंचिंत्यमितिमयूखः माधवीयेतु ऋतुकालनियुक्तो
पिनैवगच्छेत्स्त्रियंक्वचित् तत्रगच्छन्समाप्नोतिह्यनिष्टफलमेवत्विति श्राद्धप्रकरणस्थवृद्धमनूक्तेः
श्राद्धेब्रह्मचर्यंनियतमित्युक्तं पृथ्वीचंद्रोदयेप्येवं ऋतावगमनेप्रायश्चित्तमाहबृहस्पतिः
आहिताग्निरुपस्थानंनकुर्याद्यस्तुपर्वणि ऋतौनगच्छेद्भार्यांयःसोपिकृच्छ्रार्धमाचरेत् एत
च्चसमानदेशविषयं ऋतुस्नातांतुयोभार्यांसंनिधौनोपगच्छति घोरायांभ्रूणहत्यायांयुज्यतेनात्र
संशयइतिपराशरोक्तेः सन्निधावित्युक्त्यासन्निहितस्यनदोषइत्युक्तंभवति देवलः यःस्वदारानृतु २५५
स्नातान्स्वस्थःसन्नोपगच्छति भ्रूणहत्यामवाप्नोतिप्रजाप्राप्ताविनश्यति स्वस्थइतिवचनादस्वस्थ

स्यनदोष इत्युक्तंभवति सूतकादोॠतावगच्छतोनदोषः तथाचमनुः सूतकेबंधनेविप्रोहव्यक
व्यादिवर्जितः नैनसालिप्यतेतद्वृताावगमनादपीति एनसापापेन व्याधितोबंधनस्थोवाप्रवा
सेष्वप्यपर्वसु ऋतुकालेतुनारीणांभ्रूणहत्यानयुज्यते ऋतुकाल इत्यनंतरंअगमनइतिशेषः
योयंॠतौभार्यागमननियमः सोजातपुत्रंप्रत्येव जायमानोवैब्राह्मणस्त्रिभिॠणवाजायतेब्र
ह्मचर्येणर्षिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यः इतिश्रुतिमूलकत्वेनास्योपपत्तेः श्रुत्यंतरकल्पनाया
अन्याय्यत्वात् तथाचमनुः ज्येष्ठेनजातमात्रेणपुत्रीभवतिमानवः पितृणामनृणश्चैवसत
स्मात्सर्वमर्हतीति कूर्मपुराणमपि ऋतुकालाभिगामीस्याद्यावत्पुत्रोभिजायते एवंचैकपु
त्रोत्पादनोः शास्त्रार्थस्य कृतत्वादानृण्येच जातेनपुत्रोत्पादनमावश्यकमिति एतदपरेनक्षमंते
यद्यपिपुत्रित्वमानृण्यंचैकेनपुत्रेणसंपद्यतेतथापिनहिपुत्रजननमात्रेणपितुरानृण्यंकिंतर्हि
सम्यगनुशिष्टेनपुत्रेणशास्त्रीयेषुकर्मस्वनुष्ठितेषुपश्चादानृण्यंसंपद्यते अतएववाजसनेपिब्रा

ह्मणे पुत्रानुशासनविधिः समाम्नातः तस्मात्पुत्रमनुशिष्टं लोक्यमाहुरिति एवंसति बहूनां मध्ये यथा
वानुशासनं प्रज्ञामांद्यादिभिर्वधबाहुल्यात्कस्यचिदेव संपद्यते अनुशिष्टेष्वपि बहुषु यथावदनुष्ठानं
कस्यचिदेव अनोज्येष्ठः कनिष्ठोवा यस्तादृशः सएवानृण्यहेतुः अतएव पुराणेभिहितं एष्टव्याबह
वः पुत्रा यद्येकोपि गयां व्रजेत् यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् दशास्यां पुत्रानाधेहीत्यादि
मंत्राश्चैवं सति बहुपुत्रत्वविधिमुपोद्बलयंति तस्माज्जाते पुत्रे पि ऋतावुपेयादेवेति ऋतुकाले भा
र्याया अपि भर्त्तारं नानुमन्यते सा मृता तु भवेन्नारी सूकरी च पुनः पुनरिति यमोपि ऋतुस्नाता तु
या नारी भर्त्तारं नोपगच्छति तां ग्राममध्ये विख्याप्य भ्रूणघ्नीमिति वासयेत् भ्रूणघ्नी इयमिति ना
स्त्रियं ग्राममध्ये विख्याप्य प्रकटीकृत्य पृथग्वासयेदित्युत्तरार्धार्थः अत्रापि संभवि निधानवितिज्ञेयं
प्रायश्चित्तं तु पादकृच्छ्रं स्त्रीणामर्धं प्रदातव्यमिति वचनात् व्याधितादीनां स्त्रीणामपि भर्त्तारं प्रत्यृता
वगमने दोषाभावः अनंतरां दाहृतव्यासवाक्ये पुल्लिंगस्याविवक्षितत्वात् विरक्तस्य तु ऋतावगमने २५७

राः पश्चिमशिरा उदक्शिराश्च न शयीतेत्यर्थः पारिजाते व्यासः नोत्तराभिमुखः स्वप्यात्पश्चिमाभिमुखो न च त
नैवाचार्यः न दर्शांपादयोः कृत्वा प्रोर्णुयाद्बासमाबुधः नोर्वोर्निधाय हस्तं च स्वपेन्मध्ये त्वधोमुखः उत्ता
नवक्षा न शयेन्नाधोवक्षाश्च कर्हिचित् एवं नीत्वा निशो ह्यंशांशिष्टं कालमथ स्वपन् पूर्वोक्तकर्मणा स
म्यक् क्षपेदेवं विचक्षणः एवं स्वपित्वा मध्यरात्रांते स्त्रियमुपेयात् तदुक्तमाश्वलायनेन पत्नीमृतु
मतीं स्निग्धां त्वक्संभोगविवर्जितां उपेयान्मध्यरात्रांते जीर्णेन्ने त्वसमानसः पारिजाते वैद्यस्तु ततोर्धया
मभात्रे तु विहारार्थं समुत्थितः तांबूलपूरितमुखस्त्वन्वक्लिडामलांबरः रतिं कुर्यादिति शेषः ऋतुकाल
माह याज्ञवल्क्यः षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् युग्मासु पुत्रा जायंते स्त्रियोयुग्मासु
रात्रिषु ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत् स्त्रीणां षोडशनिशा ऋतुर्गर्भग्रहणयोग्यः कालः
तत्र सर्वासु अप्रतिषिद्धासु युग्मासु गमनमावश्यकं युग्मास्विति बहुवचननिर्देशात् यत्र श्राद्धादौ ब्रह्म
चर्यं विहितं तत्रापि ऋतौ गच्छतो न ब्रह्मचर्यस्खलनदोषः पर्वाणीति बहुवचनादष्टमी चतुर्दश्योर्ग्रहणमि

पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच तैलस्त्रीमांसभोगीचसर्वेष्वेतेषुवैपुमान् विण्मूत्रभोजनंनाम
प्रयातिनरकंनृपेति अत्रसामान्यतश्चतुर्दश्यष्टम्युपादानेपिकृष्णपक्षस्थितएवनिषिध्ये कृष्णा
ष्टमीचतुर्दश्योःपूर्णिमादर्शसंक्रमाइतिस्कांदात् धीरस्तु षष्ठ्यष्टमींपंचदशींचतुर्थींचतुर्दशी
मप्युभयत्रहित्वा शेषाःशुभाःस्युस्तिथयोनिषेकेवाराःशशांकार्यसितेंदुजानामिति नचनि
षेकशब्दश्रवणादेतद्गर्भाधानमाविषयमितिवाच्यं अष्टम्यांचचतुर्दश्यांषष्ठ्यांचद्वादशीति
थौ अमावास्यांचतुर्थ्यांचमैथुनंयोनगच्छति तिर्यग्योनिंनगच्छेत्समलोकंसगच्छतीतिवा
राहेसामान्यतोमैथुननिषेधात् वामनपुराणे बुधेचयेषांनसमाचरेत्तथापूर्णासुयोषित्परि
वर्जनीया शिवरहस्ये दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीन २५७
चपर्वसु. वर्ज्यनक्षत्राण्याहयाज्ञवल्क्यः एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत् सुस्थइंदौ
सकृत्पुत्रंलक्षण्यंजनयेत्कृतं मघापौष्णांचवर्जयेदितिक्वचित्पाठः क्षामाचतस्मिन्कालेरजस्व

लाग्रतेनैवभवति अथनभवति तदाकर्तव्याश्यामापुत्रोत्पत्त्यर्थं अल्पास्निग्धभोजनादिना पुमान्पुंसो
धिकेशुक्रेस्त्रीभवत्यधिकेस्त्रियाः समेपुमान्पुंस्त्रियौवाक्षीणेल्पेचविपर्ययइति मनुवचनात् अपु
मान्पुंसकः पुंस्त्रियौवा यदिबीजविभागः तदाहयमः यदिसंभोगकालेतुपुरुषो रागमोहितः द्विधा
समुत्सृजेच्छुक्रंयमकंतत्रजायते क्षीणेनिःसारे अल्पेचविपर्ययः गर्भाग्रहणं यदायुग्मायामपि
रात्रौशोणिताधिक्यंतदास्त्र्येवभवतिपरंतुपुरुषार्थकृतिः अयुग्मायामपिशुक्राधिक्येपुमानेवभ
वति परंतुस्त्र्याकृतिः कालस्यनिमित्तकारणापेक्षयोपादानकारणीभूतस्यरजसः शुक्रस्यवाप्रा
बल्यात् मघांमूलंचेतिचकारःशास्त्रांतरोक्तवर्ज्यनक्षत्राणांसमुच्चयार्थः रत्नमालायां विष्णुमघे
शरविमित्रसमीरपौष्णमूलोत्तरावारुणभानिनिषेककार्ये पूज्यानिपुष्यवसुशीतकराश्विचित्रा
दित्याश्चमध्यमफलाविफलाःस्युरन्याइति मूलरेवत्योर्विहितप्रतिषिद्धत्वाद्विकल्पः पारिजाते
बृहस्पतिः श्राद्धंपित्र्यंचिकित्सांचमैथुनाभ्यंजनेतथा चौलोपनयनादीनिवर्जयेत्तुत्रिजन्मसु

२५८ त्रिजन्मानिजन्मनक्षत्रंदशेमेकोनविंशेचजन्मनक्षत्रंतत्पूर्वोत्तरेनक्षत्रेचेतिकेचित् गुरुश्चेच्छुभस्थानस्थिते
इंदौ सकृदेकस्यांरात्रौ नद्विस्त्रिर्वेत्यर्थः ततोलक्षणेयुक्तं पुत्रनयनि पुमानहतपुंस्त्वः श्राद्धकर्त्तुर्
भोक्तोः श्राद्धपूर्वदिवसोपिवर्ज्यइत्युक्तंबृहस्पतिना द्विनिशंब्रह्मचारीस्याच्छ्राद्धकृद्ब्राह्मणैःसह
शंसोपि निमंत्रितस्तुयः श्राद्धेमैथुनंसेवतेद्विजः श्राद्धंदत्वाचभुक्त्वाचयुक्तःस्यान्महतेनसा
निर्णयसिंधौअश्वलायनः श्राद्धंकरिष्यन्कृत्वावाभुक्त्वावापिनिमंत्रितः उपोष्यचतथाभुक्त्वानोपेया
श्चऋतावपि ज्योतिर्वसिष्ठः उपप्लवेवैधृतिपातयोश्चविष्ट्यादिकेषारिघपूर्वभागे संध्यासुपर्वस्व
पिमातृपित्रोर्मृतेन्हिपत्नीगमनंहिवर्ज्यं ज्योतिर्निबंधः व्रतीयोगीमिताशीचरोगीव्यायामकृत्तथा
नसेवेतस्त्रियंतेषांबीजरोधोनबाधकः अत्रतिथिनक्षत्रादिकंतात्कालिकमेववर्ज्यं तदुक्तंस्कां
दे अभ्यंगेजलधिस्नानेदंतधावनमैथुने जातेचनिधनेचैवतत्कालव्यापिनीतिथिः तिथिशब्दो २५८
नक्षत्रयोगादीनामुपलक्षकः तथाचदेवलः निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षितइति अन्ये

दोषाभावः तदुक्तंश्रीमद्भागवते लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना व्यवस्थि
तिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टेति अत्रगमनेनिषिद्धकालः तत्रमनुः तासामाद्या
श्चतस्रस्तुनिंद्याएकादशीचया त्रयोदशीचशेषाः स्युःप्रशस्तादशरात्रयः एकादशीत्रयोदश्या
वृत्तोर्नपक्षस्येतिमदनपारिजाते यत्तुहारीतोक्तं चतुर्थेहनिस्नातायांयुग्मासुचगर्भाधानमितित
द्रजोनिवृत्तौज्ञेयं स्नानंरजस्वलायास्तुचतुर्थेहनिशस्यते तस्यानिवृत्तेरजसिनानिवृत्तेकथंचने
त्यापस्तंबोक्तेः रजस्युपरतेसाध्वीस्नानेनस्त्रीरजस्वलेतिमनूक्तेश्च कृत्यकल्पतरुस्तु स्नानं
चतुर्थेदिवसेरात्रौगच्छेद्विचक्षणइतिभारतोक्तिःगंतुःप्रत्यवायाभावमात्रपरेत्याह सप्तमीन
वम्योरपिनिषेधउक्तोगयादासनिबंधे सप्तम्यामप्रजायोषित्अष्टम्यामीश्वरःसुतः नव
म्यांदुर्भगाकन्येति आचारप्रकारोपि २ तासामाद्याश्चतस्रश्चसप्तम्येकादशीचया त्रयो
दशीचनवमीशेषाःशस्तास्तुरात्रयः ब्रह्मपुराणे चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा

यविदः कः पुनरेषां भेदः अत्यंताप्राप्तप्रापणं विधिः यदग्निहोत्रं जुहुयात् अष्टकाः कर्तव्या इत्यादिः पक्षे
 प्राप्तस्याप्राप्तपक्षांतरप्रापणं नियमः यथा व्रीहीन्नवहंतीत्यादिः कथमस्य पक्षेप्राप्तप्रापकत्वमिति
चेदित्थं अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्धत्वात् किंतु नियमः स
चाप्राप्तांशपूरणः वैतुष्यस्य हि नानोपायसाध्यत्वाद्यदावघातं परित्यज्योपायांतरं गृहीतुमारभ्यते
तदावघातस्याप्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमवानेन विधिना क्रियते अतश्च नियम
विधौ अप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेप्राप्तावघातविधानमिति यावत् तथा प्रा
ङ्मुखोन्नानि भुंजीतेतीदमपि स्मार्तमुदाहरणं पूर्वेण व्याख्यातं एकस्यानेकत्र प्राप्तस्यान्यतो निवृ
त्यर्थं एकत्र पुनर्वचनं परिसंख्या यथा पंच पंचनखा भक्ष्या इति इदं हि वाक्यं न पंचनखभक्षणप
रं तस्य रागतः प्राप्तत्वात् नापि नियमपरं पंचनखापंचनखभक्षणस्य युगपत्प्राप्तेः पक्षे प्राप्त 
स्याभावात् अत इदमपंचनखभक्षणनिवृत्तिपरमिति परिसंख्याविधिः इदं च त्रिदोषवती श्रु

तार्थस्यपरित्यागादश्रुतार्थस्यकल्पनात् प्राप्तस्यबाधइत्येवंपरिसंख्यात्रिदूषणेति एवंचनिय
मे सति ऋतावृतावितिवीप्सालभ्यते निमित्तावृत्तौनैमित्तिकमप्यावर्त्ततइतिन्यायात् यथाकामी
भवेद्वापिइत्ययमपिनियमएषानृतावपिस्त्रीकामनायांसत्यायांस्त्रीअभिरमयेदेवेति ऋता
वुपेयात्सर्वत्रवाप्रतिषिद्धवर्ज्यमित्यपिगोतमीयंसूत्रद्वयंनियमस्यानृतावपिरमेवऋतावुपे
यादेवानृतावपिस्त्रीकामनायांप्रतिषिद्धवर्जमुपेयादेवेति विज्ञानेश्वरीयेप्येवं श्रीमद्भागव
तस्थलोकेव्यवायेतिपद्यव्याख्यायांश्रीधरस्तुऋतावुपेयादित्यभ्यनुज्ञाद्वारापरिसंख्यैव न
नुयद्यभ्यनुज्ञामात्रमेतत् भवेत् तर्हिऋतुस्नानांतुयोभार्यांसन्निधौनोपगच्छति घोरायां
भ्रूणहत्यायांपच्यतेनात्रसंशयइत्यादिदोषश्रवणंनस्यात् नैषदोषः मनसिकामेसत्यपि
तस्यामरुच्याद्वेषादिनावातामनुपगच्छतोदोषश्रवणापपतेरितिसर्वमनवद्यमित्याह ऋता
वुपेत्यात्सर्वत्रवाप्रतिषिद्धवर्ज्यमितिगोतमसूत्रव्याख्यायांहरदत्तोपिनियमःपरिसंख्यावेतिवि

कल्पमुक्तवानित्यलंप्रपंचेन व्यासः नास्नातांतुस्त्रियंगच्छेन्नातुरांनरजस्वलां नातिष्ठांनप्रकुपितांन
२६० प्रशस्तांगर्भिणीं वृद्धांवंध्यामसद्वृत्तांमृतापत्यामपुष्पिणीं॥ बहुपुत्रवतींचैवगमनेपरिवर्जयेत्
ष्ठप्रवत्वादिदोषरहिताप्रशस्ता॥तद्भिन्नाअप्रशस्तास्तांवर्जयेदित्यर्थः वृद्धांसरजस्कामपिअशक्तां
गर्भधारणे पुष्पिणींऋतुमतींतदन्याअपुष्पिणीं अप्राप्तार्तवाअगतार्तवाचमनेनिषिध्यते
बहुपुत्रवतीमित्यत्रबहुपुत्रशब्देनैकादशप्रभृतिसंख्याग्राह्या दशास्यांपुत्रानाधेहीतिमंत्रलिं
गात् गर्भिणीनिषेधःषण्मासादूर्ध्वंतदुक्तमात्रेणा षण्मासान्कामयेन्मर्त्योगर्भिणींस्त्रियमेवहि
आदंतजननादूर्ध्वमेवंधर्मोनहीयते एवकारःषण्मासानित्यनंतरमन्वेति नचैवंकाममाविज
नितोःसंभवतीत्यनयाश्रुत्याप्रसवपर्यंतंगमनस्याभ्यनु[redacted]ज्ञातत्वादनेनविरोधइतिवाच्यं त
त्रप्रसवापरपर्यायविजननशब्देनातऊर्ध्वंप्रसूतिस्यादिति पारिभाषिकस्यैवविजननस्यग्रहणान्न २६०
विरोधः आदंतजननादूर्ध्ववालकेजातेतस्यदंतजननादूर्ध्वंगच्छेन्नतुततःपूर्वमित्यर्थः मात्सक

तावपि गमनमाह याज्ञवल्क्यः यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् स्वदारनिरतश्चैव स्त्रि
योरक्ष्या यतः स्मृता इति गौतमोपि ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्ज्यमिति बृहस्पतिरपि
ऋतुकालाभिगमनं पुंभिः कार्यं प्रयत्नतः सदैव वा पर्ववर्ज्यं स्त्रीणामपि मतं हि तत् श्रुतिरपि
ता अब्रुवन्वरं वृणामहै ऋत्वियात्प्रजां विंदामहे काममाविजनितोः संभवामेति तस्मादृत्वियात्स्त्रि
यः प्रजां विंदंति काममाविजनितोः संभवंति वरं वृतं ह्यासामिति ऋत्वियात् ऋतुकालिकात्पु
रुषसंबंधात् आविजनितोः प्रसूतिपर्यंतं संभवंति मिथुनीभवंति विष्णुपुराणेपि इति मत्वा स्व
दारेषु ऋतुमत्सु नरो व्रजेत् यथोक्तदोषहीनेषु सकामेष्वनृतावपीति यस्तु ऋतौ नोपैति यो भार्यामं
नृतौ यश्च गच्छति तुल्यमाहुस्तयोः पापं अयोनौ यश्च सिंचतीति बौधायनेनानृतौ गमननिषेध उक्तः
स स्त्रियः कामाभावे ज्ञेयः अत्र किंचिदुच्यते ऋतौ भार्यामुपेयादिति किमयं विधिर्नियमः परिसंख्या वा
उच्यते न तावद्विधिः प्राप्तार्थत्वात् नापि परिसंख्या दोषत्रयसमासक्तेः अतो नियमं प्रतिपेदिरेन्या

वेदित्यन्वयः रतिसमीपेदीपसांनिध्यमुक्तंरतिप्रकाशे दीपंसमीपेरतिंकुर्यादिति योतिर्निबंधेपि दीप
प्रलुमेयःसंगंकरोतिमनुजोयदि यावज्जन्मदरिद्रत्वंलभतेनात्रसंशयः इदंचसमर्थविषयं दीपिस
त्यसतिवापत्नीगच्छेदितिधर्माब्धिसारोक्तेः अयंचदीपोभार्ययैवप्रज्वालनीयः तदुक्तंज्योतिर्निबंधे
भार्यैवदीपंप्रज्वाल्यप्रत्युश्चितानुवर्तिनी नमस्कृत्यतुभर्तारंरमयेत्सहतेनतु तत्रैव कुंकुमं
चांजनंचैवतांबूलंसिंदुरंतथा धौतवस्त्रंचकुसुमंसंयोगेचशुभावहं स्त्रीकृत्यमाहतत्रैव
नमस्कृत्यभर्तृपादौपश्चाच्छय्यांसमाविशेत् नारीसुखमवाप्नोतिनचेदुःखस्यभागिनी दीपेना
त्मतनुच्छायांभर्तुस्तांपरित्यजेत् नोदंपतीदरिद्रत्वंनाप्नुवीनांविनिश्चितं भर्तुरुच्छिष्टसदाभो
ज्यंअन्नंतांबूलमेववा कंचुकेनसमंनारीभर्तुःसंगंसमाचरेत् त्रिभिर्वर्षैश्चमध्येवाविधवाभ
वतिध्रुवं नोदूपत्रमिलक्षणायदिमैथुनमाचरेत् पंचमेसप्तमेवर्षेवैधव्यमिहजायते कामा
तुरेणपतिनासंयोगेयदियाचिता निवारयतितंनारीबालरंडाभवेद्ध्रुवं प्रदोषकालेयानारीपति 

संगंसमाचरेत् आयुष्यंहरतेभर्त्तुः सनारीनरकंव्रजेत् अथपुरुषकृत्यमाह ज्योतिर्निबंधकारः
तांबूलमादौचर्वित्वाभार्यासंगंसमाचरेत् तांबूलेविशेषस्तत्रैव वामहस्तेनखादेंनस्त्रीहस्तेनत
थैवच यदिवाखादयेन्मूढस्तस्यलक्ष्मीर्विनश्यति मनुः तांबूलचर्वणंकुर्यात्सकामोभार्ययास
ह तांबूलेनमुखंपूर्णंकुंकुमादिसमन्वितं पीतमाल्यादिसंयुक्तंकृत्वायोगंसमाचरेत् विना
तांबूलवदनांनग्नामाक्रंदरोदनां दुर्मुखांक्षुधयायुक्तांसंयोगेपरिवर्जयेत् ज्योतिर्निबंधे उत्ति
ष्ठन्नतुभुंजीतगृहस्थोत्वधरंविना अन्ननिवीतमाहात्रिः ऋषितर्पणचांडालभाषणेशववाहने
विण्मूत्रोत्सर्जनेस्त्रीणांरतिसंगेविषीतयः इदमनृतविषयं ऋतौतुयज्ञोपवीतमव भार्यासंभो
गसमयेपुष्यकालंविनान्यदा ब्रह्मसूत्रंद्विजःकुर्यान्निवीतंपृष्ठभागतइतिपारिजातधृतवच
नात् सर्वदाउपवीतमेवेत्यान्हिकचंद्रिका संभोगकालेस्त्रियमकंचुकांकृत्वासंभोगंकुर्यात् स
कंचुकरतिंकृत्वासचैलंस्नानमाचरेदितिप्रकाशेप्रायश्चित्तस्मरणात् तर्जन्यांरौप्यंचेतन्निष्काश्य

शिखाच्चविसर्जनीया तर्जनीरौप्यसंयुक्तांब्रह्मग्रंथियुतांशिखां भोजनेमैथुनेमूत्रेकुर्वन्कृच्छ्रेण
शुध्यतीतिसंग्रहेप्रायश्चित्तश्रवणात् उपगमनप्रकारमाह मनुः स्वपेत्स्त्रींप्राक्शिरांकृत्वाप्र
त्यक्पादोप्रसारयेत् भुक्तवानुपविष्टस्तुशय्यायामभिसंमुखः संस्मृत्यपरमानंपत्न्याजंघेप्रसार
येत् योनिंस्पृष्ट्वाजपेत्सूक्तं विष्णुर्योनिंप्रजापतेः रेतःसिंचेत्ततोयोन्यांतस्माद्गर्भंविभर्तिसा
पादलग्नतनुश्चैवउच्छिष्टताडनंतथा कोपंरोपंचनिर्भर्त्संसंयोगेचनदोषभाक् उपगमनेमंत्र
विधिः बह्वृचानांकृताकृतः नैकउपगमनेमंत्रविधिमिच्छंतीतिपरिशिष्टोक्तेः बादरायणस्तु
यद्रजोदर्शनोत्तरंप्रथमंचतुर्थ्यादिरात्रिषूपगमनंगुणात्तदेवसमंत्रकंनान्यदितिमन्यते आ
त्रेयस्तु सर्वाण्युपगमनानिसमंत्राणिभवंतीतिमन्यते प्रतिप्रधानंगुणावृत्तिरितितदाशयः
अथसंभोगोत्तरकृत्यं तत्रपराशरः ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनस्मृतं अनृतौतुयदाग
च्छेच्छौचंमूत्रपुरीषवत् एतच्चस्नानंअशिरस्कंऋतुगमननिमित्तकस्नानंप्रकृत्याशिरस्कमेव 

श्यपाभ्यांवर्षद्वादशकादूर्ध्वमृतोरप्रामावपिगमनमुक्तं वर्षद्वादशकादूर्ध्वंयदिपुष्पंबहिर्नहि अंतःपु
ष्पंभवत्येवपनसोदुंबरादिवत् अतस्तत्रभकुर्वन्तस्त्रीसंगबुध्धिमान्नरइति वर्षद्वादशकादिति
श्रवणात्पूर्वंगमननिषिद्धमितिज्ञेयं आश्वलायनः दीक्षितस्तुमहायज्ञेपित्रोःप्रागवत्सराद्विजः ने
याद्भार्यांप्रयत्नेनऋतावप्यर्थितोबुधइति अर्थितःप्रार्थितःभोगार्थंभार्ययेतिशेषः ऋतुविशे
षेणसंभोगनियमकामशास्त्रे पक्षान्निदाघेहेमंतेनित्यमन्यर्तुषुत्र्यहात् स्त्रियंकामयमान
स्यजायतेनबलक्षयः यत्तुवाग्भट्टीये त्र्यहाद्वसंतशरदोःपक्षाद्वर्षनिदाघयोः सेवेतकामतःका
मंहेमंतेशिशिरेबलीत्युक्तं तत्रबलीत्यभिधानेनदृष्टार्थत्वोक्तेयथाबलंव्यवस्थेति इत्यर्थंभिन्नामे
वशय्यांप्रकल्पयेत् तदुक्तमाचारमयूखे पूर्वरात्रेव्यतीतेतुसंगच्छेऽतिमंदिरमिति पैठीनसिरपि
संवृत्तेदेशेमैथुनायाद्रियीतेति संवृत्तेपरिश्रिये देशविशेषनिषेधोविष्णुपुराणे देवद्विजगुरूणां
चव्यवायीनाश्रमेभवेत् चैत्यचत्वररसीरेषुनैवचचतुष्पथइति देवद्विजगुरूणामाश्रमेव्यवायीनभ

कंकिंचित्संनिहितभर्तृकायाः पृथक्शयनस्यदंडरूपत्वात् वर्ज्यकालेमैथुनेप्रायश्चित्तं मयूखे अ
ष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनं कृत्वासचैलंस्नात्वातुवारुणीभिश्चमार्जयेत् गृह्यकारि
कायां गत्वारजस्वलांभार्यांनिषिद्धदिवसेथवा अयाज्यंयाजयित्वातुविषादिप्रतिगृह्यच अप्र
तिग्राह्यपुरुषद्रव्यंवाप्रतिग्राह्यच स्पृष्ट्वाग्निचयनस्तंभंचयूपंवाभोज्यभोजने सप्तस्वेषुनिमित्तेषु
भवेदन्यतमंयदि पर्युक्ष्याग्निंपरिस्तीर्यपर्युक्ष्यचततःपरं पुनर्मामेतिमंत्राभ्यांजुहुयात्संस्कृतंघृ
तं एताभ्यामेवमंत्राभ्यांसमिधावादधात्यथ पर्यूहनोक्षणेस्यातांअन्यतंत्रंतुनेष्यते स्वाहाकारवि
निर्मुक्तौयद्वामंत्रौजपेदिहेति अत्राभोज्यपदेनलशुनादिगणिकान्नादिचेतिवृत्तिः वर्ज्यतिथिषुमै
थुनेउपवासइतिप्रायश्चित्तमजर्यां उपवासाशक्तोएकविप्रभोजनं उपवासासमर्थश्चेदेकंविप्रंतु
भोजयेदितिवचनात् मैथुनोत्तरंशौचकरणात्पूर्वंऋतुकालमैथुनेस्नानात्पूर्वंचमूत्रोत्सर्गेपुरीषोत्स
र्गेवात्रिरात्रमुपवासइतितत्रैव अथशयनविधिप्रयोगः वेदाभ्यासादिनारात्रिप्रथमयाममतिवा

स्य पादप्रक्षालनाचमनादिनाशुचिर्भूत्वाशुचिदेशेशय्यांप्रकल्प्यांतत्रगत्वापत्न्यासहतांबूलादिसे
वनंकृत्वाउपानहौवर्णवंदंडंचशय्यासमीपेनिधायजलपूर्णकुंभंशिरोदेशेस्थाप्यसुत्रामाणंपृथिवीमि
तिमंत्रेणशय्यामधिष्ठायरात्रीव्यस्व्यदायनीतिषडृचंसूक्तंजप्त्वाआगस्तयेनमः माधवायनमः मु
चुकुंदायनमः महामुनयेकपिलाय० आस्तिकायमुनये० इतिसुखशायिनोदेवान्स्मृत्वादृष्टदेवांश्च
नत्वाप्राक्शिरादक्षिणाननोदक्षिणाशिराःप्रागाननोवास्वपेत्ततःसार्धयामानंतरंमध्यरात्र्यनंतरं
वोत्थायपर्वादिनिषिद्धातिरिक्तेकालेरतिमंदिरंगत्वाचंदनपुष्पादिभिःस्वशरीरमलंकृत्यसुगंधानुले
पनपुष्पाद्यलंकृत्यतयापत्न्यासहतांबूलसेवनंकृत्वापत्न्यासहशय्यामारुह्यऋतुकालेयथास्थितो
पवीतःअनृतोनिवीतंपृष्ठतःकृत्वातर्जन्यांरोप्यंचैनिष्काश्यतिशिखांचविमुच्यवाग्यतोन्मथगृ
हंस्पृष्ट्वाविष्णुर्योनिमितिसूक्तंजप्त्वाईश्वरंस्मृत्वासत्कृत्वात्यस्त्रियमतिरीक्षन्तुत्थायनिवीतिंचे

यज्ञोपवीती भूत्वा शिखां बध्वा निष्काशितं गोप्यं पुनस्तर्जन्यां धृत्वा अशिरस्कं स्नानं विधाय आचमन प्राणाया
२६८ मो कृत्वा विष्णुं संस्मरेत् ऋतुव्यतिरिक्ते काले गमने तु पाद प्रक्षालनां गप्रोक्षणे एव न स्नानं लेप प्रक्षाल
लनमुभयत्रापि मूत्रवत् ततः पृथक् शयनो भवतः अप्रबोधकालात् भार्यायास्तु ऋतौ अनृतौ
वा अशुचिता नैवास्ति इत्याचारेंदो शयन विधि प्रयोगः अथ प्रसंगात् स्त्रीसंभोग मंतरा रेतः स्कं
दने प्रायश्चित्तानि तत्र स्वप्ने रेतो विसर्गे काश्यप आह सूर्यस्य निर्गमस्कारं स्वप्ने सिक्त्वा गृहीचरेत्
वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणं ब्रह्मचारिणं प्रति मनुराह स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः
शुक्रमकामतः स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् भयादौ प्रजापतिराह भये
रोगे तथा स्वप्ने सिक्त्वा शुक्रमकामतः आदित्यमर्चयित्वा तु पुनर्मामित्यृचं जपेत् काम
तस्त्वाह पराशरः गृहस्थः कामतः कुर्याद्रेतसः स्खलनं भुवि सहस्रं तु जपेद्देव्याः प्राणाया २६८
मैः सह त्रिभिः अकामकृते याज्ञवल्क्य आह यन्मेद्य रेत इत्याभ्यां स्कन्नं रेतो भिमंत्रयेत्

मज्जनंकुर्यादितिवृहद्वशिष्ठोक्तेः इदंस्नानमुत्तरकर्मांगं नतुस्त्रीसंगेनकिंचिदशायत्वंजन्यतेतेन

नप्रातरेवस्नानमित्याचारादर्शः अन्नतोतुधर्मसूत्रे लेपान्प्रक्षाल्यपादौचाचम्यप्रोक्षणमंगानामि

ति स्त्रीणांतुनस्नानपादप्रक्षालनंतासामशुचित्वाभावात् तथाचवृद्धशातातपः उभावप्यशुची

स्यातांदंपतीशयनंगतौ शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान् ततःपृथक्शयनोभवतः

तदुक्तंविष्णुना निद्रासमयवेलायांतांबूलंवदनात्यजेत् पर्यंकात्प्रमदांभालात्पुंड्रंपुष्पाणिम

स्तकात् प्रज्ञांहरतितांबूलंप्रमदाबलहारिणी सर्पाद्भयंतुपुष्पेभ्यआयुर्हरतिपुंड्रकः बोधायनेपि याव

त्सन्निपातंचसहशय्याततोनानेति सन्निपातःसंयोगः नानापृथक् ननुपृथक्शय्याचनारीणामशु

त्वविधिमुच्यतेइतिवचनस्यकागतिरितिचेत् अत्रपृथक्शय्याशब्देनोपगमनाभावउपलक्ष्यते

यथा प्रभूतदोषेयदिदृश्यतेतत्पुष्पंतदाशांतिककर्मकार्यं विवर्जयेदेवततदेकशय्यांयावद्रजोद

र्शनमुत्तमेन्हि आचारसारेतुमैथुनानंतरंसहशय्यानिषेधात् तदभावेएकशय्यायामपिनबाधकं

 जातमपवर्गफलमदं नास्तिक्यादथवालस्यात्ब्राह्मणोमकरोतियः सयातिनरकान्
घोरान् काकयोनौतुजायते नान्योपिमुक्तयेपंथा मुक्त्वाश्रमविधिंस्वकं तस्मात्क
र्माणिकुर्वीततुष्टयेपरमेष्टिने स्मृत्यर्थसारे नास्तिक्यात्कर्महानौतु मासेनप
तितः स्मृतः द्वादशाब्दव्रतेनैव तथाशुद्धिस्तनान्यथा तंन्निरीक्ष्यार्कमीक्षेतस्प
र्शे[illegible]स्नायात्सचेलकं तेनसंभाषणंहास्यंकुर्वन्नह्वेनतत्समः तदन्नभुक्तौसद्य
स्तु सहशय्यासनेषुच गोभिलः योविप्रः कृतनित्यस्तुससर्वान्कृतवान्मखान्
सस्नातः सर्वतीर्थेषु तप्तंतेनाखिलंतपः आन्हिकचंद्रिकायां अनेनविधिनाकृस्तु
नैत्यकंकुरुतेद्विजः विप्रः संध्याहोमादिकंचरन् सर्वपापैप्रमुच्येतजीवेच्चशरदांश 

तं सर्वकर्मस्वयुग्योसौभवतीत्याह शौनकः आश्वलायनः अनेनविधिनायस्तु
नैत्यकंकुरुतेद्विजः सयातिपरमंस्थानंपुनरावृत्तिदुर्लभं एवमावश्यककर्तव्ये
बहुविधविधिनिषेधाकुले आन्हिककर्मणिन्यूनाधिकदोषविधिनिषेधातिक्रमदो
षपरिहारार्थंप्रायश्चित्ताज्ञानेनतत्सांगतार्थंप्रायश्चित्तसांगतार्थंचश्रीविष्णुना
मोच्चारणादिकंकार्यंतथास्मर्यते प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै
यानितेषामशेषाणांकृष्णानुस्मरणंपरं यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रि
यादिषु न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं श्रीमद्भागवते नाम्नोस्तियाव
तीशक्तिःपापनिर्दहनेहरेः तावत्कर्तुंनशक्नोतिपातकंपातकीजनः प्रभासखंं

डे श्रीमद्भगवद्वाक्यं नांम्नां मुख्यतमं नाम कृष्णाख्यं यत्परंतप प्रायश्चित्तमशेषाणां पापा
नां मोचकं परं लौकिकं वैदिकंच सर्वं कर्मेश्वरे समर्पणीयं तदुक्तं भगवतार्जुनं प्रतिगीता
यां यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यति कौंतेय तत्कुरुष्व मदर्प
णमिति अत्र कुरुष्वेत्यात्मनेपदेन परमेश्वरार्पित कर्मफलस्य कर्तृगामित्वोक्त्यार्पयि
तुरर्पणजन्य फलाधिगमो ऽस्त्येवेति सूचितं तत्र युगपत्सर्वकर्मार्पणे मंत्रः कामतोका
मतो वापि यत्करोमि शुभाशुभं तत्सर्वं त्वयि सन्यस्तं त्वत्प्रयुक्तः करोम्यहमिति इतिमा
टे इत्युपनामक नारायणात्मज त्र्यंबकविरचिते आचारेंदौ सायमोपासनादिशयनांतरा
त्रिकृत्यं समाप्तं चित्तपावनकुलेतिनिर्मले शांडिल्ये हरिरभूद्द्विजवर्यः माटकाख्यउपाधि

स्नानांतरंभ्रुवोर्मध्यंतेनानामिकयास्पृशेत् यन्मेद्यरेतःपृथिवीपुनर्मामैंद्रियमित्युपनिषन्मंत्राभ्यामि
तिमाधवः कामतःसुरूपस्त्रीदर्शनस्पर्शनसंभाषणादिनारेतःस्कंदने स्नात्वार्कंसंपूज्यत्रिवारंनमस्कृ
त्यपुनर्मामैत्विंद्रियमितिजपित्वाष्टोत्तरसहस्रंगायत्रींजपेत् अकामतस्त्वष्टोत्तरशतंजपइति
प्रायश्चित्तमंजर्यां अथप्रयोगः स्वप्नादिनिमित्तकरेतोविसर्गोत्तरं स्नात्वाचम्यदेशकालौस्मृत्वा
ममस्वप्नावस्थायांजातरेतोविसर्गदोषपरिहारार्थंसूर्यार्चनपुनर्मामित्यृक्जपरूपप्रायश्चित्तंकरि
ष्येसूर्यंगंधादिनासंपूज्यत्रिवारनमस्कृत्य ॐ पुनर्मामैत्विंद्रियं पुनरायुःपुनर्भगःपुनर्ब्राह्मण
मैतुमा इतिमंत्रजपेत् अनेनस्वप्नावस्थजातरेतोविसर्गदोषप्रायश्चित्ताख्येनकर्मणापरमेश्व
रःप्रीयतामिति एवमेवभयरोगादिनिमित्तेप्रयोगऊह्यः तदेतदुक्तमान्हिकंएतस्यकरणे
श्रेयोकरणेप्रत्यवायश्च तदुक्तंकौर्मे इत्येतदखिलंप्रोक्तमहन्यहनिवैद्विजाः ब्राह्मणानांकृत्य

संख्यासप्तसाहस्री ७००० श्रीकृष्णार्पणमस्तु ॥ ७ ॥ ७ ॥

क्षितलोको रामपादकृतसर्वनिर्वहः १ तद्भानानारायणजनुराचारेंदुनामकंतनोत्
राजन्वतिशाङ्कपुरेत्र्यंबकशर्मामुदेरमेशस्य २ शकेषस्थल्यष्टौतिथिमितदिने का
र्तिकसितेक्रमपूर्णोयंचेंदुर्बुधजनमनःकंजविसकः कलंकांकोपीष्टांरसिकमुदमाधा
तुमसकृच्चकोरस्ताञ्चधे शोष्टशिवधृतपूर्णेंदुरिवयः ३ इमंग्रंथंभूयोबुधजनव
राःपश्यतसदामदीयादोषान्वैचिनुतदययैकाग्रमनसः यतोयूयंसर्वोपकृतिधृ
तदेहाः स्थंचततो ममयेविज्ञाप्तिर्भवतुसफलासर्वसुखदा ४ अनेनग्रंथनेनैव
श्रीमान्रघुपतिःस्वयं प्रीणातुजानकीशानः कर्मपूर्तिविधायकः ५ इति
माटेइत्युपनामकनारायणात्मजत्र्यंबकविरचितओचारेंदुःसमाप्तः ग्रंथ

इति ग्रन्थ रेंदुः समाप्तः

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 23971
Date 22.3.68